श्रेष्ठि देवचन्द्र लालभाई–जैनपुस्तकोद्धारे–ग्रन्थाङ्कः ३५.

श्रीमद्रुद्रपल्लीयसङ्घतिलकाचार्यविरचितवृत्तियुता श्रीमद्धरिभद्रसूरिप्रणीता

# श्रीसम्यक्त्वसप्ततिः ।

संशोधकः—श्रीमद्वल्लभविजयमुनीशशिष्य–मुनिश्रीललितविजयः ।

प्रसिद्धिकारकः—शाह–नगीनभाई घेलाभाई जव्हेरी, अस्यैकः कार्यवाहकः ।

इदं पुस्तकं मुम्बय्यां शाह नगीनभाई घेलाभाई जव्हेरी इत्यनेन, 'निर्णयसागर' मुद्रणास्पदे कोलभाटवीथ्यां २३ तमे आलये रामचन्द्र येसु शेडगेद्वारा मुद्रापितं, ४२६ जव्हेरी बाजार इत्यत्र प्रकाशितं च ।

वीरसंवत् २४४२. विक्रम संवत् १९७२. क्राइस्त सन १९१६.

प्रथम संस्कारे प्रतयः ५०० । ] पण्यम् रूप्यक एकः । [ मोहमयीपत्तने ।

॥ ओम् ॥

श्रीमद्विजयानन्दसूरिपादपद्मेभ्योः नमः ।

# श्रीसम्यक्त्वसप्ततिटीकोपोद्घातः ।

सुविदितमेवामलमेधाधरीकृतवाचस्पतिमतीनां, यदुत, धर्मोपदेशसंतारितजनसमाजेन, मुनिमहाराजाधिराजेन, शुचिरुचिमहामणिप्रभापाविन्यभूचारुविशालसालत्रयमध्यस्थकलकलधौतसिंहासनासीनेन प्रचलदमलकुण्डलमण्डितगण्डस्थलप्रह्वसाखंडलसुरमण्डलीसेव्योल्लसत्तारभामंडलज्योतिरुद्योतिताखंडदिग्मंडलेन, भगवता त्रैलोक्यनाथेन, सम्यगेतत् प्रोक्तं, यत् खलु—नारकतिर्यग्मनुजदेवगतिरूपेऽस्मिन् संसारे विज्ञातभवस्वरूपसंजातनिर्वेदानां भव्यात्मनामखिलकुशलाऽनुबंधी धर्म एव सारः, स च विशिष्टतरप्रशस्यप्रयत्नसाध्यः । तत्प्रयत्नश्च नातिरिच्यते कृत्याकृत्यगम्यागम्यहेयोपादेयादियाथातथ्यवस्तुस्वरूपदर्शनच्छेकात् सद्विवेकादिति । विवेकोऽपि च विज्ञानसंतानविज्ञाताखिलभूतभविष्यद्भाविपदार्थसार्थसंतानानां विलसदमलनिशातात्मशक्तिसमुच्छिन्नाभिष्वंगवल्लिवितानानां संसारसागरांतःपातिप्राणिप्राणत्राणैकध्यानानां, विहिताऽतुलतपः प्रयासकृतान्त-

ररिपुप्रमाथानां श्रीमत्तीर्थनाथानां [illegible] एव । तद् [illegible]प्रतीतस्फीतमहिमापि, सरससुकोमलसुशीतलताघनगुणग्रामरामणीयकधामापि, त्रैविष्टपान्तःस्थनिखिलहृद्यविधजनाप्यायकमपि नाऽनुयोगमन्तरेण हितायोपतिष्ठते

यदूचिरे स्वकलाकौशलमलफलभरतर्पिताशेषभूपालेन स्ववचनरचनाप्रचुरच्छायाप्रीणिताऽप्रमाणप्रामाणिकपथिकमालेन, निःशेषभारतवर्षविख्यातविमलगुणसंपदायत्तीकृताखिलभूभृन्मण्डलपालेनामानदानतृप्तासचारणपरम्पराप्रवृत्तातुलकीर्तिकौमुदीधवलीकृतसकलदिक्चक्रवालेन गौर्जरपति श्री "सिद्धराजजयसिंह" देवेन भक्तिभरकृतनतयो यतिपतयः

श्रीहर्षपुरीयगच्छालङ्करणाः शासनाऽऽभरणाः श्रीमन्मलधारि हेमसूरिपादाः श्रीअनुयोगद्वारसूत्रटीकायां

" इहातिगंभीरनीरमहानीरधिमध्यनिपतितानर्घ्यरत्नमिवातिदुर्लभं प्राप्य मानुष्यं जन्म, ततोऽपि लब्ध्वा त्रिभुवनैक-
" हितश्रीमज्जिनप्रणीतबोधिलाभं, समासाद्य विरत्यनुगुणपरिणामं, प्रतिपद्य चरणधर्म्मं, अधीत्य विधिवत्सूत्रम्,
" समधिगम्य तत्परमार्थं, विज्ञाय स्वपरसमयरहस्यम्, तथाविधकर्मक्षयोपशमसंभाविनीं चाऽवाप्य विशदप्रज्ञां,
" जिनवचनाऽनुयोगकरणे यतितव्यम्, तस्यैवसकलमनोभिलषितार्थसार्थसंसाधकत्वेन यथोक्तसम्यक्सामग्रीफलत्वात्."

इह क्रोधादिकलुषकषायकरालपातालभीषणे जन्मजरामरणनीरपूरपूरिते महामोहावर्त्तगर्तपतितानंन्तजन्तुसंतानसङ्कटे नानाविधाधिव्याधिव्याबाधासहस्रक्रूरजलचराकुलेऽनर्वाक्परपारसंसारपारावारे प्रचुरतरमिथ्यात्वप्रकारमकरनिकरावलुप्यमानमवलोक्य सकलजीवलोकमनन्यशरणम्, परमकारुणिकः श्रीमन्महावीरवर्द्धमानस्वामिसिद्धसांयात्रिको विहिततदुत्तारणाभिलाषोऽनन्तसुखसन्दोहमहानन्दनगरनिनीषया अनेकविधविशुद्धजीवपरिणामफलकाबद्धं प्रशमादिलिङ्गसितपटोपलक्ष्यमाणं सम्यक्त्वयानमात्रमुपादर्शयत् । (नवतत्त्व भा० वृ)

सचानुयोगो द्रव्यगणितांगादिविकल्पैर्विविच्यमानश्चतुर्धाभवति । तं चतुर्विधमप्यनुयोगं स्वप्रज्ञाविस्मायितसुरसूरयः प्राक्तनाः सूरयः प्रतिशास्त्रं प्रत्यालापकं प्रत्युद्देशकं प्रतिवाक्यं चालयंतिस्म, अयं च मार्गः श्रीमदार्यरक्षितसूरियावद्वहमानोऽभूत्, तैरेव गुणभूरिभिः सूरिभिः विन्ध्यनामानं स्वविनेयमनुकम्पमानैरनुयोगाः पृथक्कृताः *

* " तत्रगच्छेच्चत्वारः, प्राज्ञा मुनिमतल्लिकाः " दुर्बलः पुष्पमित्रोऽथ विन्ध्याख्यः फल्गुरक्षितः ॥
" गोष्ठामहिलनामाच्च, जितौशनसचेतनः; " तेषां विन्ध्योऽथ मेधावी, गुरून्विज्ञपयत्स्वयं ॥
" महत्यामनुयोगस्य, मंडल्यां पाठघोषतः; " स्खलति श्रुतपाठो मे, पृथग् मे कथ्यतां ततः ॥ त्रि॰ चि॰
" सूरिराह स्वयमहं, व्याख्यास्यामि भवतः पुरः; " व्याख्यानमंडलीं तु भंगयामि महतीं कथम् ? ॥
" तस्मात्ते वाचनाचार्यो, दुर्बलः पुष्पमित्रकः; " महामतिरुपाध्यायोऽधीष्व शीघ्रं तदन्ततः ॥
" एवं कृते दिनैः कैश्चिदसविन्ध्योऽध्यापको गुरून्; " कृताञ्जलिरथोऽवादीत्, प्रभो शृणुत मद्वचः ॥
" अहं वाचनया व्यग्रः, स्वाधीतं विस्मरामि यत्; " गुणने भंगपातेन, तत् खिन्नः किंकरोम्यहं ! ॥
" यदा स्वकगृहे प्रैषि, पूज्यैर्गुणनकारणात्, " तदकृतात् स्खलितं किंचित्, तदाधीतं पुरापि यत् ॥
" अद्यतः परमेतस्य, वाचना दापयिष्यथ, " ततो मे नवमं पूर्वं, विस्मरिष्यत्यसंशयं ॥
" श्रुत्वेत्यचिंतयत् सूरिरीदृग्मेधानिधिर्यदि; " विस्मरत्यागमं तर्हि, कोऽन्यस्तं धारयिष्यति ? ॥
" ततश्चतुर्विधः कार्योऽनुयोगोऽतः परं मया । " ततोऽङ्गोपाङ्गमूलाख्यग्रंथच्छेदकृतागमः ॥
" अयं चरणकरणाऽनुयोगः परिकीर्तितः " उत्तराध्ययनाद्यस्तु, सम्यग्धर्मकथापरः ॥
" सूर्यप्रज्ञप्तिमुख्यस्तु, गणितस्य निगद्यते; " द्रव्यस्य दृष्टिवादोऽनुयोगाश्चत्वार ईदृशः ॥
विन्ध्यार्थमिति सूत्रस्य, व्यवस्था सूरिभिः कृता; " पुरा चैकत्र सूत्रेऽभूदनुयोगचतुष्टयम् ॥ ( वर्धमानसूरिः )

तदनु स्वल्पेतरे सूरिवराः संख्यातिगान् भिन्नभिन्नाननुयोगपोषकान् ग्रंथान् विनिर्माय भूपीठमुपचक्रुः । तदुपकृतिसुरशाखिशाखाभवभव्यामलफलमिदं सकलसूरिपुंगवविद्वन्मौलिमंडनश्रीमत्संघतिलकसूरिकृतोऽयं धर्मकथानुयोगरूपसम्यक्त्वदार्ढ्यायप्रस्तुतो ग्रंथः ॥

तैरुदाराशयैरनुयोगचतुष्टयं पृथक्कृत्य यद्यपि सुगमीकृतः सिद्धान्तस्य दुर्गमः पन्थास्तथापि तमपि हृदयस्थलाङ्कुरितगुरुसमाराधना एव धीधना अधिगतसारासाराः सुतरां समवगाढुं पारयन्ति नेतरे । न खलु गुरुजनादनधिगतस्वकर्ममर्मा साहसरसिकः कोऽपि दुरधिगमापारपारावारात् दुस्तरादपारात् क्षेमेकमपि लब्धुं प्रगल्भते किन्तु तत्स्थाने कर्करमेव । इत्येतद् ग्रन्थकारैरपि विशदीकृतं शिक्षारूपेण ग्रन्थसमाप्तौ । तद् यथा—

"इय भाविऊण तत्तं गुरुआणाराहणे कुणह जत्तं । जेण सिवसुक्खबीयं दंसणसुद्धिं धुवं लहह ॥" इति ।

अत्र केचन शुष्काध्यात्मवादिन स्वात्मानमेव सम्यक्त्वभाजनं मन्यमानाः पण्डितंमन्याः प्रलपन्ति—

सम्यक्त्वशुद्धयैव कार्यं सिध्यति किं क्रियया ? यतः—

"दंसण भट्ठो इत्यादि

इति स्वकीयकल्पनास्थिरीकरणे प्रमाणमुद्घोष्य पुनः प्रजल्पन्ति भरतनरेश्वरेण का नाम क्रिया साधिता ? आख्यायते हि स चक्रवर्ती आरीसाभवनेऽवाप केवलज्ञानम् । अथ च किं नाम तपस्तप्तं श्रेणिकमहाराजेन ? तेन हि आगामिन्यां जिनचतुर्विंशतौ प्रथमीभवितुं समुपार्जितानि महिमोर्जितानि कर्माणीति चेच्छ्रूयतां तावत् समाधीयतेऽयं विषयः—

चारित्रं हि द्विधा । द्रव्यचारित्रं भावचारित्रं चेति । यत्र पूर्वोपार्जितचारित्रमोहनीयबलेन यद्यपि द्रव्यतश्चारित्रं नोपलभ्यते तथापि तत्र चारित्रविषये प्रचुररुचिप्रकर्षदर्शनाद् भावचारित्रं लभ्यत एव, भावचारित्राभावेन दर्शनशुद्धेरनुपलम्भात् ।

शुष्काध्यात्मवादिभिश्चेत् स्वकीय आत्मा भावचारित्रपात्रं मन्यते तर्हि मन्यतां नाम । स्वयमात्मानमीश्वरं मन्यमाना न तथा लोकैः श्रद्धीयन्ते । आत्मपरिणतिर्भावचारित्राधिवासिता चेत्संभाव्यते तत् । परमिदमत्रावधेयं यदुत त एवागमसंमता भावचारित्राधिकारिणो ये खलु शक्यमनुष्ठानं सादरमाचरेयुरशक्यानुष्ठानाय चान्तरात्मना महात्मन आश्रित्य तदाश्रितां पद्धतिमनुसर्तुं सम्यक्तया प्रयतेरन् । एतस्मिन्हि नियमे विचार्यमाणे न ते भावचारित्राधिकारिणः संभाव्येरन् तन्मतेन हि असाध्यमानमेव तत्त्वज्ञानं स्वयं सिध्येत् । नहि दुह्यमानो ऽप्यनड्वान् कथमपि पयः सूते । एतेन खलु दोग्धैव मूढः प्रतीयते ।

यत्खलु दृष्टान्तितो भरतचक्रवर्ती क्रियानुष्ठानविषये, तदप्यसंगतम् । यद्यपि तस्मिञ्जन्मनि न साधितं समधिकं तेन क्रियानुष्ठानं तथापि जन्मान्तरीयतपःप्रकर्षसद्भावेन केवलज्ञानस्य सुसाधता तस्य केन निवार्येत ? अपि च देवपूजा गुरुसेवाऽऽत्मनिन्दासंघभक्त्यादिकस्तदीयो गुणगणो नाद्यापि विस्मरणसरणिमारोहति बुद्धिमताम् । न च वाच्यं नासीत्तस्य तथाभूतमुत्कृष्टं तप इति, तस्य हि प्राक्तनजन्मतपःप्रकर्षसद्भावेन तज्जन्मनि केवलज्ञानप्राप्तौ तथाविधोत्कृष्टतपसोऽनावश्यकत्वादिति । यत् किल तेन चतुर्दशलक्षपर्वाणि यावत् तादृशं गहनं तपस्तप्तं, पञ्चशत्य अनगाराणां वैयावृत्त्यं च साधितं तत्खलु कथं नाम विस्मर्तुं शक्येत ?

अन्यच्चात्र विषयेयः श्रेणिकोऽपि निदर्श्यते तैस्तदपि मन्दम् । तस्यहि भवान्तरीयनिकाचितनिदानस्य विद्यमानत्वेन व्रतस्याशक्यत्वात् कर्तुं । पण्डितंमन्यानां दृष्टिर्महत्तमे श्रीमहावीरस्वामिनि कथं न रमते येन सार्द्धद्वादशवर्षपर्यन्तं विषमं तपश्चरितम् , यत् तदपेक्षयाऽतिलघी

श्रेणिकनरेश्वर एव पतितेति न विद्मः किमेतच्चेष्टितं तेषाम् । एकोऽप्यागमानां पन्थाः सद्भिः सरलत्वेन दृश्यमानोऽपि कुटिलदृष्टिभिः कौटिल्येनैव प्रतीयते । कस्य [illegible] दोषः ।

अयमत्र निष्कर्षः । सत्तत्त्वरत्नपूर्णानां शास्त्रनिधीनां कुञ्चिकाः गुरुवरकरतलगता एव ज्ञेयाः । न चान्तरा ताः कोऽपि लब्धुं प्रभवति तत्त्वरत्नानि तेभ्य इति गुरव आराधनीया एव यतः

विडंब्यमानं रागादि तस्करैर्दुःखपीडितम् । भवैश्वर्यपरिभ्रष्टं स्वकुटुंबवियोजितम् ॥
लोकभीतं भवग्रामे वीक्ष्य भिक्षाचरोपमम् । तन्मात्रेणैव संतुष्टं कर्म्मोन्मादेन विह्वलम् ॥
सद्धर्मगुरुरेवात्र जायते करुणापरः । अमुष्माद्दुःखसंतानात्कथमेष वियोक्ष्यते ? ॥

ततो जिनमहावैद्योपदेशादवधारयति सद्धर्मगुरुस्तत्रोपायं । ततो धूर्त्ततस्करेष्विव सुप्तेषुरागादिषुक्षयोपशममुपगतेषु प्रज्वालयति जीवस्वकीयशिवमंदिरे सज्ज्ञानप्रदीपम् । पाययति सम्यग्दर्शनामलजलम् । समर्पयति चारित्रवज्रदण्डम् । ततोऽयं जीवलोकसज्ज्ञानप्रदीपोद्योतितस्वरूपः शिवमंदिरे महाप्रभावः सम्यगदर्शनसलिलपाननष्टकर्म्मोन्मादो गृहीतचारित्रदंडभासुरो गुरुवचनेनैव निर्दलयति सस्पर्धमाहूय महामोहादिधूर्त्ततस्करगणम् ।

तंच निर्दलयतोऽस्यजीवलोकस्य विशालीभवति कुशलाशयः क्षीयंते प्राचीनकर्म्माणि, न बध्यंते नूतनानि, विलीयते दुश्चरितानुबन्धः समुल्लसति जीववीर्य्यं । निर्म्मलीभवत्यात्मा, परिणमति गाढमप्रमादो, निवर्त्तन्ते मिथ्याविकल्पाः, स्थिरीभवतिसमाधिरत्नम्, प्रहीयते भवसंतानः, ततः प्रविघटयत्येष जीवलोकश्चित्तापवरकावरणकपाटम् । ततः प्रादुर्भवति स्वाभाविकगुणकुटुंबकम् , विस्फुरंति ऋद्धि-

विशेषः, विलोकयतितानेष जीवलोको विमलसंवेदनालोकेन, ततः संजायते निरभिष्वंगानंदसंदोहः, समुत्पद्यते बहुदोषभवग्रामजिहासा' उपशाम्यति विषयमृगतृष्णिका, रूक्ष्यीभवत्यन्तर्ग्रामी, विचटन्ति सूक्ष्मकर्मपरमाणवः, व्यावर्त्ततेऽचिंता, संतिष्ठते विशुद्धंध्यानम्, दृढीभवति योगरत्नम्, जायते महासामायिकम्, प्रवर्त्ततेऽपूर्वकरणम्,

विजृम्भते क्षपकश्रेणिः, निहन्यते कर्म्मजालशक्तिः विवर्त्तते शुक्लध्यानानलः प्रकटीभवतियोगमाहात्म्यम्, विमुच्यते सर्वथा घातिकर्म्मपाशेभ्यः क्षेत्रज्ञः, स्थाप्यते परमयोगे, देदीप्यते विमलकेवलालोकेन कुरुते जगदनुग्रहम् विधत्ते च केवलिसमुद्घातम्, समानयति कर्म्मशेषं, संपादयति योगनिरोधम्, समारोहति शैलेश्यवस्थां, रुंधयति [illegible], विमुञ्चति सर्वथा देहपंजरम्।

ततो विहायभवग्राममेषजीवलोकः सततानंदो निराबाधो गत्वा तत्र शिवालयाभिधाने महामठे सारगुरुरिव सभावकुटुंबकः सकलकालम् तिष्ठतीति ॥

सुगृहीतनामधेयानां एतद्ग्रंथप्रासादसूत्रधाराणां महात्मनां को वंशः ? क्व वा वृद्धिंगताः ? कुत्रविहितोऽमलसकलकलापरिचयः ? कथमनुभूताबालवयोऽनुरूपा यथेष्टविलासाः ? कस्मिन् देशे सन्निवेशे वैषामायुष्मतामासीद्वासः। किंनामा स ग्रामः यः स्वीकृतः स्वनिवासतयैभिरिति जिज्ञासायां प्राप्य प्रमाणाभावात् किमपि वक्तुं न शक्यते केवलं कौटिकगणे वज्रशाखायां रुद्रपल्लीयगच्छगगनालंकारभूतानां श्रीमद्गुणशेखरसूरीणां चरणकमलेषु गृहीतदीक्षाअधीतद्विविधशिक्षाक्रमेणाधीतशास्त्रसारा पीतसुगतकणभुग्गौतमकपिलार्हन्मतरहस्यसारानिर्जितमदमारा विहितामलधर्म्मप्रचारा सूरिवरा बभूवुः । इत्येतावन्मात्रमेव प्रस्तुतग्रंथान्ते विन्यस्तप्रशस्तेः प्रश्नोत्तरमालावृत्तिप्रशस्तेश्चोपलभ्यते तथाहि—

श्रीवर्धमानजिनशासनमेरुभूषा—भूते सुधर्मगणनायकभद्रशाले। श्रीकोटिकाख्यगणकल्पतरौ सुवज्र–शाखेऽत्र गुच्छइव राजति चंद्रगच्छः।
तस्मिन्महोज्ज्वलफलोपमिति दधानः, श्रीवर्धमान इतिसूरिवरो बभूव। यस्याग्रतः समगणोद्रुणोरुगेंद्रः, सूरीन्द्रमंत्रविविधोपनिषत्प्रकारान्॥
ततोऽस्तदोषो नियतं विवस्वान्, जिनेश्वरः सूरिवरः समासीत्। नोचेत् कथं श्रीधनपालचित्तात् महातमस्तोममपाकरोद्राक्॥
तस्माद्बभूवाऽभयदेवसूरिः, यःस्तंभने पार्श्वजिनेंद्रमूर्त्तिः। प्रकाश्यशश्याश्वनवांगवृत्तीः, कृत्वा कृतार्थं स्वजनुस्ततान॥
तदनु जिनवल्लभाख्यः प्रख्यातः समयकनककषपट्टः। यत्प्रतिबोधनपटहोऽधुनापि दंध्वन्यते जगति।
ततोऽजायत सद्विद्यः सूरिश्रीजिनशेखरः। यद्यशो हसितो नौज्झत् कैलासं शशिशेखरः॥
ततः प्रवादिव्रजपद्मचंद्रः श्रीपद्मचंद्रः समभून्मुनीन्द्रः। यः क्षापयन्नेव तमोविवाद–जगच्चकारास्ततमोविकारं॥
तदनु विजयचंद्रः, सूरिरासीदतंद्रः प्रवरसमयवाणी सृष्टिपीयूषदृष्टा॥
य इह जगति भव्या रामभारामिको वा, वृषकिसलयनाला मालितं व्याततान॥
तस्मादासीदसीमप्रशममुखगुणैरद्वितीयो द्वितीयः षट्तर्कग्रंथवेत्ताऽभयपदपुरतो देवनामो मुनीन्द्रः।
यस्मात् प्रालेयशैलादिवभुवनजनव्रातपावित्र्यहेतु र्जज्ञेगंगाप्रवाहः स्फुरदुरुकमलो रुद्रपल्लीयगच्छः॥
ततो बभूवश्रीदेवभद्रः सूरीन्द्रशेखरः। यत् कराम्भोजसंस्पर्शाज्जज्ञिरे श्रीधरा नराः॥
अभूत्ततः कृतानन्दः प्रभानंदो मुनीश्वरः। यत्र प्रभाप्रभाप्रज्ञा प्रभावाः प्रापुरुन्नतिम्॥
ततः श्रीचंद्रसूरीन्द्रोऽभूत् स्वतोयं धियाऽधिकः। विबुद्ध धिषणो ह्रीणो मीनालयमशिश्रियत्॥

तदनुजो मनुजोत्तमवंदितः, समभवद्विमलेंदुमुनीश्वरः । यदुपदेशगिरः परिपीयकैरमृतपानविधौ न घणायितम् ॥
ततोऽजनि श्रीगुणेशखराख्यः, सूरिः सुशर्म्माभिधपत्तने यः । शृंगारचंद्रक्षितिभृत्सभायां यत्नावलंबैः कुदृशो जिगाय ॥
तत्पट्टाम्बुजराजहंससदृशः सिद्धान्तपारंगतः, श्रीमाचंदति सैष संघतिलकः सूरीश्वरः संप्रति ।
यो वादे विविधान् बुधानतिबुधान् बुद्धिप्रबंधैरलं, जित्वा कीर्त्तिभरैः पिपर्त्ति भुवनं कर्पूरपूरप्रभैः ॥

श्रीवीरशासनमहोदधितः प्रसूतः प्रोद्यत्कलाभिरभितः प्रथितः पृथिव्यां । माद्यन्महःप्रसरनाशिततामसोऽस्ति, श्रीचंद्रगच्छ इति चंद्र इवाद्भुत श्रीः ॥ १ ॥ तत्रासीद्धरणेन्द्रवन्द्यचरणः श्रीवर्द्धमानो गुरुस्तत्पट्टे च जिनेश्वरः सुविहितश्रेणीशिरःशेखरः । तच्छिष्योऽभयदेवसूरिरभवद्‌ङ्गनवाङ्गीमहावृत्तिस्तम्भनपार्श्वनाथजिनराड्मूर्त्तिप्रकाशैककृत् ॥ २ ॥ तत्पट्टपूर्वाचलचूलिकायां, भास्वानिव श्रीजिनवल्लभाख्यः । सच्चक्रसम्बोधनसावधानबुद्धिः प्रसिद्धो गुरुमुख्य आसीत् ॥ ३ ॥ तच्छिष्यो जिनशेखरो गणधरो जज्ञेऽतिविज्ञाग्रणीस्तत्पादाम्बुजराजहंससदृशः श्रीपद्मचन्द्रप्रभुः । तत्पट्टाम्बुधिवर्द्धनः कुवलयप्रोद्यत्प्रबोधैकधीः, श्रीमान् श्रीविजयेन्दुरिन्दुवदमूच्छ्वत्कलालङ्कृतः ॥ ४ ॥ पट्टे तदीयेऽभयदेवसूरिरासीद् द्वितीयोऽपि गुणाद्वितीयः । जातो यतोऽयं जयतीह रुद्रपल्लीयगच्छः सुतरामतुच्छः ॥ ५ ॥ तत्पादाम्भोजभृङ्गोऽजनि जिनसमयाम्भोविपाथोधिजन्मा, सूरीन्द्रो देवभद्रोऽनुपमशमरमारामभेघोपमानः । तस्यान्तेवासिमुख्यः कुमतमतितमश्चण्डमार्त्तण्डकल्पः, कल्पद्रुः कल्पितार्थप्रवितरणविधौ श्रीप्रभानन्दसूरिः ॥ ६ ॥ ज्योतिःस्तोमैरमन्दैः प्रतिहतजगतीवर्त्तितेजस्वितेजःस्फूर्त्ती तत्पट्टपूर्वाचलविमललसन्मौलिमौलीयमानौ । श्रीमान् श्रीचन्द्रसूरिर्विमलशशिगुरुश्चाप्रमेयप्रभावौ, जातौ श्रीराजहंसाविव भविकजनस्वान्तपाथो-

धैकदक्षौ ॥ ७ ॥ आकाश्मीररमणीणचारुधिषणान् वादीन्द्रवृन्दारकान्, वादद्वादविधौ विजित्य जगति प्राप्तप्रतिष्ठोदयाः । सूरीन्द्रा गुणशेखराः समयद्वराः शृङ्गारचन्द्रक्षमाधीशाभ्यर्च्यपदाम्बुजाः समभवंस्तत्पट्टशृङ्गारिणः ॥ ८ ॥ श्रीसत्तिलकाचार्यास्तत्पदाम्भोजरेणवः । सम्यक्त्वसप्ततेर्वृत्तिं, विदधुस्तत्त्वकौमुदीम् ॥ ९ ॥ अस्मच्छिष्यवरस्य सोमतिलकाचार्यानुजस्याधुना, श्रीदेवेन्द्रमुनीश्वरस्य वचसा सम्यक्त्वसप्ततेः । श्रीमद्विक्रमवत्सरे द्विनयनाम्भोधिक्षपाकृत्(१४२२)प्रमे, श्रीसारस्वतपत्तने विरचिता दीपोत्सवे वृत्तिका ॥ १० ॥ सा सोमकलशवाचकवरानुजैरत्र विहितसाहाय्यैः । प्रथमाऽऽदर्शे लिखितोपाध्यायैः श्रीयशःकलशैः ॥ ११ ॥ मेधामान्द्यात्प्रमादाच्च, यदवद्यमिहाजनि । तत्सद्य महाविद्याः, शोधयन्तु विशारदाः ॥ १२ ॥ द्वादशात्मेव सद्वारैर्द्वादशात्मेव बोधकृत् । इयं सम्यक्त्वतत्त्वानां, कौमुदी द्योततां भुवि ॥ १३ ॥ प्रशस्तिश्लोकाः ॥ १४ ॥ प्रत्यक्षरं निरूप्यास्या, ग्रन्थमानं विनिश्चितम् । रुद्राब्धिमुनिसङ्ख्याङ्काः, श्लोकाः सचतुरक्षराः ॥ १ ॥

आसीत्तत्र नवांगचंगविवृतिप्रासादवैज्ञानिकः, सूरींद्रोऽभयदेव इत्यभिधया ख्यातः क्षितौ ख्यातिमान् । तद्गच्छेऽभयदेवसूरिपरोपसास्यपदांबुजे षट्तर्क्याह्यमलेश्वरामृतभुज भृंगीयितं चानिशम् ॥ २ ॥

अस्य संशोधनसाहाय्यं पुस्तकद्वयेन लब्धम् तत्र प्रथमं न्यायाम्भोनिधितपागच्छाचार्यश्रीमद्विजयानन्दसूरि ( श्रीमदात्मारामजी ) पट्टावतंसश्रीमद्विजयकमलसूरिमहाराजानाम् । तच्च नूतनमशुद्धप्रायं चासीत् तथापि महतांऽशेन साहाय्यं प्रादात् । द्वितीयं पुनरस्मज्ज्येष्ठसतीर्थ्यानामाचामाम्लवर्धमानतपःप्रकर्षकर्शितगात्राणां महावैराग्यभाग्यपात्राणां समधिकविराजमानविवेकविनयानां मुनिवरश्रीविवेकविजयानामासीत् । तदपि नवीनं परमस्मत्परमगुरुकरकमलशोधितमिति शुद्धतरमासीत् । अस्य संशोधने जैनागमप्रवीणानां मुनिवर ( पंन्यास ) श्रीमदानंदसागरमहाशयानां साहाय्यमवाप्तवमिति, तेषां कृतज्ञतामावहन्नतीव धन्यवादान् वितरामि एवं यथामतिशोधिते-

परिष्कृतेऽप्यत्र निबंधे दृष्टिदोषादक्षरयोजकदोषाद्वाया काचनाशुद्धिः कृताजातावा स्यात्तां संशोधयंतु करुणावरुणालया विमलाशया विचक्षणाइति प्रार्थयतेविनीतो मुनिललितविजयः

## शस्यप्रशस्तिका

एषा विश्वोपकारैकपरायणन्यायाम्भोनिधितपगच्छाचार्य श्रीमद्विजयानन्दसूरि ( श्रीआत्मारामजी ) प्रशिष्यनिश्रे-
कल्लामभूतमुनिवर्यश्रीमद्वल्लभविजयमहाराजचरणाब्जचञ्चरीकशिष्यमुनि **ललितविजयेन** विरचिता ।

**श्रीमद्विजयकमलसूरीश्वरराज्येप्रवर्त्तमाने ।**

**जामनगरे**

वीरसं० २४४२ विक्रमाब्द १९७२ आत्मसं० २१ आषाढ शुक्ल दशम्यां

# ग्रन्थानुक्रान्तिर्विषयश्च

अस्मिन् ग्रंथे द्वादश वक्तव्यताद्वाराणि श्रद्धानचतुष्टयम् । लिङ्गत्रिकम् । विनयदशकम् । शुद्धित्रिकम् । दूषणपञ्चकम् । अष्टौ प्रभावकाः । पञ्च भूषणानि । लक्षणपञ्चकम् । षट् यतनाः । षडागाराः । भावनाषट्कम् । षडेव च स्थानानि ।

ग्रंथानुक्रान्तिश्चेत्थं


पृष्ठांक

## ( प्रथमोऽधिकारः )

१ मंगलादिचतुष्टयनिरूपणम्

सम्यक्त्वं कीदृग्गुणे जीवे संभवतीति नि० .... .... ४

सम्यक्त्वशुद्धिविषये आरामनंदनकथा .... .... १९

सम्यक्त्वषट्षष्टिभेदनिरूपणम् ... .... .... २१

श्रवणविषये जिनदासकथा सुदृष्टपरमार्थसंस्तवे
पुष्पचूलकथा च .... .... .... .... २६

व्यापन्नदर्शनसंगतिवर्जने रोहगुप्तकथा .... .... ३०

श्रद्धाशुद्धेश्चतुर्थभेदवर्णनम् तत्रार्थे वैश्रमणकथानकं च .... ४६

## ( द्वितीयोऽधिकारः )

लिङ्गत्रयनिरूपणम् तत्रादौ शुश्रूषालक्षणम् .... .... ४८

अत्रार्थे सुदर्शनश्रेष्ठिकथा .... .... .... .... ५०

धर्मरागस्वरूपनिरूपणमारोग्यद्विजकथानकं च .... ५२

देवगुरुवैयावृत्त्यस्वरूपम् तत्रार्थे आरामशोभाकथानकं .... ६२

## ( तृतीयोऽधिकारः )

दशविधविनयस्वरूपनि० .... .... .... .... ६४

अत्रार्थे भुवनतिलकमुनिदृष्टान्तः .... .... .... ७०

## ( चतुर्थोऽधिकारः )


त्रिशुद्धिस्वरूपनि० मनःशुद्धौ नरधर्मनृपकथा च .... ७५
वचनशुद्धिनिरूपणम् धनपालकथानकं च .... .... ८५
कायशुद्धिस्वरूपनि० वज्रकर्णनृपक० .... .... ९०


## ( पंचमोऽधिकारः )


दोषपंचकपरिहारनि० तत्र शंकापरिहारे
आषाढभूतिदृष्टांतश्च .... ९४
द्वितीयं कांक्षास्वरूपनि० जितशत्रुनृपमतिसागरमन्त्रि-
कथानकम्.... ९५
तृतीयं विचिकित्सादूषणं तत्र शुभमतिदृष्टान्तः .... ९९
चतुर्थं मिथ्यात्विप्रशंसादूषणम् भीमकुमारकथा च .... १०५
पंचमं मिथ्यादृष्टिपरिचर्याभिधं दूषणं तत्र सुराष्ट्रवासिश्रावकदृ० १०८


## ( षष्ठोऽधिकारः )


अष्टप्रभावकस्वरूपनि० तत्राद्यं प्रावचनीस्वरूपम्
द्वितीयं धर्मकथिस्वरूपं च तत्र वज्रस्वामिकथानकम् .... ११६
तृतीयं वादिस्वरूपं वादिस्वरूपे मल्लवादिदृष्टान्तः .... १२०
चतुर्थं नैमित्तकस्वरूपं तत्र भद्रबाहुस्वामिकथानकम् .... १२४
पंचमं तपस्विस्वरूपं तत्रार्थे विष्णुकुमारचरित्रं .... १२८
षष्ठं विद्यावत्प्रभावकस्व० नि० आर्यखपुटाचार्यकथा.... १३२
सप्तमं सिद्धप्रभावकस्वरूपं तत्र पादलिप्तसूरिवृत्तम् .... १३९
अष्टमं कविस्वरूपं तदुपरि सिद्धसेनसूरिचरित्रम् .... १४७
प्रभावकानामेव सामान्यलक्षणम् संघपतिरत्नश्रावक–
कथानकम्.... १५१


## ( सप्तमोऽधिकारः )


सम्यक्त्वभूषणपञ्चकस्वरूपनि० तत्राद्यभूषणस्वरूपं
तदुपरि उदायिनृपकथानकम् .... १५५
द्वितीयं भूषणम् तत्रार्थे नागदत्तकथानकम् .... .... १६०
तृतीयं सम्यक्त्वभूषणं तत्र बाह्याभ्यंतरकामिनीकथानकम् १६२

चतुर्थं सम्यक्त्वभूषणम् सुलसादृष्टान्तश्च .... .... १६६
पञ्चमं सम्यक्त्वभूषणम् सिंहदृष्टान्तश्च .... .... १६९

## ( अष्टमोऽधिकारः )

सम्यक्त्वलक्षणपंचकम् .... ... .... .... ,,
प्रथमं उपशमाख्यं लक्षणं मेतार्यदृष्टान्तश्च .... .... १७५
द्वितीयं संवेगाख्यं लक्षणं तत्र दवदन्तोदाहरणं .... १७६
तृतीयं निर्वेदस्वरूपं हरिवाहननृपकथा .... .... १८३
चतुर्थं अनुकम्पाभिधं लक्षणं जयराजदृष्टांतः .... .... १८५
पंचममास्तिक्यलक्षणं पद्मशेखरकथानकम् .... .... १८८

## ( नवमोऽधिकारः )

षड्विधयतनास्वरूपं। .... .... .... .... ,,
तत्राद्यद्वये संग्रामसूरदृष्टान्तः १९२
तृतीयचतुर्थयतनयोः स्वरूपम् .... .... .... ,,
पंचम्यः षष्ठ्याश्च यतनायाः स्वरूपम् अत्र मंत्रितिलककथा १९७

## ( दशमोऽधिकारः )

षडाकारस्वरूपवर्णनम् .... .... .... १९९–२००
षट्स्वपि आकारेषु मृगाङ्कलेखाचरितम् .... .... २१३

## ( एकादशमोऽधिकारः )

भावनाषट्कस्वरूपम् चित्रलेखाकथानकम् तत्र .... २२२

## ( द्वादशोऽधिकारः )

सम्यक्त्वषट्स्थानानि तत्रार्थे नरसुंदरकथा।
ग्रंथसमाप्तौ शिक्षासुंदरकथानकम् उपसंहारः–प्रशस्तिश्च।

# श्रीमद्धरिभद्रसूरिवरकृतं सम्यक्त्वसप्ततिमूलमात्रम्.

दंसणसुद्धिपयासं, तित्थयरमपच्छिमं नमंसित्ता । दंसणसुद्धिसरूवं, कित्तेमि सुयाणुसारेणं ॥ १ ॥
दंसणमिह सम्मत्तं, तं पुण तत्तत्थसद्दहणरूवं । खइयं खओवसमियं, तहोवसमियं च नायव्वं ॥ २॥
अवउज्झियमिच्छत्तो, जिणचेइयसाहुपूअणुज्जुत्तो । आयारमट्ठभेअं, जो पालइ तस्स सम्मत्तं ॥ ३ ॥
तस्स विसुद्धिनिमित्तं, नाऊणं सत्तसट्ठिठाणाइं । पालिज्ज परिहरिज्ज व, जहारिहं इत्थ गाहाओ ॥ ४ ॥
चउसद्दहणतिलिङ्गं, दसविणयतिसुद्धिपञ्चगयदोसं । अट्ठपभावणभूसण–लक्खणपञ्चविहसंजुत्तं ॥ ५॥
छव्विहजयणागारं, छभावणाभावियञ्च छट्ठाणं । इह सत्तसट्ठिलक्खण–भेयविसुद्धं च सम्मत्तं ॥ ६ ॥
पुव्वमुणीहिँ कयाणं, गाहाणमिमाण कमवि भावत्थं । थोवक्खरेहिँ पयडं, वुच्छं सङ्खेवरुइपत्थं ॥७॥
परमत्थसन्थवो खलु, सुमुणियपरमत्थजइजणनिसेवा । वावन्नकुदिट्ठीण य, वज्जणमिह चउह सद्दहणं ८
जीवाइपयत्थाणं, सन्तपयाईहिं सत्तहिं पएहिं । बुज्झाणवि पुण पुण सवणचिन्तणं सन्थवो होई ॥९॥

गीयत्थचरित्तीण य, सेवा बहुमाणविणयपरिसुद्धा । तत्तावबोहजोगा, सम्मत्तं निम्मलं कुणइं ॥१०॥
वावन्नदंसणाणं, निण्हवअहाच्छन्दकुग्गहहयाणं । उम्मग्गुवएसेहिं, बलावि मइलिजए सम्मं ॥ ११ ॥
मोहिज्जइ मंदमई, कुदिट्ठिवयणेहिँ गुविलढंढेहिं । दूरेण वज्जियव्वा, तेण इमे सुद्धबुद्धीहिं ॥ १२ ॥
परमागमसुस्सूसा, अणुराओ धम्मसाहणे परमो । जिणगुरुवेयावच्चे, नियमो सम्मत्तलिंगाइं ॥ १३ ॥
तरुणो सुही वियड्ढी, रागी पियपणइणीजुओ सोउं । इच्छइ जह सुरगीयं, तओऽहिया समयसुस्सूसा ॥१४॥
कंतारुत्तिन्नदिओ, घयपुण्णे भुत्तुमिच्छई छुहिओ । जह तह सदणुट्ठाणे, अणुराओ धम्मराओत्ति ॥१५॥
पूयाइए जिणाणं, गुरूण विस्सामणाइए विविहे । अंगीकारो नियमो, वेयावच्चे जहासत्ती ॥ १६ ॥
अरहंत सिद्ध चेइय सुए य धम्मे य साहुवग्गे य । आयरिय उवज्झाए, पवयणे दंसणे विणओ ॥१७॥
अरिहंता विहरंता, सिद्धा कम्मक्खया सिवं पत्ता । पडिमाओ चेइयाइं, सुयंति सामाइयाईयं ॥ १८ ॥
धम्मो चरित्तधम्मो, आहारो तस्स साहुवग्गत्ति । आयरियउवज्झाया, विसेसगुणसंगया तत्थ ॥ १९ ॥
पवयणमसेससंघो, दंसणमिच्छंति इत्थ सम्मत्तं । विणओ दसण्हमेसिं, कायव्वो होइ एवं तु ॥२०॥

भत्ती बहुमाणो वन्नजणण नासणमवण्णवायस्स । आसायणपरिहारो, विणओ संखेवओ एसो ॥२१॥
भत्ती बहिपडिवत्ती, बहुमाणो मणसि निब्भरा पीई। वण्णजणणं तु तेसिं, अइसयगुणकित्तणाईहिं॥२२॥
उड्डाहगोवणाई, भणियं नासणमवण्णवायस्स । आसायणपरिहरणं, उचियासणसेवणाइयं ॥ २३ ॥
दसभेयविणयमेयं, कुणमाणो माणवो निहयमाणो । सद्दहइ विणयमूलं, धम्मंति विसोहए संमं ॥२४॥
मणवायाकायाणं सुद्धी संमत्तसोहिणी तत्थ । मणसुद्धी जिणजिणमयवज्जमसारं मुणइ लोयं ॥२५॥
तित्थंकरचलणाराहणेण जं मज्झ सिज्झइ न कज्जं । पत्थेमि तत्थ नन्नं देवविसेसेहिं वयसुद्धी ॥२६॥
छिज्जंतो भिज्जंतो पीलिज्जंतो य डज्झमाणोऽवि । जिणवज्जदेवयाणं, न नमइ जो तस्स तणुसुद्धी ॥२७॥
दूसिज्जइ जेहि इमं, ते दोसा पंच वज्जणिज्जा उ । संका कंख विगिच्छा परतित्थिपसंससंथवणं ॥२८॥
देवे गुरुंमि तत्ते अत्थि नवत्थित्ति संसओ संका। कंखा कुमयभिलासो दयाइगुणलेसदंसणओ ॥२९॥
विचिगिच्छा सफलं पइ संदेहो मुणिजणम्मि उ दुगुंछा। गुणकित्तणं पसंसा परिचयकरणं तु संथवणं २९
सम्मदंसणजुत्तो, सइ सामत्थे पभावगो होइ । सो पुण इत्थ विसिट्ठो, निद्दिट्ठो अट्ठहा सुत्ते ॥३१॥

पावयणी धम्मकही वाई नेमित्तिओ तवस्सी य। विज्जा सिद्धो य कवी, अट्ठेव पभावगा भणिया ॥३२॥
कालोचियसुत्तधरो, पावयणी तित्थवाहगो सूरी। पडिबोहियभव्वजणो धम्मकही कहणलद्धिल्लो ३३
वाई पमाणकुसलो, रायदुवारेऽवि लद्धमाहप्पो। नेमित्तिओ निमित्तं, कज्जंमि पउंजए निउणं ॥३४॥
जिणमयमुब्भासंतो, विगिट्ठखमणेहि भण्णइ तवस्सी। सिद्धो बहुविज्जमन्तो, विज्जासिद्धो य उचियन्नू ३५
संघाइकज्जसाहग–चुण्णंजणजोगसिद्धओ सिद्धो। भूयत्थसत्थगन्थी, जिणसासणजाणओ सुकई ३६
सव्वे पभावगा ए, जिणसासणसंसकारिणो जे उ। भंगंतरेणवि जओ, एए भणिया जिणमयम्मी ॥३७॥
अइसेसिड्ढि धम्मकहि वाइ आयरिय खवग नेमित्ती। विज्जारायागणसम्मओ य तित्थं पभावंति ॥ ३८॥
इय संपत्तिअभावे, जत्तापूयाइ जणमणोरमणं। जिणजइविसयं सयलं, पभावणा सुद्धभावेणं ॥ ३९ ॥
सम्मत्तभूसणाइं, कोसल्लं तित्थसेवणं भत्ती। थिरया पभावणावि य, भावत्थं तेसि वुच्छामि ॥ ४० ॥
वन्दणसंवरणाई किरियानिउणत्तणं तु कोसल्लं। तित्थनिसेवा य सयं, संविग्गजणेण संसग्गी ॥ ४१ ॥
भत्ती आयरकरणं, जहुचियं जिणवरिंदसाहूणं। थिरया दढसम्मत्तं, पभावणुस्सप्पणाकरणं ॥ ४२ ॥

लब्भिज्जइ सम्मत्तं, हिययगयं जेहि ताइं पंचेव । उवसम संवेगो तह, निव्वेयऽणुकंप अत्थिक्कं ॥४३॥
अवराहेऽवि महंते, कोहाणुदओ वियाहिओवसमो। संवेगो मुक्खं पइ, अहिलासो भवविरागो ऊ ४४
निव्वेओ चागिच्छा, तुरियं संसारचारयगिहस्स । दुहिए दयाऽणुकंपा, अत्थिक्कं पच्चओ वयणे ॥४५॥
परतित्थियाण तद्देवयाण तग्गहियचेइयाणं च। जं छव्विहव्वावारं, न कुणइ सा छव्विहा जयणा ॥ ४६ ॥
वंदणनमंसणं वा, दाणाणुपयाणमेसि वज्जेई । आलावं संलावं, पुव्वमणालत्तगो न करे ॥ ४७ ॥
वंदणयं करजोडणसिरनामण पूयणं च इह नेयं । वायाइ नमुक्कारो, नमंसणं मणपसाओ अ ॥ ४८ ॥
गउरवपिसुणं वियरणमिट्ठासणपाणखज्जभिज्जाणं । संचिय दाणं बहुसो, अणुप्पयाणं मुणी बिंति ॥४९॥
सप्पणयं संभासणकुसलं वो सागयं व आलावो । संलावो पुणरुत्तं, सुहदुहगुणदोसपुच्छाओ ॥ ५० ॥
आगारा अववाया, छ च्चिय कीरंति भंगरक्खट्ठा । रायगणबलसुरक्कमगुरुनिग्गहवित्तिकंतारं ॥ ५१ ॥
राया पुराइसामी, जणसमुदाओ गणो बलं बलिणो। कारंति वंदणाइं, कस्सवि एए तह सुरावि ॥५२॥
गुरुणो कुदिट्ठिभत्ता, जणगाई मिच्छदिट्ठिणो जे उ । कंतारो ओमाई, सीयणमिह वित्तिकंतारं ॥५३॥

न चलन्ति महासत्ता, सुभिज्जमाणावि सुद्धधम्माओ । इयरेसि चलणभावे, पइन्नभङ्गो न एएहिं ॥५४॥
भाविज्ज मूलभूयं, दुवारभूयं पइट्ठनिहिभूयं । आहारभायणमिमं, सम्मत्तं चरणधम्मस्स ॥ ५५ ॥
देई लहु मुक्खफलं, दंसणमूले दढंमि धम्मदुमे । मुत्तुं दंसणदारं, न पवेसो धम्मनयरम्मि ॥ ५६ ॥
नंदइ वयपासाओ, दंसणपीढंमि सुप्पइट्ठंमि । मूलुत्तरगुणरयणाण, दंसणं अक्खयनिहाणं ॥ ५७ ॥
संमत्तमहाधरणी, आहारो चरणजीवलोगस्स । सुयसीलमणुन्नरसो, दंसणवरभायणे धरइ ॥ ५८ ॥
अत्थि जिओ तह निच्चो,कत्ता भुत्ता य पुण्णपावाणं। अत्थि धुवं निव्वाणं, तस्सोवाओ य छट्ठाणा ॥५९॥
आया अणुभवसिद्धो, गम्मइ तह चित्तचेयणाईहिं ।जीवो अत्थि अवस्सं, पच्चक्खो नाणदिट्ठीणं ॥६०॥
दव्वट्ठयाइ निच्चो, उप्पायविणासवज्जिओ जेणं । पुव्वकयाणुसरणउ, पज्जाया तस्स उ अणिच्चा ॥ ६१॥
कत्ता सुहासुहाणं, कम्माणं कसायजोयमाईहिं । मिउदंडचक्कचीवरसामग्गिवसा कुलालुव्व ॥ ६२ ॥
भुंजइ सयंकयाइं, परकयभोगे अइप्पसंगो उ।अकयस्स नत्थि भोगो, अन्नह मुक्खेवि सो हुज्जा ॥६३॥
निव्वाणमक्खयपयं, निरुवमसुहसंगयं सिवं अरुयं । जियरागदोसमोहेहि भासियं ता धुवं अत्थि ॥६४॥

सम्मत्तनाणचरणा, संपुन्नो मोक्खसाहणोवाओ । ता इह जुत्तो जत्तो, ससत्तिओ नायतत्ताणं ॥ ६५ ॥
इय सतसट्ठिपयाइं, उच्चिणिउं विउलआगमारामा। संगहिया इत्थ मए, मंदमईणं सरणहेउं ॥ ६६ ॥
एसिं दुविहपरिन्ना, दंसणसुद्धिं करेइ भव्वाणं । सुद्धंमि दंसणंमी, करपल्लवसंठिओ मुक्खो ॥ ६७ ॥
संघे तित्थयरम्मी, सूरिसु रिसीसु गुणमहग्घेसुं । अप्पच्चओ न जेसिं, तेसिं चिय दंसणं सुद्धं ॥ ६८ ॥
जे पुण इयविवरीया, पल्लवगाही सबोहसंतुट्ठा । सुबहुंपि उज्जमंता, ते दंसणबाहिरा नेया ॥ ६९ ॥
इय भाविऊण तत्तं, गुरुआणाराहणे कुणह जत्तं । जेणं सिवसुक्खबीयं, दंसणसुद्धिं धुवं लहह ॥७०॥

इति सम्यक्त्वसप्ततिमूलमात्रम् ॥

श्रीमद्रुद्रपल्लीयसङ्घतिलकाचार्यकृता

# श्रीसम्यक्त्वसप्ततिटीका ।

## श्रीवीतरागाय नमः ।

सच्चामीकरबन्धुरोद्धुरतरस्कन्धस्फुरद्दोर्लतः, प्रोद्यत्कुन्तलकान्तकान्तिलहरीस्वच्छाश्मगर्भच्छदः ।
दन्तोद्योतसुजातमौक्तिककुसुमः स्वेच्छानुरूपं फलन्, कल्पद्रुर्ऋषभप्रभुर्विजयते व्याख्यासु साक्षादिव ॥ १ ॥
उर्व्यामुर्व्यस्ति भीतिर्मम मृगपतितस्तत्किमाकाशदुर्गं, चन्द्रं सेवे न तत्रापि हि भयमधिकं सैंहिकेयग्रहान्मे ।
इत्थं ध्यात्वा मृगो यत्क्रमकमलयुगं स्वान्यरक्षातिदक्षं, कक्षीचक्रेऽङ्कदम्भात्स भवतु भविनां शान्तये शान्तिनाथः ॥ २ ॥
येनाकर्णनमात्रतोऽप्यरतिदौ वर्गान्तसंस्थौ नमौ, वर्णौ वीक्ष्य कृपावशादतितरां तद्गौरवाय क्रमात् ।
कृत्वाऽयिस्वरसंयुतौ विनिहितौ स्वीयेऽभिधानेऽनघे, स श्रीनेमिजिनेश्वरो भवभृतां देयादमन्दां मुदम् ॥ ३ ॥

यस्य च्छद्मस्थभावे शठकमठहठोद्धृष्टधाराधराम्भःसंभारे तुङ्गरङ्गदुरुलहरिपरिप्लावितक्षोणिदेशे ।
मग्नस्याकण्ठपीठं वदनमतितरां स्मेरराजीवशोभामङ्गीचक्रे स वामातनयजिनपतिर्वोऽस्तु विघ्नोपशान्त्यै ॥ ४ ॥
जन्मस्नात्रमहे महेन्द्रनिकरोदस्तोरुदुग्धाम्बुधिक्षीरापूर्णसुवर्णकुम्भमुखतो निर्यज्जलश्रेणयः ।
लग्ना यस्य तनौ ततश्च कणशो भूत्वाधुनाप्यम्बरे, ताराणां निभ(मिष)तः स्फुरन्ति स जिनः श्रीत्रैशलेयः श्रिये ॥ ५ ॥
योऽब्धिर्लब्धिव्रजस्य प्रमुदितमनसो यं निषेवन्ति भव्या, येनोपात्तं चरित्रं स्पृहयति सुतरामेव यस्मै शिवश्रीः ।
यस्मादाविर्बभूव श्रुतमघरहितं यस्य वीरेऽतिभक्तिर्यस्मिन्नस्ति प्रशस्ता गुणततिरिह स श्रीन्द्रभूतिर्विभूत्यै ॥ ६ ॥
सिद्धान्तोन्नतिशालिनो नयचयप्रोर्जस्विगर्जाजुषश्छन्दोव्याकरणप्रमाणसुमहःसौदामिनीमालिनः ।
धिन्वन्तो निखिलं धरित्रिवलयं व्याख्यामृतोद्वर्षणैः, श्रीमन्तो गुणशेखराख्यगुरवो नन्दन्तु मेघा इव ॥ ७ ॥
ढिल्ल्यां साहिमहम्मदं शककुलक्ष्मापालचूडामणिं, येन ज्ञानकलाकलापमुदितं निर्माय षट्दर्शनी ।
प्राकाश्यं गमिता निजेन यशसा साकं स सर्वागमग्रन्थज्ञो जयताज्जिनप्रभगुरुर्विद्यागुरुर्नः सदा ॥ ८ ॥
एतेषां गुणशालिनां पदपयोजन्मद्वयीसेवनात्, सञ्जाताधिगमः स सङ्घतिलकाचार्यो जडोऽप्यञ्जसा ।
पूर्वाचार्यकृतेर्विचारचतुरज्ञातार्थसार्थोद्धृतेः, सम्यक्त्वाग्रगसप्ततेर्विवरणं कर्त्ताऽस्मि सङ्क्षेपतः ॥ ९ ॥

इह हि हेतुयुक्तिदृष्टान्तकृतदुष्टशासनशासने श्रीमज्जिनशासने सकलकर्त्तव्येषु परमपदसम्पदुपादानकारणं संसारपारावारतारणं सम्यक्त्वमेव ब्रुवतेऽर्हन्तः, यदुक्तं श्रीधर्मदासगणिना "संमत्तंमि उ लद्धे, ठवियाइं नरयतिरियदाराइं। दिव्वाणि माणुसाणि य, मुक्खसुहाइं सहीणाइं ॥ १ ॥"

अत एव प्रकटीकृतामृतायमानसदुपदेशसारः प्रकरणकारः प्रज्ञावज्ञातसुराचार्यः कश्चित्पूर्वाचार्यः अपहसितसमस्तदुर्मतिमहातमसे सम्यक्त्वसप्ततिकाभिधानशास्त्रप्रारम्भे बहुविघ्नानि श्रेयांसि, उक्तञ्च "श्रेयांसि बहुविघ्नानि, भवन्ति महतामपि। अश्रेयसि प्रवृत्तानां, क्वापि यान्ति विनायकाः ॥ १ ॥" इति विघ्नविनायकोपशमनाय, आदिमध्यावसानमङ्गलमयानि शास्त्राणि भवन्ति, तथा चोक्तम् "तं मङ्गलमादीए, मज्झे पज्जंतए य सत्थस्स। पढमं सत्थत्थाविग्घपारगमणाय निद्दिट्ठं ॥ १ ॥" इति शास्त्रसागरपारप्राप्तये, शुभप्रवर्त्तिनो हि भवन्ति शिष्टाः, यदुक्तम् "शिष्टानामयमाचारो, यत्ते संत्यज्य दूषणम्। निरन्तरं प्रवर्त्तन्ते, शुभ एव प्रयोजने ॥ १ ॥" इति शिष्टसमयप्रतिपालनाय, फलाभिलाषिण एव प्रेक्षावन्तः, उक्तञ्च "प्रेक्षावन्तोऽत्यर्थं, प्रयोजनं दूरतः परित्यज्य। फलवति सदैव साध्ये, यत्ते व्यक्तं प्रवर्त्तन्ते ॥ १ ॥"

इति प्रेक्षावत्प्रवृत्तये च समुचितेष्टदेवतानमस्कारपूर्वकं सम्बन्धाभिधेयप्रयोजनसूचिकां प्रथमगाथामाह—

दंसणसुद्धिपयासं, तित्थयरमपच्छिमं नमंसित्ता । दंसणसुद्धिसरूवं, कित्तेमि सुयाणुसारेणं ॥ १ ॥

व्याख्या—'दंसणसुद्धि'त्ति दृश्यते यथावत्पदार्थसार्थो येन तद्दर्शनं सम्यक्त्वमोहनीयकर्म्मक्षयोपशमात्सम्यग्देवगुरुधर्म्मपरिज्ञानसमुद्भूतशुभाध्यवसायरूपं यदागमः—"से य सम्मत्ते सम्मत्तमोहणीयकम्मोवसमखयसमुत्थे सुहे आयपरिणामे पन्नत्ते" तस्य शुद्धिर्मिथ्यात्वकषायनोकषायाद्यात्मकमलस्य शुक्लध्यानजलक्षालनेन निर्मलता ततः प्रकाशो घातिकर्म्मक्षयात् केवलज्ञानावाप्तिरूपो यस्य तं एवंभूतं, कं तमित्याह—'तित्थयरं'ति, तीर्यते संसारसागरोऽनेनेति तीर्थं प्रवचनाधारश्चतुर्विधः सङ्घः, प्रथमगणधरो वा । यदुक्तमागमे—"तित्थं भन्ते तित्थं ? तित्थयरे तित्थं ? गोयमा, अरिहा ताव नियमा तित्थङ्करे, तित्थं पुण चाउव्वण्णो समणसङ्घे, पढमगणहरे वा," तत्करोतीति तम्, ईदृग्गुणगणोपेतं कं तमित्याह 'अपच्छिमं'ति, इहावसर्पिण्यां श्रीयुगादिदेवादिश्रीपार्श्वनाथपर्यन्तानां त्रयोविंशतितीर्थकृतामनन्तरोत्पन्नत्वादपश्चिमं न पश्चिमस्तीर्थकृद्यस्मादित्यपश्चिमश्चरमस्तं चतुर्विंशतितमं श्रीसिद्धार्थपार्थिवकुलतिलकं त्रिशलाकुक्षिशुक्तिमुक्ताफलं श्रीवर्द्धमानस्वामिनं, अत्रापश्चिमशब्दस्य चरमवाचित्वान्मङ्गलार्थमुपादानं, 'नमंसित्तत्ति' नमस्कृत्य उपहासपरिहारेण त्रिकरणविशुद्ध्या प्रणम्य । अत्र च चत्वारोऽतिशयाः तद्यथा-

दर्शनशुद्धिप्रकाशमित्यनेन विशेषणेन भगवतः श्रीमहावीरस्य लोकालोकालोकनाद् ज्ञानातिशयः, स च दुर्निवारान्तरङ्गशत्रुवित्रासनादेव स्यादित्यनेनैव विशेषणेनाऽपायापगमातिशयः, तीर्थकरमित्यनेनैव विशेषणेन निरुपमोपदेशवचनरचनाप्रतिबोधितभव्यलोकत्वाद्वचनातिशयः, जघन्यतोऽपि कोटिसंख्यैः सुरासुरैस्तीर्थकरः सेव्यतेऽतोऽनेनैव विशेषणेन पूजातिशयः, तदेवंविधस्य परमेशितुरुचितं नमस्कारकरणमिति । अथ कृतभावमङ्गलो गाथोत्तरार्द्धेन तत्स्वरूपमाह– 'दंसणसुद्धित्ति' दर्शनं प्राग्व्यावर्णितस्वरूपं सम्यक्त्वं तस्य शुद्धिर्निर्दूषणता तस्याः स्वरूपं भेदप्रभेदलक्षणम्, 'कित्तेमित्ति' कीर्त्तयामि प्रतिपादयामि, न स्वमनीषिकया, किन्तु 'सुयाणुसारेणंति' श्रुतानुसारेण सिद्धान्तयुक्त्येति, अत्र सम्बन्धो वाच्यवाचकलक्षणः, वाच्यं प्रकरणार्थः, वाचकं सूत्रम्, अभिधेयः सम्यक्त्वमूलद्वादशभेदतत्प्रतिभेद-(सप्तषष्टि) भेदस्वरूपनिरूपणम्, प्रयोजनं द्विधा, प्रकरणकर्त्तुः श्रोतुश्च, तदपि द्विधा–कर्त्तुः (परं) परमपदसंपदवाप्तिः अपरं च भव्यजनप्रबोधानुग्रहः, श्रोतुरपि परं स्वर्गापवर्गनिरर्गलकमलालीलालालसत्वं, अपरं तु शास्त्रतत्त्वावबोधः, अत एवंविधं शास्त्रं विपश्चिच्चेतश्चमत्कारकारि स्यादिति गाथार्थः ॥ १ ॥ सम्यग्दर्शनस्वरूपमाह—

दंसणमिह सम्मत्तं, तं पुण तत्तत्थसद्दहणरूवं । खइयं खओवसमियं, तहोवसमियं च नायव्वं ॥ २ ॥

व्याख्या 'दंसणत्ति,' यद्यपि दर्शनशब्देन त्रिलोचनविलोकनपरतीर्थिकशासनादीनि कथ्यन्ते, तथापीह शास्त्रे

मोहनीयकर्म्मक्षयोपशम(समुत्थ)शुभात्मपरिणामस्वरूपमेव दर्शनं सम्यक्त्वमेवाङ्गीक्रियते, यतस्तद्विना सकल-क्रियाकलापपरिशीलनादिकमनर्थकम्, यदागमः—"भट्ठेण चरित्ताओ, दंसणमिह दढयरं गहेयव्वं । सिज्झन्ति चरणरहिया, दंसणरहिया न सिज्झन्ति ॥ १ ॥" तत्परिज्ञानाच्च चिदानन्दपदवी न दवीयसी, उक्तं च—"सम्यक्तत्त्वपरिज्ञानाद्धेयोपादेयवेदिनः । उपादेयमुपादाय, गच्छन्ति परमां गतिम् ॥ २ ॥" तस्मिंश्चावासे जीवेन किं किं न लब्धम् ? यदुक्तम्—"सम्यक्त्वरत्नान्न परं हि रत्नं, सम्यक्त्वबन्धोर्न परोऽस्ति बन्धुः । सम्यक्त्वमित्रान्न परं हि मित्रं, सम्यक्त्वलाभान्न परोऽस्ति लाभः ॥ १ ॥" तस्य सम्यक्त्वस्य किं लक्षणं स्यादित्याह 'तं गुणाते' तत्पुनः सम्यक्त्वं तत्त्वार्थश्रद्धानरूपम्, ननु शाक्यकणभक्षाऽक्षपादकापिलवेदान्तवादिबार्हस्पत्यादिदर्शनप्रमाणीकृतान्यपि तत्त्वानि सन्ति, किन्तु तेषां न हिंस्यात्सर्वभूतानीतिपूर्वमुक्त्वा पश्चाच्च अनस्थ्नां जन्तूनां शकटभरवधे एका हिंसेति पूर्वापरविरुद्धत्वेन परीक्षाऽक्षमत्वेन च तत्त्वाभासत्वादप्रामाण्यं, तथा च तच्छास्त्रं—"पुराणं मानवो धर्म्मः, साङ्गो वेदश्चिकित्सितम् । आज्ञासिद्धानि चत्वारि, न हन्तव्यानि हेतुभिः ॥ १ ॥" तत्त्वं तु तदेवोच्यते, यत्परीक्षकपरीक्षालक्षैरपि सुजात्यजातरूपमिव न दूषयितुं शक्यते, यदुक्तम्—"तापच्छेदकषैः शुद्धं, सुवर्णमिव यद्भवेत् । युक्तिसिद्धान्तसिद्धत्वात्तत्तत्त्वमभिधीयते ॥ १ ॥" अतः सुनिरूपितजीवाजीवादिपदार्थपरिज्ञानरूपं तत्त्वं तस्यार्थोऽनन्तधर्म्मात्मकतया परिच्छेदस्तत्र श्रद्धानं परमार्थवृत्त्या निश्चली-

करणं यदागमः—"एस अट्ठे एस परमट्ठे सेसे अणट्ठे" इति, एवंविधं रूपं लक्षणं यस्य तत्, उक्तञ्च, "त्रिकालविद्भिस्त्रिजगच्छरण्यैर्जीवादयो येऽभिहिताः पदार्थाः। श्रद्धानमेषां परया विशुद्ध्या, तद्दर्शनं सम्यगुदाहरन्ति ॥१॥" तच्च सम्यक्त्वं यद्यप्येकद्वित्रिचतुःपञ्चदशभेदमस्ति, तथापि तन्मुख्यभेदत्रयानुसारेणाह—'इदं त्रिविधं क्षायोपशमिकं तथौपशमिकं, चः समुच्चये, अत्र सूत्रे यद्यपि क्षायिकादिक्रमस्तथापि जीवस्य पूर्वमौपशमिकं सम्यक्त्वं ततः क्षायोपशमिकं सम्यक्त्वं ततोऽपि क्षायिकं सम्यक्त्वं चोत्पद्यते, अतोऽत्रादावौपशमिकं सम्यक्त्वं कथ्यते, तद्द्विधा नैसर्गिकं आधिगमिकं च, तत्र नैसर्गिकं परोपदेशनिरपेक्षतया प्राग्भवस्मरणादिना स्यात्, आधिगमिकं तु परोपदेशादिनोत्पद्यते, अत औपशमिकसम्यक्त्वस्यैवोत्पत्तिरुच्यते, तथाहि—कश्चिज्जीवोऽनादिकालालीनमिथ्यादर्शनवासनः सांसारिकं दुःखं सुखमिव मन्वानः, असद्दर्शनमपि सद्दर्शनमिव जानानः, नरकगत्यादिचतुष्टयस्यान्यतरस्यां गतौ वर्त्तमानः, ज्ञानावरणादिसप्तकर्म्मणामनाभोगनिर्वर्तितगिरिसरिदुपलघोलनाकल्पयथाप्रवृत्तिकरणजनितसागरोपमकोटाकोट्यन्तःस्थितिकः, पर्याप्तसंज्ञिपञ्चेन्द्रियः, मत्यज्ञानश्रुताज्ञानविभङ्गज्ञानानामन्यतरसाकारोपयोगे मनोवाक्कायानामन्यतरस्मिन् योगे तेजःपद्मशुक्ललेश्याक्रमेण जघन्यमध्यमोत्कृष्टपरिणामानामन्यतरस्मिन् लेश्यापरिणामे च वर्त्तमानः, अशुभप्रकृतीनां चतुःस्थानकं रसं द्विस्थानकं शुभप्रकृतीनां तु द्विस्थानकरसं चतुःस्थानकं कुर्वाणः, ज्ञानावरणान्तरायदशकदर्शनावरणनवकमिथ्यात्वकषायषोडशकभयजुगुप्सातैजसकार्मणवर्णादिचतुष्कागुरुलघूपघातनिर्माणरूपाः सप्तचत्वारिंशद्ध्रुवबन्धिनीः

प्रकृतीः शेषास्त्वायुर्वर्जसम्भवद्बन्धप्रायोग्याः प्रकृतीर्बध्नन् अपूर्वकरणानिवृत्तकरणसंज्ञकविशुद्धिविशेषाभ्यां प्रत्येकमन्तर्मुहूर्त्तकालमानाभ्यां विशुध्यमानः स्थितिघातरसघातस्थितिबन्धगुणश्रेणीरपूर्वापूर्वतराश्च प्रवर्त्तयन् कर्कशरूढगूढकर्मग्रन्थेरन्तरकरणं करोति, तत्र प्रथमस्थितौ मिथ्यात्वदलिकवेदनान्मिथ्यादृक्, अन्तर्मुहूर्त्तेन तु तस्यामपगतायामन्तरकरणेनाद्यसमय एव निसर्गतोऽधिगमतो वा औपशमिकसम्यक्त्वमवाप्नोति । अथ क्षायोपशमिकं सम्यक्त्वमुच्यते–तथाहि—यस्तु जीवोऽन्तरकरणं न करोति, स प्रथममेव यथाप्रवृत्तापूर्वकरणानिवृत्तकरणैरेव मदनकोद्रवन्यायेन विहितमिथ्यात्वदलिकत्रिपुञ्जीकरणस्तथैव क्षायोपशमिकसम्यक्त्वं लभते, तल्लाभाच्च सम्यग्ज्ञानादिलाभः । अथ क्षायिकं सम्यक्त्वं भण्यते, तथाहि—मिथ्यात्वमिश्रक्षायोपशमिकसम्यक्त्वमहाकटुकविपाकानन्तानुबन्धिप्रथमकषायचतुष्टयक्षयात्क्षायिकं सम्यक्त्वं प्राप्नोति, तद्वासौ तु तस्मिंस्तृतीये चतुर्थे वा भवे सिध्यति, यदुक्तं पञ्चसङ्ग्रहे—"तइय चउत्थे तम्मि उ, भवंमि सिज्झन्ति दंसणे खीणे । जं देवनिरयासङ्खाउ, चरमदेहेसु ते हुंति ॥ १ ॥" औपशमिकं सम्यक्त्वं क्षायोपशमिकं सम्यक्त्वं च पौद्गलिकं, शोधितमिथ्यात्वपुद्गलमयत्वात्, क्षायिकं सम्यक्त्वं त्वपौद्गलिकं, अत एव मुक्तिक्षेत्रे तत्सम्भव इति ज्ञातव्यमिति गाथार्थः ॥ २ ॥ तत्सम्यक्त्वं कीदृग्गुणे जीवे सम्भवतीत्याह—

अवउज्झियमिच्छत्तो, जिणचेइयसाहुपूअणुज्जुत्तो । आयारमइभेअं, जो पालइ तस्स सम्मत्तं ॥ ३ ॥

व्याख्या–'अवउज्झियत्ति' अव सामस्त्येनोज्झितं परित्यक्तं मिथ्यादर्शनाभिनिवेशो येन सः, मिथ्यात्वं ह्याभिग्रहिका-

नाभिग्रहिकाभिनिवेशिकसांशयिकाऽनाभोगिकभेदैः पञ्चधा, यदुक्तम्—"आभिग्गहियं अणभिग्गहियं तह अभिनिवेसियं चेव । संसइयमणाभोगं, मिच्छत्तं पञ्चहा होइ ॥ १ ॥ अभिग्गहियं किल दीक्खियाण अणभिग्गहियं च इयराण। गुट्ठामाहिलमाईण, तं अभिनिवेसियं जाण ॥ २ ॥ संसइयं मिच्छत्तं, जा संका जिणवरस्स तत्तेसु । विगलिन्दियाण जं पुण, तमणाभोगं तु निद्दिट्ठं ॥ ३ ॥" अतोऽनेन व्यामूढमना जीवो रागद्वेषमोहोपद्रुतानपि कुदेवान् देवत्वेनाभ्युपगच्छति, बहुविधपरिग्रहारम्भसंरम्भाम्भोधिमध्यमग्नानपि कुगुरून् सुगुरुत्वेनाङ्गीकरोति, हिंसात्मकदुर्गदुर्गतिपातहेतुककुशास्त्रप्रणीतं कुधर्म्ममपि सद्धर्म्मत्वेनावगच्छति, यतः—"रागी देवो दोसी देवो मानी सुन्नंपि देवो, मज्जे धम्मो मंसे धम्मो जीवहिंसाइ धम्मो । रत्ता मत्ता कन्तासत्ता जे गुरू तेवि पुज्जा, हा हा कट्ठं मुद्धो लोओ अट्टमट्टं कुणन्तो ॥१॥" तदीदृशस्यानन्तसंसाराध्वपाथेयस्य परिहार एव श्रेयान्, अतो युक्तमेवाऽवोज्झितमिथ्यात्व इति विशेषणम्, 'जिणचेइयत्ति', जयन्त्यन्तरङ्गारीनिति जिनास्तीर्थकृतः, ते चतुर्द्धा, नामस्थापनाद्रव्यभावभेदात्, यदुक्तमागमे—"नामजिणा जिणनामा, ठवणजिणा पुण जिणिंदपडिमाओ । दव्वजिणा जिणजीवा, भावजिणा समवसरणत्था ॥१॥" चैत्यानि चित्तसमाधिजनकानि जिनभवनानि, तानि भक्तिमङ्गलनिश्राकृताऽनिश्राकृतशाश्वतभेदात्पञ्चविधानि, यदागमः—"भत्ति-मङ्गलचेइयनिस्सकडअनिस्सचेइए वावि । सासयचेइय पञ्चमुवइट्ठं जिणवरिन्देहिं ॥ १ ॥ गिहजिणपडिमाए भत्ति–चेइयं १ उत्तरङ्गघडियंमि २ । जिणबिम्बे मङ्गलचेइयं समयन्नुणो बिन्ति ॥ २ ॥

निस्सकडं जं गच्छस्स सन्तियं ३ तदियरं अनिस्सकडं ४ । सिद्धायवणञ्च ५ इमं, चेइयपणगं विणिद्दिट्ठं ॥ ३ ॥'' सम्यग्दर्शनज्ञानचारित्रैः परमं पदं साधयन्तीति साधवः, उक्तञ्च,—''दशविधयतिधर्म्मरताः, समवगणितशत्रुमित्रतृणमणयः । जीवादितत्त्वविज्ञास्तीर्थकरैः साधवः प्रोक्ताः ॥ १ ॥'' एतेषां जिनचैत्यसाधूनां द्रव्यभावाभ्यां यत्पूजनं यथार्हमभ्यर्हणं तत्र उद्युक्तः सावधानः, यत एतदर्चकस्य भविकस्य भवेत्सफलं जन्म, तथाचोक्तम्—''जिनचलणचणनिच्चलचित्तह, अणुदिणु दाणु सुपत्तिहिं दिंतह । धन्नह गिहवासेवि वसन्तह, सहलं जम्मु होइ सुकयत्थह ॥ १ ॥'' एवंविधो यो जीवः ''आयारत्ति'' आचरणमाचारः शुभक्रियाव्यापारस्तं, 'अट्ठभेयन्ति' अष्टौ अष्टसङ्ख्या निःशङ्कितनिष्काङ्क्षितनिर्विचिकित्साऽमूढदृष्ट्युपबृंहणास्थिरीकरणवात्सल्यप्रभावनारूपा भेदाः प्रकारा यस्य तं, पालयति सम्यगाराधयति, तस्य सम्यक्त्वं सद्देवगुरुधर्म्मपरिज्ञानरूपं भवतीति गाथार्थः ॥३॥ यद्यपि अत्र प्रकरणे प्रकरणकृता न दृष्टान्ताः सूचिताः, तथाप्यस्माभिरर्थदृढनार्थं भव्यजनानुग्रहार्थं च यथायोगं निदर्शनानि दर्शयिष्यन्ते, तत्रादौ सम्यक्त्वशुद्धिविषये आरामनन्दनकथा कथ्यते—तथाहि—

इहैव जम्बूद्वीपाख्ये, द्वीपेऽर्धशशिसन्निभम् । अस्ति श्रीभरतक्षेत्रं भालवद्भूमृगीदृशः ॥ १ ॥ तत्र लक्ष्म्या इव क्रीडागारं लक्ष्मीपुरं पुरम् । यत्रान्तर्बहिरुर्वीषु, पुन्नागाः सन्ति सत्फलाः ॥ २ ॥ तत्रासीत्त्रासितारातिविक्रमो विक्रमो नृपः । यत्प्रतापजितोऽद्यापि, सविता सेवते नभः ॥ ३ ॥ तस्य प्रसादप्रासादनिर्विवाद-

निवासिनः । चत्वारः सोदरा आसन्नुपाया इव नैगमाः ॥ ४ ॥ आद्यो विमलबुद्ध्याह्वो, द्वितीयो बुद्धिसागरः । तार्त्तीयीकः सुबुद्धिस्तु, तुर्यो विशालबुद्धिकः ॥ ५ ॥ विशालबुद्धिनाम्नस्तु, स्वप्राणेभ्योऽप्यतिप्रिया । पद्म-तर्जितपद्मश्रीः, पद्मश्रीरजनि प्रिया ॥ ६ ॥ साऽन्येद्युर्ज्येष्ठपत्नीनां, सुतानां प्रतिवत्सरम् । वीक्ष्य जन्मविवाहादि-महानेवमचिन्तयत् ॥ ७ ॥ एतास्वहमधन्यास्मि, यस्या नैकोऽपि नन्दनः । येन मे मन्दभाग्यायाः, पूर्यन्ते हि मनो-रथाः ॥ ८ ॥ अतस्तनूभवाभावदूयमानमनाः सदा । गृहोपवनिकां गत्वा, पद्मश्रीररुदत्तराम् ॥ ९ ॥ सुदतीं रुदतीमेत्य, कदाचित्कापि वानरी । तद्दुःखदुःखितेवाख्यत्किमर्थं सखि ! रोदिषि ? ॥ १० ॥ पद्मश्रीरपि तां स्माह, सखीन्दुप्र-तिमामिव । वन्ध्याभिधः कलङ्को मां, सकलामपि बाधते ॥ ११ ॥ ततः सञ्जातकारुण्या, महारण्यात् महौषधीम् । आनीय वानरी तस्यै, वितीर्यैवमवोचत ॥ १२ ॥ सख्यमुष्यां महौषध्यामार्त्तवस्नानवासरे । नीरेण पिष्टा पीतायां, भावी ते गर्भसम्भवः ॥ १३ ॥ पद्मश्रीः स्माह पुत्रो मे, यदि भावी त्वदौषधात् । तदा तुभ्यं प्रदास्यामि, हारं नवसरं सखि ! ॥ १४ ॥ कथं नरगिरा वक्षीत्युक्ता पद्मश्रियाऽथ सा । वानरी स्माह वानर्या, विद्ययैवानवद्यया ॥ १५ ॥ अथैत्य सद्म पद्मश्रीः, सानन्दा स्नानवासरे । औषधीमपिबद्धारासुधामिव सुधाशनी ॥ १६ ॥ तत्प्रभावभवद्गर्भा, सम्पूर्णेषु दिनेषु सा । सुषुवे वानरं दुःखादहो ? ? विधिविजृम्भितम् ॥ १७ ॥ सा सूतिकारिका वक्त्राच्छ्रुत्वा शाखामृगं सुतम् । दुःखेन मूर्च्छिता भूम्यां, पपात च्छिन्नवल्लिवत् ॥ १८ ॥ शीतोपचारात्सञ्जातसंज्ञाहादैववादिनी । साऽप्याज-

यद्गृहारामे, मलयत्तं प्लवङ्गमम् ॥ १९ ॥ ततः सा वानरी जातमात्रमादाय तं कपिम् । साह मे गूढगर्भायाः, समभूत्प्रसवोऽधुना ॥२०॥ स्तन्यं न साम्प्रतं तादृग्, श्रीयते तद्(द्वि)ना त्वयम् । इत्युक्त्वा च वयस्याभिः, शिशुं स्तन्यमपाययत् ॥ २१ ॥ युगलम् ॥ तत्रैव भवनारामे, पुनरागत्य सा कपी । रुदतीं करुणं दृष्ट्वा, पद्मश्रियमभाषत ॥ २२ ॥ मा रुदः सखि ? मद्वार्त्तां, शृणु स्वार्थं मयैव हि । वन्ध्यया प्रेतनः सूनुरुद्पाद्यत स त्वयि ॥२३॥ साम्प्रतं मूलिकामन्यां, नरनन्दनदायिनीम् । आदत्स्वात्र न कर्त्तव्यः, संशयोऽर्हद्गिरीव हि ॥ २४ ॥ पुनस्तद्वाचि विश्वस्ता, प्रशस्ता हि वणिक्प्रिया । पूर्ववन् मूलिकापानादसूत सुतमुत्तमम् ॥ २५ ॥ विशालबुद्धिरानन्दादतुच्छोत्सवपूर्वकम् । आरामनन्दन इति, बालकस्याभिधां व्यधात् ॥ २६ ॥ क्रमेण पाल्यमानः स, धात्रीभिर्वृद्धिमासदत् । सिच्यमानोऽम्भसाराममालिकाभिरिवांहिपः ॥ २७ ॥ उपाध्यायादधीतानां, कलानां स्पर्द्धया किल । स यौवनश्रियाऽश्रायि, राजहंस्येव मानसम् ॥ २८ ॥ पितृभ्यां कारितातुच्छमहोत्सवपुरस्सरम् । कन्यां पद्मावतीं पर्यणयत्स धरणेन्द्रवत् ॥ २९ ॥ आरामसूस्तया सार्द्धं, भुञ्जन् भोगानभङ्गुरान् । समयं व्यतिचक्राम, यथा शच्या शचीवरः ॥ ३० ॥ सुस्वामिनेव मधुना, नन्दितां सकलां प्रजाम् । अथ व्यथयितुं प्राप्तो, भीष्मो ग्रीष्मः कुमन्त्रिवत् ॥ ३१ ॥ तस्मिन्नवसरे सूरे, ललाटंतपताङ्गते । नर्मदाजलकेल्यर्थं, वनसूः सप्रियो ययौ ॥ ३२ ॥ तयोः कुर्वाणयोर्वारिक्रीडां पद्मावती ततः । तरत्सरिज्जलेऽपश्यद्धंसवत्पुष्पकञ्चुकम् ॥ ३३ ॥ ऊचे च नाथ ! पश्येदं, वासयन्नर्मदाजलम् । कथं स्रोतोऽन्तरे याति ? प्रसून-

मयकञ्चुकम् ॥ ३४ ॥ तदिदं मम जीवेश ! समानीय समार्पय । एतस्य परिधानायोत्कण्ठितं वर्त्तते मनः ॥ ३५ ॥ प्रियेऽगाधे जले गच्छदेतदादीयते कथम् ? । इत्युक्ता तेन सा स्माह, तर्हि स्तान्मे गतिर्मृतिः ॥ ३६ ॥ बालानामबलानां च, दुर्निवार्यः कदाग्रहः । इति ध्यात्वा जिघृक्षुस्तत्, तरणीमारुरोह सः ॥ ३७ ॥ यथा यथा ययावस्य, पृष्ठे श्रेष्ठितनूद्भवः । तथा तथा पुरः पुष्प–कञ्चुकोऽपि स्म गच्छति ॥ ३८ ॥ स्पर्द्धयेव तयोरेवं, गच्छतोरभवन्निशा । तदा स कञ्चुकोऽप्यस्थाज्जातश्रम इव क्षणम् ॥३९॥ यावदारामसूस्तस्या–ऽऽदाने प्रासारयत् करम् । तावत्तत्कञ्चुकशिराः, काचित्स्त्री निरगाज्जलात् ॥ ४० ॥ अहो ? ? कथमसौ योषिदकस्मात् प्रकटाऽभवत् । इति ध्यायन् क्षणं तस्थौ, विस्मितो वनन्दनः ॥ ४१ ॥ पश्यामि कौतुकं तावदेषा योषा क यास्यतः । विमुच्य नाविकं नावं, तत्पृष्ठेऽथ चचाल सः ॥४२॥ साऽपि श्रीकालिकादेव्या, गृहे नद्यास्तटस्थिते । वेगाज्जगाम तां चान्वगच्छदारामनन्दनः ॥ ४३ ॥ साऽपि तं कञ्चुकं देवीं, परिधाप्य ममाऽधुना । कल्याणकारिणी भूया, इत्युक्त्वा च नमोऽकरोत् ॥ ४४ ॥ ततः स्थानाद्विनिर्गत्य, वनिता सा कचिद्ययौ । देव्या निर्माल्यमित्येतत्, सोऽपि कञ्चुकमाददे ॥ ४५ ॥ तल्लाभमुदितो यावदागमत्तटिनीतटम् । तावत्तत्र ददर्शासौ, न नावं नैव नाविकम् ॥ ४६ ॥ इतस्ततो भ्रमन्नुच्चैः शब्दयन्नाविकं हि सः । तत्प्रवृत्तिमजानंश्च, चेतस्येवमचिन्तयत् ॥ ४७ ॥ अहो ! ! स दुष्टो मां मुक्त्वा, काऽपि दुर्जनवद्गतः । अहं तु पूर्णकामोऽपि, कगच्छाम्यधुना निशि ? ॥ ४८ ॥ ततो भयद्रुतः कापि, पुरबाह्यप्रपागृहे । सोऽस्वाप्सीत्तत्र च स्तेनाः, पर्यटन्तः समी-

यतः ॥ ४९ ॥ तेष्वेकः स्माह भोः ! पुष्प–सौरभ्यादनुमीयते । कोऽपि भोगी पुमान् कान्तायुतः सुप्तोऽत्र वर्तते ॥५०॥ तत्सज्जीभूय व(वृ)न्देन, गृह्णीत गृहमेधिनम् । यथाद्याऽभीष्टलाभेनास्माकं स्यात्सफला निशा ॥ ५१ ॥ इत्यालोच्य प्रविश्यान्तस्तस्करास्तमशोधयन् । धनाप्राप्त्या च तल्लात्वा, कञ्चुकं द्राग् विनिर्ययुः ॥ ५२ ॥ जाते दिनोदये सुप्तोत्थित उद्याननन्दनः । तज्जीवितमिवापश्यन्महामोहमुपेयिवान् ॥५३॥ गतमूर्च्छस्ततो मुञ्चन्निःश्वासान् पुष्पकञ्चुकम् । प्रपादिकेषु स्थानेषु, शोधयन्नपि नाप सः ॥ ५४ ॥ तं विनाऽहं कथं पत्न्या, दर्शयामि स्वमाननम् ? । स तु विज्ञायते गन्धात्कल्पद्रुसुमनोमयः ॥ ५५ ॥ अतः सोऽब्दशतेनापि, नाप्नोतिम्लानतां ततः । शोधयामि पुरग्रामा–रामादींस्तस्य लब्धये ॥ ५६ ॥ इत्यालोच्य स आरामनन्दनो नन्दनोपमैः । वनैर्मण्डितमाविक्षद्रमानिलयपत्तनम् ॥ ५७ ॥ पश्यंस्तस्य श्रियं स्वर्ग–सदृशीं श्रेष्ठिनन्दनः । अभ्रंलिहेऽर्हत्सदने, जिनेन्द्रान् वन्दितुं ययौ ॥ ५८ ॥ तत्र नानास्तवैर्देवान्, वन्दमानो धनात्मजः । सागरश्रेष्ठिना पूर्वायातेन ददृशे मुदा ॥ ५९ ॥ स देववन्दनाप्रान्ते, सागरेणेत्यभाष्यत । साधर्म्मिक ! नमस्तुभ्यं, समेहि सदने मम॥ ६० ॥ ततस्तेन गृहे नीत्वा, रामसूः स्नानपूर्वकम् । भोजितो भाषितश्चैवं, सुतवत्तुल्यस्यमच्छ्रियः ॥ ६१ ॥ पितुर्गृहमिवामुष्मिन्नुषिते सागरौकसि । शीतीकर्त्तुं महीं ग्रीष्मप्रतप्तां प्रावृडाययौ ॥ ६२ ॥ यस्यां सकन्दला भूमिर्भृशं सकलुषा नदी । श्यामा जलदमाला च, समजायन्त न प्रजाः ॥ ६३ ॥ तदा पट्टगजः श्रीमल्लक्ष्मीधरधरापतेः । सरोवरे पयः पीत्वा, व्यावृत्तः कर्दमेऽपतत् ॥ ६४ ॥ आधोरणैर्महामात्यैः, पौरैर्नर-

वरेण च । सिन्धुरो नोद्धृतः पङ्कादुपायैर्विहितैरपि ॥ ६५ ॥ पङ्कान्निष्कासयत्येनं, गजं यस्तस्य वाञ्छितम् । ददामीति नृपो द्रङ्गे, पटहं पटुवीवदत् ॥ ६६ ॥ तच्छ्रुत्वा वनजोऽस्प्राक्षीत्पटहं पटुधीस्ततः । उपभूपमयं निन्ये, धराधिपतिपूरुषैः ॥ ६७ ॥ नृपं प्रणम्य स स्माह, राजन् ! पङ्कगजोद्धृतौ । सहायिनं मदादेश–करं मन्त्रिणमादिश ॥ ६८ ॥ ततः पद्मश्रियः सूनुर्नरेन्द्रादिष्टमन्त्रिणा । समं तत्र ययौ यत्र, निमग्नोऽस्ति महागजः ॥ ६९ ॥ आकण्ठमग्नं सीत्कारान्मुञ्चन्तमबलाङ्ककम् । जाङ्गुलीस्तम्भितं नागमिव नागं ददर्श सः ॥ ७० ॥ मन्त्रिणा तस्य नागस्य, शतहस्तमितां भुवम् । पङ्केष्टकाभिरभितो, बन्धयामासिवानसौ ॥ ७१ ॥ धिषणागोचरं कार्यं, कथं कर्त्तेति ? सादरम् । विदुरैर्वीक्ष्यमाणोऽसा–वादिशन्मन्त्रिपुङ्गवम् ॥ ७२ ॥ यदमुष्य गजेन्द्रस्य, बलसम्पत्तिहेतवे । शल्लक्याद्यशनं देहि, तेनापि विदधे तथा ॥ ७३ ॥ तद्गजाध्यासितं स्थानं, सरसो वनसूस्ततः । सारिणीवारिणा पूर्वं, तूर्णं कारयति स्म सः ॥ ७४ ॥ सुधीर्निर्मापितोदारस्फारशृङ्गारसारया । करिण्या करिणं स्वीय–करेणास्पर्शयच्छनैः ॥ ७५ ॥ शल्लक्या अशनोद्भूत–बलो मदकलोऽथ सः । जलाप्लावितजंबालबन्धमुक्तोऽभवद्द्रुतम् ॥ ७६ ॥ वशाङ्गस्पर्शसञ्जातस्मरोल्लासमहोद्यमः । तां रिरंसुरसौ हस्ती, समुत्तस्थौ शनैः शनैः ॥ ७७ ॥ अरे निषादिनो ! नीरान्मन्दं कुषत हस्तिनीम् । तैरप्येवं कृते दन्ती, तां सरोद्रेकतोऽन्वगात् ॥ ७८ ॥ आकृष्टिविद्ययेवेत्या–कृष्यमाणं मतङ्गजम् । वनजो जनयंश्चित्रं, निनाय गज-

---

१ समं.

शालिकाम् ॥ ७९ ॥ धिषणा धिषणस्यापि, जयिन्यस्येति पूर्जनः । लक्ष्मीधरधराधीशपुरो वनजमस्तवीत् ॥८०॥ तद्बुद्धिरञ्जितो राजा, समाकार्य स्वसन्निधौ । तस्मै प्रसादं पश्चाङ्गं, दत्वा प्रोचे वरं वृणु ॥ ८१ ॥ सागरश्रेष्ठिनं तत्रानाय्य काननसूरपि । नृपं व्यजिज्ञपदेव, ! दीयतामस्य मद्वरः ॥ ८२ ॥ लक्ष्मीधरधरेशोऽपि, वनसूवचसा मुदा । सागरश्रेष्ठिनः श्रेष्ठिपदं तदुचितं ददौ ॥ ८३ ॥ राज्ञोऽनेन पदं मह्यं, दापितं तदमुष्य हि । अहमप्यात्मनः कन्यां, दत्वाऽस्मै स्याङ्किलानृणः ॥ ८४ ॥ इति ध्यात्वा तथाऽभ्यर्थ्य, कन्यां यच्छन् स सागरः । जगदे वनपुत्रेण, तताग्रे मेऽस्ति वल्लभा ॥ ८५ ॥ प्रतिपन्नः पिता त्वं मेऽतस्ते कन्या मम स्वसा । पदं दत्ते ह्यसन्मार्गे, सुविचारः कथं ? पुमान् ॥८६॥ अन्यदा वार्द्धियात्रायै, पोतान् प्रगुणितानसौ । विलोक्य सागरं स्माह, तात ! वित्तं प्रयच्छ मे ॥ ८७ ॥ तल्लाभोऽपि त्वया ग्राह्यः, केवलं कौतुकं मम । ततः स सागरस्तस्मै, लक्षमेकमदाद्धनम् ॥ ८८ ॥ भूरिशो व्रीहयश्चाष्टौ, महिष्यो मुग्धदुग्धदाः । पदार्थाः शर्कराचन्द्र–पूगनागलतादयः ॥ ८९ ॥ मुशलोदूखले यन्त्राष्टकं व्रीहेश्च पिष्टये । रन्धनाय तथा स्थाल्यो, वस्तुभोगोपयोगि च ॥ ९० ॥ शस्त्राणि वरवस्त्राणि, भल्लाभल्लाष्टकं पृथक् । अङ्गशुश्रूषिकाचार्द्ध,- वृद्धा खेका पुरन्ध्रिका ॥ ९१ ॥ ससश्वेतपटोपेतः, पोतो भाटककर्म्मणा । एतानि तेनोपात्तानि, लक्षैकद्रविणव्ययात् ॥ ९२ ॥ चतुर्भिः कलापकम् । महेभ्यैरपरैर्यानपात्राणि विविधैरपि । क्रयाणकैरपूर्यन्त, परतीरोपयोगिभिः ॥ ९३ ॥ आरामसूस्तु सर्वेषां, हसतां पुरवासिनाम् । समक्षं स्थापयामास, व्रीह्यादि निजवाहने ॥ ९४ ॥ ततः सागरमापृच्छ्य,

शुभेऽहनि वनाङ्गभूः । पोतमारोहदन्येऽपि, स्वं स्वं वाहनमाश्रयन् ॥ ९५ ॥ शुभे मुहूर्त्ते वाते च, वर्त्तमाने नियामकैः । कृतकोलाहलैः पोताः, समपूर्यन्त वेगतः ॥ ९६ ॥ यान्त्यब्धौ यानपात्राणि, धनुर्निर्मुक्तकाण्डवत् । क्वाप्यनूपे महाद्वीपे, स्थापितानि नियामकैः ॥ ९७ ॥ ततोऽवतीर्य द्वीपस्थकूपेभ्यो मिष्टमम्बु ते । स्वजीवितमिवादाय, भाण्डेषु निदधुस्तराम् ॥ ९८ ॥ अहंपूर्विकया लोकाः, पोतानापूरयन् रयात् । नवरं वनजन्मा तु, स्थितस्तत्र स्वगेहवत् ॥९९॥ किं न संवाहयस्यात्मपोतं शुभमतेऽधुना । इति पोतवणिक्पुत्रैः, प्रोक्तोऽसौ तानभाषत ॥ १०० ॥ मान्द्यादहं शरीरस्य, स्थाता यूयं तु गच्छत । तैरूचे पालयिष्यामो, भवन्तं सहगामिनम् ॥ १०१ ॥ भ्रमिर्मम वपुष्येति, पोतेऽनारूढपूर्विणः । समरे कातरस्येव, तत्काले गन्तुमुत्सहे ॥ १०२ ॥ इतः पुरः पदमपि, गन्तुं नेशः प्रयात तत् । बलमानास्तु गच्छेयुर्मां सहादाय सह्याः ॥ १०३ ॥ सप्रेम समुदीर्येति, विसृष्टास्तेन ते ततः । प्रस्थाय स्वस्वयातव्यद्वीपेषु क्षेमतोऽगमन् ॥१०४॥ अथारामसुतस्तत्र, महालाभं स आत्मनः । जानानो वाहनाद्वस्तु, स्वभृत्यैरुदतारयत् ॥१०५॥ सर्वतो द्वीपमालोक्य, स्वस्मै गेहानकारयत् । भृत्यानां नातिदूरे च, सुधीर्दिक्षु विदिक्षु सः ॥ १०६ ॥ दासान् स प्रेरयामास, व्रीहिपेषणहेतवे । दासीश्च तन्दुलान् कर्त्तुं, सैरिभीदोहनाय च ॥ १०७ ॥ रन्धनादिक्रियातस्तद्द्वीपं ग्रामोपमामगात् । तेषां च पायसाशित्वान्नित्यं शकुनपूर्णिमा ॥ १०८ ॥ सोऽन्यदाब्धितटे सायं, भ्रान्त्वा किञ्चिद्विचिन्त्य च । दासेभ्यो वार्द्धि(सैरुदधि)वेलायां, कोष्णां रक्षामचिक्षिपत् ॥१०९॥ तद्रसगन्धमाघ्रातुं, यादांस्यायान्ति यान्ति

च । कण्डू स्फोटयितुं तत्र, निर्भयं विलुठन्ति च ॥ ११० ॥ वासितं घनसाराद्यैर्दधिकूरकरम्भकम् । ताम्रपात्रे निधा-
यैष, तत्र चास्थापयत्स्वयम् ॥ १११ ॥ ततो जलचरा घ्राणमूर्द्धयित्वास्य सौरभम् । आघ्रातुं समुपायान्ति, कमलं
भ्रमरा इव ॥११२॥ भूयो भूयः समायातो, विश्वस्तांस्तलिहश्च तान् । दिनैः कतिपयैरेष, निर्भीकानकरोत्तराम् ॥११३॥
क्रमेण स स्वकं गन्धं, साद्दयन् स्थालिकां करे । निमज्ज्य जोयक्रमात्, करम्भं तान् सुतानिव ॥ ११४ ॥ अथ यादः
पुमानेकस्तरस्वी स च लोलुपः । अन्येभ्यः पूर्वमेवैत्य, स्थाल्यां स्वकरमक्षिपत् ॥ ११५ ॥ अस्मिन्नवसरे पाणिर्वनजेन
प्रसारितः । तन्नावज्ञेन तेनापि, झम्पापातः कृतोऽर्णवे ॥ ११६ ॥ अन्यान्यायान्ति यादांसि, नास्त्यद्याशनमित्यसौ ।
निवा(विचा)र्य दाम्भिको रत्नकरस्तत्पार्श्वमीयिवान् ॥११७॥ वनसूनोः करे रत्नं, तद्दत्वास्थालिकास्थितम् । भुक्त्वाऽऽ-
कण्ठं करम्भं च, सोऽस्प्राक्षीदुदरं मुदा ॥११८॥ तदनर्घ्यं महारत्नं,निरीक्ष्य वननन्दनः । आगान्मुदमुपाये हि,सिद्धे कः
स्यान्न हर्षभाक् ? ॥ ११९ ॥ तद्यादश्चेष्टितं दृष्ट्वाऽन्येऽपि नक्रा महोदधेः । रत्नान्यानीय दत्वा च, तस्माद्यादुः करम्भ-
कम् ॥ १२० ॥ उपायेनाऽमुना तेनानाय्य रत्नानि भूरिशः । आर्द्रच्छगणकेष्वन्तः, क्षिप्तान्येकैकशः क्रमात् ॥ १२१ ॥
स रत्नानामरत्नानां, छगणानां पृथक् पृथक् । राशिद्वयं स्वयं कृत्वा, रक्षति स्म सदैव सः ॥ १२२ ॥ अथासौ वनजे
पुष्पकन्दुकादानहेतवे । उत्तीर्णे नाविको नावं, बद्ध्वास्थाप्सीन्नदीतटे ॥ १२३ ॥ नर्म्मदाश्रोतसा च्छिन्नबन्धना प्रेरिता-
ऽधिकम् । सा नौः स नाविकोऽम्भोधावपतद्विधियोगतः ॥ १२४ ॥ सिन्धूर्मिहन्यमानां तामनूपद्वीपमागताम् । प्रसृ-

मिव निरीक्ष्यैष, धनजः सम्मुखं ययौ ॥ १२५ ॥ आलिङ्ग्य बन्धुवत्स्नेहादुत्तीर्णं नाविकं ततः । आनीय धनसूर्गेहे, शाल्योदनमभोजयत् ॥ १२६ ॥ नाविकेन स्ववृत्तान्ते, कथिते धनसूरपि । रत्नासिवर्जं स्वं वृत्तं, तत्पुरः प्रत्यपादयत् ॥ १२७ ॥ अथोपार्जितवित्तास्ते, निवृत्ताः पोतगैर्ममाः । स्मृतसन्धास्तदैव द्रागनूपद्वीपमैयरुः ॥ १२८ ॥ तत्र ते नीरमादाय, चलन्तः स्वपुरं प्रति । आह्वयन् धनजं सोऽपि, तदैव प्रगुणोऽभवत् ॥ १२९ ॥ नावि पोते च सोऽरत्नान्, सरत्नांश्छगणान् क्रमात् । भृत्येभ्यः स्थापयन्नेवं, तैरुक्तः किमिदं हि भो? ॥ १३० ॥ सागरश्रेष्ठिनो वित्तमुपाया भाषतोऽधिकम् । अविज्ञेन मया भद्र, भाग्येनेव भक्षितम् ॥ १३१ ॥ त्यक्तास्छगणका? ह्यत्रोपयुज्यन्ते क्व निर्जने । अतः सहैव नीयन्ते, धनसूरित्युवाच तान् ॥ १३२ ॥ युग्मम् । तेऽपि स्माहुः त्यजैतांस्त्वं, गृहीत्वाऽसत्क्रयाणकम् । स्वपोते स्थापय क्षिप्रं, दास्यामस्तव भाटकम् ॥ १३३ ॥ एवमज्ञाततत्त्वैस्तैर्हसितोऽपि स्वपोतकम् । आरूढो वणिजैः सार्द्धं, सोऽचालीत्स्वपुरं प्रति ॥ १३४ ॥ व्रजतां यानपात्राणामर्द्धमार्गे महोदधेः । दुर्दैववशतो वातो वाति स्म प्रातिकूलिकः ॥ १३५ ॥ तेनेरितानि तानि द्राग्, भ्रश्यत्सितपटानि हा । निपेतुर्मण्डलावर्त्ते, कैवर्त्तैर्धारितान्यपि ॥ १३६ ॥ तत्र भ्रमत्सु पोतेषु, तेषु सांयात्रिकाशिनाम् । इन्धनं हि व्ययीभूतं, बहुकालव्यतिक्रमात् ॥ १३७ ॥ अत्र सांयात्रिकैस्तस्माच्छगणेष्वर्थितेषु सः । स्माह नैतानि विक्रीणे, रिक्तोऽपोतो हि मज्जति ॥ १३८ ॥ अपक्वान्नादनादेते, सञ्जातजठरार्त्तयः । पुनस्तमवदन् स्वेन, यच्छैतानि न सोऽप्यदात् ॥१३९॥ तन्मध्यान्मुखरस्त्वेकः, स्माहोद्धारेण देहि नः ।

चतुर्गुणान् प्रदातारो, भवते स्वपुरं गताः ॥१४०॥ स प्रोचे यादृशान्यत्र, गृह्णीध्वं च्छगणानि भोः ! । तादृंस्येव प्रदेयानीत्यर्थे मे दत्त पत्रकम् ॥ १४१ ॥ शुश्रुतान्यच्च किञ्चिन्मे, पण्यं प्रहणके यतः । लज्जा न कार्या विज्ञेन, व्यवहारं प्रकुर्वता ॥ १४२ ॥ तथेति प्रतिपन्नेऽस्य, वाक्ये तैर्वननन्दनः । प्रतिभूसहितं पत्रं, तेभ्यो वेगादलीलिखत् ॥ १४३ ॥ आख्यच्च पोते तयोँ च, सन्ति च्छगणका हि मे । यथास्वैरमुपादत्त, सङ्ख्यालेखनपूर्वकम् ॥ १४४ ॥ आलस्याधानपात्रात्ते, च्छगणाँल्लातुमक्षमाः । तरीतो जगृहुः सर्वानज्ञानां हि कुतो मतिः ? ॥ १४५ ॥ ज्वालयित्वाऽथ तद्रक्षां, क्षिपन्तोऽम्भसि वारिधेः । स्वात्मानं नैव जानन्ति, वञ्चितं हि जडाशयाः ॥१४६॥ अभविष्यन्न चेदस्य, पार्श्वे च्छगणराशयः । प्राणिष्यामः कथं चात्रेत्यमुन्ते समवर्णयन् ॥ १४७ ॥ दैवेनैवानुकूलेनानिलेन प्रेरितास्ततः । वणिजः पूरयामासुराशु पोतान् पुरं प्रति ॥ १४८ ॥ क्रमेण यान्तस्ते निष्ठाप्रापितच्छगणोत्कराः । स्वपुरोपान्तपाथोधेस्तीरं प्रापुः प्रहर्षिताः ॥१४९॥ केचिदुत्तीर्य पोतेभ्यः, स्वेच्छयेभ्यानवर्द्धयन् । ते (तत) सम्मुखमाजग्मुः, कारयित्वा महोत्सवम् ॥ १५० ॥ क्रयाणकानां कूटानि, चक्रुस्ते तोयधेस्तटे, । वनसूश्छगणानाञ्च, हस्यमानो घनैर्जनैः ॥१५१॥ सागर ! त्वद्वणिक्पुत्र, आगाच्छगणपण्यभृत् । वर्ध्यसे भो इति श्रुत्वा, नृभ्यो न स तमभ्यगात् ॥१५२॥ अथेभ्याः सारवस्तूनि, लक्ष्मीधरधराभुजे। हर्षादुपायनीचक्रुः, शुल्कस्वल्पत्वहेतवे ॥ १५३ ॥ स्वस्यमूर्द्धनि चक्रेरीं, दत्वा च्छगणपूरिताम् । दिदृक्षुर्वनजोऽपीशं, गोपुराधिपमैक्षत ॥ १५४ ॥ तेनोक्तं किमिदं ? सोऽपि, मस्तास्त्वामयत्दत्त्विति ! प्रोच्यैकं छगणं

तस्मै, दत्वा मण्डपिकामगात् ॥ १५५ ॥ तत्र पञ्चकुलायैष, दत्वा च्छगणपञ्चकम् । हसद्भिर्वेष्टितः पौरैर्द्वास्थोक्तो ऽगान्नृपान्तिकम् ॥ १५६ ॥ दृष्ट्वाऽऽयान्तं पुरायाता, इभ्या व्यज्ञपयन्नृपम् । अहो वाणिज्यचातुर्यं, पश्यारामभुवो विभो ! ॥ १५७ ॥ चक्रेरीं मोचयित्वाग्रे, धराधीशं ननाम सः । तद्दापितासने सिंह, इवोपविशति स च ॥ १५८ ॥ मौक्तिकादीनि वस्तूनि, ढौकितानि धनेश्वरैः । पश्यन् महीपतिर्दृष्टिं, छगणस्थानके न्यधात् ॥ १५९ ॥ आश्चर्यामर्षवान् भूपो, बभाषे भो ममाग्रतः । वणिजा केन दुष्प्रापमुपायनमिदं धृतम् ? ॥ १६० ॥ कृताञ्जलिः प्रतीहारः, प्रोचे वनभुवाऽमुना । तञ्च दृष्ट्वाऽस्मरद्राजा, तन्मतिं दन्तिरक्षिकाम् ॥ १६१ ॥ निरर्थकं न चेष्टेत, मतिमानीदृशो जनः । इति ध्यात्वा नृपः पाणावेकं छगणमाददे ॥ १६२ ॥ तदारामसुते हृष्टेऽन्येषु स्मितमुखेषु च । खण्डिताच्छगणाद्दाविर्भूतं रत्नं नृपोऽग्रहीत् ॥ १६३ ॥ अन्यान्यपि द्विधाकृत्य, नृरत्नं रत्नसञ्चयम् । आददानो मुदं भेजे, खेदं च हसज्जनः ॥१६४॥ रत्नोद्योतेऽपि सर्वत्र, भूतले प्रसृते सति । सांयात्रिकजनश्चित्रमजायत तमोमयः ॥१६५॥ प्रमोदवानथो नाथोऽपृच्छत्तं स्वागतं तव ? । सोऽपि स्माह महाराज ! तदस्ति त्वत्प्रसत्तितः ॥१६६॥ राजा पप्रच्छ किं सर्वमपि पण्यं तवेदृशम् ? । आमेत्युक्त्वा स आरक्षादिभ्यच्छगणमानयत् ॥ १६७ ॥ वणिजां हृदयानीव, बिभेद च्छगणानि सः । रत्नानि दर्शयित्वा च, नृपमेवमवोचत ॥ १६८ ॥ कृत्वा प्रसादं भूपालवेलाकूलमहीतलम् । सनाथीक्रियतामस्मन्मनः सन्तुष्टिपुष्टये ॥ १६९ ॥ तदुक्तिरञ्जितो राजा, सांयात्रिकजनैः सह । पट्टवाजिनमारुह्य, वेलाकूलं ययावयात् ॥ १७० ॥

धनसूनोर्भयादन्ये, परिम्लानानना जनाः । यथावद्दर्शयामासुः, स्वं स्वं भाण्डं भुवो विभोः ॥ १७१ ॥ पश्यन् भाण्डानि सर्वेषां, चक्षुषा क्षणवीक्षिणा । वेगवदागादयं राजा, यत्रास्ते च्छगणोच्चयः ॥ १७२ ॥ धनाङ्गजेन भूजानिश्छगणान् अविदर्शि ताम्रं । [illegible] रत्नाकरं, राशिं रोहणसन्निभम् ॥ १७३ ॥ अथारामभुवोद्धारपत्रं राज्ञे प्रदर्शितम् । नृपोऽप्युवाच ते वित्तमेतेभ्यो दापयामि किम् ? ॥१७४॥ विशालबुद्धिजोऽप्यूचे, देवैते यदि मे धनम् । लभ्यं दास्यन्ति नो तर्हि, पुरा विज्ञपयाम्यहम् ॥ १७५ ॥ सर्वेषां वणिजां दानमुक्तिं धनभुवोऽपि च । प्रासादद्वारमाधायागाद्राजा राजमन्दिरम् ॥ १७६ ॥ ततो धनसुतोऽनांसि, भृत्वा रत्नैरनेकशः । याचकेभ्यो ददद्दानमागात्सागरमन्दिरम् ॥१७७॥ सागरोऽपि त्रपामन्दानन्दाभ्यां युगपद्धृतः । अभ्यागच्छन्नमश्रके, वक्रेतरहृदाऽमुदा ॥ १७८ ॥ श्रेष्ठिना कुशलप्रश्ने, कृते स रचिताञ्जलिः । प्रोचे तात ! भवत्पुण्यक्रीताः स्वीक्रियतां श्रियः ॥ १७९ ॥ सागरोऽपि हि तद्वाक्यं, गुरुवाक्यमिवानघम् । मेने को हि रमां रामामिवायान्तीं निवारयेत् ? ॥ १८० ॥ अथापरैर्वणिक्पुत्रैर्वृत्ते स्वे व्यवहारिणाम् । वज्रपात इव प्रोक्ते, ते चिन्तासागरेऽपतन् ॥ १८१ ॥ ततः सम्भूय सम्भूय, सर्वेऽपि व्यवहारिणः । विमृश्य किमपि स्वान्ते, सागरागारमैयरुः ॥ १८२ ॥ तानिभ्यानभियाति स्म, श्रेष्ठी धनसुतान्वितः । आसनेषु निवेश्याथाप्रच्छदागमकारणम् ॥ १८३ ॥ तेऽप्यासनात्समुत्थाय, संयोज्य करपल्लवान् । भृत्या इव पुरोभूय, धनसूनोरुपाविशन् ॥ १८४ ॥ अतिदीनगिरस्त्वेवं, प्रोचुस्तद्वारिता अपि । तद्रहस्यमजानानाश्छगणान् जगृहुर्जनाः ॥ १८५ ॥ रक्षा च वारिधौ

क्षिप्ता, रत्नवार्त्तापि? न श्रुता । तवैकरत्नमूल्यं न, प्राप्नुमो वयमप्यहो ॥ १८६ ॥ दृष्ट्वाक्षराणि पत्रस्य, विच्छायवदना वयम् । अननुज्ञाप्य तत्त्वा नो नयामः पण्यसालये ॥ १८७ ॥ त्रिशुध्यापि हि रत्नानां, शुद्धिश्चेत् ज्ञायते ततः । यत्त्वं वक्षि तमेवात्र, शपथं कुर्महेऽनघ ! ॥ १८८ ॥ स्वरूपं रूपाणानां स, ज्ञात्वार्द्धिर्दम्भमानसः । कश्चकार्थी हि तल्लिप्सा- मुक्तः स्मित्वेत्युवाच तान् ॥ १८९ ॥ हंहो दुर्गतवचूयं, दीनं किमिति जल्पत? । यतोऽभीष्टा वसुभ्योपि, तन्मा कुरुत मद्भयम् ॥ १९० ॥ तद्दत्तं पत्रकं भित्त्वा, निर्भयान् प्रविधाय सः । ताम्बूलाद्यैश्च सत्कृत्य, कृत्यविद्विससर्ज तान् ॥ १९१ ॥ गुणव्यावर्णने तस्य, श्रयद्भिर्बन्दिनां पदम् । तदादेशादुपानिन्ये, भाण्डं तैः स्वस्ववेश्मनि ॥ १९२ ॥ कष्टोपार्जितवित्तानां, दानभोगैरभङ्गुरैः । साफल्यं कुरु वत्सेति, धनजं सागरो जगौ ॥ १९३ ॥ धनजोऽप्यब्रवीत्तात ! पुष्पकञ्चुकहेतवे । भ्राम्यंस्तत्राप्नुवं बोधिबीजं भव्येतरो यथा ॥ १९४ ॥ अध्यारोहमहं पोतं, दुःखस्यापोहहेतवे । किन्तु रत्नान्युपार्ज्योर्वीशादिस्वान्तमरञ्जयम् ॥ १९५ ॥ शुभ्रीकृतं जगत्सर्वं, यशस्तुहिनरश्मिना । तथाऽपि नाभू- त्तत्प्राप्तिर्धर्म्मे यत्नं करोम्यतः ॥ १९६ ॥ इति सद्वासनोल्लासाच्चैत्येषु श्रीमदर्हताम् । अष्टाह्निकामहं शक्र इव चक्रे धनात्मजः ॥ १९७ ॥ वित्तव्ययेनामारिं सोऽघोषयत्सकले पुरे । अवारितं महादानपटहं पटुवीवदत् ॥ १९८ ॥ कारागाराद्भूरिभा(सा)रैरमोचयदयं नरान् । रोमाञ्चितश्च सत्साधूनन्नाद्यैः प्रतिलाभयन् ॥ १९९ ॥ धन्योऽहं सफलं जन्म, ममेति प्रमुदं वदन् । धनजोऽपूजयत्सङ्घं, जङ्गमं कल्पशाखिनम् ॥ २०० ॥ चैत्योद्धारं जिनानां तद्बिम्बानां

स्थापनानि च । सोत्सवं कारयन् स स्वजन्मसाफल्यमातनोत् ॥ २०१ ॥ अन्यदा यामिनीयामयामले वननन्दनः । शयनीये सुखं सुप्तो, ददर्श स्वप्नमीदृशम् ॥ २०२ ॥ लक्ष्मीपुरे नर्मदायास्तीरे चन्दनदारुभिः । पद्मावती स्वभृत्येभ्यश्चितां शीघ्रमचीकरत् ॥ २०३ ॥ ततः सा स्नानमासूत्र्य, प्रासुकैर्नर्मदाजलैः । पूजयित्वा जिनेन्द्रांश्च, तस्याः पार्श्वे समीयुषी ॥ २०४ ॥ ऊचे च वारितं जैनैर्यद्यप्यग्निप्रवेशनम् । तथाप्यहं वियोगार्त्ता, प्रवेक्ष्याम्याशुशुक्षणिम् ॥ २०५ ॥ यतो मया दुष्टबुद्ध्या, कदाग्रहगृहीतया । हठात्प्रियतमः प्रैषि, पुष्पकञ्चुककाङ्क्षया ॥ २०६ ॥ यदसौ नागतोऽद्यापि, तज्ज्ञानेऽस्य शुभं न हि । यतः क्षणमपि स्वामी, न जीवति स मां विना ॥ २०७ ॥ साध्वीमपि विना पत्या, लोका अपवदन्ति हि । सभर्तृकां पुनर्नारीं, मन्यन्तेऽत्रामरीमिव ॥ २०८ ॥ अतो विशाम्यहं वह्नौ, दुःखिता मृत्यवे-ऽधुना । इत्युदीर्य स्ववर्गेभ्यः, सा चचाल चितां प्रति ॥ २०९ ॥ इति साक्षादिव प्रेक्ष्य, वनसूरुत्थितोऽवदत् । प्रिये ! मयि पुरस्थे(स्थे)ऽदः, कर्तुं युक्तं न साहसम् ॥२१०॥ तच्छ्रुत्वा सहसा तस्योत्तस्थौ परिजनोऽपि हि । किमिदं ? किमिदं ? स्वामिन्निति भ्रान्तः स्म वक्ति च ॥२११॥ रेरे भृत्या यात याताऽऽनयतात्राशु—मान्त्रिकान् । इति जल्पपरे श्रेष्ठिना(न्या)ससंज्ञः स तानवक् ॥२१२॥ साध्यं किं मान्त्रिकैरत्र, गात्रं तु पटु मेऽस्ति भोः ? । यद्दुश्चेष्टं[1] जल्पं तव, स्वभावे-शविजृम्भितम् ॥२१३॥ एवं स्ववर्गं सन्तोष्य, सोऽध्यायदधुना मम । प्रसूनकञ्चुकादानतृष्णापि विलयं गता ॥२१४॥

---

१ नहि.

यतः प्रिया वियोगान्मे, चितारूढा भविष्यति । न स्यादतर्कितस्वप्नदर्शनं हि कचिन्मृषा ॥ २१५ ॥ अतोऽहं दयिताहत्यापातकी क्वापि पर्वते । गृहीत्वाऽनशनं प्राणान्मुञ्चेयं दुर्जनानिव ॥ २१६ ॥ इति सञ्चिन्त्य चित्तेऽसौ, सागरं सुत्कलाप्य च । गतोऽद्रिं तदधो भूमिभागे योगिनमैक्षत ॥२१७॥ आरामसूस्तदभ्यर्णे, ययौ सोऽपि हि योगिराट् । सर्वलक्षणपूर्णोऽयमिति तत्संमुखं ययौ ॥ २१८ ॥ मुञ्चन्नश्रूणि सान्द्राणि, स्नेहादिव जगाद च । भद्र ! त्वमत्र मद्भाग्यैः, समाकृष्ट इवागमः ॥ २१९ ॥ सिद्धक्षेत्रेऽत्र मन्त्रस्य, पूर्वसेवा मया कृता । सत्त्वाधिकनराप्राप्त्या, नारब्धोत्तरसेविका ॥ २२० ॥ अतः पुरुषरत्न ! त्वां, याचे याचकवत्सलम् । मम साधयतो विद्यां, साहाय्याय यतस्व भोः ! ॥ २२१ ॥ इति तेनार्थितो दध्यौ, स स्वान्ते योगिनोऽस्य हि । विद्यां साधयतो भूत—वेतालादिसमुद्भवम् ॥ २२२ ॥ विघ्नादि रक्षतोऽवश्यं, मम मृत्युमनोरथः । अनायासेन भविता, परिपूर्णो न संशयः ॥ २२३ ॥ युग्मम् । इति सञ्चिन्त्य तद्वाक्ये, धनजेन प्रतिश्रुते । योगी हर्षपयोराशि—कृतस्नान इवाभवत् ॥ २२४ ॥ आदिदेश च भूतो वा, प्रेतो वा राक्षसोऽथवा । मन्त्रविघ्नकृदागच्छंस्त्वया वार्योऽत्र सात्त्विके ॥२२५॥ ततः स होमप्रायोग्य—वस्तून्यानाय्य वेगतः । खदिराङ्गारसम्पूर्णं, कुण्डमुण्डमकारयत् ॥ २२६ ॥ तत्र मण्डलमापूर्य, तं कृत्वोत्तरसाधकम् । स्मारं स्मारं तथा मन्त्रमाहुतीर्योग्यदान्मुदा ॥ २२७ ॥ क्षुब्धाया मन्त्रदेव्याः प्राग्, भूतवेतालराक्षसाः । अट्टाट्टहासं कुर्वन्तः, प्रादुरासन् दिशो दिशः ॥ २२८ ॥ तेष्वेकः सहजोत्तालो, वेतालो धननन्दनम् । उपेत्याख्यदरे दुष्ट ! !, दृष्टोऽसि क नु यास्यसि

॥ २२९ ॥ परं कुरु करे शस्त्रमभीष्टं वा स्मरास्मरम् । मम क्रोधानले भस्मी—भावं प्राप्स्यसि निश्चितम् ॥ २३० ॥
इति तेनोक्त आराम-सुतस्तं प्रत्यधावत । वेतालघातमास्खल्य, तदङ्के प्रविवेश च ॥ २३१ ॥ तेनोदग्रैर्मुष्टिघातै-
राहत्याहत्य मर्मणि । पातितो भुवि वेतालः, सिद्धस्तेऽस्मीति तं जगौ ॥ २३२ ॥ तन्मुक्तस्तमथो नत्वा, स वेतालो
व्यजिज्ञपत् । दासस्तेऽस्मि गुणक्रीतो, वद तत्किं करोम्यहम् ? ॥ २३३ ॥ वनजः स्माह वेताल,! यदा त्वां संस्मरा-
म्यहम् । तदागत्य त्वया कार्यं, साहाय्यं मम निश्चितम् ॥ २३४ ॥ तथेति प्रतिपद्यायं, नत्वाऽदृश्योऽभवत्पुनः ।
तमेत्यास इव क्षिप्रं, रहस्येवमचोचत ॥ २३५ ॥ पापिनो योगिनो वाचा, यदि भ्रान्ता हुताशनम् । तदा स्वसिद्धये
ध्वंसा, त्वामसौ दाम्भिकः स हि ॥ २३६ ॥ एवमुक्त्वा च नत्वा च, वेतालः स्वालयं ययौ । साहसी साधकोपान्ते,
वनसूरपि तस्थिवान् ॥२३७॥ अथागायोगिनाऽऽकृष्टा, मन्त्राधिष्ठातृदेवता । ऊचे चातःपरं किं ते, कुर्वे ? योगिन्!
समादिश ॥२३८॥ योग्यपि स्माह हे! देवि, साध्यः सौवर्णपूरुषः । यः कुण्डाग्नौ प्रवेश्योऽत्र, स भावी काञ्चनः पुमान्
॥ २३९ ॥ इत्युक्त्वाज्यच्छटां क्षिप्त्वा, वह्नौ देवी ययौ ततः । शिखां वनभुवो मूर्ध्नि, प्रबबन्ध स योग्यपि ॥२४०॥
युग्मम् । चर्चयामास तस्याङ्गं, रक्तचन्दनजैर्द्रवैः । कण्ठेऽक्षैप्सीत्तथा रक्त-करवीरस्य मालिकाम् ॥ २४१ ॥ भद्राग्निं
परितो भ्राम्येत्याख्यथारामनन्दनम् । त्वत्प्रभावाद्यथा विद्या, मम सिध्यति सात्त्विक! ॥ २४२ ॥ ततो वनसुतः
स्वान्ते, वेतालवचसः स्मरन् । परमेष्ठिनमस्कारं, चाभ्रमत्परितो ऽनलम् ॥ २४३ ॥ तं जिघृक्षुश्छलात्पृष्ठ-विलग्नो

योग्यपि भ्रमन् । कथञ्चिदग्निकुण्डान्तः, समुत्पाट्याक्षिपत् कुधीः ॥ २४४ ॥ उत्प्लुत्य वह्नितो देह—लावण्याङ्गजनन्दनः । दोर्भ्यां योगिनमादायाग्निकुण्डान्तरपातयत् ॥ २४५ ॥ तत्र दग्धवपुर्योगी, जातः स्वर्णपुमांश्च तम् । वनभूस्त्व-स्पृहो भूमौ, निखाय पुरतोऽचलत् ॥ २४६ ॥ याम्यां दिश्यथ गच्छन् स, योगिनीनां प्रजल्पितम् । इत्यश्रौषी-द्वलास्तत्र, विलम्बो वः किमत्यभूत् ॥ २४७ ॥ ता अपि स्वामिनीं नत्वा, प्रोचुर्भीता इव क्षणम् । अत्र नो विक-थाश्राव—चापल्यमपराध्यति ॥ २४८ ॥ योगिनीः स्वामिनी स्माह, काश्च ता विकथाः श्रुताः । ताः प्रोचुः श्रूयतां कृत्वा, प्रसादं परमेश्वरि ? ॥ २४९ ॥ मानदण्ड इव क्षोण्या, वैताढ्यो भरते गिरिः । तत्रास्ति दक्षिणश्रेण्यां, नगरी मङ्गलावती ॥ २५० ॥ विद्युन्माल्यभिधस्तत्र, खेचरेन्द्रोऽन्यदा तु सः । अष्टापदगिरिं गच्छन्, सम्प्राप्तो ह्री-पुरं पुरम् ॥ २५१ ॥ तत्रारामे सखीयुक्तां, जलक्रीडां वितन्वतीम् । महेन्द्रनृपतेर्भार्यां, सोऽद्राक्षीद्रतिसुन्दरीम् ॥ २५२ ॥ स्वैरचेष्टितमेतस्याः, कुर्वे प्राघूर्णकं दृशोः । इति शाखिशिखायां स, विद्याभृन्निभृतं स्थितः ॥ २५३ ॥ साऽथ राजप्रिया प्रोचे, क्षेमङ्करि ! मम प्रियः । कुतोऽपि कञ्चुकं पौष्यं, दुरापं प्राप्तवान्नवा ? ॥२५४॥ ततः क्षेमङ्करी स्माह, देवि ! त्वद्भाग्ययोगतः । कञ्चुकं त्वत्प्रियः प्राप, पद्मेश इव कौस्तुभम् ॥२५५॥ सा स्माह तत्कथं प्राप्तं ?, वदेति मम कौतुकम् । सख्यूचे विदधुश्चौराश्चौर्यं त्वत्पुण्यतः पुरे ॥ २५६ ॥ ते बद्धा नगरारक्षैरानीता उपभूमिपम् । नागरा अपि तान् दृष्ट्वा, नृपायेदं व्यजिज्ञपन् ॥ २५७ ॥ एतैरेव हि राजेन्द्र ! लुण्ट्यन्ते प्रत्यहं गृहाः । अतः सम्भाव्यते-

ऽमीषां, गेहेष्वसद्धनादिकम् ॥ २५८ ॥ तद्वेश्मभ्योऽथ सर्वस्वमानाय्य न्यायवान्नृपः । यद्यस्य वस्तु तत्तस्यादाद्राड्धर्मोऽयमेव हि ॥ २५९ ॥ ततो लोभात्पुरारक्षश्चौरवेश्मानि शोधयन् । अवाप कञ्चुकं देवि!, गन्धप्रीणितनासिकम् ॥ २६० ॥ स तदानीय भूपाय, ददौ तेनाऽपि वीक्ष्य तत् । आनन्दितहृदा तुभ्यं, प्रैषि प्रेमेव मूर्त्तिमत् ॥ २६१ ॥ अन्तःपुरपुरन्ध्रीणां, पश्यन्तीनामपि श्रियः । यन्मे प्रैषीत्तदित्येषा, स्वोत्कर्षान्न ममौ तनौ ॥ २६२ ॥ तामादिक्षच्च हे हञ्जे', तदानीय समर्पय । परिधाय यथास्थाने, भर्त्तुरर्द्धासनं श्रये ॥ २६३ ॥ क्षेमङ्करी तमादाय, यावदायाति गेहतः । तावत्तद्धस्ततोऽहार्षीत्कञ्चुकं स खगेश्वरः ॥ २६४ ॥ दृष्ट्वा स प्रमना जज्ञे, यद्दत्त्वैतन्निजप्रियाम् । रुष्टां सन्तोषयिष्यामि, करिष्ये च यथेप्सितम् ॥ २६५ ॥ इति सञ्चिन्त्य विद्याभृद्धत्वा वेश्मनि कञ्चुकम् । यावद्दित्सुरभूत्पत्न्यै, तावत्तस्यापरा प्रिया ॥ २६६ ॥ ज्ञात्वा कञ्चुकमानीतं, दास्या व्यज्ञपयत्प्रियम् । प्रवेक्ष्यामि चितां नूनं, नैनं चेन्मेऽर्पयिष्यसि ॥ २६७ ॥ प्रियायाः प्रार्थनामेनां, श्रुत्वा विद्याधराधिपः । भग्नपोत 'इवापसद्वापरक्षारवारिधौ ॥ २६८ ॥ परस्परं जिघृक्षू द्वे; सपत्न्यौ पुष्पकञ्चुकम् । वार्यमाणे प्रियेणान्यैरपि नो तस्थतुस्तराम् ॥ २६९ ॥ न भोजनं न शयनं, कुर्वाणे तद्ग्रहेच्छया । विद्याधरः प्रिये वीक्ष्य, चिन्ताचिंत्तो व्यचिन्तयत् ॥२७०॥ दास्ये कञ्चुकमेकस्यै, तदाऽन्याऽसून् विमोक्ष्यति । अयञ्च मत्कृतोऽनर्थो, भावी दुर्यशसा सह ॥ २७१ ॥ तदहं क्वापि मुक्त्वैनं, यामीति कृतनिश्चयः ।

---

१ प्रहान्तः प्र. २ चिन्ताचान्तः प्र.

खेचरेन्द्रोऽष्टापदाद्रौ, ययौ देवान् विवन्दिषुः ॥ २७२ ॥ वृत्तान्तमेतत् शृण्वन्त्यः, स्थितास्तत्र वयं चिरम् । प्रसीदातो ऽपराधं नः, क्षमस्व परमेश्वरि ! ॥ २७३ ॥ इति तद्वाक्यमाकर्ण्य, वनसूनुरचिन्तयत् । स कञ्चुकोऽस्ति मेऽद्यापि, वैताढ्ये किन्तु दुर्लभः ॥ २७४ ॥ यत्कृते कञ्चुकादानं, क्रियते सा प्रिया मृता । तत्साम्प्रतं कृतं कान्ता–घातपात-किनाऽमुना ॥ २७५ ॥ अतो व्याघुट्य निश्येव, यामि यत्र स योगिराट् । मयाऽसौ पातितस्तत्र, विशाम्यहमपि द्रुतम् ॥ २७६ ॥ ततस्तत्पार्श्वमागत्य, स्मृत्वा पञ्चनमस्कृतिम् । आलोच्य पापस्थानानि, क्षमयित्वाऽसुमद्गणम् ॥ २७७ ॥ पुण्यानुमोदी यावत्स, प्रवेष्टा वनजोऽनलम् । तावत्तदग्रतो लेखः, पपात सविधद्रुमात् ॥२७८॥ युग्मम् । तं लेखं समुपादाय, पाणिनोन्मुद्र्य च क्षणात् । साश्चर्यचेता आराम–तनुभूरित्यवाचयत् ॥ २७९ ॥ स्वस्ति-लक्ष्मीपुरात् श्रीमान्, श्रीविक्रमनरेश्वरः । क्वापि स्थाने यथानाम्नि, "प्रीत्यालिङ्ग्य वनात्मजम् ॥२८०॥ समादिशति ते कान्ता, त्वद्वियोगाद्धुताशने । प्रविशन्ती मयाऽवार्यवधीकृत्याष्टवासरीम्" ॥२८१॥ अतो लघु त्वयैतव्यं, मया च तव शुद्धये । सर्वत्र प्रहिताः सन्ति, शुकशाखामृगादयः ॥ २८२ ॥ तत्करे प्रतिलेखस्तु, प्रेष्योऽस्यतत्तुष्टिपुष्टये । इत्यर्थमधिगत्यासौ, पुनरेवमचिन्तयत् ॥ २८३ ॥ अहो !! परोपकाराय, सतां धीर्यन्मम प्रिया । वह्नौ विशन्ती भूपेन, रक्षिता जीवितोऽस्मि च ॥२८४॥ स्वप्नोऽपि सूनृतः सोऽभूद्यो दृष्टः श्रेष्ठिमन्दिरे । तन्मन्ये दर्शितोऽभीष्ट–देव्या मे सुप्रसन्नया ॥ २८५ ॥ कथं व्योम्नोऽपतल्लेख, इति वृक्षं दृशा स्पृशन् । शाखामृगं ददर्शासौ, सोऽपि तं प्रणनाम

च ॥ २८६ ॥ तमालिङ्ग्य मुदा तेनाचिन्त्यद्यापि च यत्प्रिया । ममापि कञ्चुकस्याऽपि, प्रवृत्तिर्दैवयोगतः ॥ २८७ ॥ यद्यानीयाधुना पत्न्यै, कञ्चुकं न ददाम्यहम् । तदा तस्या ध्रुवं मृत्युर्भविष्यति ममापि च ॥ २८८ ॥ अतो नृपाय कौशल्य–पिशुनं पत्रकं लघु । लिखित्वा प्राहिणोद्यासैः, क्रोडाहरिकरेऽर्पये ॥ २८९ ॥ यथा तद्दर्शनाद्राजा, मृत्युतस्तां निषेधयेत् । तथा कृत्वा स तं प्रैषीत्कञ्चुकायाचलत्स्वयम् ॥ २९० ॥ व्यन्तरान् वानरीभूय, क्रीडतः काननेऽन्यदा । दृष्ट्वा तेषां तु कापेय–चापलं स विसिष्मिये ॥ २९१ ॥ एकः कालमुखाभिख्यस्तेषु राजपदं श्रितः । सामन्तामात्यपादात–पदस्थैर्वानरैर्वृतः ॥ २९२ ॥ द्वारपालं समादिक्षदरे ! ! सूत्रकृतः स्वयम् । गत्वा कारय दारूणां, केकिनः कीलिकाङ्कितान् ॥ २९३ ॥ युग्मम् । तथैव कारयित्वाऽसौ, व्योमगं कीलिकावशात् । दारुबर्हिगणं द्वास्थः, कपीन्द्राय न्यवेदयत् ॥ २९४ ॥ अथ प्रयाणढक्कां स, ताडयित्वा स्ववर्गयुक् । तेष्वारूढः कालमुखोऽचालीज्जेतुमरीन् हरीन् ॥ २९५ ॥ अश्ववारानिव व्योम्नि, वानरान् केकिवाहनान् । आरामनन्दनः पाद–चारेणानुचचार तान् ॥२९६॥ कपयोऽपि वनं प्राप्य, कीलिकाकेकिनो रयात् । उत्तीर्य वादयामासुः, काहलाः कातरार्त्तिदाः ॥ २९७ ॥ एकान्ते केकिनो मुक्त्वा, चेलुश्चारिहरीन् प्रति । प्रतिवीराश्च तान् दृष्ट्वा, चुक्षुभुर्वायुनाऽब्धिवत् ॥ २९८ ॥ केऽपि नेशुर्वने केऽपि, विविशुर्गिरिगह्वरम् । केऽप्यरीन् द्रष्टुमायाता, वलिताश्च भयातुराः ॥ २९९ ॥ स्वेशं नीलमुखं चोचुर्देवाद्यैव बलान्विताः । पतामोऽरातिघाताय, नान्यथा विजयो हि नः ॥ ३०० ॥ ततो नीलमुखः स्वाहान्तःपुरं क्वापि भूधरे ।

मुक्त्वा कृत्वा च पूरक्षां, जेतुं यामो रिपोर्बलम् ॥ २०१ ॥ तथैवासूत्र्य सर्वाभि-स्सारसारः स निर्ययौ । ततः शिबिरयोर्जज्ञे, नामग्राहं महारणः ॥ २०२ ॥ युध्यमानाः कपिभटा, दन्तादन्ति नखानखि । केपि पेतुर्महीपीठे, कुठारच्छिन्नवृक्षवत् ॥ २०३ ॥ केचित्स्ववीर्यपेटाभिश्चपेटाभिः क्रुधोद्धुराः । आहत्याहत्य वक्त्राणि, नीरदानि वितेनिरे ॥ २०४ ॥ केचनापि शिलागोलैर्वर्षन्तो दुष्टमेघवत् । अन्योऽन्यस्य शरीराणि, चूर्णयांचक्रिरेतराम् ॥ २०५ ॥ एवं समरसंरम्भं, तन्वन्तः कपयो मिथः । काकनाशं भृशं नेशुः, स्थैर्यं हि स्यात् क तादृशाम् ? ॥ २०६ ॥ अथोद्भटान्भटान् स्वान् स्वान्, नष्टानालोक्य तौ रुषा । अन्योन्यकालनीलास्यौ, चक्रतुर्दारुणं रणम् ॥ २०७ ॥ निर्जितो नीलचक्रेण, कालवक्रः कपीश्वरः । ननाश प्रतिकूले हि, विधौ कस्य भवेज्जयः ? ॥ २०८ ॥ इतश्चारामजन्माऽपि, जग्मिवांस्तत्र यत्र तैः । कपिभिः स्थापिता आसन्नभोगाः काष्ठकेकिनः ॥ २०९ ॥ तेष्वेकं केकिनं वेगादारुह्याऽऽरामनन्दनः । कीलिकामर्मवित् प्राप, वैताढ्ये मङ्गलावतीम् ॥ २१० ॥ कुतोऽपि विद्युन्माल्योकस्तुर्यौकनि गवाक्षके । स्वर्णतल्पस्थितं पुष्प-कञ्चुकं ह्यवगत्य सः ॥ २११ ॥ आदाय च ततो राज-कुलाध्यक्षमदोऽवदत् । हंहो वनभुवा सीय, एवायं नीयतेऽधुना ॥ २१२ ॥ युग्मम् । एवमुच्चैःस्वरं वारं वारं जल्पन् पुराद्बहिः । विनिर्गत्य स वानेयः, प्रतस्थे स्वपुरं प्रति ॥ २१३ ॥ कश्चित्पुमान् गृहेऽभ्येत्य, गृहीत्वा पुष्पकञ्चुकम् । मयूरवाहनारूढो, हहा याति विहायसि ॥ २१४ ॥ इत्याकर्ण्य तडिन्मालिप्रिये सुप्रियकञ्चुके । सोरस्ताडं निजान् भृत्यानूचतुर्धावताशु भोः !

॥ ३१५ ॥ विद्युन्मालिनि कान्ते द्रागष्टापदगिरिं गते । कञ्चुके वादनिर्णीतिरिति ताभ्यां स्वयं कृता ॥ ३१६ ॥ आवयोर्या गृहीतामुं, जित्वा कञ्चुकहारिणम् । तयैव कञ्चुको ग्राह्यः, शपथोऽत्रेष्टदैविकः ॥ ३१७ ॥ ततश्च पैतृकैर्विद्याधरसैन्यैश्च संयुते । तमन्वगातां ते विद्याविकृतैः स्वबलैरपि ॥ ३१८ ॥ आरामनन्दनं दूराद्दृष्ट्वाऽप्येऽजल्पतामिमे । अरे क यासि? नौ हृत्वा, चौरवत्पुष्पकञ्चुकम् ॥३१९॥ वनजोऽप्यनयोः सैन्यं, पृष्ठायातं नभोऽङ्गणे । विलोक्य व्याकुलो जज्ञे, पुष्पकञ्चुकरक्षणे ॥ ३२० ॥ दध्यौ च गन्तुं नाग्रेऽलं, यद्भटैर्वेष्टितोऽभितः । एकोऽहमरिभिर्योद्धा, धर्त्ता वा कञ्चुकं कथम्? ॥ ३२१ ॥ विद्याधर्योर्बलैर्हेलि–मण्डलाच्छादनादलम् । एकच्छत्रे तमोराज्ये, जाते पश्यामि नो पुरः ॥ ३२२ ॥ भ्रामं भ्रामं दिशां मोहाद्विद्याधरबलान्तरे । पतितः किं करिष्यामि?, जीविष्याम्यधुना कथम्? ॥३२३॥ इति यावदयं चिन्ता–चान्तोऽभूत्तावदस्य सः । वेतालः स्मृतिमायातः,सतां हि समये मतिः ॥३२४॥ ततो मुखाद्विनिर्गच्छदनलज्वालया तमः । संहरन्नट्टहासेन, त्रासितारातिसैनिकः ॥ ३२५ ॥ वेतालः प्रकटीभूय, वनस्तुं विनम्य च । उवाच किमहं कुर्वे?, महाशय! समादिश ॥३२६॥ युग्मम् ॥ स स्माह सैन्यं खेचर्योर्वेताल स्खलयाखिलम् । यावद्द्वितीयं भार्यायै, कञ्चुकं पुनरेम्यहम् ॥ ३२७ ॥ व्रजामि यद्यहं नाथ!, निजद्रङ्गे तदा मम । कृता प्रतिज्ञाऽसम्पूर्णा, भवत्यत्र विलम्बतः ॥ ३२८ ॥ ततस्तु मे प्रिया प्राणान्, जुहोति हुतभुग्यतः । त्वया वैद्याधरं सैन्यमन्वागच्छन्निवार्य्यताम् ॥ ३२९ ॥ वेतालोऽप्यब्रवीद्भद्र!, पुरे क्वापि मयापि हि । प्रवेष्टुं प्रस्थिता वह्नौ, दद्दशे काऽपि

कामिनी ॥ ३३० ॥ तन्मन्ये तव जीवेश!, भविष्यतितमामसौ । अतो व्रज रयात्तत्र ! पृष्ठरक्षोऽस्म्यहं ननु ॥३३१॥ वेतालवचसा तेन, वामाक्षिस्फुरणेन च । ज्ञातप्राणेश्वरीमृत्युस्ततो वनसुतोऽचलत् ॥ ३३२ ॥ अथ पद्मावती कान्ता, कान्तागमनवासरान् । प्रपूर्य नर्मदातीरे, नृपमूचे कृताञ्जलिः ॥ ३३३ ॥ वारितापि स्ववर्गेण, नार्थां यान्ती चितां प्रति । कपिना शुद्धिमानाय्ये यच्चिरं स्थापिता त्वया ॥ ३३४ ॥ अवधौ परिपूर्णेऽपि, यन्नागान् मम वल्लभः । तद्ध्रुवममङ्गलं तस्य, सत्यसन्धो यतोऽस्ति सः ॥ ३३५ ॥ अतो मामनुजानीहि, चितालिङ्गनकर्मणि । इत्युक्त्वा सा महीपालं, मुत्कलाप्यागमद्द्रुहम् ॥ ३३६ ॥ ततः स्वोभयपक्षं सानुज्ञाप्याभ्यर्च्य देवताः । वितीर्य दानं दीनेभ्यो, ह्यनुकूल्य सखीजनम् ॥ ३३७ ॥ अनुमोद्य कृतं पुण्यं, गर्हितं दुष्कृतं तथा । लोके क्रन्दति हा हेति, चचालाशु चितां प्रति ॥ ३३८ ॥ पश्यतां सर्वलोकानां, स्मृत्वा पञ्चनमस्कृतिम् । सा स्ववर्गाशु(श्रु)भिः सार्द्धमदाज्झम्पां चितानले ॥ ३३९ ॥ अथोद्यानसुतो वेगादागतो नर्मदातटे । धूमव्याप्तं नभो ऽपश्यच्चितां च ज्वलदग्निकाम् ॥ ३४० ॥ क्रन्दतः स्वजनांस्तत्र, वीक्ष्यासावित्यचिन्तयत् । वह्नौ प्रियाऽपतत् स्वभ्रे, मनोरथरथश्च मे ॥ ३४१ ॥ ततो मयूरादुत्तीर्यो- पांशु मुक्त्वा च कञ्चुकम् । कान्ताचितासमीपस्थो, वनसूरित्यभाषत ॥ ३४२ ॥ सतीव्रतधरा मेऽस्ति, यद्येषा प्राण- वल्लभा । तदैतस्यां ममापि स्यादाशु श्रेयःपरम्परा ॥ ३४३ ॥ इत्युदीर्य प्रियामृत्युपापव्ययकृते कृती । सोऽज्ञातः स्वजनैर्झम्पापातं वैश्वानरेऽकरोत् ॥ ३४४ ॥ अथालुगैर्युध्यमानैर्विद्याधरभटैर्मिथः । वेतालसुभटैश्चाऽपि, तथास्थः स

कञ्चुकं केकिनं मुक्त्वा, चौरः किमकरोदिदम्
व्यलोक्यत ॥ ३४५ ॥ ततो जजल्पतुर्विद्या-धर्यौ साश्चर्यमानसे । प्राणप्रियः सखा सोऽयं, वह्नावह्नाय ह्यविशत् ॥ ३४७ ॥
॥ ३४६ ॥ वेतालोऽप्यब्रवीद्धृष्टा, यदर्थं क्लेशमासदम् । किमेतदिति? सम्भ्रमात् ॥ ३४८ ॥ चतुरङ्ग-
आगच्छतश्चिताभ्यर्णे, प्रेक्ष्य वेतालखेचरान् । दूरीभूय स्थिता लोकाः, अथ विद्याधरीसैन्यं,
चमूयुक्तो, योद्धुकामो नृपोऽपि हि । वैतालखेचरानीक्ष्य विमुखं लोकोऽचलत् ॥ ३४९ ॥
तां चितां परितो भ्रमत् । अग्रहीत्कञ्चुकं दारु-मयूरं च महीस्थितम् ॥ ३५० ॥ असद्वियान्यहेतोर्वा, प्राविशत्तस्कर-
श्चिताम् । इतीव यावत्तां द्रष्टुं, लग्ने ते खेचरप्रिये ॥ ३५१ ॥ तावद्धनसुतं तत्र, प्रियापद्मावतीयुतम् । अक्षताङ्गं
निरीक्ष्योभे, खेचर्याविदमूचतुः ॥ ३५२ ॥ अहो अहो प्रविष्टोऽपि, यदेषोऽसौ सवल्लभः । स्वर्णासने स्थितो हंस-
युग्मवद्राजतेऽम्बुजे ॥ ३५३ ॥ तयोरिति गिरः श्रुत्वा, कौतुकोत्तानमानसाः । वेतालः खेचरा राजा, स्वजनाश्च
समीयरुः ॥ ३५४ ॥ अहो पद्मावतीशीलमाहात्म्यं यदियं चिता । प्रज्वलज्ज्वलनज्वाला, जालाप्यजनि शीतला
॥ ३५५ ॥ इति बन्दिष्विवैतेषु, जल्पत्सु धनसूस्ततः । निर्गत्य सप्रियः पृथ्वी-पतिं जोदकरोन्मुदा ॥ ३५६ ॥
राज्ञाऽप्याश्लिष्य स स्नेहात्पृष्टोऽथ धननन्दनः । स्वं कञ्चुकवृत्तान्तं, यथावत्प्रत्यपीपदत् ॥ ३५७ ॥ पितृभ्यां स्वजनै-
श्चायं, परिरभ्याभ्यनन्द्यत । वत्से! पुत्रवती भूया, इति पद्मावती तथा ॥ ३५८ ॥ ज्ञात्वा कञ्चुकवृत्तान्तमथ विद्या-
धरप्रिये । मुक्त्वा च तस्मिन्निर्बन्धमिति चेतसि दध्यतुः ॥ ३५९ ॥ दम्पत्योरनयोः प्रीतिरहो!! कापि परस्परम् ।

यदाभ्यां विरहाहत्ता, झम्पा ज्वालाकुलेऽनले ॥ ३६० ॥ प्रमोदमेदुरान् दृष्ट्वा, स्वजनांस्तस्य सक्रमात् । गतरोषे स्वचा-
रिण्यावौचित्यादेत्य सन्निधौ ॥ ३६१ ॥ पुष्पकङ्कमानाय्य, भृत्येभ्यः कमलावतीम् । पर्यधापयतां दिव्यामोदनन्दि-
तनासिकम् ॥ ३६२ ॥ युग्मम् । वेतालखेचरीवर्गो–राजस्वजनसंयुतः । वनजो गजमारूढः, सोत्सवं स्वगृहेऽविशत्
॥ ३६३ ॥ रत्नभूषणदानेन, सत्कृत्य पृथिवीपतिम् । देवदूष्योपमैर्वस्त्रैः, सन्तोष्य स्वपरिच्छदम् ॥ ३६४ ॥ योजि-
ताञ्जलिबन्धेन, खेचर्यौ प्रणिपत्य ते । याचकान् पोषयित्वा च, वनसूनुर्व्यसर्जयत् ॥ ३६५ ॥ युग्मम् । वेतालादपि
सौवर्ण–नरमानाय्य मन्दिरे । न्यासीकृत्य च भक्त्या तं, विससर्ज वनात्मजः ॥ ३६६ ॥ स ततः स्नानमासूत्र्यार्हद्-
द्बिम्बानि प्रपूज्य च । दानं दत्वा सुपात्रेभ्यो, बुभुजे स्वजनैः समम् ॥ ३६७ ॥ परीक्षितस्वपुण्योऽयं, दृष्टकान्तास-
तीव्रतः । उद्यानमन्दनोऽकार्षीत्सफलां गृहमेधिताम् ॥ ३६८ ॥ अथान्येद्युर्विरुद्याने, सचक्रप्रतिबोधकृत् । केवल-
ज्ञानभृद् ज्ञान–भानुर्भानुरिवाऽऽययौ ॥ ३६९ ॥ श्रुत्वा तदागमं पद्मावतीयुक्तो वनात्मभूः । गत्वा केवलिनं भक्त्या,
नत्वा चोपाविशत्पुरः ॥ ३७० ॥ सर्वजीवहितां धर्म–देशनां मुनिपुङ्गवः । प्रारेभे रभसा मुक्ति–प्रेयसीदूतिकामिव
॥ ३७१ ॥ सर्वेषां धर्मकृत्यानां, मूलं सम्यक्त्वमुच्यते । तच्च देवे गुरौ तत्त्वे, सम्यक्श्रद्धानतो भवेत् ॥ ३७२ ॥ देवो-
ऽष्टादशदोषाणां, हर्त्ता कर्त्ता शिवश्रियाम् । निरवद्यक्रियाज्ञान–धरो गुरुरुदाहृतः ॥ ३७३ ॥ तत्त्वं तद्येन जायेत,
भूतेषु समतामतिः । इति सद्दर्शनं जीवा, लभन्ते कर्मलाघवात् ॥ ३७४ ॥ ततः श्राद्धस्य साधोश्च, धर्म्ममाराध्य

शुद्धधीः । क्रमात्कर्म्मक्षयं कृत्वा, श्रयते परमं पदम् ॥ ३७५ ॥ इति व्याख्याऽमृतं पीत्वा, वनभूः श्रुतिशुक्तिभिः । गुरोः सम्यक्त्वमादाय, सजायः स्वाश्रयं ययौ ॥ ३७६ ॥ छिन्नप्ररूढसौवर्णपुरुषाक्रान्तकाञ्चनैः । धर्मस्थानानि भोगांश्च, स प्रत्यहमपूपुषत् ॥ ३७७ ॥ वनसूनुमनुज्ञाप्य, संसारोद्विग्नमानसौ । पितरौ सुगुरोरात्तचारित्रौ दिवि जग्मतुः ॥ ३७८ ॥ ततो वनसुतो भावादर्हत्पूजादिकोत्सवैः । लक्ष्मीपुरपुरं चक्रे, धर्म्माद्वैतमयं सुधीः ॥ ३७९ ॥ रत्नकाव्यस्वर्णपूर्णकलशस्वप्नसूचितः । क्रमेण कमलावत्सा, सुषुवे तनयोऽद्भुतः ॥ ३८० ॥ कारयित्वोत्सवं स्वप्नानुसाराद्वननन्दनः । द्वादशाहे शिशोः पूर्णकलशेत्यभिधां व्यधात् ॥ ३८१ ॥ पितृभ्यां जातहर्षाभ्यां, पाल्यमानः शिशुः क्रमात् । अधीतसर्वशास्त्रार्थस्तारुण्यं पुण्यमासदत् ॥ ३८२ ॥ महेभ्यकुलजाताभिः, कन्याभिः पर्यणाययत् । पिता तं तनयं शिष्यं, विद्याभिरिव सद्गुरुः ॥३८३॥ विवाहानन्तरं पूर्णकलस्या(शा)ङ्गे ज्वरं सुरी । काप्यारामजसम्यक्त्वक्षोभार्थमुदपादयत् ॥३८४॥ स तेन पीडितो लुप्तचेतनो व्यलुठद्भुवि । वैद्याद्यसाध्यो यत्किञ्चित्प्रलापं कुरुते स च ॥३८५॥ इतश्च मान्त्रिकः कोऽपि, साहङ्कारः पुरे भ्रमन् । प्रतीकारकृतेऽनायि, वनजेनाङ्गजन्मनः ॥ ३८६ ॥ सोऽपि मण्डलमापूर्य, कन्यां तत्र निवेश्य च । मन्त्राह्वानपरो देवीं, खड्डेऽवातारयद्रयात् ॥ ३८७ ॥ अस्य पात्रस्य गात्रे किं?, रोगो दोषो ऽथवाऽस्ति हि । इति कन्यामुखात्तेन, पृष्टा सा देवताऽवदत् ॥ ३८८ ॥ यदसौ पूर्णकलशो, प्रस्तो

---

१ गमनम् ।

दोषेण सर्वतः । अतोऽस्य भावि कीनाशसरणं शरणं किल ॥ ३८९ ॥ इति तद्वाक्यमाकर्ण्यामूर्च्छत्पद्मावती शुचा । वनजः साहसं धृत्वा, मान्त्रिकं स्माह पृच्छ भो ! ॥ ३९० ॥ सुतः केनाप्युपायेन, जीवस्येषो ऽथवा नहि ? । तेनापि कन्यावक्त्रेण, पृष्टा देवीत्यवोचत ॥ ३९१ ॥ शिशुरस्मान्महादोषान्मुच्यते यदि हि स्वयम् । वनसूनुः पद्मयक्ष-मर्चयेदन्यथा मृतिः ॥ ३९२ ॥ तच्छ्रुत्वा वनजोऽवादीत्सम्यक्त्वस्थैर्यमन्दरः । जीवान्तेऽपि न कुर्वेऽहमन्यदैवत-पूजनम् ॥ ३९३ ॥ शरीरी म्रियमाणस्तु, पूर्वबद्धायुषः क्षयात् । रक्ष्यते नैव भूपालैर्न देवैर्न च दानवैः ॥ ३९४ ॥ असम्पूर्णायुरेषोऽपि, रोगदोषशतैरपि । वज्रपञ्जरमध्यस्थ, इव नो म्रियते क्वचित् ॥ ३९५ ॥ प्राणेभ्योऽप्यधिकस्यास्य, हितं स्यादथवाऽहितम् । तथापि जातु सम्यक्त्वमालिन्यं न करोम्यहम् ॥ ३९६ ॥ अर्हतः सुगुरूंश्चैव, मुक्त्वा साध-र्मिकांस्तथा । नमयामि न मूर्द्धानमन्येषामिति निश्चयः ॥ ३९७ ॥ एकस्मिंस्तु भवे पुत्रा, भवन्ति सुखदा न वा । भवे भवे भवेत् सम्यग्—दृष्टिः श्रेयस्करी नृणाम् ॥ ३९८ ॥ अतस्त्वं मान्त्रिकश्रेष्ठ ! श्राग्विसर्जय मण्डलम् । यद्यस्य विपुलं ह्यायुस्तदा प्राणिष्यति स्वयम् ॥ ३९९ ॥ इति तेनोदिते यावन्, मान्त्रिको मण्डलं किल । विसृष्टुमलग-त्तावत्सा सुरी प्रकटाऽभवत् ॥ ४०० ॥ ऊचे च वनसूनो ? त्वं, धन्योऽस्येतन्मया कृतम् । त्वत्सम्यक्त्वपरीक्षार्थं, निरुगेषास्ति ते सुतः ॥ ४०१ ॥ इत्युक्त्वा सा तिरोभूता, पूर्णकुम्भोऽपि निर्गतः । प्रेयसीभिः समं भोगान्, भु-ञ्जानः कालमत्यगात् ॥ ४०२ ॥ वनसूरपि सम्यक्त्वं, प्रपाल्य गतदूषणम् । सम्पूर्णायुः शुभध्यानः, सप्रियस्त्रिदिवं

ययौ ॥ ४०३ ॥ इत्यारामसुतस्य चरित्रम्, । श्रुत्वा भव्यजना! अतिचित्रं । सम्यक्त्वं स्वीकुरुत नितान्तं, येन प्राप्नुत मङ्क्षु भवान्तम् ॥ ४०४ ॥

इति सम्यक्त्वे आरामनन्दनकथा सम्पूर्णा ॥

उक्तं सम्यक्त्वस्वरूपमथ तच्छुद्धिमाह—

तस्स विसुद्धिनिमित्तं, नाऊणं सत्तसट्ठिठाणाइं। पालिज्ज परिहरिज्जव, जहारिहं इत्थ गाहाओ ॥ ४ ॥

'तस्स'त्ति तस्य सम्यक्त्वस्य प्राग्भणितस्वरूपस्य 'विशुद्धिनिमित्त' वैशद्यसम्पादनाय, पुरोवक्ष्यमाणानि श्रद्धादीनि सप्तषष्टिस्थानानि, 'ज्ञात्वा' सम्यगवबुध्य 'पालयेत्' सेवेत, न केवलं पालयेत् 'परिहरेद्वा' त्यजेत्, कथं? 'यथार्हं' श्रद्धानादिसेवनेन शङ्कादिदोषपरिहारेणेति, अतः 'अत्र' अर्थे पूर्वसूरिकृते सप्तषष्टिभेदसूचिके इमे गाथे, अत्र यद् द्विवचनस्य स्थाने बहुवचनं तन्न दोषाय, प्राकृतत्वात्, उक्तञ्च—बहुवयणेण दुवयणं छट्ठिविभत्तीइ भन्नइ चउत्थी । जह हत्था तह पाया, नमुत्थु देवाहिदेवाणं ॥ १ ॥ इति गाथार्थः ॥ ४ ॥

ते च के द्वारगाथे? इत्याह—

चउसद्दहणतिलिङ्गं, दसविणयतिसुद्धिपञ्चगयदोसं। अट्ठपभावणभूसण—लक्खणपञ्चविहसंजुत्तं ॥५॥

छव्विहजयणागारं, छभावणाभावियञ्च छट्ठाणं । इह सत्तसट्ठिलक्खण—भेयविसुद्धं च सम्मत्तं ॥६॥

व्याख्या–'चउसद्दहणलिंग'ति चत्वारि श्रद्धानानि त्रीणि च लिङ्गानि यत्र तच्चतुःश्रद्धानत्रिलिङ्गं, 'दसविणय'त्ति, दश विनयाश्च तिस्रः शुद्धयश्चार्षत्वादृताः पञ्च दोषाश्च यत्र तद्दशविनयत्रिशुद्धिपञ्चगतदोषम् । 'अट्ठप्रभावण'त्ति, अष्ट प्रभावनाश्च भूषणानि च लक्षणानि च तेषां प्रत्येकं प्रत्येकं पञ्च विधाः पञ्च प्रकारास्तैः संयुक्तं सहितं, 'छव्विह'त्ति, षड्विधा यतना आकारश्च यत्र तत् षड्विधयतनाकारं, 'छब्भावण'त्ति, षड्भिर्भावनाभिर्भावितं वासितम्, 'छट्ठाण'त्ति,षट् स्थानानि यत्र तत् षट्स्थानम्, 'इय सत्तसट्ठि'त्ति इत्यमुना प्रकारेण सप्तषष्टिलक्षणभेदैर्विशुद्धं निर्दूषणं सम्यक्त्वं भवतीति ज्ञेयं । चकारावत्र समुच्चयार्थाविति, गाथायुगार्थः ॥ ५–६ ॥

एते द्वारगाथे कैः कृते? इत्याह,—

पुव्वमुणीहिँ कयाणं, गाहाणमिमाण कमवि भावत्थं । थोवक्खरेहिँ पयडं, वुच्छं सङ्खेवरुइपत्थं ॥७॥

व्याख्या–अत्र प्रकरणकर्त्ता अहमिति स्वात्मानं निर्दिशति ततोऽहं 'कमपि' रहस्यभूतं 'भावार्थं, परमतत्त्वं अनयोर्गाथयोः पूर्वमुनिभिः कृतयोर्वक्ष्ये इति सम्बन्धः । तत्र मन्यन्ते त्रिकालावस्थामिति मुनयः पूर्वे च ते मुनयश्च पूर्वमुनयः पूर्वाचार्यास्तैः कृतयोः, 'स्तोकाक्षरैः' अल्पवर्णैः 'प्रकटं' सुबोधं सङ्क्षेपरुचीनां स्वल्पग्रन्थश्रवणाभिलाषिणां पथ्यं हितं 'वक्ष्ये' कथयिष्यामीति गाथार्थः, ॥ ७ ॥

तेषु भेदेष्वाद्यस्य श्रद्धानस्य चतुरो भेदानाह—

परमत्थसन्थवो खलु, सुमुणियपरमत्थजइजणनिसेवा । वावन्नकुदिट्ठीण य, वज्जणमिह चउहसद्दहणं ८

व्याख्या 'परमत्थत्ति, ( त्येत्यादि )' 'खलु' निश्चितं परमार्थस्य परमरहस्यस्य संस्तवः परिचय इत्येको भेदः, 'सुमुणिय'त्ति ( येत्यादि ) सुज्ञातपरमार्थानां यतिजनानामर्हन्मुनीनां सेवनं पर्युपास्तिकरणमिति द्वितीयो भेदः, वावन्नत्ति ( न्नेत्यादि ) व्यापन्नाश्च कुदृष्टयश्च व्यापन्नकुदृष्टयस्तेषां वर्जनं, कोऽर्थः ? परिच्युतसम्यक्त्वानां मिथ्यादृशां च परित्याग इति तृतीयचतुर्थौ भेदौ । 'चः' समुच्चये 'इह' अत्र ग्रन्थे चतुष्प्रकारं श्रद्धानं भवतीति गाथार्थः ॥ ८ ॥

तस्यैव श्रद्धानस्य परमार्थसंस्तवरूपं प्रथमं भेदं विवृण्वन्नाह—

जीवाइपयत्थाणं, सन्तपयाईहिं सत्तहिं पएहिं । बुद्धाणवि पुण पुण सवणचिन्तणं सन्थवो होई ॥ ९ ॥

व्याख्या—'जीव'त्ति जीवन्ति प्राणान् धारयन्तीति जीवाः, सर्ववक्तव्यमूलत्वात्तेषां प्रथमोपादानमिति, आदिशब्दादजीवपुण्यपापाश्रवसंवरबन्धमोक्षपरिग्रहः, तेषां पदार्थानां तत्त्वानां परिज्ञानं, कथं स्यादित्याह, 'सन्तपयाईहिन्ति' सत्पदादिभिः सत्सङ्ख्याक्षेत्रस्पर्शकालान्तरभावाल्पबहुत्वभेदैः सप्तभिः पदैः, तेषां सत्पदादीनां प्ररूपणा चैषा,— जीवाइपयत्थाणं, गुणठाणेसु पवट्टमाणाणम् । चउदसमग्गणट्ठाणपरूवणा सन्तपयमाई ॥ १ ॥ तथाहि— यद्यपि सच्छब्दः प्रशंसादिषु वर्त्तते तथाप्यत्रास्तित्ववाचक उपादीयते, अतः सन्ति जीवाद्याः पदार्थाः गुणस्थानकेषु चतुर्दशसु मिथ्यादृष्ट्याद्ययोगिपर्यन्तेषु वर्त्तमानत्वात् , अत्रापि तेषां सत्त्वं मार्ग्गणास्थानैरभिव्यज्यते । तानि चामूनि-

गइ इन्दिए य काए, जोए वेए कसायनाणे य । संजमदसंणलेसा, भवसंमे सन्निआहारे ॥ १ ॥ इतिचतुर्दशमार्गणास्थानानि तैः सत्पदप्ररूपणा सामान्यविशेषाभ्यां द्विधा—सामान्येन जीवो मिथ्यादृष्टिः सास्वादनादिमान्वेत्यादि, विशेषेण तु गत्याद्यपेक्षया निगद्यते, तथाहि—देवनरकगत्योराद्यानि चत्वारि गुणस्थानकानि, तिर्यग्गतौ पञ्च, मनुष्यगतौ चतुर्दशापि १ । इन्द्रियाद्यपेक्षया एकद्वित्रिचतुरिन्द्रियेष्वाद्यं, द्वितीयमपि गुणस्थानं, पञ्चेन्द्रियेषु चतुर्दशापि २ । कायापेक्षया, पृथिव्यप्तेजोवायुवनस्पतिकायेष्वाद्यं, तेजोवायुवर्जमितरेषु द्वितीयमपि, त्रसेषु सर्वाणि ३ । योगापेक्षया मनोवाक्काययोगेषु त्रयोदश गुणस्थानानि, न चतुर्दशं, तस्य निरुद्धयोगत्वादयोगित्वम् ४ । वेदापेक्षया पुंस्त्रीनपुंसकवेदेष्वाद्यानि नव गुणस्थानकानि, अतः अग्रेतनान्यवेदकानि, ५ । कषायापेक्षया क्रोधमानमायासु नव गुणस्थानकानि, लोभे दश, ततोऽग्रेतनान्यकषायाणि ६ । ज्ञानापेक्षया मत्यज्ञानश्रुताज्ञानविभङ्गेष्वाद्ये द्वे गुणस्थाने त्रीणि वा, मतिश्रुतावधिज्ञानेष्वविरतिसम्यग्दृष्ट्यादीनि क्षीणकषायान्तानि नव, मनःपर्यायज्ञाने प्रमत्तादीनि क्षीणकषायान्तानि सप्त, केवलज्ञाने प्रान्ते द्वे ७ । संयमापेक्षया सामायिकच्छेदोपस्थाप्ययोः प्रमत्तादीनि चत्वारि, गुणस्थानानि, परिहारविशुद्धौ प्रमत्ताप्रमत्ते द्वे, सूक्ष्मसम्पराये सूक्ष्मसम्परायमेकं, यथाख्याते उपशान्तादीनि चत्वारि देशविरतौ देशविरतिस्थानमेकं, अविरतौ मिथ्यादृष्ट्यादीनि चत्वारि ८ । दर्शनापेक्षया, चक्षुरचक्षुर्दर्शनयोराद्यानि द्वादश गुणस्थानकानि, अवधिदर्शनेऽविरतादीनि नव, केवलदर्शने प्रान्त्ये द्वे ९ ।

लेश्यापेक्षया कृष्णनीलकापोतलेश्यास्वाद्यानि चत्वारि गुणस्थानानि, तेजःपद्मयोराद्यानि सप्त, शुक्लायामाद्यानि त्रयोदश, अलेश्यं चतुर्दशम् १० । भव्यापेक्षया भव्येषु चतुर्दशाऽपि गुणस्थानकानि, अभव्येष्वाद्यमेव । ११ सम्यक्त्वापेक्षया क्षायिकेऽविरतादीन्येकादश गुणस्थानानि, औपशमिके अष्टौ, क्षायोपशमिके चत्वारि, सास्वादन-मिश्रयोः स्वं स्वम् १२ । संज्ञ्यपेक्षया संज्ञिषु चतुर्दशापि गुणस्थानानि, असंज्ञिष्वाद्ये द्वे १३ । आहारकापेक्षया आहारकेष्वाद्यानि त्रयोदश गुणस्थानकानि, अनाहारकेषु जीवेषु विग्रहगत्यापन्नाः केवलिसमुद्घातगतसयोगिकेवलिनो ऽयोगिकेवलिनश्च १४ । एवं गुणस्थानमार्गणास्थानसंयोगेन जीवानां सत्पदप्ररूपणा ज्ञेया १ ॥ अनयैव दिशा अजीवादिशेषपदार्थानां प्ररूपणा सुमतिभिः स्वमत्याऽभ्यूह्या, ग्रन्थगौरवभयान्नेह प्रतन्यत, सङ्ख्या पुनर्जीवादितत्त्वानां प्रभेदगणना, यदुक्तम्—'चउदस चउदस बायालीसा बासीइ हुन्ति बायाला । सत्तावन्नं बारस, चउनवभेया कमेणेसिं ॥ १ ॥' २ । क्षेत्रं तु वर्त्तमानकालविषयीकृतजीवाजीवादिनिवासः, तदेव त्रिकालगोचरं चतुर्दशरज्ज्वात्मकं श्रुतप्रणीतस्वरूपं जीवाजीवाधारक्षेत्रं, स्पर्शना ३ । अथ जीवाद्यपेक्षया सादिसान्तसाद्यनन्ताऽनाद्यनन्ताऽनादि-सान्तादिभेदात्कालश्चतुर्द्धा, यदुक्तमागमे—'गइ सिद्धा भवियाया, अभविय पुग्गल अणागयद्धा य, तीयद्ध तिन्नि काया जीवाजीवट्ठिई चउहा ॥ १ । ४ ॥ अन्तरं तु जीवाजीवाद्युत्पत्तिविनाशविरहकालः ५ ॥ भावस्त्वौदयिकौ-पशमिकक्षायिकक्षायोपशमिकपारिणामिकसांनिपातिकभेदात्षोढा जीवादिषु सम्भवन्ति, यदुक्तम्—दुगजोगो सिद्धाणं

केवलसंसारियाण तिगजोगो । चउजोगजुयं चउसुवि, गईसु मणुयाण पण जोगो ६ ॥ अल्पबहुत्वं तु परस्परापेक्षया सविशेषा प्रतिपत्तिर्यथा—सङ्ख्याता मनुष्यास्तेभ्योऽसङ्ख्यातगुणा नैरयिकाः तेभ्यः सविशेषा देवाः तेभ्योऽनन्तगुणास्तिर्यञ्च इति ८ । एतैः सप्तभिः सदादिभिः पदैर्बुद्धानां ज्ञातानामपि जीवादिपदार्थानां पुनः पुनः श्रवणमाकर्णनं चिन्तनं पर्यालोचनं संस्तवो भवतीति गाथार्थः ॥ ९ ॥

अस्मिन् विषये जिनदासश्रावकदृष्टान्तः प्रतन्यते, तथाहि,

इहैव जम्बूद्वीपे द्वीपे निवासिजनजनितहर्षप्रकर्षे श्रीभारते वर्षे समस्ति समस्तवस्तुविस्तारमधुरा मथुरा नाम नगरी, यस्यां मनुष्यश्रुतिसौख्यकारिविरावश्रृद्धंसकभासमाना समुल्लसत्पीनपयोधरान्तःसत्त्वीराजिराभातिवहिर्वनीव । तस्यामनवरतसुगुरुवदननिर्यदमृतायमानविशुद्धसिद्धान्तदेशनाश्रवणसञ्जातजिनशासनदृढवासो जिनदासो नाम श्रावकः प्रतिवसति स्म, यस्य मानससरोवरमध्ये गुर्वपूर्वतरभक्तितरङ्गे सद्विचारचतुरः शुचिपक्षः खेलनं स तनुते जिनहंसः । तस्य निरन्तरदेवगुरुचरणपरिचरणसमुपार्जितागण्यपुण्यनिवासीभूता समासीत्साधुदासी नाम प्रेयसी, 'श्रीमज्जिनाज्ञासुदशासनाथे, पुण्यक्रियास्नेहभराभिरामे । यच्छीलदीलायितदीप्रदीपे, पतङ्गपोतायितमाप मारः । १ ।' एकदा ताभ्यां सद्गुरुपादमूले सम्यक्त्वमूलानि द्वादश व्रतानि स्वीकुर्वद्भ्यां सावद्यभीरुतया सर्वथा चतुष्पदपरिग्रहपरिहाररूपोऽभिग्रहो जगृहे, तञ्च निरतीचारप्रतिपालयद्भ्यां ताभ्यां सुखेन समयोऽतिवाह्यते स्म, कदाचित्काचिदेका-

ऽऽभीरी स्निग्धमधुरदधिभाण्डशिरस्का जिनदासावासमाससाद, साधुदास्यपि डिण्डीरपिण्डपरिपाण्डुरं दध्युपादाय सादरमाभीरीमुदीरयामास, सखि! प्रत्यहमेवास्मद्गृहे दध्यानीय विक्रेतव्यं, दास्यामि तवेप्सितं द्रव्यं, तयाप्याभीरिकयोपदेशवत्तद्वचः प्रतिपन्नं, ततः सा सततं दध्याद्यानयन्ती साधुदास्या वेषवारादिप्रदानेन सत्कृता सख्यमभजत्। यतः—दानेन सत्त्वानि वशीभवन्ति, दानेन वैराण्युपयान्ति नाशम्। परोऽपि बन्धुत्वमुपैति दानात्तस्माद्धि दानं सततं प्रदेयम्। १। अन्यदाऽऽभीर्या स्वसुताविवाहमहे सपत्नीको जिनदासो न्यमन्त्र्यत, तेनापि "क्षणमपि मम नास्त्यागमनावसर" इति निषिध्य मुधिकयैव विवाहोपयोगीनि वस्तूनि तस्यै ददिरे, तैर्वस्तुभिः सरङ्गः करग्रहमहः समजनि, साप्याभीरी स्वस्यानृण्यमभीप्सुर्निजपरिजनयुता त्रिहायणौ गङ्गातरङ्गधवलौ कम्बलशम्बलनामानौ वृषभौ श्रेष्ठिने उपदीचकार, मास्म भून्मम नियमभङ्ग इति तेन निवारितापि सा तद्गृहे कीलकेऽतौ वृषभौ निबध्य स्वधाम जगाम, श्रेष्ठ्यपि निजगृहागतस्तौ तथास्थौ निरीक्ष्य क्षणं विषद्य चेति चिन्तयामास, यद्येतौ मुञ्चामि तदा पामरनरप्रेरिताऽरुन्तुदतोदनप्रहारविधुरशरीरौ हलशकटवाहनव्यथामनुभविष्यतः, स्थापितौ तु मम नियमभङ्गाय भविष्यतः अतः, कथमहं तयाऽभीर्या मुग्धस्नेहेन सङ्कटावटे पातितः, तथापीमावनुकम्पयातः परं परिपालनीयाविति विमृश्य श्रेष्ठी तौ वृषभौ प्रासुकतृणजलादिनाऽनुदिनं पुपोष, अथ पर्वतिथिषु कृतोपवासं गृहीतपौषधं पठितधर्मशास्त्रपुस्तकवाचनपरं जिनदासं दृष्ट्वा

१ समुद्रफेण.

तौ पशू अपि सत्सङ्गतिवशाज्जातचैतन्यौ दीयमानमपि तृणादिकं नाभुञ्जाताम्" यतः—सङ्गः सर्वात्मना त्याज्यः, सचे-त्त्यक्तुं न शक्यते, । स सद्भिः सह कर्त्तव्यः, सन्तः सङ्गस्य भेषजम् ॥ १ ॥ ततः श्रेष्ठी तयोर्वृषभयोरीदृक् स्वरूपं विनिरूप्य कृपयैवेयन्तं कालं मया पालितौ सम्प्रति तु विशिष्टधर्म्मावबोधात्साधर्म्मिकौ जाताविति सञ्चिन्त्य च तौ वृषौ सहोदराविव मनोहराहारेणापूपुषत्, उभयथापि वृषभपोषनिरतस्य तस्य यान्ति स्म वासराः, अथैकदा भिण्डीरगण-यक्षयात्रोत्सवे प्रवृत्ते नागरिकलोकैरहमहमिकया वाहकेल्यां प्रारब्धायां कश्चिज्जिनदासस्य परमवयस्यस्तमनापृच्छ्यै-कोदरजातवत्समानौ गिरिशृङ्गवत्तुङ्गपीवरस्कन्धावरिष्ठरत्नवत्सुस्निग्धमुग्धशृङ्गौ कन्दुकवद्वृत्ताङ्गौ चामरवल्लसत्पुच्छौ वायुवदधिकवेगौ पुण्डरीककमलवद्धवलौ कौतुकवशादादाय शकटयामयोजयत्, ततः स गतकृपस्तच्छरीरसुकुमा-रतानभिज्ञोऽरुन्तुदतोदननोदनेन तुरगादप्यधिकतरं रयं तौ वृषौ कारयन् प्रतिज्ञापूर्वमपूर्वानपि पौरपरम्पराधुरीणान् विधुरयन्, सर्वत्र जयपताकामवाप्य पुनः श्रेष्ठीगृहे बद्ध्वा यथागतमगमत्, जिनदासोऽपि कृतजिनपूजः सत्पात्रनि-वेशितवित्तो भोजितपरिजनस्तयोर्धुरन्धरयोः पोषाय हारिचारिकरः समाजगाम, तावप्यारप्रहारनिःसरद्रुधिरधारा-सरणिटतशरीरौ दीर्घनिःश्वासान् विमुञ्चन्तौ निःसहावुदश्रू वीक्ष्य श्रेष्ठी सकष्टमाचष्ट हा ! ! केन पातकिना मामननुज्ञाप्यै-तौ वृषावीदृगवस्थामवापितौ ? तदनु श्रेष्ठी सशोक इव तयोस्तापव्यापनिराकरणाय शर्करामिश्रक्षीरशिशिरकरम्भकादि वस्तु पुरस्तान्निवेशितवान्, तावप्यत्यन्तव्यथाविधुरितशरीरौ तस्मिन् दृक्पातमपि न चक्राते, अनशनकृतमती श्रेष्ठि-

नाप्यनुमानेनाशनपराङ्मुखौ तौ वृषौ ज्ञात्वा भक्तप्रत्याख्यानं कारितौ, ताभ्यामपि शुभायतिभ्यां पथ्यमिव तदङ्गीकृतम्, श्रेष्ठ्यपि परित्यक्तापरव्यापारः संसारासारतां प्रकटयन्नाराधनापुरस्सरं पञ्चपरमेष्ठिनमस्कारमहामन्त्रं तयोः श्रुतिपथपथिकतामनैषीत्, तावप्यमृतमिव तं निजकर्णपुटाभ्यां निपीय समाधिनाऽऽयुः परिपूर्य नागकुमारेषु देवत्वेनोपपद्येतां, अथ कम्बलशम्बलौ नागकुमारावधिज्ञानेन बेडायामारूढस्य भगवतः श्रीवर्द्धमानस्य मिथ्यादृष्टिना सुदाढनागकुमारेण क्रियमाणं जीवितान्तोपद्रवं विज्ञाय जन्मकृत्यञ्च विमुच्य स्याादाजग्मतुः, तयोस्त्वेकः सुदाढेन सार्द्धं युद्धं चकार, द्वितीयस्तु भगवदधिष्ठितां नावं पद्मिनीमिव करसम्पुटेनोद्धृत्य सरित्परतीरमनैषीत्, ततो महर्धिकोऽपि सुदाढनागकुमारोऽत्यन्तासन्नच्यवनसमयगलद्बलस्ताभ्यां नूतनदेवाभ्यां निर्जितः शृगाल इव पलायांचकार, तावपि कम्बलशम्बलौ नागकुमारौ भगवतः श्रीमहावीरस्वामिन उपरि गन्धोदकपुष्पवृष्टिं विधाय भक्त्या तत्पादारविन्दद्वन्द्वमभिवन्द्य च धाराहतकदम्बपुष्पवद्रोमाञ्चिताङ्गौ स्वस्थानमगच्छतां, तदनु जिनदासश्रेष्ठ्यपि तयोर्वृषभयोर्विपत्त्यनन्तरं विशिष्य शश्वदर्हदुक्तशास्त्रपरिशीलनेन कतकफलक्षोदेनेवात्मानं जलमिव निर्म्मलीकृत्यावसाने समाधिपरः सदारः सुरपुरमलंचकार । इति यथा जिनदास उपासकः, समकरोत् परमार्थसुसंस्तवम्। कुरुत तद्वदिमं यदि वः स्पृहा, शिववधूपरिरम्भणकर्म्मणे । १ । परमार्थसंस्तवे जिनदासकथा ।

श्रद्धानस्यपरमार्थसंस्तवरूपमाद्यं भेदमुक्त्वा द्वितीयं सुदृष्टिपरमार्थसंस्तवलक्षणं भेदं व्याचिख्यासुराह—

गीयत्थचरित्तीण य, सेवा बहुमाणविणयपरिसुद्धा । तत्तावबोहजोगा, सम्मत्तं निम्मलं कुणइ ॥ १० ॥

व्याख्या गीयत्थत्ति, गीतं सूत्रं अर्थस्तद्विचारः, यदागमः—गीयं भन्नइ सुत्तं, अत्थो तस्सेव होइ वक्खाणं। उभएण य संजुत्तो, सो गीयत्थो मुणेयव्वो ॥ १ ॥ तदुभयं विद्यते येषां ते गीतार्थाः सुज्ञातागमार्थाः, चारित्रं सर्वविरतिरूपं पृथिव्यादिजीवरक्षणात्सप्तदशभेदम्, यदागमः—पुढवीआऊतेउवाउवणस्सइतसाइअजीवे । पेहुप्पेह-पमज्जण—परिट्ठवणमणोवईकाए ॥ १ ॥ अथवा, पञ्चाश्रवाद्विरमणं, पञ्चेन्द्रियनिग्रहः कषायजयः । दण्डत्रयवि-रतिश्चेति, संयमः सप्तदशभेदः ॥१॥ तद्विद्यते येषां ते चरित्रिणः संयमयुक्ताः गीतार्थाश्च चारित्रिणश्च गीतार्थचारित्रिण-स्तेषां, च शब्दात्सम्यग्ज्ञानिनां सम्यग्दर्शनिनामपि, सेवन्ति, सेवा परिचरणा, किम्भूता ? 'बहुमानविनयपरिशुद्धा' तत्र ब-हुमानमन्तरङ्गा प्रीतिर्विनयो मनोवाक्कायैः प्रणमनं ताभ्यां परिशुद्धा निर्मलीकृता, अन्यथा वागुरिकनमनवत्सेवनं निष्फलं, 'तत्तावबोह' त्ति, तत्वानां प्राक्प्रतिपादितस्वरूपाणां जीवानां(जीवादीनां)योऽवबोधो यथावत्तया परिज्ञानं तस्य योगः सम्बन्धस्तस्मात्, 'सम्मत्तंति, सम्यक्त्वं सम्यग्दर्शनं 'निर्मलं' आकाशस्फटिकमिव स्वच्छं करोति ङ्क्रियत इति गाथार्थः ॥ १० ॥

अत्रार्थे पुष्पचूलोदाहरणं तथाहि—

अत्थि इह भरहवासे, बहुभद्दा पुप्फभद्दिया नयरी । जसु परिसरंमि तरुणिव्व, वहइ सुपओहरा गङ्गा ॥ १ ॥ तत्थासि सकुलकेऊ, रिउकुलकेउव्व पुप्फकेउत्ति निवो । जस्स करे असी रेहइ, विजयसिरी-वेणिदण्डुव्व ॥ २ ॥ सुद्धमई हंसगई, विणयवई नयवई सुसीलवई । देवगुरुविहियपणई, तस्स पिआ आसि पुप्फवई ॥ ३ ॥ विसयसुहमणुहवंताण, ताण मिहुणं मणोहरं जायं । तणओ य पुप्फचूलो, तणया पुण पुप्फचूला य ॥ ४ ॥ समगं रममाणाणं, समरूवाणं पवड्ढमाणाणं । निरुवमपिम्मपराणं, ताणं वच्चन्ति दियहाइं ॥ ५ ॥ कइयावि कामलीला—वणंमि तारूण्णयंमि वट्टन्ता । ते नियवि निवो नियमाणसंमि इय चिन्तिउं लग्गो ॥ ६ ॥ जइ एयाण परुप्परपिम्मपराणं समाणरूवाणं । कहविहु कीरइ विरहो, ता नूणममङ्गलं हुज्जा ॥ ७ ॥ तो एयाणं कर-गहमङ्गलकरणंमि निम्मिए सन्ते । विहिणो अउव्वविन्नाणपयडणं सहलयं होइ ॥८॥ अहमवि विरहं एयाणमक्खमो पिक्खिउं मणागंपि । तणयतणयाण पाणि—ग्गहणमओ कारवेमि लहु ॥ ९ ॥ तो मन्तिपमुहनायरलोए सद्दाविउं निवो भणइ । अन्तेउरंमि रयणं, उप्पज्जइ तस्स को सामी ? ॥१०॥ ते विहु भणन्ति सामिय ! सयलम्मिवि मण्डलंमि जं रयणं । उपज्जइ तस्स पहू, निवो किमंतेउरगयस्स ? ॥११॥ नियदेसे जं रयणं, जायइ जणउव्व तं जहिच्छाए । विणिवेसन्तो सययं, वारिज्जइ केण धरणिधणो ? ॥१२॥ इय तव्वयणछ(च)लेणं, छलप्पहाणो नरेसरो हिट्ठो । लोय-

समक्खं नियदा–रगाण कारेइ करगहणं ॥ १३ ॥ पुष्फवई तब्भज्जा, सावयधम्मुज्जया अकज्जाओ । वारंतीवि न गणिया, भूवइणा कुग्गहग्गहिणा ॥ १४ ॥ सिरिपुप्फचूलकुमरो, विसयसुहं तीइ पुप्फचूलाए । सद्धिं अणुहवमाणो, गमेइ कालं निमेसुव्व ॥ १५ ॥ कमसो अकित्तिकद्दम–मलिणे निवपुप्फकेउयंमि मए । सिरिपुप्फचूलराया, पालइ नीईइ महिवलयं ॥ १६ ॥ तइया अकज्जकरणा–वसरे पइणा विमाणिया सन्ती । पुप्फवई निव्वेया, पडिवन्ना जिणवरचरित्तं ॥ १७ ॥ निरवज्जं पव्वज्जं, पालिय खालियपमायमलपडला । सा मरिऊणं सुहझाणसज्झया दिवि सुरो जाओ ॥ १८ ॥ ओहिं जाव पउंजइ, सो तियसो ताव सोयरेण समं । पिक्खेवि पुप्फचूलं, भोगपरं चिन्तिउं लग्गो ॥ १९ ॥ मम आसी पुव्वभवे, पाणाओ(उ)वि वल्लहा सुया एसा । ता तह करेमि अहुणा, जेण न नरए कुडं पडइ ॥ २० ॥ इय चिन्तिय पडिबोहण–विहियमई पुप्फवइ वरो अमरो । निसि सुत्ताए तीए, नरयेदुह दंसए एवं ॥ २१ ॥ साहाविय तिसु उण्हा, मीस चउत्थीइ सीय उवरितिगे । परमाहम्मियजणुदीरणा वेयणा तत्थ ॥२२॥ अइसंकडमुहघडियालयाओ असुरेहिँ फडुरडंतसरा । कड्ढिज्जन्ति हु केई, जन्ताओ लोहतन्तुव ॥ २३ ॥ ताडिज्जन्ति य केई, सिलायले वज्जकण्टयाइण्णे । असुरेहिं गहियचलणे, खालणपारद्धवसणं व ॥ २४ ॥ पीडिज्जन्ति य केई, उच्छुं पिव लोहजंतमज्झंमि । करवत्तेहिं केई, दारुव वियारियज्जन्ति ॥ २५ ॥ आलिङ्गाविज्जंती, केई लोहित्थिमग्गितविय-तणुं । खाविज्जन्ति समंसं, छिन्देउं केवि छुरियाहिं ॥ २६ ॥ तिण्हातरला केई, पाइज्जंती य उण्हतउयाई । केविहु

जलिरंगारे, खाविजंती छुहकिलन्ता ॥ २७ ॥ राइयपमाणखण्डे, काऊणं केवि कडुरडंता वि। कुम्भीपाए पावा, पचन्ति य सागपत्तं व ॥ २८ ॥ अइउण्हतावियासुं, केवि तलिज्जंति पप्पडुव फुडं। चूरिज्जंति य केई, घडुव्व मुग्गरपहारेहिं, ॥ २९ ॥ केवि रुहिरवसविप्पुडुवसंपलउवसनमीरपूरभरियाए । वेयरणीए दक्खुत्ति-पुकरन्ता खिविज्जन्ति ॥ ३० ॥ केई तीए पुलिणे, वसहुव महाभरं वहिज्जन्ता। पलयाणलपज्जलिए, भट्ठे चणयव्व फुट्टन्ति ॥ ३१ ॥ छायत्थिणो य केई, असिवणपत्ता समीरखित्तेहिं। सव्वंगं छिज्जन्ती, पहरणसरिसेहिं पत्तेहिं ॥३२॥ इय नेरइयसरूवं, सुदारुणं पासिऊण पडिबुद्धा। सुरहिव्व वग्घतत्था, सइव्व परपुरिसकरपुट्ठा ॥३३॥ हंसिव्व सेणन(त)ट्ठा, मूसिव्व विडालदंसणपलाणा। सा पुप्फचूलजाया, जाया भयवेविरसरीरा ॥३४॥ जुगलं। अप्पाणं नरयगयं व, पिक्खमाणा मणंमि संबुद्धा। सव्वं सुविणसरूवं, सा साहइ निययदइयस्स ॥ ३५ ॥ सोविहु तीए दुसुविणउवसमणत्थं पभूयविभवेहिं। सन्तियनिउणजणेहिं, कारवइ सन्तियं कम्मं ॥ ३६ ॥ एवं च पुप्फचूला, सुयापबोहाय पुप्फवइतियसो। वारं वारं नरए, दंसइ साविहु भणइ पइणो ॥ ३७॥ तो सो गोसे नियपिययमाइ सहिओ सहंगओ सव्वे। दंसणिणो आणाविय, नरयसरूवाइ पुच्छेइ ॥३८॥ तेविहु भणन्ति नरवर! दारिद्दं रोगसोगसन्तावा। परवसभावो गुत्तीइ, ठाणमिय नरयचिण्हाइं ॥ ३९ ॥ सुमिणविसंवायाओ, तव्वयणमसच्चयं वियाणित्ता। मोडेऊणं वयणं, ते लहु देवी विसज्जेई ॥४०॥ रण्णा अपिणयपुत्तायरिओ हक्कारिऊण अह पुट्ठो। जहठियनरयसरूवं, तेसिं पुरओ परूवेइ ॥ ४१ ॥ देवी

भणेइ भयवं ! ममं व तुम्हेहिँ सुविणमज्झंमि । किं नरयाण सरूवं, सयलंपि पलोइयं एयं ? ॥ ४२ ॥ सूरीवि भणइ भद्दे !, सुविणेण विणावि जिणवरागमओ । जाणिज्जइ अम्हेहिं, लोयसरूवं असेसंपि ॥ ४३ ॥ तो निवजाया पुच्छइ, भयवं ! विहिएण केण कम्मेणं ? । जीवा पावन्ति इमाणि, नरयदुक्खाणि तिक्खाणि ॥ ४४ ॥ अण्णियपुत्तो साहइ, कुणिमाहारे सया पसत्ताणं । महरम्भमहपरिग्गह—पसत्तचित्ताण सत्ताणं ॥ ४५ ॥ पञ्चिंदियघाईणं, गुरुपडिणीयाण रुद्दझाणीणं । नरए हवेइ पडणं, उलालियदण्डनाएण ॥ ४६ ॥ जुयलं । इय कहिऊणं अण्णिय—पुत्तायरिया गया नियं ठाणं । जणणीदेवोवि तओ, तीसे दंसेइ सग्गाइं ॥ ४७ ॥ तत्थ य तियसा मणिमयविमाणमालानिवाससुहसुहिया । अमरतरुनियरपूरियसमीहियत्था अइपसत्था ॥ ४८ ॥ कुण्डलतिरीडहारप्पमुहाहरणेहि भूसियसरीरा । नियकंतकन्तिपूरेहिं, पूरियासेसदिसिविदिसा ॥ ४९ ॥ अरयंबरवत्थधरा, अणमिसनलिणोवमाणनयणजुया । अमिलाणपुप्फमाला, घोलिरगलकन्दला सययं ॥ ५० ॥ देवंगणागणेहिं, सह विसयसुहं सया समाणन्ता। बहुविहजलाइकीलापसत्तचित्ता दुहच्चत्ता ॥ ५१ ॥ गामसरताणमुच्छणमुच्छियवरगीयसवणनिहुअमणा । ताललयमाणरम्मं, नट्टारम्भं पलोयन्ता ॥ ५२ ॥ सयलजगलोललोलाकोडिहिं पिहु न वण्णिउं सक्कं । ईसरियमणुहवंता, चिट्ठन्ति पगिट्ठतुट्ठमणा ॥५३॥ षड्भिः कुलकम् ॥ इय पिक्खिउण सुमिणे देवसरूवं सकोउगा देवी । पडिबुज्झिऊण पइणो, जहट्ठिअं कहइ वुत्तंतं ॥ ५४ ॥ गोसे तोसेण निवो, दंसणिणो आहवित्तु पुच्छेइ । किं सग्गस्स सरूवं?

तेसिं एगो कहइ एवं ॥ ५५ ॥ पियसङ्गमाओ अवरो, सग्गो नो अत्थि इत्थ भुवणंमि । अवरो भणेइ जं जं, सुह-
जणयं स स हवइ सग्गो ॥५६॥ एवं सग्गसरूवं, तक्कहियं पुप्फचूलनिवदइया । नो मन्नेइ जओ सा, तद्दिट्ठठिई सयं
सुविणे ॥ ५७ ॥ अह हक्कारिय रण्णा, अण्णियउत्तो नमित्तु परिपुट्ठो । तियसालयस्सरूवं, जहट्ठियं साहए सव्वं
॥५८॥ तं सुणिय पुप्फचूला, विणयावणया भणेइ गुरुपुरओ । भयवं ! ममं व सुविणे, किं तुम्हेवि पिक्खिया सग्गा ?
॥ ५९ ॥ वागरइ गुरू भद्दे,! जिणवयणपईवभासियमणाणं । सग्गसरूवं अन्नंपि, सव्वमम्हाण पुण पयडं ॥ ६० ॥
नियदइयावि पमाणं, जिणवयणं चिय मणंमि जाणित्ता । पुच्छेइ गुरुं सग्गो, पाविज्जइ केण कम्मेणं ? ॥६१॥ तो वाग-
रइ गुरु विउ, भद्दे ! जिणदेसियाइ दिक्खाए । सव्वसुहाणं ठाणं, लब्भइ सग्गोऽपवग्गोवि ॥ ६२ ॥ इय सुणिय भग्ग-
दुग्गइमग्गा रङ्गतरङ्गसंवेगा । श्रीपुप्फचूलनरवरपाणपिया विन्नवेइ गुरुं ॥ ६३ ॥ भयवं ! दइयं पुच्छिय, पवज्जं तुम्ह
पायमूलंमि । गहिउं नरजम्मफलं, सुहफलफ(क)लियं करिस्सामि ॥६४॥ इय भणिरी निवभज्जा, नमिऊण गुरुं विसज्जए
हरिसा । तत्तो नियदइयं पइ, जंपइ महुराइ वाणीए ॥ ६५ ॥ तुम्ह पसाया सामिय ! भोगुवभोगा मए सया भुत्ता ।
इण्हिं कुणह पसायं, पवज्जं जेण गिण्हेमि ॥ ६६ ॥ तमयण्डवज्जपायं पिव सुणिय वयं निवो पयंपेइ । सुयणु !
मह पिम्मपउमं, मा उम्मूलेसु करिणिव्व ॥ ६७ ॥ सत्तङ्गसङ्गयं पिहु, रज्जं अन्तेउरं तहा नयरं । मह तुह विरहे
ससिमुहि !, सुन्नरण्णं व पडिहाई ॥ ६८ ॥ अह चिट्ठसि न कहंपिहु, तो तं अङ्गीकयवया सन्ती । गिण्हसु महगिह-

भिक्खं, जेणणुजाणामि दिक्खइं ॥ ६९ ॥ एसो तइ त्ति पडिवज्जिऊण तं वयणममयपाणं व । दीणाइयाण दाणं, दाऊणं कप्पवल्लिव ॥ ७० ॥ सव्वत्थाभयदाणं, उग्घोसिय चेइएसु तह पूयं । काऊण दइयकारियनिक्खमणमहूसवु- क्करिसा ॥ ७१ ॥ गन्तूण अण्णियासुयगणहरपासंमि पुप्फचूला सा । पडिवज्जइ पव्वज्जं, बीयंपिव सुक्खरुक्खस्स ॥ ७२ ॥ ( तिहिँ कुलयं ) गहणासेवणसिक्खं, सम्मं सा सिक्खिउं महादक्खा । सआया गरुयाणं, सज्जो हि गुणा- वहो होइ ॥ ७३ ॥ अह नाणेणं नाउं, बारससंवच्छराइँ दुब्भिक्खं । अण्णियउत्तायरिओ, गच्छं पइ जंपए एवं ॥ ७४ ॥ वच्छा ! गच्छह तुब्भे, दुभिक्खाओ सुभिक्खदेसेसु । जङ्घाबलपरिखीणा, चिट्ठिस्सामो इहेवऽम्हे ॥७५॥ पुहवितलुल्लियसीसा, सीसावि भणन्ति नेरिसं जुत्तं । तुम्ह पयपउममूलं, मुत्तुं अम्हाण पुण गमणं ॥ ७६ ॥ तो नमिय पुप्फचूला, विन्नवइ गुरुं मुणिन्द ! तुम्हाणं । पुण्णोदएणं लद्धं, सुस्सूसमहं करिस्सामि ॥ ७७ ॥ उस्सग्गववा- यविऊ, अणुचियमवि तीइ साहुणीइ गिरं । पडिवज्जिऊण गच्छं, सुभिक्खदेसंमि पट्ठवइ ॥ ७८ ॥ अह पुप्फचूल- अन्तेउराओ गहिऊण सुद्धमाहारं । वियरेइ पुप्फचूला, गुरूण परमाइ भत्तीए ॥ ७९ ॥ एवं सया गुरूणं, एगग्गम- णेण सा परमभत्तिं । कुणमाणा सुहझाणा, पावइ वरकेवलं नाणं ॥ ८० ॥ सा जायकेवलावि हु, वेयावच्चं विसे- सओ गुरुणो । आगमभणियं अत्थं, सव्ववयन्ती विणिम्मेइ ॥ ८१ ॥ जो जस्स य जारिसयं, पुव्विं भत्तिं कुणन्तओ होइ । सो तस्स तारिसं चिय, कुणेइ जा नज्जइ न नाणी ॥ ८२ ॥ नाणेण सा गुरूणं, सव्वाइँ मणिच्छियाइं पूरंती ।

तेहिं वुत्ता वच्छे ! कहं तुहं इय वियाणेसि ? ॥ ८३ ॥ पभणेइ पुप्फचूला, भयवं ! पगिइं तुमाण जाणेमि । जो जं खु सया सेवइ, सो जाणइ तस्स सब्भावं ॥ ८४ ॥ कइया सा वरिसन्ते, घणेऽसणं आणिऊण वियरन्ती । गुरुणा वुत्ता जाणंतियाऽवि किं वच्छि! भुलेसि ? ॥ ८५ ॥ साऽवि पयंपइ भयवं ! आउकाएण वज्जिए मग्गे । पिण्डं आणन्तीए, मज्झं दोसो न कोवि हवे ॥ ८६ ॥ अचित्तं पुण मग्गं, जाणेसि तुमं कहन्ति ? गुरुपुट्ठा । सा भणइ केवलेणं, सवं पच्चक्खयं मज्झ ॥ ८७ ॥ सूरीवि चिन्तए जं, मए दुरप्पेण केवलन्नाणी । आसाइओ तओऽहं, किं भवो दूरभव्वो वा ? ॥ ८८ ॥ तो जाणिऊण गुरुणोऽभिप्पायं सा भणेइ सुरसरियं । तुम्हं तरंताण फुडं, भविस्सइ केवलं नाणं ॥ ८९ ॥ अह सूरी गंतूणं, गंगाए बहुजणेण परियरिओ । आरुहई नावाए, लाहत्थे को न उज्जमइ ? ॥ ९० ॥ जत्थ पएसे सूरी, उवविसइ तत्थ बुड्डए नावा । तो लोओ नियजीवियलुद्धो तं खिवइ जलमज्झे ॥ ९१ ॥ तत्थ पडन्तं पच्चयणपडिणीया खुड्डवन्तरी सूरिं । पोएइ तिसूलेणं, जओ खलाणं कओ करुणा ? ॥ ९२ ॥ सूरीवि नियं पीडं, अवमन्निय चिन्तए कहं देहो ? । आउकायाईणं, जीवाण खयंकरो मज्झ ॥ ९३ ॥ इय जीवदयासारं, भावं भावंतओ मणे सूरी । आरुहिय खवगसेणिं, अन्तगडो केवली जाओ ॥ ९४ ॥ सियझाणंमि चउत्थे, ठिओ तओ निव्वुइं गओ सूरी । तत्थ य निव्वाणमहं, देवा देवीउ अकरिंसु ॥ ९५ ॥ तप्पभिइ तत्थ ठाणे, लोइयतित्थं पयाग इय नामं । सुपसिद्धं सञायं, कामियदाणाओ लोयम्मि ॥ ९६ ॥ इत्तो य पुप्फचूला, सियझाणेणं खवित्तु कम्माइं । निव्वा-

णमणन्तसुहाण भायणं झत्ति सम्पत्ता ॥९७॥ इत्थं पसत्थं सिरिपुप्फचूलावुत्तं निसामित्तु विवेइलोया ! । सया गुरूणं चरणाण सेवं, कुणेह मुत्तं हि जहा लहेह ॥ ९८ ॥

इतिसुदृष्टपरमार्थसंस्तवे पुष्पचूलाकथा ।

श्रद्धानस्य सुदृष्टपरमार्थसंस्तवरूपं द्वितीयं भेदमुक्त्वा तृतीयं व्यापन्नदर्शनलक्षणं भेदं व्याचिख्यासुराह—

वावन्नदंसणाणं, निण्हवहाच्छन्दकुग्गहहयाणं । उम्मग्गुवएसेहिं, बलावि मइलिज्जए सम्मं ॥ ११ ॥

व्याख्या—वावन्नत्ति, अनन्तधर्म्मात्मके वस्तुनि इतरधर्म्मप्रतिक्षेपेणान्यतरधर्म्मस्वीकाराध्यवसायजनितैकैकनयव्यामोहवशसञ्जातमिथ्यात्वोदयेन व्यापन्नं—नष्टं दर्शनं—सर्वनयमयवस्तुबोधरूपं सम्यक्त्वं येषां ते व्यापन्नदर्शनास्तेषां, प्रत्येकनयाङ्गीकरणमेव मिथ्यात्वं, यतः—“जावइया वयणपहा, तावइया चेव हुन्ति नयवाया । जावइया नयवाया, तावइयं चेव मिच्छत्तं ॥ १ ॥” निण्हवत्ति—यथावस्थितं समस्तवस्तुप्रतिपत्तावप्येकत्र कुत्रचिदर्थेऽन्यथाप्रतिपत्त्या यथावज्जिनवदनविनिर्गतवचनं निह्नुवते ऽपलपन्तीति निह्नवा मिथ्यादृशः, उक्तञ्च—“पयमक्खरं पि इक्कं, जो न रोएइ सुत्तनिद्दिट्ठं । सेसं रोयंतो वि हु, मिच्छद्दिट्ठी मुणेयव्वो ॥१॥” अहाच्छन्दत्ति—यथाकथञ्चित्स्वमनीषिकया गुरुसिद्धान्तनिरपेक्षतया च सर्व्वधर्म्मकृत्येषु च्छन्दो मनोऽभिप्रायो येषां ते यथाच्छन्दसः, यदुक्तम्—“उस्सुत्तमणुवइट्ठं, सच्छन्दविगप्पियं अणणुवायं । परतत्ति पवत्तेंति, तेण य इणमो अहाच्छन्दो ॥ १ ॥” कुग्गहत्ति—शाक्यादिकुदृष्टिसृष्टि-

मद्दावासनामलमलिनखान्तस्य जीवस्य हेतुयुक्तिस्पष्टदृष्टान्तशतसहस्रैरपि नीलीरक्तवासोवद्बहुशोऽपि प्रक्षाल्यमानस्य तत्तत्संस्कारानुवर्त्तनरूपः कुत्सितो ग्रहः कुग्रहस्तेन हता अर्थापत्त्या दुर्गदुर्गतिपातेन नाशं नीताः, निह्नवाश्च यथाच्छन्दसश्च कुग्रहहताश्च निह्नवयथाच्छन्दःकुग्रहहतास्तेषाम् । उम्मग्गत्ति—अर्हत्प्रणीतक्षायोपशमिकभावरूपसन्मार्गपरित्यागात्मकः शाक्यशैवनास्तिकादिशासनस्वीकारात्मकश्च य उन्मार्गस्तस्योपदेशाः, ते चामी—“मृद्वी शय्या प्रातरुत्थाय पेया, मध्ये भक्तं पानकं चापराह्णे । द्राक्षाखण्डं शर्करा चार्धरात्रे, मोक्षश्चान्ते शाक्यसिंहेन दृष्टः ॥१॥ न मांसभक्षणे दोषो, न मद्ये न च मैथुने । प्रवृत्तिरेषा भूतानां, निवृत्तिस्तु महाफला ॥ २ ॥ पिब खाद च जातशोभने,! यदतीतं वरगात्रि! तन्न ते । न हि भीरु! गतं निवर्तते, समुदायमात्रमिदं कलेवरम् ॥ ३ ॥” इत्यादि मुग्धजनविप्रतारकरूपास्तैः,‘बलादपि’ हठादपि ‘सम्यक्त्वं मलिनीक्रियते’ तत्सम्पर्काद्दर्शनहानिरेवेति गाथार्थः। अत्रार्थे रोहगुप्तकथा, तथाहि—इहेव भारहे वासे जणमणरंजिया अत्थि अंतरंजिआ नाम नयरी, ‘जीए जिणहरसिरठियसुवण्णकलसेहिं जलहलन्तेहिं । सहसकरसहसंकं, पहियजणो कुणइ पइरयणिं ।१।’ तत्थासी पच्चत्थिपत्थिवागरिसियरायसिरी बलसिरी नाम राया । ‘हयअरिपुरन्धिसंजणियनयणुण्हंसूहिं जस्स जसवल्ली ।१।’ चुब्बं सित्ता विसयत्तमुव्वहन्ती समुल्लसइ।१।’ तत्थ य बहुविहलद्धिसमिद्धविज्ञातजियसुरसूरी आसि सिरिगुत्तो नाम सूरी । ‘कुन्दुज्जलगुणमुत्ताहलाहं(इं)गहिऊण जस्स भव्वजणो । देसेसु विकिणन्तो, नूणमुवज्जेइ परमसिरिं ।१।’ एगया तस्स सहोयरो सीसो य असेसकलाकला-

वज्जुत्तो रोहगुत्तो नाम गामन्तराओ गुरुचरणवन्दणत्थं आगओऽन्तरजियाए पुरीए । तत्थ य एगो परिवायगो अहंकारविकारनडिओ । जम्बूदीवमज्झे मज्झसमो अन्नो वाई नत्थित्ति करधरियजम्बूयतरुसाहो । मा मे पभूयविज्जाहिं पुट्टो फुट्टिहित्ति सुदिढलोहमयपट्टपिणद्धोयरो । तिहुयणेवि मह सरिसो कोवि उ कलाकलावकलिओ पुरिसो नत्थित्ति पडुपडहं नयरे उग्घोसावन्तो तियचउक्कचच्चरेसु सुइरं परिब्भमइ, कस्स न होइ नियचित्तनिम्मिओ गव्वो ? हरिसप्पगरिसाय, यतः—"टिट्टिभः पादमुत्क्षिप्य, शेते भङ्गभयाद्भुवः । स्वचित्तनिर्मितो गर्वः, कस्य न स्यात्सुखप्रदः ? ॥१॥" तओ लोएण से "पुट्टसालुत्ति" नाम कयं, अन्नया रोहगुत्तेण गुरुपायमूले गन्तूण गमणागमणमालोयन्तेण तेण कहिओ पडहच्छिवणवुत्तन्तो, गुरुहिं पि साहियं—वच्छ ! तए न सम्मयं सम्मयं कयं, जं सो विज्जाबलिओ वाए पराजिओऽवि देयाहिट्ठियखुद्दविज्जं पउंजन्तो केण धरिज्जइ ? अन्नं च सत्तवसणं व दुरुत्तराओ विच्छुयसप्पसुसयहरिणसूयरकायसउणिपमुहाओ सत्त विज्जाओ महारुद्दाओ वाए पराजियम्मि पडियाईणमुवद्दवन्ति, तओ रोहगुत्तेण भणियं—भयवं ! पलायमाणेहिं अहुणा कहँ छुट्टिज्जइ ? विग्घभयेणारम्भियमत्थमुज्झन्तेहिं नियचित्ताओवि लज्जिज्जइ । यदुक्तम्—"प्रारभ्यते न खलु विघ्नभयेन नीचैः, प्रारभ्य विघ्ननिहता विरमन्ति मध्याः । विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः, प्रारब्धमुत्तमगुणा(जना) न परित्यजन्ति ॥१॥" इय तेण विन्नत्ता गुरुणो विचिन्तिउं लग्गा, न एस दव्वाणुओगस्स सिद्धन्तस्स जुग्गो, उत्तञ्च—"आमे घडे निहित्तं, जहा जलं तं घडं विणासेइ । इय सिद्धंतरहस्सं, अप्पाहारं विणासेइ ॥ १ ॥"

तहावि जिणसासणस्स सव्वहा ओहावणा रक्खियव्वा, पभावणा (य) कायव्वा, अन्नहाऽणंतसंसारपडणदण्डो । तओ गुरूहिं परिव्वायगविज्जापडिवक्खभूयाओ मऊरी-नउली-बिराली-वग्घी-सिंही-उलूई-सेणीसन्नाओ सत्त विज्जाओ पढियसिद्धाओ, अन्नं च रओहरणमभिमन्तिऊण दाऊण भणियं च—जइया कोवि भयंकरो उवसग्गो उप्पज्जइ, तइया अणेण रओहरणेण ताडिओ सो पलयं गमिही, सक्कोवि एयप्पहारेण सग्गाओ दडउव्व खडहडिउं पडइ, अन्नस्स का वत्ता ? । इय गुरुदत्ताओ विज्जाओ गहिय सो हरिसुप्फुल्लगल्लजुयलो, सिरिबलसिरिराइणो अत्थाणमण्डवं पविट्ठो, तस्स परिव्वायग(स्स)माणमलणत्थं, तत्थ वाइपडिवाइसब्भसहावइरूवाए चउरङ्गट्ठिईए ठावियाए सहाए खुहमाणसो परिव्वायगो चिन्तिउं पउत्तो—अन्नमयपक्खेहिं गहिएहिं ममेस निग्गहिहिइ, तओ एयस्स चेव पक्खं कक्खीकरेमि, जेण जिणमुणिमेयं सुहेण विजिणेमि, तओ तेण परिव्वायगेण जीवअजीवपक्खरासिजुयलमङ्गीकयं । अणेण दुट्ठेण अम्हाणं चेय पक्खं कक्खीकयन्ति चिन्तिय सो रोहगुत्तो अप्पडिहयपडिभुल्लासवसेण जीवअजीवनोजीवरासित्तयमङ्गी-करेइ, तत्थ चेयणलक्खणा जीवा एगिन्दियाइया, अचेयणा घडपडकडप्पमुहा अजीवा, चेयणाचेयणरूवा च्छिन्नपु-च्छाइया घिरोलीयाइया नोजीवा, एवं सग्गमच्चुपायालभेयओ लोगट्ठिई वि हु तिविहा, अईयाणागयवट्टमाणभेयओ कालोवि तिविहो, आइमज्झावसाणभेयओ दण्डाइया वि सव्वे पयत्था तिविहत्ति ठावयंतेण तेण परिव्वायगो निरुत्तरी-कओ, सयललोयसमक्खमेएण वाए अहं जिओ, अओ विज्जंतरेणऽवि एसो विजेयव्वुत्ति विमंसिऊण तेण पुट्टसालेण

तब्भक्खणत्थं तिक्खकंटया विञ्छुया मुक्का। मुणिणावि तच्चूण्णणकरा अइतिक्खचंचूणो सिहंडिणो संमुहं पेसिया। तओ जिणसासणमच्छरिएण तेण सहस्सफणफणा फारफुंकारवियारभीसणा विसहरगणा पउंजिया, मुणिणावि तब्भक्खणकए निसियदसणुद्धरा नउलपरम्परा पेसिया। तओ भिउडीभीसणभालवट्टेण तेण तग्घायणत्थं कयंतविदूसया मूसया पणुलिया, साहुणावि ते अइकरालेहिन्तो बिरालेहिन्तो मुसुमूराविया। तओ कुदिट्ठिणा तब्भयवियारणत्थमुत्तुङ्गकुडिलनिसियग्गसिङ्गा कुरङ्गा पयडीकया, अणगारेणावि तव्विणासणपवीणा पसारिआणणा घुरघुरन्ता सिग्घं वग्घा विउव्विआ। तओ पावेण तप्पडिकूला अइकरालदसणमालाविलोललोला कोला पयडिआ, मुणिपञ्चाणणेणावि पसारियाणणे पञ्चाणणे निम्मिऊण ते खण्डीकारिया। तओ पासण्डिणा तक्खण्डणपण्डियाणं वायसाण सिन्नं पणुन्नं, जइणावि तव्विग्घनिग्घायणत्थं घोरघुक्कारक्खेवहरियदसदिसिमुहा (नु!) भूयसमूहा निउंजिया। तओ दुट्ठज्झवसाएण धिज्जाइएण निविडकडुचञ्चुपुडतडपाडियपडिवक्खवक्खं सउणिलक्खं सज्जीकयं, समणेणावि तब्भयविहण्डणअइसमत्थं सेणसत्थं वित्थारियं। तओ पओसदूसियमाणसेण उण्हनिसासे विमुञ्चन्तेण अत्ताणं विजियन्ति मन्नन्तेण सियभिक्खुनिग्घायणत्थं खरखुरप्पहारखणियखोणिमण्डला खरमहिला सज्जिया, निग्गन्थेणावि गुरुपसाईकयरओहरणेण सा मत्थए ताडिया रोसभरभरियहियया तस्स परिवायगस्स सीसे मुत्तपुरीसे काऊण सव्वेसिंपि रायाइलोयाणं पिक्खंताणं भयत्तट्ठा नट्ठा। तओ परिव्वायगो लोएहिं खिंसिज्जमाणो जयइ जयइ जिणसासणंति पसंसन्तेणं राइणा-

वि स परिव्वायगो सविसयाओ निव्वासिओ, अह समुवलद्धविजयपत्तो रोहगुत्तो सिरिगुत्तायरियाणं पासे तं जह-ट्ठियं आलोयन्तो गुरुहिं वुत्तो, वच्छ! उट्ठन्तेणं तए किं न जम्पियं? जं जिणमए जीवाजीवरूवे दुवे रासी परूविए, मया उण परवाइविजयनिमित्तं मिच्छारूवं जीवाजीवनोजीवरूवं रासित्तयं पण्णवियं, तत्थ मे मिच्छामिदुक्कडन्ति। ता अहुणावि तत्थ गंतूण साहसु, सो नेच्छइ, जओ मए चउरङ्गाए रायसहाए एस अत्थो ठाविओ तत्थ इह(एव)मन्नहा-भणंतस्स ओहावणा मे महई उप्पज्जइ। तओ पुणो पुणो गुरूहिं सासिओ आसुरुत्तो रोहगुत्तो पडिभणइ-को इत्थ-दोसो? जहट्ठियत्थपरूवणेणं। गुरूहिं भणियं—एवं जिणसासणस्स आसायणा कया होइ। तओ सो कुग्गहग्गहिओ गुरूहिं सह विवइउं लग्गो। अह आयरियावि रायसहाए गंतूण भणन्ति, अम्ह सीसेण उस्सुत्तो वुत्तो, जओ जीवाजी-वरूवं रासिजुयलमत्थि, न नोजीवरूवो रासी अत्थि, इय सुचा परोहंतरोसङ्कुरो रोहगुत्तोवि तत्थागन्तूण सूरिहिं सद्धिं विवइउं सज्जीभूओ, एवं विवयमाणाणं गुरुसीसाणमेगदिणंव छ मासा वइक्कन्ता, अह रण्णा सूरिणो विण्णत्ता-तुम्हाण वायाओ अम्हाणं सव्वाइं रायकज्जाइं सीयन्ति, अणिट्ठिया एसा वायगुट्ठी न तुट्ठिं जणेइ, तओ सूरीहिं वज्ज-रियं—महाराय! निरत्थयमेव एस इत्तियं कालं धरिओ, गोसे उण एयं वायए मुसियसव्वस्सं करिस्सामो, जयपत्तं च गहिस्सामो। तओ गुरुसीसा वसहिं गया। पभाए उण ते दोवि गुरुसीसा रायसहंगया। तत्थ सूरिणो रायं भणन्ति, अम्हाणं परिक्खा कुत्तियावणे किज्जउ, जओ तत्थ सव्वाणि वत्थूणि विज्जमाणाणि भवन्ति, इत्थंतरे

पत्थिवपच्चक्खं सूरिहिं सासणदेवी पयडिया भासिया य, जीवेऽजीवे य पयत्थे आणिऊण दंसेहि, तओ सावि जीवे अजीवे य पयत्थे दंसेइ, नोजीवे उण कत्थवि न संतित्ति भणंती सासणदेवी तिरोहूया। तओ इच्चाइयाहिं चउयालीसाहियसयमियाहिं आवस्सयमहागंथविवरणपवंचियाहिं पुच्छाहिं सूरिहिं निरुत्तरीकओ रोहगुत्तो, तओ जय जय (जयइ जयइ) सिरिवद्धमाणसामित्ति उग्घोसंतेण चउव्विहसिरिसमणसंघेण जिणभवणेसु पभूया पभावणा कया, जं च रुट्ठेहिं गुरुहिं तस्स कुसीसस्स सीसे खेलमत्तयरक्खा पक्खित्ताऽऽसी, तं चेवायरंतो सो गच्छाओ निवासिओ, तओ सो दुरप्पा वेसेसियसुत्ताणि काऊण उलूयगुत्तत्तणओ उलूय एसत्ति जणेहिं भणिज्जंतो वद्धमाणसामिनिव्वाणाओ चउयालीसाहियपंचसए वरिसे वइक्कंते छट्ठो निण्हवो रोहगुत्तो जाओ-इच्चाइयाणं चुयदंसणाणं, कुदेसणा कन्नपहं गयावि। कुणेइ सम्मत्तमलीमसत्तं, अओ विवज्जिज्ज इमं सिवत्थी ॥ १ ॥ व्याख्याता व्यापन्नादिविषये रोहगुप्तकथा ॥ ११ ॥

श्रद्धानस्य तृतीयं व्यापन्नादिरूपं भेदमुक्त्वा चतुर्थं कुदर्शनदेशनापरिहाररूपं भेदमाह—

मोहिज्जइ मंदमई, कुदिट्ठिवयणेहिँ गुविलडंढेहिं। दूरेण वज्जियव्वा, तेण इमे सुद्धबुद्धीहिं ॥ १२ ॥

व्याख्या—"कुदिट्ठी"ति कुत्सिता दृष्टिर्दर्शनं येषां ते कुदृष्टयः-त्रिषष्ट्यधिकत्रिशतीसङ्ख्याः पाखण्डिनः, यदागमः—असियसयं किरियाणं, अकिरियवाईण होई चुलसीई। अन्नाणिय सत्तट्ठी, वेणइयाणं च बत्तीसं ॥ १ ॥ एतत्सङ्ख्योत्पत्तिस्त्वियं-अशीत्यधिकं शतं क्रियावादिनाम्, तथाच—न कर्त्तारमन्तरेण क्रिया पुण्यबन्धादिलक्षणा भवति, तत

एवं परिज्ञायात्मसमवायिनीं क्रियां वदन्ति तच्छीलाश्च ये ते क्रियावादिनः, ते पुनरात्माद्यस्तित्वप्रतिपत्तिलक्षणा अमुनोपायेनाशीत्यधिकशतसंख्या ज्ञेयाः, जीवाऽजीवाश्रवबन्धसंवरनिर्जरापुण्यपापमोक्षरूपान्नव पदार्थान् परिपाट्या विन्यस्य स्वपरभेदाभ्यां गुणयित्वा नित्यानित्याभ्यां च संगुण्य ततः कालेश्वरात्मनियतिस्वभावभेदैः पञ्चभिर्गुणिता जाता अशीत्यधिकशतं भेदाः । अक्रियावादिनां स्वरूपमाह—न कस्यचित्प्रतिक्षणमनवस्थितस्य पदार्थस्य क्रिया सम्भवति, उत्पत्त्यनन्तरं विनाशादिति वादिनः, एते चात्मादिनास्तित्वप्रतिपत्तिलक्षणा अमुनोपायेन चतुरशीतिसंख्या द्रष्टव्याः, पुण्यापुण्यरहिततत्त्वसप्तकं स्वपरभेदाभ्यां गुणितं जाताश्चतुर्दश, ते च कालेश्वरात्मनियतिस्वभावयदृच्छाभेदैः षड्भिर्गुणिता जाताश्चतुरशीतिभेदाः अक्रियावादिनाम् । अज्ञानवादिनां स्वरूपमाह—ज्ञाने सत्यभिनिवेशसम्भवात् (वः) तस्मादज्ञानमेव मुमुक्षुणा मुक्तये अभ्युपगन्तव्यं, न ज्ञानमिति, तद्भेदानाह—जीवादिनवतत्त्वानि सत्त्वासत्त्वसदसत्त्वावाच्यत्वसदवाच्यत्वासदवाच्यत्वसदसदवाच्यत्वभेदसप्तकेन गुणितानि जातास्त्रिषष्टिः भेदाः, सती १ असती २ सदसती ३ अवक्तव्या ४ भावानामुत्पत्तिरितिचतुष्टययोगात्सप्तषष्टिर्भेदाः, एताः को वेत्ति ? एताभिर्ज्ञाताभिः किं ? इत्यज्ञानता । वैनयिकानाह—विनयेन चरन्तीति वैनयिकाः, एते चानवधृतलिङ्गाचारशास्त्रा विनयप्रतिपत्तिलक्षणा वेदितव्याः, तद्भेदाःसुरनृपयतिज्ञातिस्थविराधममातृपितृरूपा अष्टौ भेदाः, ते च मनोवाक्कायदानभेदैश्चतुर्भिर्गुणिता द्वात्रिंशद्भेदा भवन्ति । एवंरूपाः स्याद्वादसद्वानलङ्कृतत्वादेकैकनयमतावलम्बिनो मिथ्या-

दृशः, तत्प्रणीतैर्वचनैः, अथवा वाल्मीकव्यासग्रथितै रामायणभारताद्यसत्यप्रलापप्रायैः शास्त्रैः, 'गुपिलदण्डैः' गहनतरदम्भसंरम्भप्रतिपादनप्रवीणैः 'मन्दमतिः' प्राणी अज्ञातजिनागमो मोहमापद्यते इति प्रमुह्यते, भक्षितहृत्पूर इव हृदयं तु मुह्यते, 'तेन' हेतुना मिथ्यादृशः 'शुद्धबुद्धिभिः' सम्यग्दर्शननिर्मलीकृतमतिभिः, 'दूरेण वर्ज्जनीयाः' सर्वथा तत्सङ्गः परित्याज्य एवेति गाथार्थः ॥१२॥ एतदर्थसत्यापनार्थं वैश्रमणश्रेष्ठिदृष्टान्तो मूलदेवादिपञ्चधूर्त्तस्वरूपोपलक्षितः प्रतन्यते, तथाहि–

समस्ति भारते वर्षे, हर्षोत्कर्षकरे सताम्। श्रीअवन्त्याह्वयो देशो, लेशो यत्र न पाप्मनाम् ॥ १ ॥ स्वःपुरीजयिनी तत्र, समस्त्युज्जयिनी पुरी। यां द्रष्टुमिव गीर्वाणा, निर्निमेषत्वमाश्रिताः ॥ २ ॥ तमालतालहिंतालरसालावलिमालितम्। तस्या उत्तरदिग्भागे, जीर्णोद्यानाभिधं वनम् ॥ ३ ॥ नन्दनाद्यैरलं फल्गुफलैर्भोग्यफलं त्वहम्। नृत्यतीवेति यद्वातविधूतैः पल्लवैः करैः ॥ ४ ॥ तत्रामात्रद्रुमेऽन्येद्युर्वाचाला निकृतिव्रताः। भूयांसो भूरिदेशेभ्यः, समीयुर्धूर्त्तपुङ्गवाः ॥ ५ ॥ यैरवस्वापिनीप्राज्यरूपिणीमोहिनीमुखैः। धूपयोगाञ्जनाद्यैश्च, दम्भैः कः को न वञ्चितः? ॥ ६ ॥ मूलदेवः कण्डरीक, एलाषाढः शशाह्वयः। खण्डापानाभिधा स्त्री च, तेषां पञ्चेश्वरा अमी ॥ ७ ॥ प्रत्येकं ते नृधूर्त्तानां, पञ्चशत्या परिस्थिताः। खण्डापाना किलैका तु, नारीपञ्चशतान्विता ॥ ८ ॥ वर्षाकालस्तदा प्रादुरासीन्निर्नाशिताऽऽतपः। प्रकाशयन् घनैः स्वस्य, राज्यमेकातपत्रितम् ॥ ९ ॥ ससाहं वारिदेनाम्बुवृष्टिं विदधताऽधिकम्। बभूव बाढजम्बालपिच्छलं क्षोणिमण्डलम् ॥ १० ॥ तदा धूर्त्ताः क्षुधाक्रान्ताः, शीतेन परिपीडिताः।

परस्परं वदन्ति स्म, को नो दाताऽद्य भोजनम् ? ॥ ११ ॥ जगाद मूलदेवोऽथ, स्वानुभूतं श्रुतं हि वा । यद्येन धूर्त्तं तत्तेन, धूर्त्तानां कथ्यतां पुरः ॥ १२ ॥ यस्तन्न मन्यते तेषु, वचः सत्यतया पुनः । तेन देयं समग्राणां, धूर्त्तानामद्य भोजनम् ॥ १३ ॥ श्रीभारतपुराणोक्तिरामायणनिरूपितैः । संवादिवचनैर्धूर्त्तान्, प्रत्याययति नः पुनः ॥ १४ ॥ स धूर्त्तानां शिरोरत्नमददानोऽपि भोजनम् । इत्युक्त्वा मूलदेवोऽथ, प्रथमं तानभाषत ॥ १५ ॥ मया तरुणभावे यदनुभूतं महाधियः ! । तदाकर्णयतोत्कर्णाः, कथ्यमानमिहाधुना ॥ १६ ॥ एकदा तरुणत्वेऽहमीहमानः सुखासिकाम् । कमण्डलुजलपाणिः, स्कन्धविन्यस्तकम्बलः ॥ १७ ॥ दिधीर्षुः स्वर्णदीधारां, प्रस्थितः स्कन्दमन्दिरम् । यावत्ताव-न्मदोन्मत्तो, दन्ती प्रादुरभूत्पुरः ॥ १८ ॥ युग्मम् । पर्जन्य इव गर्जन्तं, सिञ्चन्तं क्ष्मां मदाम्बुभिः । अभ्यायान्तमिभं पश्यन्नातङ्कव्याकुलोऽभवम् ॥ १९ ॥ एतस्मात्कथमात्मानं, कृतान्तात्कुपितादिव । नश्यामीति भयाऽऽवेशात्प्राविशं कुण्डिकान्तरे ॥ २० ॥ मदभिन्नकटः सोऽपि, करटी प्रसरत्करः । ममानुपदिकः कुण्ड्यां, प्राविक्षन्नालकाऽध्वना ॥ २१ ॥ कुम्भी स कुम्भीनसवत्फूत्कारान् रोदसः सृजन् । मत्पृष्ठलग्नो भ्राम्यंश्च, षण्मासीं तत्र वञ्चितः ॥ २२ ॥ ममैषोऽद्यापि नो पृष्ठं, मुञ्चतीति विचारवान् । ततोऽहं कुण्डिकाद्वारान्निरगां नरकादिव ॥ २३ ॥ मत्पृष्ठे निःसरन्नेष, सिन्धुरोऽपि मदोद्धुरः । कुण्डिकारन्ध्रसंलग्नपुच्छकेशोऽस्खलत्क्षणम् ॥ २४ ॥ ततः स्वर्गनदीं नारीमिव पीनपयो-धराम् । दृष्ट्वा गोष्पदवत्तीर्त्वाऽभ्यगां स्कन्दस्य मन्दिरम् ॥ २५ ॥ अवधूय क्षुधोदन्ये, षण्मासीं तत्र तिष्ठता । पतन्तौ

व्योमतो मूर्ध्नि, गङ्गाधारा मया धृता ॥ २६ ॥ ततः षण्मुखमानत्याऽऽगत्य चोज्जयिनीं पुरीम् । भवद्भ्यो धूर्त्तराजेभ्यः, क्षेमेण मिलितोऽधुना ॥ २७ ॥ इदं चेद्वित्थ सत्यं तन्मां मानयत हेतुभिः । अथालीकं तदाऽमीभ्यः, सर्वेभ्यो दत्त भोजनम् ॥ २८ ॥ कण्डरीकस्ततोऽवादीत्त्वामसत्यीकरोति कः? । जानानो हि पुराणं च, श्रीरामायणभारते ॥ २९ ॥ यत् त्वयाऽवाद्यहं सेभः, कथं कुण्ड्यामभमान्तमाम्? । तत्प्रत्ययाय विप्राणामत्रार्थे शृणु जल्पितम् ॥ ३० ॥ –विधातुर्वदनाद्विप्राः, क्षत्रिया बाहुयुग्मतः । ऊरुयुगलतो वैश्याः, पद्भ्यां शूद्राश्च निर्ययुः ॥ ३१ ॥ यद्येतावान्ममौ लोको, ब्रह्मणो जठरान्तरे । कमण्डलौ भवांस्तर्हि, न मातोभससमन्वितः? ॥ ३२ ॥ अन्यच्च यस्य धावन्तौ, ब्रह्मविष्णू उपर्यधः । दिव्यवर्षसहस्रेणाध्यासौ पारं नहि कश्चित् ॥ ३३ ॥ महत्प्रमाणं तल्लिङ्गमुमायोनौ यथा ममौ । तथा त्वां सगजं कुण्ड्यां, प्रविष्टं कोऽत्र दूषयेत्? ॥ ३४ ॥ युग्मम् ॥ अन्यच्च कीचकशतोत्पत्तिर्या व्यासभाषिता । प्रसिद्धा भारते शास्त्रे, तामप्येतर्हि संशृणु ॥ ३५ ॥ विराटभूपतेरग्रमहिषी पुत्रकाम्यया । ऋषिं गाङ्गलिनामानमाराधान्यदाऽऽश्रमे ॥३६॥ साधयित्वा चरुं सोऽपि, दत्वा तामिदमूचिवान् । –अन्तःकुडङ्गं भुक्तेऽस्मिन्, सुतानां भावि ते शतम् ॥३७॥ ततो गत्वा कुडङ्गान्तर्बुभुजे तमसौ चरुम् । तत्रस्थो गाङ्गलिरपि, तप्यते स्म तपोऽधिकम् ॥ ३८ ॥ सरस्यप्सरसस्तत्र, स्नान्तीर्वासोविवर्जिताः । ता निरीक्ष्य ऋषिः स्मेरस्मरबाणैरविध्यत ॥३९॥ कामक्षोभादस्य शुक्रबिन्दुर्यः कीचकेऽपतत् । तस्मादाद्यः कीचकोऽभून्महावीर्यवदुत्तमः ॥ ४० ॥ पश्यतोऽप्सरसस्तस्य, गलिताः शुक्रबिन्दवः । नाल्यां ये

पतितास्तेभ्यः, कीचकानामभूच्छतम् ॥ ४१ ॥ तां नालीं स ऋषिस्तत्र, निधाय स्वाश्रयं ययौ । राजाऽपि रक्षयामास, ततो वंशकुडङ्गकम् ॥ ४२ ॥ नाल्याः सम्पूर्णसर्वाङ्गान्, यद्राज्ञी ह्याददेऽर्भकान् । तेन ते तत्सुतत्वेन, प्रोच्यन्ते कीचका जनैः ॥४३॥ कीचकानां शतं प्रौढं, तादृग्नाल्यां ममौ यदि । ततस्त्वं सगजो मासि, कथं नैव कमण्डलौ? ॥४४॥ गङ्गा वर्षसहस्रं चेज्जटाक्लेशेन मोहिता। षण्मासांस्तु त्वयाऽमोहि, हस्ती कुण्ड्यामिदं श्रुतम् ॥ ४५ ॥ कुण्ड्या नालादहं दन्ती, लग्नकेशश्च निःसृतौ । कथमत्रापि हे भ्रातः!, शृणु पौराणिकं वचः ॥ ४६ ॥ प्रलये सर्वभूतानां, जलैकार्णवतां गते । जगत्त्रये जलेशायी, तस्थावेको जलाशयः ॥ ४७ ॥ जगत्सृष्टिकृतस्तस्य, नाभिपद्माद्विनिर्ययौ । दण्डकुण्डीकरो ब्रह्माऽब्जनालं तत्र चालगत् ॥ ४८ ॥ इत्थं कुण्डीमुखाच्चेत्त्वं, सेभो भ्रातर्विनिर्गतः । तत्केशस्तत्र लग्नश्च, किमयुक्तं भवेत्ततः? ॥ ४९ ॥ कमण्डलोर्मुखाद्भ्रातः?, कथं विनिरगामिति । यद्ब्रूषे तस्य संवादं, शृणु भारतभाषितम् ॥ ५० ॥–दिव्यं सहस्रं वर्षाणां, तपः कुर्वति धातरि । क्षुब्धाः सुराः स्म जल्पन्ति, विघ्नमस्य भवेत्कथम् ? ॥५१॥ इन्द्रोऽवक्–स्त्रीषु लोलोऽयं, यदुमापाणिपीडने । अग्निकर्मणि निर्युक्तो, गौरीं दूषितवाससम् ॥ ५२ ॥ दृष्ट्वा क्षुब्धो बीजसर्गं, कृत्वा वासो व्यधूनयत् । अथ तत्पतितं कुम्भे, द्रोणाचार्यस्ततोऽभवत् ॥५३॥ युग्मम्॥ ससर्पयः सुराधीशा, देवा हरिहरादयः । मुक्त्वैकं श्रीमहावीरं, खण्डिता हि मनोभुवा ॥ ५४ ॥ उग्रव्रतधरास्तीव्रतपश्चरणकारिणः । अन्येऽपि स्मरबाणार्त्ता, दासाः स्त्रीभिर्न के कृताः ? ॥ ५५ ॥ उत्तमा सर्वदेवीनामतो गत्वा तिलोत्तमा । पितामहं

स्मरोद्रेकाद्विदधातु तपश्च्युतम् ॥ ५६ ॥ इन्द्रादेशादथ क्षिप्रं, सपरिच्छदसंयुता । गत्वा तिलोत्तमा धातुः, पुरो नृत्यमसूत्रयत् ॥ ५७ ॥ यथा यथाऽसौ नृत्यन्ती, करेणोल्लासितांशुका । विधेरदर्शयत्स्वाङ्गं, चुक्षुभे स तथा तथा ॥५८॥ तस्या निभालयन्नङ्गं, विधाता निर्निमेषदृक् । त्यक्तान्यसर्वव्यापारः, कामिवत्तत्स्पृहोऽभवत् ॥ ५९ ॥ विज्ञाय साऽपि तद्भावं, लावण्यामृतसारणिः । ब्रह्मणो दक्षिणे पार्श्वे, भूत्वा नृत्यमसूत्रयत् ॥ ६० ॥ तद्रूपमोहितस्वान्तः, सोऽपि कामज्वरार्दितः । तां विलोकयितुं वक्त्रं, द्वितीयं निर्ममे पुनः ॥ ६१ ॥ एवं तृतीयं वारुण्यां, कौबेर्यां च चतुर्थकम् । तस्यामूर्ध्वं गतायां च, स चक्रे पञ्चमं मुखम् ॥ ६२ ॥ तिलोत्तमाऽनुरक्तस्य, ब्रह्मणः पञ्चमं मुखम् । रुद्रेण पर्शुतीक्ष्णेन, नखेनाच्छिद्यताऽऽशु तत् ॥ ६३ ॥ ततो ब्रह्माऽतिकोपेनाऽपसव्यकरजातया । प्रदेशिन्योद्धर्य भालं, शेषं समुदपाटयत् ॥ ६४ ॥ सितकुण्डलिनामा स, क्रोधाद्धात्रा न्ययोज्यत । गौरीप्राणेश्वरं हन्तुं, व्याधवन् मार्गणो मृगे ॥ ६५ ॥ नश्यंस्तस्य भिया शम्भुर्गत्वा बदरिकाश्रमे । नियमस्थं हरिं मह्यं, भिक्षां देहीत्यभाषत ॥ ६६ ॥ ततस्तेन निजाद्भालाद्रक्तधारा व्यमुच्यत । तदधोऽस्थापयत्सोऽपि, ब्रह्मणः पञ्चमं शिरः ॥ ६७ ॥ रक्तेनापरिपूर्णं तत्सहस्रैः शरदामपि । हरो विलोडयामास, कराङ्गुलिकयैकया ॥ ६८ ॥ पितामहशिरोविष्णुरक्तशाङ्गुलियोगतः । समुत्पेदे महांस्तत्रैको नरो रक्तकुण्डली ॥ ६९ ॥ रुद्रेणादेशि योद्धुं स, सितकुण्डलिना सह ( दक्षे
वर्षसहस्रं तु, जातमायोधनं तयोः ॥ ७० ॥ तयोर्युद्धनिषेधाय, नरं दत्त्वा सुरेशितुः । भास्करस्य द्वितीयं दु. दुव

ऊचुरिदं रविम् ॥ ७१ ॥ वरदानक्षणे सूर्य ! त्वया भारतसंयते । भारावतारकालेऽसाववतार्यो नृजन्मनि ॥ ७२ ॥ तस्मिन् काले रविः कुन्तीमुपभुज्यत्तुसङ्गनाम् । तत्कुक्षौ तं नरं चाशु गर्भत्वेनोदपादयत् ॥ ७३ ॥ सन्नद्धबद्धसन्नाहः, कुन्त्याः कर्णात्स निर्ययौ । यथा तथा त्वमप्यस्मात्, कुण्डीरन्ध्राद्विनिःसृतः ॥ ७४ ॥ यच्चावोचः कथं गङ्गामपरां तीर्णवानहम् ? । अत्रोऽर्थे साधकं भद्र !, शृणु रामायणोदितम् ॥ ७५ ॥ हनुमान् राघवादिष्टो, जानकीशुद्धिहेतवे । तीर्त्वा भुजाभ्यामम्भोधिं, क्षणाल्लङ्कापुरीमगात् ॥ ७६ ॥ दृष्टया सीतया तत्र, प्रियसंदेशतुष्टया । पृष्टः कथं त्वया सिन्धुस्तीर्णः ? सोऽप्यब्रवीदिति ॥ ७७ ॥ तव प्रसादात्तव च प्रसादाद्भर्तुश्च ते देवि ! तव प्रसादात् । साधून(न्न)ते येन पितुः प्रसादात्तीर्णो मया गोष्पदवत्समुद्रः ॥ ७८ ॥ यदि तेन तिरश्चाऽपि, समुत्तीर्णो महार्णवः । तदा गङ्गा त्वया किं न, ? लङ्घ्यते स नरोत्तम ! ॥ ७९ ॥ यदवादीः कथं धारा, षण्मासीं मूर्ध्नि धारिता ? । अखिन्नर्थेऽपि हेतुं त्वं, शृणु भूदेवभाषितम् ॥ ८० ॥ सुरैरभ्यर्थिता गङ्गा, लोकानां हितहेतवे । भूमाववातरत्स्वर्गात्, साऽप्येवं तानदोऽवदत् ॥ ८१ ॥ युष्माखिलां पतन्तीं मां, को धर्त्तेशस्तदाऽवदत् । अहमित्यूचुषा तेन, सा धृता निजमूर्द्धनि ॥ ८२ ॥ दिव्यं वर्षसहस्रं चेत्तेन गङ्गा धृता स्वके । तत् त्वं कथं न षण्मासीं, वारिधारामधारयः ? ॥ ८३ ॥ एवं निरुत्तरो मूलदेवः प्रोवाच तं प्रति । कण्डरीक ! त्वमप्यात्मानुभूतं वद किञ्चन ॥८४॥ कण्डरीकोऽवदद्बाल्ये, दुर्विनीतोऽभवंतराम् । पितृभ्यामत एवाहं, हठान्निर्वासितो गृहात् ॥ ८५ ॥ ततो भ्राम्यन्नहं देशानेकं गोमहिषीवृतम् ।

कूपारामसरोराजीराजितं ग्राममासदम् ॥ ८६ ॥ तस्य मध्ये महाकायः, सच्छायो वटपादपः । कमलाख्यो महायक्षस्तन्मूलमधितिष्ठति ॥ ८७ ॥ पञ्चोपचारबलिभिः, स जनैः पूजितोऽनिशम् । समीहितं वरं दत्ते, को न मान्यो भवेद्गुणैः ? ॥ ८८ ॥ ततस्तं कौतुकात् यक्षं, नत्वा ग्राम्यजनेष्वहम् । यावद्विचित्रक्रीडाभिरात्मानं स्म विनोदये ॥८९॥ सन्नद्धबद्धकवचा, विविधायुधपाणयः । सुतरां दारुणास्तावन्निपेतुस्तत्र तस्कराः ॥ ९० ॥ सबालवृद्धाः सस्त्रीका, ग्राम्या जनपदान्विताः । पशुभिश्च समं भीत्या, वालुङ्क्यां विविशुर्द्रुतम् ॥ ९१ ॥ तत्रस्थानपि तान् ग्राम्यानपश्यन्तोऽन्धला इव । चौरास्ततस्ते व्यावृत्ता, नष्टो ग्राम इतीरिणः ॥ ९२ ॥ पशुवृन्दं चरत्तत्र, विश्वस्तं समुपेयिवत् । तन्मध्यादेकया छाग्या, वालुङ्की परिजग्रसे ॥ ९३ ॥ साऽपि ग्रस्ताऽजगरेण, सोऽपि ढिङ्केन जग्रसे । स चोड्डीय वटेऽतिष्ठद्भूमिप्रासपदः खगः ॥९४॥ तत्र केनापि भूपेन, सैन्यावासे विनिर्मिते । स्तम्भभ्रान्त्या ढिङ्कपादे, बद्धो भिण्ठेन कुञ्जरः ॥ ९५ ॥ ढिङ्केनोड्डीयमानेन, सह यान्तं विलोक्य तम् । पूच्चकुरिति हा भिण्ठाः!, केनापि ह्रियते करी ॥ ९६ ॥ तेषां कलकलं श्रुत्वा, सुभटाः शब्दवेधिनः । तत्रैयुर्व्याकुला बाणबाणासनकरा रयात् ॥ ९७ ॥ सुभटैः शरधोरण्या, च्छिन्नमूर्धा वटच्युतः । ढिङ्कपक्षी पपाताऽऽशु, वज्रपात इव क्षितौ ॥ ९८ ॥ पश्यञ्जे दारिते राज्ञाऽजगरो निरगात्ततः । अजा तस्याश्च वालुङ्की, ततो ग्रामादयोऽखिलाः ॥ ९९ ॥ ते सर्वे नृपतिं नत्वा, स्वस्ववस्तुसमन्विताः । निजं स्थानं ययुरहमत्रायातश्च सम्प्रति ॥ १०० ॥ एवं मयाऽनुभूतं भो !, गदितं भवतां पुरः । यो न मन्येत धूर्तानां, स ददात्वद्य भोजनम् ॥ १०१ ॥

एलाषाढस्ततः प्रोचे, प्रतीमो नात्र संशयः । कण्डरीकोऽवदद्ग्रामो, वालुङ्क्यन्तः कथं ममौ ? ॥ १०२ ॥ एलाषा-
ढोऽथ तं स्माह, किं भ्रातर्न श्रुतास्त्वया । दृष्टान्ता विष्णुपुराणे, भारते च किलेदृशाः ॥ १०३ ॥ आसीत्पुरा
जगत्पञ्चमहाभूतविवर्जितम् । जलैकार्णवीभूतं, तत्राण्डमभवत्किल ॥ १०४ ॥ ऊर्मिप्रेङ्खोलनाभिस्तद्भिन्नं त्रिविध-
तामगात् । त्रिविष्टपमहीपीठरसातलविभेदतः ॥ १०५ ॥ यद्यण्डे तादृशं सर्वं, सममाज्जगतां त्रयम् । वालुङ्क्यां तर्हि
सग्रामः, कथं माति न बान्धव ? ॥ १०६ ॥ शास्त्रेऽन्यच्चारण्यपर्वे, मार्कण्डेयोऽवदन्मुनिः । धर्माङ्गजस्यान्ययु-
गानुभूतं तच्छ्रुतीकुरु ॥ १०७ ॥ सकलाम्भोभिरप्रोत्थैर्लोके एकार्णवीकृते । लोलकल्लोलमालाभिः, प्रेर्यमाणोऽम्बुधौ
गतः ॥ १०८ ॥ सर्वशून्यं जलाकीर्णं, जगत्पश्यन्नृषिस्ततः । एकं तत्र महाकायं, वटवृक्षमुदैक्षत ॥ १०९ ॥ शाखायां
तस्य पल्यङ्कमपश्यत् तत्र चार्भकम् । सर्वाङ्गसुन्दराकारं, तेजस्तर्जितभास्करम् ॥ ११० ॥ प्रसारितकरं तं चावादी-
देह्येहि दारक ! । ममांसे लग तेऽम्भस्सु, पतनान्मा स्म गान्मृतिः ॥ १११ ॥ सोऽप्यंसमवलम्ब्यास्यावतारीत्स ततो
मुनिः । आस्ये प्रसारितेऽपश्यद्विश्वं तस्योदरेऽखिलम् ॥ ११२ ॥ प्रविष्टस्तत्र वर्षाणां, सहस्रं दिव्यमञ्जसा । भ्रमन्पार-
मपारस्य, नापर्विनिरगात्ततः ॥ ११३ ॥ सशैलकाननं विश्वं, ममौ चेद्दारकोदरे । तदा माति न किं ? ग्रामो, वालुङ्क्यां
कण्डरीक भोः ! ॥११४॥ ढिङ्कोदरे ह्यजगरस्तस्याजाऽस्याश्च चर्भटी । तस्यां ग्रामः कथमिति, प्राख्यस्तच्छृणु यच्म्यहम्
॥ ११५ ॥ यदि त्रिजगती सर्वा, ममौ विष्णोः किलोदरे । कुक्षौ सोऽपि हि देवक्यास्तल्पस्याभ्यन्तरेऽपि सा ॥११६॥

यदि सत्यं पुराणोक्तं, वचनं प्रतिभासते । तदा आभारिप्रवेशा, वालुक्यादौ न दोषदाः ॥ ११७ ॥ वालुक्यजगरान्तःस्थः, कथं नासादयं मृतिम् । इति तेन कृते प्रश्ने, शेलाषाढोऽब्रवीदिति ॥ ११८ ॥ तस्मिन्नेवाह्नि भवान्निर्गतो न मृतो ह्यतः । चिरं विष्णूदरे तिष्ठज्जगज्जीवति नाद्भुतम् ॥११९॥ य(अ)स्मिन्नुदरगे सन्ति, वाणिज्यं योधसंयतः । आरम्भा व्यवहाराश्चोत्सवा वैवाहिकादयः ॥ १२० ॥ कथमस्योदरे विश्वमिति पृच्छसि तच्छृणु । पुरा परस्परं युद्धं, ब्रह्मकेशवयोरभूत् ॥ १२१ ॥ दीनो ब्रह्मा हरिं स्माह, वक्त्रबाहूरुपादतः । मदीयेभ्यो जगत्सर्वं, चातुर्वर्ण्यं विनिर्गतम् ॥ १२२ ॥ विधिमाक्षिप्तवान् विष्णुर्वचनैः कठिनैरलम् । रे रे! त्वं चेटरूपो मे, ब्रुवन्नेवं न लज्जसे ॥ १२३ ॥ कण्ठस्थशेषे भूमीभ्रदाढे सागरजिह्विके । मन्मुखे त्वं प्रविश्याशु, पश्य विश्वं चराचरम् ॥ १२४ ॥ जलेशयस्य मे नाभिसमुत्थाम्भोजतो भवान् । प्रादुर्भूतो ह्यतो वक्तुं, मत्पुरो नोचितं तव ॥ १२५ ॥ अपिच—यत्प्रभावात्प्रकाशत्वमगमत्कौमुदं वनम् । कलङ्कीति निशाधीशं, सोत्कर्षात्तद्धसत्यहो ॥ १२६ ॥ कण्डरीको बभाषे किं? पुराणादौ श्रुताः क्वचित् । ढिङ्का एवंप्रमाणाः स्युरेतन्मान्ति यदन्तरे ॥ १२७ ॥ एलाषाढोऽपि तं स्माह, द्रौपद्या हि स्वयंवरे । प्राविक्षत् धनुषि क्षोणीधरवह्निभुजङ्गमाः ॥ १२८ ॥ यः श्रीद्रुपदराजस्य, तद्देवाधिष्ठितं धनुः । राधां भेत्ता समारोप्य, स कृष्णां परिणेष्यति ॥ १२९ ॥ आघोषणामिमां श्रुत्वा, तत्रैत्य बलिनो नृपाः । धनुरारोपयन्तस्ते, पतिता हसिता जनैः ॥ १३० ॥ अथ मानोन्नतः शूरः, शिशुपालक्षितीश्वरः । आरोपयितुमारेभे, यावद्राधाभिदे धनुः

॥ १३१ ॥ तावत्तत्र हरिर्मेरुं, गरुडं मुशलं हलम् । नागान् शङ्खं गदां चक्रं, मन्दरं क्षिप्तवांश्च सः ॥ १३२ ॥ सन्धानावसरे सूरं, विधुमग्निं पयोनिधीन् । सशैलामचलां तत्र, चापे चिक्षेप केशवः ॥ १३३ ॥ अर्द्धाङ्गुलिप्रमाणेऽस्मिंस्तेनाकृष्टे सुरद्विषा । छलेन मोचिते बाणे, सचापश्छेदिपोऽपतत् ॥ १३४ ॥ पार्थोऽथासहमानायामुर्व्यां तद्भारमञ्जसा । आरुह्य भीमहस्ताग्रे, चापरोपणमातनोत् ॥ १३५ ॥ कर्णप्रदत्तबाणेनार्जुनो राधां विभिद्य ताम् । यशः सम्प्राप्तवाँल्लोके, कृष्णां च परिणीतवान् ॥१३६॥ यदि चापान्तरे ते ते, पदार्था निखिला ममुः । तत्किं ढिङ्के महाकाये, न मान्त्यजगरादयः ? ॥ १३७ ॥ किञ्च रामायणे भ्रातः !, श्रूयते विहगोत्तमः । जटायुः सीतापहारे, युयुधे रावणेन सः ॥ १३८ ॥ दशाननेन रुष्टेन, चन्द्रहासमहासिना । छित्त्वा पक्षयुगं भूमौ, स भूभ्र इव पातितः ॥ १३९ ॥ सीतया च स पक्ष्यूचे, शीलमाहात्म्यतो मम । पक्षौ भविष्यतो रामदूतसंदर्शनात्तव ॥ १४० ॥ अन्यदा दाशरथिना, जानकीशुद्धिहेतवे । आदिष्टो हनुमानुर्वी, भ्राम्यंस्तत्र समाययौ ॥ १४१ ॥ अहो गिरिरसावुच्चैर्हनुमानित्यचिन्तयत् । य(त)दत्रारुह्य पश्यामि, समन्तान्महिमण्डलम् ॥१४२॥ ततो जटायुषा पृष्टः, कस्त्वं भोः ! स तमब्रवीत् । रामदूतोऽस्मि सीतायाः, प्रवृत्त्यर्थमिहागमम् ॥ १४३ ॥ पक्ष्यप्याख्यद्रामजाया, विलपन्ती पथाऽमुना, । अपहृत्य दशास्येन, लङ्कापुरीमनीयत ॥ १४४ ॥ किं भ्राम्यसि मुधाऽरण्यं, हनुमंस्त्वरया व्रज । इदं संदेशवाक्यं च, रामाय कथयेर्मम ॥ १४५ ॥ सीतार्थे युद्ध्यमानोऽहं, रावणेन दुरात्मना । छित्त्वा पक्षौ स्वखड्गेन, मुक्तोऽतोऽगामिमां दशाम्॥१४६॥

ततो वायुसुतोऽवादीद्यत्त्वं रक्षोरणं व्यधाः । आख्याच वृत्तं तेन स्या(स्ता)च्चापि हि हितं सखे ? ॥ १४७ ॥ इति दूतवचः श्रुत्वा, जटायुर्जातपक्षतिः । उड्डीय व्योममार्गेण, त्रिदशाश्रयमाश्रयत् ॥ १४८ ॥ यदि शैलसमो गृध्रो, जटायुरभवत्पुरा । तत्किं(तदा) ढिङ्को महाकायः, कण्डरीक ! भवेन्न किम् ? ॥ १४९ ॥ एलाषाढमथावादीत्, कण्डरीको गतोत्तरः । ब्रूहि त्वमपि किञ्चिन्नः, स्वानुभूतं महाद्भुतम् ॥ १५० ॥ एलाषाढोऽप्यवग् बन्धो !, यौवने धनलोलुपः । नटितो धातुवादाद्यैर्व्यसनैर्निरगां गृहात् ॥ १५१ ॥ बिलमत्र रसो ह्यत्र, भूधरोऽत्र सधातुकः । एवमाशाग्रहग्रस्तो, बम्भ्रमीमि स्म भूतलम् ॥ १५२ ॥ एकदेत्यागमो लेभे, यद्योजनसहस्रके । पूर्वस्यां भूधरस्तत्र, रसो वेधसहस्रकृत् ॥ १५३ ॥ शिलया रसरन्ध्रास्यं, छन्नं योजनमानया । तां चोत्पाट्य रसं धीरा, गृह्णन्ति स्वर्णकुण्डतः ॥ १५४ ॥ योजनानां शतमितैः, क्रमैः क्रामन्नहं महीम् । गिरौ गत्वोत्पाट्य शिलामग्रहं कुण्डतो रसम् ॥ १५५ ॥ पुनस्तच्छिलयाऽऽच्छाद्य, गृहमेत्य ततो रसात् । घनं कनकमुत्पाद्य, धनदोपमतामगाम् ॥ १५६ ॥ भोगानभङ्गुरान् भुञ्जन्नर्थिभ्यो द्रविणं ददत् । प्रसिद्धिमगमं लोके, लोकेश इव मूर्तिमान् ॥ १५७ ॥ प्रेयसीभिः समं गीत–नृत्यवादित्रकेलिभिः । क्रीडन् शचीपतिं मेने, न तृणायापि सम्पदा ॥ १५८ ॥ प्रसिद्धिं च समृद्धिं च, मम विज्ञाय दारुणाः । निशायां निशितास्त्रौघकराश्चौरा गृहेऽपतन् ॥ १५९ ॥ कृतसिंहनिनादास्ते, स्तेनाः पञ्चशतीमिताः । प्रवृत्ता लुण्टितुं गेह–सारं यावद् दुराशयाः ॥ १६० ॥ तावत्कथं मे न्याय्यात्तो, जीवतो वित्तसञ्चयः । चौरैर्म-

दृश्यत इति, ध्यायन् साहसमाश्रिये ॥ १६१ ॥ शस्त्राणि प्रगुणीकृत्य, चौरैः सह रणाङ्गणम् । कुर्वन्नहं महाघोरं, सुरैरप्यभिनन्दितः ॥ १६२ ॥ एकेन शरघातेन, दश द्वादश पञ्चषान् । स्तेनाननैषं कीनाश–निशान्तातिथितामहम् ॥ १६३ ॥ निमेषाद् घातिते चौर–शते तेऽपि ममोपरि । सम्भूय कोपतः पेतुरिव कीनाशकिङ्कराः ॥ १६४ ॥ शीर्षं मे कणशः कृत्वा, बद्ध्वा च बदरीतरौ । मुषित्वा वेश्मसर्वस्वं, जग्मुश्चौरा यथाऽऽगतम् ॥ १६५ ॥ रक्ताग्रं कुण्डलोल्लासि, मच्छिरो बदरीस्थितम् । निर्बाधं बदरव्रातं, प्राश्नात्स्थौ यथासुखम् ॥ १६६ ॥ सूर्योदयेऽथ कोलीस्थं, बदराखादि तच्छिरः । सजीवमिति विज्ञायाऽऽददिरे नागरा नराः ॥ १६७ ॥ अङ्गोपाङ्गानि सर्वाणि, सम्पिण्ड्योपरि तन्न्यधुः । ततोऽहं रूपलावण्य–भागभूवंतरां पुनः ॥ १६८ ॥ मयाऽयं स्वानुभूतोऽर्थः, प्रत्यपादि भवत्पुरः । यो न मन्येत तद्वृत्तं, धूर्तानां सोऽद्य भोजनम् ॥१६९॥ शशोऽथोचदथो कस्तेऽलीकं कुर्यादिदं वचः ? । प्रमाणितं पुरावृत्तं, स्मृतिरामायणेषु यत् ॥ १७० ॥ तथाहि–यमदग्निऋषिः पूर्वमभूद्भार्याऽस्य रेणुका । यां नेमुस्तरवः पुष्पार्थिनः शीलप्रभावतः ॥ १७१ ॥ अथाश्वापहृतं दृष्ट्वा, नृपं सर्वाङ्गसुन्दरम् । रेणुका समभूत्तत्र, रागाद्वाश्लेषशालिनी ॥ १७२ ॥ अथानमस्ततो वृक्षान्, वीक्ष्य शीलच्युतां च ताम् । मन्वानो यमदग्निर्प्राक्, पर्शुरामं समादिशत् ॥ १७३ ॥ स्वमातुरस्याः पापायाश्छिन्धि शीर्षं स्वपर्शुना । तेनापि पितुरादेशः, तथैव विदधे क्षणात् ॥ १७४ ॥ यमदग्निस्तदा तुष्टो, रामं स्माह वरं वृणु । सोऽप्यूचे तात ! मे माता, पुनर्जीवतु सत्वरम् ॥ १७५ ॥ एवमस्त्विति

तेनोक्ते, सजीवाऽजनि रेणुका । सद्भूतं चेदिदं भ्रातर्जीवितस्त्वमपीह तत् ॥ १७६ ॥ जरासन्धोऽपि भूपालः, खण्डद्वितययोजनात् । जरया सजितो राज–सहस्राधीश्वरोऽजनि ॥ १७७ ॥ अन्यच्च श्रूयते सुन्दनिसुन्दौ द्वौ सहोदरौ । असुरौ सुरवृन्दस्य, क्षयकालवदुत्थितौ ॥ १७८ ॥ पर्यालोच्याथ गीर्वाणैस्तद्वधाय तिलोत्तमा । तिलं तिलं स्वदेहेभ्य, उपादाय विनिर्ममे ॥ १७९ ॥ सर्वाङ्गसुन्दराकारा, मोहिनी सर्वकामिनाम् । प्रणम्य सा सुरान् स्माह, सुधामधुरया गिरा ॥ १८० ॥ यत्कर्त्तव्यं मया देवा–स्तदादिशत तेऽपि ताम् । प्रोचुरुद्धर नः सुन्द–निसुन्दातङ्कसंकटात् ॥ १८१ ॥ इत्याज्ञां शिरसि न्यस्य, ययौ तत्र तिलोत्तमा । यत्र तावसुरौ सुन्द–निसुन्दौ परितिष्ठतः ॥१८२॥ हारार्द्धहारकेयूर–नूपुरादिविभूषिता । सुरूपोच्चकुचा श्यामा मृगनेत्रोडुपानना ॥ १८३ ॥ सा ताभ्यां युगपद्दृष्टा, दृष्टिपीयूषपारणम् । ततश्च सानुरागौ तौ, तस्यामेव बभूवतुः ॥ १८४ ॥ युग्मम् । तदार्थं युध्यमानौ तौ, शस्त्रैरस्त्रैश्च दारुणैः । मृतौ बन्धू अपि हहा, स्त्रीभिः को न विडम्बितः ? ॥ १८५ ॥ उक्तञ्च—स्त्रीणां कृते भ्रातृयुगस्य भेदः, सम्बन्धभेदे स्त्रिय एव मूलम् । अप्राप्तकामा बहवो नरेन्द्रा, नारीभिरुच्छेदितराजवंशाः ॥ १८६ ॥ देवाङ्गलवसंयोगात्, सञ्जाता चेत्तिलोत्तमा । लूनलूनैस्तदोपाङ्गैस्त्वदङ्गं किं न जायताम् ? ॥ १८७ ॥ श्रूयते शैशवे वायु–सुतो मातरमञ्जनाम् । अप्राक्षीत्को ममाहारः, क्षुधितस्य भविष्यति ? ॥ १८८ ॥ सोचे वत्सातिरक्तानि, फलानि तव भोजनम् । तेनापि जगृहे सूर्योऽथोद्यन् पक्वफलभ्रमात् ॥ १८९ ॥ तेनापि चूर्णितं तच्च, वीक्ष्य माता

शुचाऽऽतुरा । भर्तुर्निवेदयामास, करुणं रुदती सती ॥ १९० ॥ क्रन्दन्तीं दयितां दृष्ट्वा, मृतं च पवनः सुतम् । ततो रसातलं कोपात्, प्रविश्य स्थितवानसौ ॥ १९१ ॥ पवनस्य निरोधेन, सदेवमनुजासुरम् । जगज्जातमतीवार्त्तं, मृत्युशेषमशेषतः ॥ १९२ ॥ ततो दीनानना देवास्तं प्रसादयितुं गताः । हनुमन्तं सजीवं च, संयोज्यावयवान् व्यधुः ॥ १९३ ॥ हनुरेकाऽस्य नो दृष्टा, शोधयद्भिः सुरैस्तदा । तद्वियुक्तेऽपि हनुमानिति तस्याभिधा कृता ॥ १९४॥ पवनस्याङ्गजश्चूर्णीभूतश्चेन्मिलितोऽभवत् । अपूर्वं तत्कथं ? भ्रातस्त्वद्वाचां ब्रूमहे वयम् ॥ १९५ ॥ कथायां रामभद्रस्य, सीतापहरणक्षणे । सेतुबन्धे कृते लङ्कापुरीं दाशरथौ गते ॥ १९६ ॥ रामरावणयोर्वीरैर्घोरे समरविक्रमे । प्रारब्धे क्षुब्धपाथोधौ, सिंहनादस्फुटन्नगे ॥ १९७ ॥ लङ्केशभटनिर्मुक्त–शैलचायलमल्लकैः । शक्तिभिश्चासिभिश्छिन्नाङ्गोपाङ्गे कपिसैनिके ॥ १९८ ॥ शक्तिप्रहारनिर्बद्ध–भूमीपतितलक्ष्मणे । रामप्रलापनिर्घोष–प्रतिशब्दितभूधरे ॥ १९९ ॥ द्रोणाद्रेर्वायुपुत्रेण, समानीतविशल्यया । सौमित्रेर्वक्षसः शक्तिर्निर्गात्पापधीरिव ॥ २०० ॥ पञ्चभिः कुलकम् । तया विशल्यया सिक्ताश्छिन्नाङ्गा अपि वानराः । सजीवाः सहसोत्तस्थुर्मिलितावयवव्रजाः ॥ २०१ ॥ छिन्नाङ्गा अपि चेज्जाताः, सजीवाः प्लवगास्ततः । भवान् खण्डीकृतः किं न ?, भ्रातः! प्राणिति सम्प्रति ॥ २०२ ॥ जगत्प्रसिद्धमन्यच्च, कार्तिकेयस्य सम्भवम् । किं नाश्रौषीद्भवान् भूयोग्रन्थेषु ग्रथितं बुधैः ? ॥ २०३ ॥ हिमाचलगुहामध्ये, मैथुनासक्तयोस्तयोः । गौरीशङ्करयोर्जज्ञे, दिव्यं वर्षसहस्रकम् ॥ २०४ ॥ तस्मिन्नवसरे देवास्तारकासुर-

पीडिताः । अशक्तास्तद्वधेऽन्योऽन्यं, पर्यालोचं वितेनिरे ॥ २०५ ॥ शम्भोर्वीर्यं विना नान्यस्तारकं हन्तुमीश्वरः । स तु सम्भोगसंलीनोऽस्ति दर्यां हिमभूभृतः ॥ २०६ ॥ भिया कोऽपि न तत्पार्श्वं, यात्यन्यो ह्यनलं विना । अतः सम्प्रार्थ्यते गन्तुमिति ते वै बभाषिरे ॥ २०७ ॥ परोपकारिणः कार्यमेकस्यापि प्रकुर्वते । विशिष्य सर्वदेवानां, कुले कः स्यात्पराङ्मुखः ? ॥ २०८ ॥ यदर्थमखिला देवा, मग्नाश्चिन्तामहार्णवे । तत्रानल ! भवानेव, गन्तुमीशो न चापरः ॥ २०९ ॥ तद्गत्वा दर्शयात्मानं, हिमाद्रिस्थस्य शूलिनः । कदाचित्त्वां विलोक्येशः, स्मरक्रीडां विमुञ्चति ॥ २१० ॥ हव्यवाहोऽथ तानूचे, कः शम्भोः सम्मुखं व्रजेत् । विशिष्येदृग्दशस्थस्य, स्वस्य श्रेयोऽभिलाषुकः ? ॥ २११ ॥ खट्वाङ्गधारिणं शूल–पाणिं नरकपालिनम् । श्मशानवासिनं कस्तमभिगच्छेज्जिजीविषुः ? ॥ २१२ ॥ ऊर्ध्वमुखास्य यो लिङ्गं, ताण्डवेन प्रनृत्यति । बलारिरपि तत्पार्श्वं, गन्तुमीशो भवेन्नहि ॥ २१३ ॥ कदाचित्कन्दरान्तःस्थः, शूलपाणिर्निहन्ति माम् । तदा मे का गतिः स्यात्तन्न मां प्रेषयतामराः ! ॥२१४॥ तेऽप्यूचुर्मा स्म भैषीस्त्वं, यतोऽयं पार्वतीवशः । नूनं जगदिदं सम्यग्, दम्यते प्रमदाजनैः ॥ २१५ ॥ उक्तञ्च—मासेन दम्यते वाजी, वर्षेणोन्मत्तकुञ्जरः । निमेषोन्मेषमात्रेण, पुमांस्तु प्रमदाजनैः ॥ २१६ ॥ यदेव रोचते गौर्यास्तदेव कुरुते हरः । किं नाऽनल ! त्वया दृष्टोऽर्द्धाङ्गे तासुङ्हद्वयम् ॥ २१७ ॥ अतस्त्यज त्वमाशङ्का–मेतां यत्कुपितो हरः । न कर्त्ता भवतः पीडां, गौरीस्वान्तानुवृत्तये ॥ २१८ ॥ एवमस्त्विति गत्वाऽग्निर्हिमवत्कन्दरान्तरे । प्रैक्षत त्रिपुरारातिं, रतिलीलाविसंस्थुलम् ॥ २१९ ॥

तमुपान्तगतं दृष्ट्वा, रुषोत्तिष्ठन् हरस्ततः । हुंहुं गौर्या निषिद्धः स, ऊर्ध्वलिङ्गोऽनलं जगौ ॥ २२० ॥ मुखं व्यादेहि रे रेतः, पिबेत्यथ वदन् हरः । तत्तस्मै पाययामास, भानुतेज इवोल्बणम् ॥ २२१ ॥ रेतसा दह्यमानोऽग्निः, कथञ्चित्प्राप्य वारिधिम् । तद्ववाम ततः सोऽपि, बभूव सुखितो मनाक् ॥ २२२ ॥ ततःप्रभृति लोकेषु, श्रूयते रत्नसन्ततिः । समुद्रे रेतसो जाता, प्रस्फुरत्तेजसाऽञ्चिता ॥ २२३ ॥ अथ पद्माकरे पद्म–भासुरे शिशिराम्भसि । अग्निस्तद्रेतसः शेषं, वान्त्वा शीतोऽभवत्तराम् ॥ २२४ ॥ तत्र षण्णां कृत्तिकानां, स्नान्तीनां स्मरमन्दिरे । तत्र शुक्रे प्रविष्टेऽभूत्समकं गर्भसम्भवः ॥ २२५ ॥ कालान्तरे सुषुविरे, युगपत् कृत्तिकास्ततः । शीर्षं बाहू उरो रुण्डं, शरीरं च क्रमादिमाः ॥ २२६ ॥ ततस्ता विस्मितस्वान्ता, दर्शयाञ्चक्रिरे मिथः । यावत्तावत्किलाङ्गानि, मिमिलुस्तानि पार-(पार्द)वत् ॥२२७॥ स्वस्वस्थानाङ्गसंयोगात्, कार्त्तिकेयः षडाननः । आसीदाशैशवादेषोऽजिह्मब्रह्मव्रतोल्बणः ॥२२८॥ विजिग्ये समरे येन, तारकाख्यो महासुरः । महातेजाः स याम्यायां, भ्रमरक्षाकृते स्थितः ॥ २२९ ॥ पृथग्गर्भेषु जातानि, यद्यङ्गान्यमिलन् प्रभोः । तान्येवैकत्र जातानि, सङ्गच्छेरन्न ते कथम् ? ॥ २३० ॥ एलाषाढोऽवदल्लूनं, परिभ्राम्य कथं शिरः ? । फलानि भुङ्क्ते सोल्लासमिति धूर्त्त ! वदाधुना ॥ २३१ ॥ शशोऽप्यूचे–श्रुतेः किं न, श्रुतं चक्रेण चक्रिणः । राहोश्छिन्नं शिरो भ्राम्यद्विलत्पर्यन्तशीतगूः ॥ २३२ ॥ यच्च ब्रूषे–योजनानां, शतमेकपदेन गाम् । उल्लङ्घ्य विषमं शैलमगां तत्रोत्तरं शृणु ॥ २३३ ॥ विष्णुर्यागे द्विजीभूय, बलिं प्रार्थ्य क्रमत्रयम् । सशैलकानना-

मुर्ध्नीमाक्रम्यैनां जहार च ॥ २३४ ॥ विष्णुः क्रमत्रयेणाशु, यथाचक्राम मेदिनीम् । शतयोजनमात्रां तद्गतिं कस्ते न मन्यते ॥ २३५ ॥ शिला योजनमाना सा, कथमुत्पादिता मया ? । इति पृच्छासमाधानं, कुण्डलीकुरु कर्णयोः ॥ २३६ ॥ रामायणे रणे जाते, लक्ष्मणे शक्तिपातिते । हनुमान् द्राग् विशल्यार्थं, द्रोणाद्रिमुदपाटयत् ॥ २३७ ॥ चेद्विशालशिलः शैलः, प्रोत्क्षिप्तः कपिनाऽपि सः । तदा योजनमात्रा किं, शिला नोत्पाद्यते त्वया ? ॥ २३८ ॥ एलाषाढः प्रतिक्षिप्तस्तेन प्रत्युक्तियुक्तिभिः । शशं स्माह त्वमप्याशु, स्वानुभूतं वदाधुना ॥ २३९ ॥ सोऽप्यवादीदहं क्वापि, ग्रामे कौटुम्बिकोऽभवम् । क्षेत्रोपजीवी वर्षासु, कृतवान् क्षेत्रकर्षणम् ॥ २४० ॥ शरत्कालागमे द्रष्टुं, क्षेत्रं गिरितलस्थितम् । ग्रामाद्‌वीयःस्थानस्थं, सानन्दो जग्मिवानहम् ॥ २४१ ॥ तत्र शैलात्समुत्तीर्य, शैलाभो मत्तकुञ्जरः । रुषारुणेक्षणस्तूर्णमधावत्स ममोपरि ॥ २४२ ॥ तद्भिया कम्पमानाङ्गः, परिभ्राम्यन्नितस्ततः । तिलवृक्षं पुरोऽद्राक्षं, बद्धसख्यमिवाद्रिणा ॥२४३॥ तच्छाखायां विलग्नं तु, स मामाक्रष्टुमक्षमः । तिलद्रुं धूनयामास, पात्राङ्गं क्षेत्रपालवत् ॥ २४४ ॥ पेतुस्तत्कम्पितात् पृथ्व्यां, तिलौघास्तिलपादपात् । भ्रमता तेन ते चूर्णी–कृताश्च तिलयन्त्रवत् ॥ २४५ ॥ ततः प्रादुरभूत्तैल–नदी कुण्डादिवापगा । यस्याः कल्लोलमालाभिर्जीयन्तेऽप्यूर्म्मयोऽम्बुधेः॥२४६ ॥ तैलपङ्के महादन्ती, भृशं विरसमारसन् । निमग्नः क्षुत्तृषाक्रान्तो, व्यपद्यत स कीटवत् ॥ २४७ ॥ पुनर्जातमिवात्मानं, मन्वानो गजसङ्कटात् । प्रदोषेऽहं कथमपि, तिलवृक्षादवातरम् ॥ २४८ ॥ ततस्तस्य मतङ्गस्य, मया चर्मोप-

सार्धं तत् । इतीकृत्य च तैलेन, पर्यपूरि समन्ततः ॥ २४९ ॥ तत्राहं त्रुटितो भुञ्जे, खलभारं क्षुधातुरः । पिबामि तैलकुम्भानां, दशकं तृषितोऽनिशम् ॥ २५० ॥ तां दृतिं तैलसम्पूर्णां, स्कन्धे कृत्वाऽर्कतूलवत् । ग्रामं प्रत्यटितोऽध्वद्राववलम्ब्य गृहेऽगमम् ॥ २५१ ॥ अथ तां दृतिमानेतुं, सङ्केतितमहातरौ । मया निजसुतः प्रैषि, सोऽपि तां तत्र नैक्षत ॥ २५२ ॥ ततः स पादपस्तेन, प्रोन्मूल्य गजराजवत् । दृतिरानीयत ग्रामलोकानां पश्यतां गृहे ॥ २५३ ॥ अहमप्यात्मनो गेहादुत्थायात्र समागमम् । इत्यसत्यवचश्चेन्मे, तदेभ्यो दत्त भोजनम् ॥ २५४ ॥ शशं स्माह महादक्षा, खण्डापानाऽथ धूर्त्तिका । भारते सुप्रसिद्धार्थः, श्रुतो रामायणेऽपि सः ॥ २५५ ॥ शशः प्राख्यत्क्वचिद्दृष्टः, श्रुतो वेदृक्तिलो द्रुमः ? । खण्डापानाऽपि तं प्रोचे, श्रुतं किं न त्वया जनात् ? ॥ २५६ ॥ यत्पा-टलीपुरे माषवृक्षादतिगरीयसी । भेरी व्यधायि केनापि, तत्तिलद्रुर्न किं महान् ? ॥ २५७ ॥ व्यूढा तैलनदीत्यत्रा-प्युत्तरं भारतं शृणु । यद्दन्तिदानसम्भूता, सरित्प्लावयते स्म गाम् ॥ २५८ ॥ यतः—तर्षां कदतदैर्भ्रष्टैर्गजानां मद-बिन्दुभिः । प्रावर्त्तत नदी घोरा, हस्त्यश्वरथवाहिनी ॥ २५९ ॥ यदि दन्तिमदाम्भोभिरभूत्कूलङ्कषा नदी । तथा तैलान्न जायेत, वाहिनी किं द्रुवाहिनी ? ॥ २६० ॥ यथोक्तं खलतैलादि, भक्षितं तादृशं मया । तत्राप्याकर्ण-योदन्तं, भारतग्रन्थसङ्कृतम् ॥ २६१ ॥ यद्राज्यान्निर्गतो भीम, एकचक्रां पुरीं गतः । महाबलं बकं रक्षो–राजं व्यापादयद्रुषा ॥ २६२ ॥ सहस्रं मद्यकुम्भानां, षोडशाशनखारिकाः । बकायोपस्थितान्येको, भीमो भक्षितवां-

सदा ॥ २६३ ॥ एकाकिनाऽपि भीमेन, पीतं भुक्तं च तथ्यतः । तथैव सकृतं तेऽदो, भोजनं खलतैलयोः ॥२६४॥ पिबेद् घटसहस्राणि, कुम्भकर्णः सदा यदि । दशतैलघटानां ते, तदा पानं न चित्रकृत् ॥ २६५ ॥ अन्यच्चैतत्पुराणेषु, श्रूयते यदगस्तिना । दानवानां विनाशाय, निपीतः क्षारवारिधिः ॥ २६६ ॥ स्वर्गोत्तीर्णा जटाजूटाच्छम्भोर्गङ्गा विनिर्गता । वहन्ती जह्नुसंज्ञस्य, मुनेश्चाश्रममीयुषी ॥ २६७ ॥ तेन पीत्वा सहस्रं सा, वर्षाणां भ्रामितोदरे । तन्मुक्ता पप्रथे लोके, जाह्नवीत्यभिधानतः ॥ २६८ ॥ यदि ताभ्यामृषिभ्यां भोः,! पीते सिन्धुसुरापगे । दश-तैलघटापानं, तदा कस्ते न मन्यते ? ॥ २६९ ॥ गजचर्मदृतिस्तादृग्, मयोढैकाकिना कथम् ? । ग्रामं नीता च तत्रेदं, गरुडाख्यानकं शृणु ॥ २७० ॥ कश्यपस्य ऋषेः पत्न्यौ, द्वे कद्रुविनताह्वये । ताभ्यां परस्परं चक्रे, पणब-न्धोऽन्यदेदृशः ॥ २७१ ॥ कार्यं दास्यं तयाऽन्यस्या, या पणेन विजीयते । अथवाऽत्र समानीय, दातव्यममृतं द्रुतम् ॥ २७२ ॥ ततः कद्र्वा जिता दास्यं, विनता तन्वती भृशम् । तया विमान्यते नित्यं, सपत्नीति विरोधतः ॥२७३॥ आजन्मदासभावेन, विनता दुःखिताऽधिकम् । गर्भभारालसाङ्गी च, सुषुवे साऽण्डकत्रिकम् ॥ २७४ ॥ औत्सु-क्याद्दास्यमोक्षार्थैकस्मिन् भिन्ने तयाऽण्डके । वृश्चिकान् निर्गतान् वीक्ष्य, विषादो विदधेऽधिकम् ॥ २७५ ॥ यस्या दैवहताया मे, प्रसूतिरजनीदृशी । कथंकारमहं पारं, तद्यास्ये दास्यवारिधेः ? ॥ २७६ ॥ कालं कियन्तमप्येषा, व्यतिक्राम्यातिदुःखिनी । आशानिबद्धस्वान्ताऽण्डं, द्वितीयं विनताऽभिनत् ॥ २७७ ॥ तस्मादनूरुर्निर्गच्छन्, सखेदं

स्वाह मातरम् । किमकाण्डे द्वितीयाण्डमौत्सुक्याद्भिभिदे त्वया ? ॥ २७८ ॥ अपूरयिष्यं तेऽवश्य—महं मातर्मनोरथान् । चेदजङ्गमकायो ना—भविष्यं त्वदमान्यतः ॥ २७९ ॥ तस्मात्तृतीयमण्डं त्वं, चिरं रक्ष विचक्षणे ! । अस्माद्यो भविता सूनुः, स ते दुःखं हरिष्यति ॥ २८० ॥ सोऽनूरुः सारथिश्चक्रे, रथे किरणमालिना । विनताऽपि तृतीयाण्डं, पूर्णं मत्वाऽभिदत् स्वयम् ॥ २८१ ॥ तस्मादाविरभूद्भोगि—कुलकालो महाबलः । गरुडो विनतास्वान्तमहोदधिसुधाकरः ॥ २८२ ॥ शैशवेऽपि हि स क्रीडन्निजाहिसुतमृत्युकृत् । विलोक्य कद्रूया विनता, प्रत्यहं क्लेश्यतेऽधिकम् ॥ २८३ ॥ विनतामश्रुनीरेण, सिञ्चन्तीमवनीवनीम् । विलोक्य गरुडः स्माह, मातः ! किं रुद्यते त्वया ? ॥ २८४ ॥ साऽप्यूचे जीवितस्यार्थे, सपत्न्या दास्यमाश्रिता । तदादेशं भयभ्रान्ता, करोमि प्रतिवासरम् ॥ २८५ ॥ तच्छ्रुत्वा गरुडोऽवादीद्दास्यात्त्वं मुच्यसे कथम् ? । साऽप्यूचे यदि वत्स ! त्व—ममृतं स्फुटमानयेः ॥ २८६ ॥ तत्क्वास्त्यमृतेति पृष्टा साऽऽचष्टे वेत्ति पिता तव । स चाश्रमे बदर्याख्ये, तप्यते दुस्तपं तपः ॥ २८७ ॥ तत्क्षणाद्गरुडस्तत्र, गत्वा पादौ नमन् पितुः । ज्ञातोऽप्रत्यक्षज्ञानेन, करस्पर्शान्ममैष तुक् ॥ २८८ ॥ ताताहं क्षुधयाक्रान्तस्तन्मे वितर भोजनम् । इत्युक्तो वैनतेयेन, कश्यपस्तमभाषत ॥ २८९ ॥ इतः समीपगे पद्म—सरस्यस्ति महागजः । योजनद्वादशायामस्तन्मानः कच्छपस्तथा ॥ २९० ॥ कोपाटोपोत्कटावेतौ, युध्यमानौ परस्परम् । कुर्वाते सरसः क्षोभं, मन्थाद्री इव जङ्गमौ ॥ २९१ ॥ तौ व्यापाद्य यथास्वैरं, भुङ्क्ष्व छिन्धि क्षुधाव्यथाम् । गत्वैकेन क्रमेणाथ, सौ

हत्वा तेन भक्षितौ ॥ २९२ ॥ ततः प्रतिनिवृत्तोऽसावपश्यद्वटपादपम् । अलयाम्बुदसंवादिपक्षिकोलाहलाकुलम् ॥ २९३ ॥ ब्रह्मबीजसमुत्पन्ना, ऋषयोऽङ्गुष्ठकोटयः । वालिखिल्याभिधास्तस्याधस्तादृिदधते तपः ॥ २९४ ॥ गरुडो यावदारूढो, भग्नस्तावद्वटद्रुमः । तेन चञ्च्वा गृहीतश्च, मुनीनां मृतिरस्तु मा ॥ २९५ ॥ समुत्क्षिप्य व्रजन् व्योमा-च्छादयन् विस्मयाकुलान् । सुरासुरान् प्रकुर्वाणः, सोऽमुचत् सिन्धुकाननं ॥ २९६ ॥ तद्वटालङ्कृता भूमिर्जनैर्लङ्केति सोच्यते । या निशाचरराजस्य, प्रसिद्धाऽस्ति महापुरी ॥ २९७ ॥ ततो हिमाचले गत्वा, पितरं गरुडोऽवदत् । दन्ति-कर्कोटनेनापि, बुभुक्षा मे न जग्मुषी ॥ २९८ ॥ निषादान् खाद तेनेति, प्रोक्ते जग्ध्वा स तांस्ततः । एत्याब्रवत् कश्यपं तातामृतं क्वास्ति ? समादिश ॥ २९९ ॥ सोऽव्यादीद्वत्स ! पाताल–सप्तकाधःस्थकुण्डके । धगद्धगिति जाज्व-ल्यमानाग्नौ तद्विवर्तते ॥ ३०० ॥ सावधानैः स्वयं तच्च, देवाद्यैस्तत्र रक्ष्यते । अतोऽमृतं न केनापि, ग्रहीतुं शक्यते-ऽर्भक ! ॥ ३०१ ॥ तत्रासौ कोऽप्युपायो मे, तातास्तीति तदीरितः । स आख्यदाज्यसक्षौद्र–दध्यम्भोभिरनार-तम् ॥ ३०२ ॥ कृशानौ तर्पिते वत्स, ? लभ्यते यदि वा न वा । प्राप्तेऽमृतेऽपि जायन्ते, तत्रोग्रा विघ्नराशयः ॥ ३०३ ॥ युग्मम् । इति कश्यपवाक्येन, वैनतेयेन सत्वरम् । गत्वा मध्वादिभिर्वह्निः, सन्तर्प्य परितोषितः ॥ ३०४ ॥ अग्निना प्रीणितेनास्यामृतकुण्डं प्रदर्शितम् । तेनाप्यादाय पीयूषं, गच्छतु तस्माद्विनिर्गतम् ॥ ३०५ ॥ तद्रक्षकसुरैर्दृष्टं, यत्पक्षी कुण्डतोऽमृतम् । आदाय यातीतिश्रुत्वा, सुक्षुभुस्त्रिदशाश्रयः ॥ ३०६ ॥ ततः सर्वाभिसारेण,

सुराः प्रहरणोद्धुराः । कोलाहलरवैराशाः, पूरयन्तः समन्ततः ॥३०७॥ भिन्नच्छिन्नहता हन्तात्रापि माऽमुं च मुञ्चत । इति जल्पपराः क्रूराः, सम्भ्रमात्ते तमन्वगुः ॥ ३०८ ॥ युग्मम् । त्रयस्त्रिंशत्कोटिदेवा, वेष्टयित्वाऽथ तं जगुः । हतोऽसि रे सुधाचौर !, क्व यास्यस्मदग्रतः ? ॥ ३०९ ॥ एकतः सकलं विश्वमन्यतस्त्वेक एव सः । समरं कर्तुमारेभे, कातरपलायनौषधम् ॥ ३१० ॥ स पक्षी पक्षघातेन, चतुर्दिक्षु दिवौकसाम् । लक्षं सहस्रं कोटीश्चानयत्कीनाश-पत्तनम् ॥ ३११ ॥ गरुडस्य सुराणां च, युद्धं पीयूषहेतवे । जज्ञे स्म क्षयविध्वंसि, विश्वाश्चर्यकरं तथा ॥ ३१२ ॥ ततः समूहो देवानामेकेन विनताभुवा । ग्रस्तो रणाङ्गणाद्दिक्षु, बलिवन्निर्ममेऽखिलः ॥ ३१३ ॥ अथेन्द्रस्त्रिदशान् भग्नान्, दृष्ट्वा ज्वालाशताकुलम् । मुमोच कुलिशं घोरं, विघाताय गरुत्मतः ॥ ३१४ ॥ तद्वज्रं वज्रसाराभ्यां, पक्षिभ्यां (पक्षाभ्यां) पक्षिणः पतत् । भाग्यादेव दिवोभर्तुर्नागात् खण्डसहस्रताम् ॥ ३१५ ॥ किमप्यशनिनाऽनेन, चिच्छिदे भोः सुरा ! इति । तत्प्रत्ययाय पक्षं स, चञ्च्वोत्पाट्य ह्यदर्शयत् ॥ ३१६ ॥ ततो दन्दह्यमानोऽसौ, केशवः कोपव-ह्निना । द्वादशार्कप्रभं चक्रं, लात्वा तद्धतयेऽचलत् ॥ ३१७ ॥ भीतभीताः ससम्भ्रान्ता, हा हा किमितिलापिनः । महर्षयस्ततो गत्वा, विष्णुमेवं व्यजिज्ञपन् ॥ ३१८ ॥ ससुरासुरलोकस्य, स्वामी सर्वगतो भवान् । नीचवन्निरपेक्षः किं, ? गरुडं प्रति धावसि ? ॥ ३१९ ॥ तवैष गरुडो बन्धुस्त्यज कोपमतः प्रभो ! । व्यामूढ ! म्लेच्छवद्गोत्रं, मा नय क्षयमात्मनः ॥ ३२० ॥ ऋषीणां तद्वचः श्रुत्वेत्यच्युतोऽचिन्तयद्धृदि । कथं ? क्रोधान्मया बन्धुर्हहा व्यापादितो भवेत्

॥ ३२१ ॥ क्रोधाग्निविह्वलीभूतः, पुरुषो ज्ञानवानपि । कृत्याकृत्यं न जानाति, तदेतैः साधु बोधितः ॥ ३२२ ॥ जाते ततस्तयोः सन्धौ, रथीचक्रे स चक्रिणा । दत्त्वाऽमृतं च माताऽपि, पक्षिणाऽऽमोचि दास्यतः ॥ ३२३ ॥ कुम्भिकर्कवटास्तेनोत्पादिता यदि पक्षिणा । दृतेरुत्पाटनं तत्कः, शृण्वंस्तव न मन्यते ? ॥३२४॥ शशाद (शशोऽवक्)दुर्दिने विष्णुरधाद्गोवर्द्धनाचलम् । तत्त्वं तैलभृतां बन्धो ! दर्तिं धरसि नो कथम् ? ॥३२५॥ कपिभिर्बन्धने सेतोरुत्क्षिप्योत्क्षिप्य पर्वताः । बहुभ्यो योजनेभ्योऽथानीय क्षिप्ताः पयोनिधौ ॥ ३२६ ॥ अशोकवनिकाभङ्गे, हनुमाञ्जुवशाखिनः । हेलयैवाभिनत्कोपादित्युदन्तं विभावयन् ॥३२७॥ पादपोन्मूलनानीततमायास्त्वसनूभुवा । दृतेः को विस्मयं धत्ते ? वद धूर्त्तशिरोमणे ! ॥३२८॥ युग्मम् । एवं निरुत्तरीभूतः, शशः खण्डामभाषत । स्वानुभूतं त्वमप्यर्थं, धूर्त्तिके ! ब्रूहि कञ्चन ॥ ३२९ ॥ साऽप्यवादीद्वदाम्येव, भवतां पुरतः परम् । नमतैतर्हि मत्पादौ, यदि तद्भोजयामि वः ॥ ३३० ॥ धूर्त्तास्तां स्माहुरुच्याः स्मः, पुरुषेषु कथं नु ते । महिलायाः पुरो दीनं, ब्रूमो भोजनहेतवे ? ॥ ३३१ ॥ ईषद्धसित्वा सा स्माहाकर्णयध्वं सकर्णकाः ! । आख्यानकं मयाऽऽचीर्णं, वर्ण्यमानं च सूनृतम् ॥ ३३२ ॥ यौवनोदयसञ्जातलावण्योत्सेकशालिनी । रतिरूपा स्मरोन्मादशुण्डा रण्डाऽभवं पुरा ॥ ३३३ ॥ अन्यदाऽहमृतुस्नाता, प्रसुप्ता मण्डपे शुचौ । पवनेन यथास्वैरमुपभुक्ता विलासिवत् ॥ ३३४ ॥ तस्मात्सुतो मयाऽसावि, तत्कालं सोऽपि मां बलात् । मुत्कलाप्य क्षणात् क्वापि, जगाम स्वप्नदृष्टवत् ॥ ३३५ ॥ तद्यूयं ब्रूत किं सत्यं ? यथेवं

स्युस्तनूद्भवाः । तदा काऽपि न जायेत, रण्डा पण्डितमानिनः ! ॥३३६॥ मूलदेवोऽथ तां स्माह, श्रुतिषु श्रूयतेऽनिलात् । जातः कुन्त्या भीमसेनोऽञ्जनया हनुमानपि ॥३३७॥ कैवर्त्तिकुक्षिजो (तो) व्यासः, परासरमुनेरभूत् । कार्येषु मां स्मरेर्मातरित्युक्त्वा स वने ययौ ॥ ३३८ ॥ जाता योजनगन्धाप्य–क्षतयोनिर्मुनेर्गिरा । विचित्रवीर्यं साऽसूत, भूत्वा सान्तनुवल्लभा ॥ ३३९ ॥ विचित्रवीर्ये व्यापन्ने, कृष्णद्वैपायनो मुनिः । तत्राऽऽजगाम मात्राऽसौ, स्मृतो योजनगन्धया ॥ ३४० ॥ व्यासोऽभाणि तया वंशः, पुत्राभावाद्विनङ्क्ष्यति । तथा यतस्व वत्स ! त्वं, कुलं संवर्द्धते यथा ॥३४१॥ उद्दध्रे तेन वंशोऽयं, पाण्डू(ण्डुं)जनयि(य)ता नृपम् । धृतराष्ट्रं च राष्ट्रेशं, विदुरं विदुरोत्तरम् ॥३४२॥ रन्त्वा प्रजावतीस्तिस्रो, व्यासः सञ्जातजातकाः । शशाप हा तपोभ्रष्टः, कृताघाभिः कृतोऽस्म्यहम् ॥ ३४३ ॥ उक्तंच—आहारे चैव योनौ च, बीजे कर्मणि यः शुचिः । तस्य कृत्स्नगतस्यापि, न पापे रमते मतिः ॥ ३४४ ॥ भीमाञ्जनेयव्यासानामुत्पत्तिर्यदि सूनृता । तदावयोः सुतावाप्ति–प्रसवस्ते न किं मतः ? ॥ ३४५ ॥ पुनः खण्डाऽवदद्गौरी–देवी मे समभूत्सखी । तया मन्त्रो ददे मह्यं, देवाद्याकृष्टिकारकः ॥ ३४६ ॥ तेन सौभाग्यमन्त्रेणाकृष्टस्तीव्रकरो रविः । मां रन्त्वा सबलं पुत्रं, जनयाञ्चकृवान् जवात् ॥ ३४७ ॥ षडशीति सहस्राणि, योजनानां मही रविः । दहत्यहं कथं तेन, न प्लुष्टाङ्गेन सङ्गता ? ॥ ३४८ ॥ कण्डरीको जगादाथ, कुन्ती चेदर्कसङ्गता । न प्लुष्टा तत्कथं रण्डे, खण्डे ! त्वं दह्यसेऽमुना ॥ ३४९ ॥ पुनः साऽभाषताऽऽकृष्टो, ज्वलनः प्रज्वलन्मया । मामालिङ्ग्य महावीर्यं,

सोऽप्युत्पादितवान् सुतम् ॥ ३५० ॥ रविर्दहति दूरस्थोऽङ्गलग्नस्तु हुताशनः । तत्तेनाहं कथं नैव, दग्धा सम्भोगसङ्गता ? ॥३५१॥ एलाषाढो बभाणैतां, धूमोर्णा यमगेहिनी । होतुं हुताशनाऽऽयासं, गता रेमेऽग्निना तु सा ॥३५२॥ यमं स्वगृहमायान्तं, वीक्ष्यापूर्णे रतेऽपि सा । अपसर्तुमनीशाऽग्निं, पपौ नीरमिवातुरा ॥३५३॥ असमाप्तरतां तां तु, शिथिलीकृतमेखलाम् । गिलित्वा प्रेतराजोऽपि, ययौ त्रिदशसंसदि ॥ ३५४ ॥ स्वागतं स्वतृतीयस्य, तवेति व्याकृतः सुरैः । यमो ववाम धूमोर्णां, तन्मुखं चाशुशुक्षणिम् ॥३५५॥ यमेनानुगतो धावन्नग्निर्नष्टो वनान्तरे । गजैस्तदाग्नेन प्रोक्तः, (गजस्तदाऽग्निना प्रोक्तः) स तद्वाचमतोऽच्छिदत् ॥३५६॥ यदि प्रेतपतेर्जाया, न दग्धा वह्निसेविनी । तत्खण्डे ! त्वं हुताशेन, भोगिनी दह्यसे कथम् ? ॥३५७॥ पुनर्बभाषे खण्डा तान्मयैरावणवाहनः । आकृष्टः सोऽपि सङ्कल्प, मय्यजीजनदङ्गजम् ॥३५८॥ देवीरिन्द्रः कथं त्यक्त्वाऽविश्वा मामुपभुक्तवान् । शशोचे(शशोऽवग् भो) न किं रेमे, सोऽहल्याङ्गौतमप्रियाम् ॥३५९॥ गौतमोऽथ रुषाऽङ्गेऽस्य, कृत्वा भगसहस्रकम् । समादिदेश दुष्टात्मा, वर्ह्रंस्तदुपभुक्तये ॥३६०॥ कन्दर्पाग्निप्रतप्तानां, बह्वनामविवेकिनाम् । सकाशात्त्रिदशाधीश–स्तामवाप विडम्बनाम् ॥ ३६१ ॥ प्रसादितादथो देवैर्गौतमादतिभक्तितः । अक्ष्णां सहस्रं तत्स्थाने, कार्यते स्म कथञ्चन ॥३६२॥ कुन्त्याऽपीन्द्रस्य सम्भोगादर्जुनः सुषुवेऽङ्गभूः । तद्भोगात्ते सुतोत्पत्तिं, को न मन्येत ? शास्त्रवित् ॥ ३६३ ॥ पितरं मातरं वंशं, नाम वित्तं च वित्थ मे । इति ते खण्डया पृष्टा, मूलदेवस्ततो जगौ ॥ ३६४ ॥ अभूस्त्वं पाटलीपुत्रे, नागशर्मद्विजात्मजा । सोमश्रीकुक्षिभूः

खण्डा-भिधा गौलकन्याऽभवम् ॥ ३६५ ॥ लोके नाहं ननन्दस्तु, भ्रान्ताः सदृशरूपतः । किन्त्वसि राजरजकपुत्रिका दधिकाऽभिधा ॥ ३६६ ॥ बहुधान्यसमाकीर्णं, नानावाहनभासुरम् । धनैरमानैः सम्पूर्णं, मद्वेश्म नृपवेश्मवत् ॥ ३६७ ॥ भूपते राजलोकस्य, शुद्धान्तस्य च शिल्पिनाम् । सहस्रेण युताऽजस्रं, वासांसि क्षालयाम्यहम् ॥ ३६८ ॥ अंशुकैः शकटीर्भृत्वा, शिल्पिसाहस्रिकायुता । तरङ्गिणीं तरङ्गालितालितामन्यदाऽगमम् ॥ ३६९ ॥ छटच्छुटितिछुच्छुश्रशेष्टिकाशब्दपूर्वकम् । शिल्पिनः क्षालयामासुर्वासांसि मम सेवकाः ॥ ३७० ॥ विस्तारितानि वस्त्राण्यातपे शोषयितुं भुवि । रौद्रेण वायुना तानि, हृत्वा नीतानि च क्वचित् ॥ ३७१ ॥ ततो भूत्या मया प्रोक्ता, नंष्ट्वा गच्छत रे रयात् । वस्त्रापहारदोषोऽयं, ममैवातो गता हि ते ॥ ३७२ ॥ गोधारूपमहं कृत्वा, नराधिपतिभीतितः । सच्छायं नगरोद्यानं, रजन्यां समुपेयुषी ॥ ३७३ ॥ क्रीडन्ती तत्र च स्वैरं, पश्चिमप्रहरे निशः । अचिन्तयं जनो मांसचर्मार्थी मां हनिष्यति ॥ ३७४ ॥ तन्निर्भया क्व तिष्ठामीत्येवं चिन्तान्विता सती । अभ्राम्यमहमारामं, को हि मृत्योर्बिभेति न ? ॥ ३७५ ॥ गोधारूपं ततस्त्यक्त्वा, रक्ताशोकमहीरुहः । पार्श्वे चूतलतारूपं, विधाय स्थितवत्यहम् ॥ ३७६ ॥ तमःपटावृता रात्रिरसतीव विलासिनी । व्यतीयाय ततो भानुरुदगात् पद्मबोधकृत् ॥ ३७७ ॥ वस्त्रापहारवृत्तान्तं, श्रुत्वा राजा जनादथ । पटहोद्घोषणापूर्वं, रजकानां ददेऽभयम् ॥ ३७८ ॥ ततोऽहं पटहारावं, श्रुत्वा श्रुतिपुटामृतम् ! हित्वा चाम्रलताभावं, पुनः स्वं रूपमाश्रिता ॥ ३७९ ॥ शकटीनां वरत्राद्यं,

तासां चर्ममयं निशि । शृगालमण्डलव्रातैः, सकलं परिभक्षितम् ॥ ३८० ॥ तदन्विष्टिः कृता पित्रा, मम तत्रैके-
मौन्दुरम् । पुच्छं लब्धं ततः सर्वं, वरत्रार्थं विनिर्मितम् ॥ ३८१ ॥ सद्भोः सत्यं किमेतन्न ?, तयेत्युक्ताः शशोऽवदत् ।
यन्न लिङ्गान्तगौ ब्रह्मविष्णू तत्कोऽत्र विस्मयः ? ॥ ३८२ ॥ रामायणेऽपि हनुम–ल्लाङ्गूलं श्रूयते महत् । येन लङ्कापुरी
दग्धा, वेष्टयित्वाऽग्निनाऽखिला ॥ ३८३ ॥ इयत्प्रमाणं लाङ्गूलं, यथासीद्वायुजन्मनः । तदा मूषकपुच्छात्किं, सम्भ-
वेयुर्न रज्जवः ? ॥ ३८४ ॥ श्रूयते हि श्रुतौ राजाऽरण्ये गन्धारिकावरः । यन्मानववपुस्त्यागादभूत्कुरुवकद्रुमः
॥ ३८५ ॥ नघुषो नाम राजाऽभू–द्विक्रमाक्रान्तशात्रवः । शक्रोऽपि वज्रभृद्येन, जिग्ये कातरवद्रणे ॥ ३८६ ॥ अभि-
क्षिपन् पुनः शक्रं, रोषतः सुरसूरिणा । शप्तः सोऽभूदजगरोऽरण्यदेशे महावपुः ॥ ३८७ ॥ अन्येद्युः पाण्डवा राज्य–
भ्रष्टास्तत्र वने ययुः । ततो भीमो भ्रमंस्तेनाजगरेणाशु जग्रसे ॥ ३८८ ॥ युधिष्ठिरोऽथ विज्ञातोदन्तस्तत्सविधं गतः ।
तत्पृष्टः सप्तप्रश्नानां, प्रत्युत्तरमदाच्च सः ॥ ३८९ ॥ उद्गीर्णभीमः शापान्ताद्विमुच्याजगरीतनुम् । पुनर्नघुषराजः स,
बभूव भुवनाद्भुतः॥ ३९० ॥यद्येतत्सकलं सत्यं,तदा खण्डे ! भवत्यपि । गोधाचूतलताभावान्नारीभूता किमद्भुतम्?॥ ३९१॥
पुनः साऽऽख्यद्धूर्तराजा,! मन्यध्वं चेद्वचो मम । सत्करोमि तदा सर्वान्, प्रचुरैर्भोज्यपानकैः ॥३९२॥ जयामि चेत्क-
दाचिद्वः, कदाचिन्मेधया तदा । स्फुटं कपर्दिकामात्रं, मूल्यं न प्राप्स्यथ क्वचित् ॥ ३९३ ॥ तेऽप्यूचुरेतां सामर्षाः,
कोऽस्मान् धूर्तशिरोमणीन् । जेतुमीष्टे ? परमेष्ठि–शम्भुविष्णुसमोऽपि सन् ॥ ३९४ ॥ ततस्तान् स्माह सा खण्डा,

मुत्कलाप्य महीपतिम् । पुरा गता शुकार्थेऽहं, पर्यभ्राम्यं दिशो दिशः ॥ ३९५ ॥ अन्यच्च दासाश्चत्वारो, नंष्ट्वा
क्वापि गता मम । गवेषयन्ती तांश्चात्र, साम्प्रतं समुपेयुषी ॥ ३९६ ॥ भवन्तस्ते च मे दासाः, सन्ति यैश्चौरि-
तानि हि । यद्येतन्नैव मन्यध्वं, तद्दत्तैभ्योऽद्य भोजनम् ॥ ३९७ ॥ ह्रीणह्रीणास्ततस्तेऽपि, खण्डां स्माहुरखण्डिताः ।
त्वयैव खण्डिता विश्व-जनतावञ्चका वयम् ॥ ३९८ ॥ भारस्यैतस्य योग्याऽसि, त्वमेव वरवर्णिनि ! । यया प्रज्ञा-
मदोन्मत्ता, विजिता पुरुषा अपि ॥ ३९९ ॥ औत्पत्तिक्या महाबुद्ध्या, विजिता यत्त्वया वयम् । अतस्त्वं प्रार्थ्यसे
देहि, धूर्त्तानां पानभोजने ॥ ४०० ॥ ओमित्युदीर्य सा भूत-पिशाचप्रेतसङ्कुलम् । घूकघूत्कारदुर्वारफेरुफेत्कार-
दारुणम् ॥ ४०१ ॥ कलेवरविनिर्गच्छद्वसारुधिरपिच्छलम् । ज्वलच्चितानलज्वालं, गृध्रपक्षिरणोत्कटम् ॥ ४०२ ॥
शूलप्रोताङ्गिनामस्त्रवित्रासितजनव्रजम् । दुर्गन्धगन्धवाहोग्रं, खण्डा पितृगृहं ययौ ॥ ४०३ ॥ त्रिभिर्विशेषकम् ।
तत्राखण्डितसर्वाङ्गं, बालमेकं गतासुकम् । तत्कालमुक्तमादाय, खण्डाऽसिक्तपदाम्भसा ॥ ४०४ ॥ सा वाससा
तमाच्छाद्य, विधाय च सुसङ्गतम् । उज्जयिन्यां धनाढ्यस्य, श्रेष्ठिनः सदनं ययौ ॥ ४०५ ॥ तत्रेन्द्रसदृशः श्रेष्ठी,
दृष्ट्वा श्रेष्ठजनैर्वृतः । तयोचे दुर्गतस्याहं, दुहिताऽस्मि द्विजन्मनः ॥ ४०६ ॥ अबन्धुरशरण्याऽद्य, सूता वैदेशिकी
द्विजी । अतस्त्वां प्रार्थये देहि, धनं बालकवृद्धये ॥ ४०७ ॥ स श्रेष्ठी व्याकुलः कार्ये, भूयो भूयोऽर्थितस्तया । क्रुधा
भृत्यानुवाचैतां, निष्काशयत दुर्गताम् ॥ ४०८ ॥ अतिदीनं ब्रुवाणापि, भृत्वा तैः प्रेरिताऽथ सा । भूमौ निपत्य

चाक्रन्दन्मारितो हा मदङ्गभूः ॥ ४०९ ॥ अनाथाया ममाऽऽधारो, भावीत्येष मनोरथः । हहा दुरात्मनाऽनेन, भग्नो द्रुरिव दन्तिना ॥ ४१० ॥ पश्यतागत्य भो लोका,! वणिजा धनगर्विणा । मारितस्तनयः शुद्धः, ब्राह्मण्या मम पाप्मना ॥ ४११ ॥ ताडयन्ती शिरो वक्ष, उदरं च पुनः पुनः । भग्नं भिक्षाकपालं मेऽनेनेति विललाप सा ॥४१२॥ विहस्तोऽथ समुत्थाय, श्रेष्ठी परिकरान्वितः । विलपन्तीं बभाणैनां, मा त्वं कोलाहलं कुरु ॥ ४१३ ॥ मुद्रिकां मे गृहाणैनामात्तबाला व्रज द्रुतम् । मुञ्च शोकं च दत्ता ते, गुर्व्येषाऽऽजीविका मया ॥४१४॥ उर्म्मिकां साऽप्युपादाय, शिशुं च निरगाद्गृहात् । श्रेष्ठ्यपि प्रगतापायो, दानमाहात्म्यतोऽजनि ॥ ४१५ ॥ खण्डाऽपि मुदिता स्वान्ते, तं त्यक्त्वा मृतमर्भकम् । सोल्लासं खण्डिकापिण्डं, [illegible]ः ॥ ४१६ ॥ विक्रीय तामथादाय, वस्तूनि विविधानि सा । यथेच्छं भोजयामास, धूर्तान् श्राद्धे द्विजानिव ॥ ४१७ ॥ तैः सर्वैस्तोषसन्तुष्टमनस्कैः सेत्यवर्ण्यत । खण्डे! तवैव जानीमो, जीवितं सुष्ठु निश्चितम् ॥ ४१८ ॥ यत्त्वया धूर्त्तवर्गोऽयं, विजित्य प्रतिभोदयात् । क्षुधार्त्तः प्रीणितो बाढं, विपुलैः पानभोजनैः ॥ ४१९ ॥ सुशिक्षिता अपि बुधा–स्तन्न जानन्ति जल्पितुम् । अशिक्षिता अपि वचः, प्रवदन्ति यदङ्गनाः ॥ ४२० ॥ उक्तञ्च—अधीत्य शास्त्राणि विमृश्य चार्थान्, न तानि वक्तुं पुरुषाः समर्थाः । यानि स्त्रियः प्रत्यभिधानकाले, वदन्ति लीलारचिताक्षराणि ॥ ४२१ ॥

चन्द्रेन्द्रवायुभास्वन्तो, धर्मोग्निमुनयोऽपि वा । दूषिता निखिला लोके, स्वरापस्माररोगिणः ॥४२२॥ जीवांस्तथाप

भिव्याप्य, सूक्ष्मस्थूलविभेदतः । भगवान् सर्वगो विष्णु–रिति श्रुतिषु गीयते॥४२३॥यदि सर्वगतो विष्णु–रिति सत्यं वचो भवेत् । तदा स्मरातुरो गोपीः, किं चिन्तयति कामिवत् ?॥४२४॥ असम्भाव्यमिदं लोके, श्रूयते यदुमामलात् । जातोऽपि प्राप्तचैतन्यः, प्रथमः (पप्रथे) स गणाधिपः ॥ ४२५ ॥ इत्येते लौकिकाऽऽलापाः, पुराणादिसमुद्भवाः । विशीर्यन्ते प्रतिपदं, विचक्षणविचारिताः ॥ ४२६ ॥ अतोऽदो लौकिकं वाक्यं, रासभोच्चारवद्बुधैः । रम्यमन्तश्चिन्त्यमानं, पुनस्तुषवसा(दा)कुलम् ॥४२७॥ इति वैश्रवणस्याग्रे,साकेतपुरवासिनः । शुश्रूषायां सतृष्णस्य,धर्माधर्मविवेकिनः॥४२८॥ सुस्थितेन मुनीन्द्रेण, ज्ञानत्रितयशालिना । लौकिकग्रन्थवाक्यानि, विरुद्धानि पदे पदे ॥ ४२९ ॥ असत्प्रलापरूपाणि, मदोन्मत्तप्रलापवत् । उक्त्वा स गद्यते लोको–त्तरधर्मविचारणा ॥ ४३० ॥ त्रिभिर्विशेषकम् । पूर्वापराविरुद्धं तु, तीर्थं लोकोत्तरं मतम् । परीक्षाक्षममेवैतत्, सुविशुद्धसुवर्णवत् ॥४३१ ॥ महाव्रतानि पञ्चैव, यत्र मूलगुणाः स्मृताः । उत्तरास्तु समाख्याताः, पिण्डशुद्ध्यादिसप्ततिः ॥ ४३२ ॥ मुख्यं जैनममुं धर्ममनाराध्य नरः क्वचित् । अनुप्तबोधिबीजः सन्न मोक्षफलमश्नुते ॥ ४३३ ॥ द्वितीयं श्राद्धधर्मं तु, द्वादशव्रतभासुरम् । सम्यक्त्वयुक्तं संसेव्य, पुमान् स्वःसुखमश्नुते ॥ ४३४ ॥ मूलशुद्धिमिति ज्ञात्वाऽर्हद्धर्मस्य गुरोर्मुखात् । उदियाय विवेकार्क–स्तन्मनः पूर्वपर्वते ॥ ४३५ ॥ ततो वैश्रमणः सूरी–नानम्य स्माह मेऽधुना । दीक्षाऽक्षमस्य सुश्राद्ध–धर्मं दत्त सुखास्पदम् ॥ ४३६ ॥ गुरवोऽपि ददुस्तस्मै, ज्ञात्वा ज्ञानेन योग्यताम् । विशुद्धदर्शनोपेतां, श्रावकद्वादशव्रतीम् ॥ ४३७ ॥

ततः स मुदितः सूरी-र्नत्वा गेहे समेत्य च । धनवत्यै स्वगेहिन्यै, तां धर्म्मोंसिं न्यवेदयत् ॥ ४३८ ॥ साऽप्यूचे जीविताधारा, रत्नत्रयमयं मम । विभूषयतु सर्वाङ्गं, शाश्वतं धर्मभूषणम् ॥ ४३९ ॥ दीनाभ्युद्धरणैः पात्रदानैः स श्रीजिनार्चनैः । शश्वत्प्रभावयामास, शासनं श्रीमदर्हताम् ॥ ४४० ॥ अन्यदा तस्य गेहिन्या, धनवत्या महत्य-भूत् । अबाधा बहुधा गाढा, दुष्टव्यन्तरनिर्मिता ॥ ४४१ ॥ ततः पपातोत्पपात, क्रन्दति स्म स्म धावति । नृत्यति स्मो-न्ममादासौ, दोषावेशान्मुमूर्च्छ च ॥ ४४२ ॥ दुरवस्थामिमां तस्या, वीक्ष्य वैश्रमणः क्षणात् । सर्वानाकारयामास, स-वैद्यान्मन्त्रवादिनः ॥४४३॥ मान्त्रिकैर्मण्डलं कृत्वा, तस्या देहेऽवतारितः । स दुष्टो व्यन्तरोऽवादीन्नैनां मुञ्चामि कर्हि-चित् ॥ ४४४ ॥ पुनः पुनः स आकृष्टो, दुष्टोऽवोचदिदं वचः । न मां पूजयति श्रेष्ठी, जिनार्चानिरतोऽनिशम् ॥ ४४५ ॥ तेनास्य दयितां नेष्ये, कीनाशस्य निकेतनम् । जीविताच्यावयिष्यामि, धृष्टं श्रेष्ठिनमप्यमुम् ॥ ४४६ ॥ निशम्य तद्वचः श्रेष्ठी, बभाषे नेह जन्मनि । वीतरागं विना देव-मर्चये मनसा परम् ॥ ४४७ ॥ काचखण्डकृते हस्तात्, कश्चिन्तामणिमुज्झति । अतो मत्वरदेहार्थे, नैव कुर्वे व्रतक्षतिम् ॥ ४४८ ॥ मम मूर्द्धाऽपि चेत्खण्डसहस्रं क्रियते-ऽरिभिः । तथापि न नमस्यन्यान्, देवांस्त्यक्त्वा जिनेश्वरम् ॥ ४४९ ॥ इति तन्निश्चयं ज्ञात्वा, व्यन्तरोऽपि प्रमोद-भाक् । प्रशशंसेति धन्यस्त्वं, यस्य धीस्ते व्रते दृढा ॥ ४५० ॥ इत्युक्त्वा विरते तस्मिन्, धनवत्यपि सुस्थिता ।

सञ्जाताचिन्तयच्चित्ते, नान्यत्सारं जिनादृते ॥ ४५१ ॥ मन्यमानः पुराणादे-र्मिथ्या मिथ्यादृशां वचः । विशिष्य जिनधर्मे स, श्रेष्ठी दृढतरोऽभवत् ॥ ४५२ ॥ पालयित्वाऽथ सुश्राद्ध-धर्मं शर्मनिबन्धनम् । स कृत्वाऽनशनं चान्ते, मृत्वाऽभूदच्युते सुरः ॥ ४५३ ॥ ततो नरभवं प्राप्य, चारित्रप्रतिपत्तिभृत् । ध्यानासिना कर्मवनं, छित्त्वा मुक्ति-मवाप्स्यति ॥ ४५४ ॥ इत्थं वैश्रमणस्य चारु चरितं श्रुत्वा श्रुतिप्रीणकं, मा रामायणभारतश्रुतिभवैर्वाक्यैर्वि-चाराक्षमैः । मालिन्यं नयतातिनिर्मलतमं सद्दर्शनं पावनं, येन स्युर्भवतां जिनागमविदां शर्मश्रियः सुस्थिराः ॥४५५॥

। कुदर्शनवर्जनविषये वैश्रमणकथा ।

इति रुद्रपल्लीयगच्छगगनमण्डनदिनकरश्रीगुणशेखरसूरिपट्टावतंसश्रीसङ्घतिलकसूरिविरचितायां सम्यक्त्वसप्तति-कावृत्तौ तत्त्वकौमुदीनाम्न्यां सम्यक्त्वश्रद्धानस्वरूपनिरूपणो नाम प्रथमोऽधिकारः समाप्तः ।

आद्यं श्रद्धानाधिकारमुक्त्वा द्वितीयं लिङ्गद्वारमाह—

परमागमसुस्सूसा, अणुराओ धम्मसाहणे परमो । जिणगुरुवेयावच्चे, नियमो सम्मत्तलिंगाइं ॥ १२ ॥

व्याख्या—"परमागमत्ति," परमो-यथावस्थितसकलपदार्थसार्थपरमार्थतया प्रधानो य आगमो द्वादशाङ्गीरूपः सिद्धान्तस्तस्य शुश्रूषा-श्रोतुमिच्छा, नहि श्रवणमन्तरेण ज्ञानादिगुणगणः कर्हिचिज्जायेत, किन्तु तच्छ्रवणादेव स्यात् ।

यदागमः"–सवणे नाणे य विन्नाणे, पच्चक्खाणे य संजमे। अणण्हए तवे चेव, वोदाणे अकिरिय निव्वाणे ॥ १ ॥" अत एवैषा सम्यक्त्वस्याद्यलिङ्गम्। "अणुरागुत्ति" अनुरागो–मनसा परमा प्रीतिः, क? 'धर्म्मसाधने' धर्म्मस्य-यति-श्रावकभेदभिन्नस्य साधनं-कारणं तत्र परमोऽत्यन्तासेवनेन परां कोटिं प्राप्त इति द्वितीयं लिङ्गम्। "जिणगुरुत्ति," रागाद्यष्टादशदोषजयनाज्जिना-अतीतानागतवर्त्तमानार्हन्तः गृणन्ति धर्मतत्त्वमिति गुरवः-पञ्चविधाचारचतुरा, जिनाश्च गुरवश्चेति द्वन्द्वः, तेषां वैयावृत्यं–विनयकरणं, तस्मिन्नियमः-अवश्यतया तत्परिशीलनं, तच्च प्राणिनां महते गुणाय स्यात्, यदुक्तम्–"सद्यः फलन्ति कामा, वामाः कामा भयाय न यतन्ते। न भवति भवभवभीतिर्जिनपतितततिनमनतः पुंसाम्। १। गुरुसेवाकरणपरो, नरो न रोगैरभिद्रुतो भवति। ज्ञानसुदर्शनचरणै–रान्नियते सद्गुणगणैश्च ॥ २ ॥" इति तृतीयं लिङ्गम्। एतानि त्रीण्यपि सम्यक्त्वस्य क्षायिकादेर्लिङ्गानि। तत्र लिङ्ग्यन्ते–चिह्नयन्ते सम्यग्दर्शनभाजो जीवा एभिरिति लिङ्गानि–साधनानि, साधनं विना ह्यन्वयव्यतिरेकाभ्यां साध्यसिद्धिः कापि नो(प)लभ्यते, प्रयोगश्चात्र-सन्ति सम्यक्त्वभाजो जीवाः, परमागमधर्मानुरागजिनगुरुवैयावृत्त्यकारित्वात्, ये ये परमागमादिवैयावृत्यकरण-वन्तस्ते ते सम्यक्त्वभाजः, यथा श्रीभरतचक्रवर्त्यादयः, तथा चामी तस्मात्तथेति, व्यतिरेकस्तु ये एवंविधा न स्यु-स्ते माध्यमिकादिवत् सम्यक्त्वभाजोऽपि न स्युरिति गाथार्थः ॥ १३ ॥ तत्र प्रथमं शुश्रूषालक्षणं लिङ्गमाह—

तरुणो सुही वियड्ढो, रागी पियपणइणीजुओ सोउं। इच्छइ जह सुरगीयं, तओऽहिया समयसुस्सूसा॥१४॥

व्याख्या–"तरुणु"त्ति, तरुणो–युवा तारुण्ये हि प्रायः स्मरोन्मादादिविकाराः सम्भवेयुः, यदुक्तम्–
नवि अत्थि नविय होही, पाएणं तिहुयणंमि सो जीवो । जो जुव्वणमणुपत्तो, विआररहिओ सया होइ ॥ १ ॥
एवंविधोऽपि कदाचिद्दारिद्र्यदुःखशोकाद्याकुलः स्यादत एवोक्तं–सुखी-निरुपचरितभोगयोगवान् । ननु सोऽपि कदाचिन्निर्विचारत्वकारागारनिपतितः स्यादत एवाह–विदग्धः-प्रज्ञापज्ञातवाचस्पतिमतिकः, ईदृगपि कदाचिद्रागपराङ्मुखो भवतीत्यत एवाह–रागी–स्मरोपचारचतुरो अथवा रागरागाङ्गस्वरादिपरिज्ञानवान्, यदुक्तम्—सप्त स्वराः त्रयो ग्रामा, मूर्च्छनास्त्वेकविंशतिः । तानान्येकोनपञ्चाश–त्तिस्रो मात्रास्त्रयो लयाः ॥ १ ॥ स्थानत्रयं यतीनां च, षड्भाषाः षड् रसानि च । वर्णाः षड्विंशतिस्तुल्याः, भाषाः स्युः सप्तषड्गुणाः ॥२॥ रागादिपरिज्ञानमप्युभयथा प्रियाविरहितस्य निरर्थकमत एवाह–'प्रियप्रणयिनीयुतः' प्रिया-प्राणेभ्योऽप्यधिकं अभीष्टा या प्रणयिनी–प्रेयसी, तया युतः सहितः, एवंरूपोऽपि यथा–येन प्रकारेण सुरगीतं-अखर्वगान्धर्वसर्वकलासगर्वहहाहूहूप्रभृतिदेवगन्धर्वगानं श्रोतुम् आकर्णयितुमिच्छति-अभिलषति, ततः-तस्मादधिका–प्रकर्षवती समयशुश्रूषा–जिनप्रणीतागमश्रवणेच्छा, सम्यक्त्वप्रथमलिङ्गमिति गाथार्थः । अत्रार्थे सुदर्शनश्रेष्ठिदृष्टान्तो निष्टङ्क्यते–तथाहि—

युवतीमुखमिव सदक्षं, गिरीशाङ्गमिव गौरीसङ्गतं, पुरुषोत्तमवक्ष इव सश्रीकं, सुरपुरमिव विविधविबुधोपशोभितं, मगधदेशालङ्करणभूतं राजगृहं नाम नगरं । यत्रोन्नतस्फुरद्ध्वजचैत्यरुग्ध्वस्ततामसे, कुमुदाम्भोजबोधे नाद्यापि

विज्ञायते निशा ॥ १ ॥ तत्र कणाद इव बहुद्रव्यगुणक्रियः, साङ्ख्य इव प्रमाणितप्रधानपुरुषः, सौगतवद्वि-दितायतनः, श्रीवर्द्धमानजिनसमाराधनासादितसुकृतश्रेणिकः श्रीश्रेणिकः क्षितिपतिः। सुधर्मायां सभायां श्री–सुध-र्म्माधिपतिः स्वयम्। सम्यक्त्ववर्णनं यस्य, कुरुते शुसदां पुरः ॥ १ ॥ तत्रैवाभिनन्दितसज्जनोऽर्जुनो नाम माला-कारः प्रतिवसति स्म। तस्य च सौन्दर्यतर्जितसुरसुन्दरी बन्धुमती नाम प्रियतमा। प्रत्यहं सोऽर्जुनमालाकारः सदारः सौरभ्यसारसारपुष्पैः पुरोद्यानकृतावासं प्रातिहार्याधिवासं निजकुलदैवतं मुद्गरपाणियक्षमर्चयति स्म। अन्यदा तत्र दानशूरैः पौरैः प्रारब्धे कस्मिंश्चिन्महोत्सवे "प्रातर्मे सुमानि महर्घाणि भविष्यन्तीति" विचार्य सभार्यः सोऽर्जुनः सायं करण्डकं पुष्पैः सम्पूर्य यक्षायतनं प्रविशन् षड्भिर्गोष्ठीकैरालोकितः। ततस्तैर्दुष्टाशयैरन्योऽन्यमालुलोचे–यदेतस्य जायां निरुपमसौभाग्यालङ्कृतकायामद्यैनं बद्ध्वा एतत्प्रत्यक्षमेव स्वैरमभिरंस्यामः इति, प्रतिश्रुत्य ते द्वारकपाटपश्चा-द्भागे निलीय तस्थुः। इतश्च मालाकारोऽपि कारायामिव भवनान्तः प्रविश्यैकताननमना यक्षं पूजयामास। ततस्ते दुष्ट-गोष्ठीकाः सहसा निःसृत्य तं बन्धनैर्बद्ध्वा तत्प्रियां बन्धुमतीं यथास्वैरमभिरेमिरे। ततस्तां तथा विलोक्यार्जुनो जाङ्गुलीमन्त्रनियन्त्रितभुजङ्गम इव प्रहर्तुमक्षमो रोषभरं बिभरांबभूव, यतः—पितृघातादिदुःखानि, सहन्ते बलिनो-ऽपि हि। प्रियाधर्षणजं दुःखं, रङ्कोऽपि न तितिक्षति ॥१॥ किञ्च—सहन्ते प्राणिभिर्बाढं, पितृमातृपराभवाः। भार्या-पराभवं सोढुं, तिर्यञ्चोऽपि न हि क्षमाः ॥ २ ॥ सोऽप्यमर्षोत्कर्षात्कठोरतरवचनैर्यक्षमुपालब्धवान् भो–गुह्यक!

त्वं सत्यं शिलामय एव, न देवः। यस्य पश्यतः पापात्मानो गोष्ठीकाः पशुवत्पशुधर्ममाचरन्ति। यदि त्वं कोऽप्यभविष्यस्तदा नैते त्वदर्चकस्य मम प्रियां भवत्प्रत्यक्षमेवं व्यडम्बयिष्यन्। यक्षोऽपि तद्वचःश्रवणसम्पन्नकोपाटोपो मालाकारशरीरमनुप्रविश्यामसूत्रतन्तुवद्बन्धनानि त्रोटयित्वा पलसहस्रमानायोमयमुद्गरमुद्गीर्य सबन्धुमतीकान् षडपि गोष्ठीकांश्चूर्णवत् चूर्णयाञ्चकार। ततः प्रभृति प्रतिदिनमन्यानपि स्त्रीसहितान् षड् पुंसो यावन्न विनाशयति तावन्न तस्यामर्षःउपशाम्यतीति। तस्य स्वरूपं निशम्य श्रेणिकभूपः पटहवादनपूर्वकं पौरानेवं निवारयति स्म–यावदर्जुनेन सप्त जना व्यापादिता न भवन्ति तावत्पुरात् केनापि न निर्गन्तव्यम्। अस्मिन्नवसरे भगवान् श्रीवर्द्धमानस्वामी ऋषिसभ्यपरीत उद्याने समवासार्षीत्। तदाऽर्जुनभिया भगवन्तमभिनन्तुं न कोऽपि जिगमिषति स्म। इतश्च तस्मिन्नेव नगरे सुविशुद्धदर्शनः 'सुदर्शनो' नाम श्रेष्ठी परिवसति स्म–यः श्रीजिनपतिपदयुग—सरसीरुहरुचिरमधुकरसदृक्षः। श्रुतवचनश्रवणरुचिः, श्रमणोपासकधुरि स्थितवान्॥ १॥ स तु श्रीवीरस्वामिवचनामृतं पिपासुर्मातापितरौ व्यजिज्ञपत्–हे पितरावद्योद्याने समायातस्य त्रिशलासुतस्य पञ्चत्रिंशद्गुणपवित्रां संशयतमस्तिरस्कारभास्करकरणिं धर्म्मदेशनां शुश्रूषुः पादारविन्दद्वन्द्वमभिनिनंसामि, ततस्तं पितरौ व्याजहतुः–वत्स! सम्प्रति तत्र गच्छतस्तवार्जुनस्य महानुपसर्गो भावी, तद्विरम चरमजिनवरपदविवन्दिषायाः, इह स्थित एव भगवन्तं महावीरं भाववन्दनया वन्दस्व, पूर्वश्रुतां च तद्देशनां परिभावय। ततः सुदर्शनोऽपि धर्मानुरागचतुरां वाचमुच्चचार–हे पितरौ! त्रिजगद्गुरौ

स्वयमत्रायाते तदुपदेशे चाश्रुते मम भोक्तुमपि न कल्पते, स चार्जुनकृतोपसर्गो मे किं कर्त्ता ? यतः—श्रीवर्द्ध-मानवचन–श्रवणामृतपानपुष्टतनुयष्टेः । विष इव विषमोऽपि सदा, किं कर्त्ता मे तदुपसर्गः ? ॥१॥ तस्माद्यद्भाव्यं तद्भवत्वित्युदीर्य पितरावनुज्ञाप्य च स त्रिभुवनगुरुं नन्तुं पथि गच्छन् रुषा मुद्गरमुद्गीर्य कुपितकृतान्तमिवार्जुनमायान्तं दृष्ट्वा निर्भयचेता भुवं वस्त्राञ्चलेन प्रमार्ज्य जिनान्नमस्कृत्य कृत्यवित् विधिवद्व्रतानि पुनरुच्चार्य चतुःशरणं प्रतिपद्य सर्वसत्त्वानि क्षमयित्वा दुष्कृतगर्हां सुकृतानुमोदनां साकारमनशनं कृत्वोपसर्गपारङ्गत एव पारयिष्यामीति विचिन्त्य पञ्चपरमेष्ठिमहामन्त्रं स्मरन् कायोत्सर्गं चकार । तदा तमभिभवितुमप्रभुरुद्गीर्णविषविषधर इव विगतरोषो यक्षः स्वं मुद्गरमुपादाय भीत्येव तद्वपुर्विहाय पलायाञ्चक्रे। तन्मुक्तोऽर्जुनोऽपि छिन्नद्रुरिव भुव्यपतत् ।क्षणेन चाप्तस्-चैतन्यो मृत्योर्जीवित इवोन्मील्य नयनेअर्जुनः सुदर्शनं ददर्श । श्रेष्ठ्यप्युपसर्गपारं प्राप्तमात्मानं विदित्वा कायोत्सर्ग-मपारयत् । कस्त्वं क्व प्रस्थितोऽसीत्युक्तोऽर्जुनेन सुदर्शनोऽप्युवाच–भोः श्रमणोपासकोऽहं श्रीवीरं नन्तुं तद्देशनां च श्रोतुं प्रस्थितोऽस्मि । ततोऽर्जुनोऽपि तमभाणीत् । भद्र! ममाप्ययं मनोरथो मनसि जागर्त्ति । ततो द्वावपि भगवत्समव-सरणं गतौ । तत्र जिनं पञ्चाङ्गप्रणामेन प्रणम्योभावपि भगवद्व्याख्यां शुश्रुवाते । तथाहि–मानुष्यमार्यविषयः सुकु-लप्रसूतिः, श्रद्धालुता गुरुवचःश्रवणं विवेकः । मोहान्धिते जगति सम्प्रति सिद्धिसौध–सोपानपद्धतिरियं सुकृतो-पलभ्या ॥ १ ॥ संसारकूपाज्जननापमृत्युर्जरामहाक्षारजलाभिपूर्णात् । अर्हद्वचोरज्जुमृतेऽभिमग्नान्, जनान् समुद्ध-

तुमलं न चान्यः ॥ २ ॥ इति धर्मदेशनां निशम्य मुदितमनाः सुदर्शनो यथाशक्त्या नियमग्रहणं कृत्वा कृतकृत्य-मात्मानं मन्वानो जिनमभिनम्य निजधामाऽऽजगाम । अर्जुनोऽपि भगवद्देशनामृतं श्रवणपुटेनापीय रूढसंवेगः श्रीवीरपदमूले जघन्यतोऽपि षष्ठतपोऽभिग्रहपूर्वं दीक्षां कक्षीकृत्य सकोपजनजनितताडनातर्जनाक्रोशकदर्थनादिपरीषहान् सहमानः षण्मासीमतिक्रम्य मासद्वयकृतसंलेखनः शुक्लध्यानानलदग्धकर्मेन्धनः शिवपुरमाससाद । सुदर्शनोऽपि चिरकालं विशिष्टतरप्रभावनाभिर्जिनशासनं प्रभावयन् श्रमणोपासकव्रतानि विधिवत्प्रपाल्य स्वर्गसुखभागजायत । इत्यागमश्रवणसादरचित्तवृत्तेर्वृत्तं निशम्य वणिजस्य सुदर्शनस्य । भव्या ! भवाम्बुनिधितारणनौनिभायां, धर्मश्रुतौ कुरुत सन्ततमेव यत्नम् ॥ १ ॥ आगमशुश्रूषारूपप्रथमलिङ्गविषये सुदर्शनकथा । आगमशुश्रूषारूपमाद्यलिङ्गमुक्त्वा द्वितीयं धर्मरागाख्यं लिङ्गमाह—

कंतारुत्तिन्नदिओ, घयपुण्णे भुत्तुमिच्छई छुहिओ। जह तह सदणुट्ठाणे, अणुराओ धम्मराओत्ति ॥१५॥

व्याख्या-कान्तारात्—फलजलरहितान्महारण्यादुत्तीर्णः—कथमपि पारं प्राप्तः, कोऽप्यनिर्दिष्टनामा 'द्विजो' ब्राह्मणः, द्विज इति विशेषपदेन सूचयति यद्द्विजाः स्वभावत एव भोजनलम्पटाः स्युः, यदुक्तम्—वटका यत्र लभ्यन्ते, न दूरे पञ्चयोजनी । मोदका यत्र लभ्यन्ते, न दूरे दशयोजनी ॥ १ ॥ सोऽपि क्षुधितः—अत्यर्थं बुभुक्षया पीडितो यथा—येन प्रकारेण सुदलितसुमलितसुगलितसुतलितसुललितेति पञ्चलकारोपेतानि सितास्थूलस्थलघुलितानि घृतपूरपूरितानि

चातुर्जातकोपेतानि घृतपूराणि निःस्पृहस्यापि स्पृहाजनकानि भोक्तुम्-अत्तुमिच्छति अभिलषति, एतावता परमादर-ख्यापनार्थैतानि विशेषणान्युक्तानि, 'तथा' तथैव युक्त्या 'सदनुष्ठाने' विशिष्टतरक्रियाकलापे, योऽनुरागः–परमप्रीतिः, स धर्मरागः कथ्यत इति गाथार्थः । भावार्थस्त्वारोग्यद्विजनिदर्शनादवसेयः । तच्चेदम्—

उज्जेणी अत्थि पुरी, भारहवासंमि पुहविविक्खाया । जीए फालिहमंदिरपंती हसइव्व सग्गसिरिं ॥१॥ तत्थ य सुप-यडगुत्तो. धम्मपमत्तो य देवगुत्तदिओ। आणंदियजणविंदा, नंदा तस्सासि वरघरिणी ॥ २ ॥ ताणं सुरव्व भोगे, भुं-जंताणं कमेण संजाओ, पुत्तो पुव्वभवज्जिय–पाववसा रोगगसिअतणू ॥ ३ ॥ तं तहरूवं दट्ठुं, पियरेहिं निच्चदुक्खियम-णेहिं । सो अविहियनामोऽविहु, जणम्मि 'रोगुत्ति' विक्खाओ ॥ ४ ॥ तस्सुग्गाणं रोगाण, वेयणं निच्चमणुहवंतस्स। कइया घरे पविट्ठो, मुणिपवरो कोवि भिक्खट्ठा ॥ ५ ॥ तं पुत्तं तच्चलणे, पाडित्ता देवगुत्तदियपवरो । सिरधरियपा-णिकमलो, विन्नवई मुणिवरं एवं ॥ ६ ॥ भयवं! रोगोवसमो–गायं मह नंदणस्स आइसह । तो सोवि भणइ मुणिणो कहंति नो किंऽपि गोयरगा ॥ ७ ॥ तं निसुणिय मज्झण्हे, सहपुत्तो सो वणंमि गंतूणं । वंदिय मुणिमुत्तइट्ठो, पुच्छइ तणयस्स वुत्तंतं ॥ ८ ॥ अह कहइ मुणी जायइ, दुहपंको पावपाणियपसंगा । धम्मक्खररविखरकरसंसग्गाओ य सुक्कई ॥९॥ आराहियधम्माणं, दूरं नासंति सयलदुक्खाइं । न य हुंति पुणो एयाइँ, परभवे मुणियतत्ताणं ॥१०॥ इय मुणि-वयणं सोउं, संबुद्धा दोवि दंसणेण समं । बारसवयसोहिल्लं, गिण्हंति गिहीण वरधम्मं ॥ ११ ॥ अह सुकयरुइ माह–

णयुत्तो चिंतामणिव्व लहिऊणं । धम्मं सेवइ दढयरपरिणामो विगयमिच्छत्तो ॥ १२ ॥ धारिज्जइ इन्तो सायरोवि कल्लोलभिन्नकुलसेलो । नहु अन्नजम्मनिम्मिय-सुहासुहो कम्मपरिणामो ॥ १३ ॥ एवं परिभावंतो, विगयविसाओ सहेइ वियणाओ । धम्मरुई सावज्जं, मणसावि न चिंतइ तिगिच्छं ॥ १४ ॥ अह नियसहाइ हरिणा, पसंसिओ एगया स धम्माओ । न य चालिज्जइ एसो, अहो अहो धम्मतत्तरुई ॥ १५ ॥ तव्वयणं सोऊणं, दो देवा माण-संमि असहंता । काऊण विज्जरूवं, तस्स सगासं समल्लीणा ॥ १६ ॥ पभणंति तस्स सयणे, जइ एसो बालगो अवा-लमई । अम्हुवइट्ठुवयारं, करेइ ता होइ नीरोगो ॥ १७ ॥ तेऽविहु साहंति कहेसु संपयं पसिय करिय कारुण्णं । तो वज्जरंति विज्जा, सावज्जं किरियमेरिसयं ॥ १८ ॥ पढमे जामे महुणो-वलेहणं पच्छिमंमि सुरपाणं । मक्खणमी-सियकूरं, मंसजुयं निसि हि भुत्तव्वं ॥१९॥ सो दियतणओ सोउं, तं किरियं विज्जभासियं पावं । पभणेइ नाहमेयं, करेमि जीवाण वहहेउं ॥ २० ॥ जओ भणियमागमे—मज्जे महुंमि मंसंमि, नवणीयंमि चउत्थए । उप्पज्जंति असंखा, तव्वण्णा तत्थ जंतुणो ॥२१॥ इय जीवाणं घायण-पराइ किरियाइ नत्थि मे कज्जं । जीए अइसयघोरे, नरए पाडिज्जए अप्पा ॥ २२ ॥ सकरुणमिव तो विज्जा, भणंति तं भद्द! मुंच कुवियप्पं । पढमं साहणमेयं, देहं धम्मस्स बिंति जओ ॥ २३ ॥ ता तं रक्खेसु सया, सावज्जेणावि किरियकरणेण । पावस्स तस्स सुद्धिं, पच्छा य तवेण कु-ज्जासु ॥ २४ ॥ तो स दिओ ते जंपइ, अइसावज्जं करिसु जइ किरियं । कीरइ पच्छा सुद्धी, ता तीए होउ पज्जत्तं

॥ २५ ॥ जइ जीवियस्स इक्कस्स, कारणे हणइ जीवकोडीओ । ता किं सासयभावं, तमित्थ पडिवज्जए कहवि ? ॥ २६ ॥ तो सयणेहिं निवेणं, सउल्लवयणेहिं उल्लिओवि दिओ । न य धम्माओ चलिओ, मेरुव्व भणेइ तं चेवं ॥२७॥ वरं प्रवेष्टुं ज्वलितं हुताशनं, न चापि भग्नं चिरसञ्चितं व्रतम् । वरं हि मृत्युः सुविशुद्धकर्म्मणा, न चापि शीलस्खलितस्य जीवितम् ॥ २८ ॥ जाव न मन्नइ तेसिं, वयणं माहणसुओ स धम्मरुई । ताव सहसत्ति भणिओ, सुररूवं काउ विज्जेहिं ॥ २९ ॥ धन्नो पुन्नोऽसि तुमं, जस्स सयं तियससामि ससहाए । वण्णइ धम्मदढत्तं, सयलाण सुराण पच्चक्खं ॥ ३० ॥ तस्स तणुं नीरोगं, काउं रयणेहिं पूरिउं च घरं । आणंदपूरियमणा, सुमणा सविमाणमणुपत्ता ॥ ३१ ॥ एरिसयं तच्चरियं, पलोइउं पुलइओ निवो जाओ । सयणावि फुल्लवयणा, नलिणा इव तव्वणदंसणओ ॥ ३२ ॥ जयइ जए जिणधम्मो, माहप्पं जस्स एरिसं पयडं । इय थवणं कुणमाणा, बहवे वयपालणे सत्ता ॥ ३३ ॥ जं देवेहिं आरुग्ग—विग्गहो निम्मिओ लहुं एस । आरुग्गदिओत्ति जणे, तप्पभिई नाम से जायं ॥ ३४ ॥ नियपडिवन्नवयाइं, सम्मं पालित्तु धम्मरायपरो । पाविय सग्गसुहाइं, कमेण गमिही स मुक्खंमि ॥ ३५ ॥ निसामिऊण चरियं इमस्स, आरुग्गविप्पस्स दढव्वयस्स । जिणंदधम्मे रुइमायरेह, जहा लहुं सिद्धिसिरिं वरेह ॥ ३६ ॥ धर्म्मानुरागरूपद्वितीयलिङ्गविषये आरोग्यद्विजकथा । धर्म्मानुरागलक्षणं द्वितीयं लिङ्गमुक्त्वा तृतीयं देवगुरुवैयावृत्त्याख्यं लिङ्गमाह—

पूयाइए जिणाणं, गुरूण विस्सामणाइए विविहे । अंगीकारो नियमो, वेयावच्चे जहासत्ती ॥ १६ ॥

व्याख्या–"पूयाइए"त्ति, पूजा द्विधा, द्रव्यभावभेदात्, तत्र द्रव्यपुजाऽष्टधा, उक्तञ्च–"वरगंधधूवचोक्खक्खएहिं, कुसुमेहिं पवरदीवेहिं । नेवज्जफलजलेहि य, जिणपूया अट्ठहा भणिया ॥ १ ॥" भावपूजा तु स्तुतिस्तोत्रगीतनृत्यवादित्रादिभेदैरनेकधा, किमुच्यते तस्या माहात्म्यं? यदागमः—मेरुस्स सरिवस्स य, जित्तियमित्तं तु अंतरं होइ । दव्वत्थयभावत्थय, अंतरं तत्तियं नेयं ॥ १ ॥ किञ्च–उक्कोसं दव्वथयं, आराहिय जाइ अच्चुयं जाव । भावत्थएण पावइ, अंतमुहुत्तेण निव्वाणं ॥२॥ आदिशब्दाद्बिम्बचैत्यादिकारापणं तत्र, केषामित्याह–जिनानाम्-अर्हतां, तथा गुरूणां–निरुपचरितधर्ममार्गोपदेष्टृणां धर्माचार्याणां, 'विश्रामणादौ' अङ्गशुश्रूषादिके, विविधे-अशनपानखादिमस्वादिमवस्त्रपात्रादिना बहुप्रकारेऽङ्गीकारः–स्वीकरणं, 'नियमो' निश्चयकरणं, क्व? 'वैयावृत्त्ये' विनयविधाने, कथं 'यथाशक्ति' शक्तेरनतिक्रमेण यथाशक्ति, उत्सर्गापवादाभ्यामिति गाथार्थः । भावार्थस्त्वारामशोभादृष्टान्तादवसेयः, स चायम् इहेव जम्बूरुक्खालंकियदीवमज्झट्ठिए अक्खंडछक्खंडमंडिए बहुविहसुहनिवहनिवासे भारहे वासे असेसलच्छिसंनिवेसो अत्थि कुसट्टदेसो । तत्थ पमुइयपक्कीलियलोयमणोहरो उग्गविग्गहुव्व गोरीसुंदरो सयलधन्नजाईअभिरामो अत्थि बलासओ नाम गामो । जत्थ य चाउद्दिसि जोयणपमाणे भूमिभागे न कयावि रुक्खाइ उग्गइ । इओ य तत्थ चउवेयपारगो छक्कम्मसाहगो अग्गिसम्मो नाम माहणो परिवसइ । तस्स सीलाइगुणपत्तरेहा अग्गिसिहा नाम

भारिया, ताणं च परमसुहेण भोगे भुंजंताणं कमेण जाया एगा दारिया, तीसे 'विज्जुप्पह'त्ति नाम कयं अम्मापिऊहिं—जीसे लोलविलोयणाण पुरओ नीलुप्पलो किंकरो, पुन्नो रत्तिवई मुहस्स वहई निम्मललीलं सया । नासायंसपुरो सुअस्स अपडू चंचूपुडो निज्जरा, रूवं पिक्खिय अच्छरासुवि धुवं जायंति ढिल्लायरा ॥ १ ॥ तओ कमेण तीसे अट्ठवरिसदेसियाए दिव्वयसा रोगायंकाभिभूया माया कालधम्ममुवगया । तत्तो सा सयलमवि घरवावारं करेइ । उट्ठिऊण पभायसमए विहियगोदोहा कयघरसोहा गोचारणत्थं बाहिं गंतूण मज्झण्हे उण गोदोहाइ निम्मिय जणयस्स देवपूयाभोयणाइं संपाडिऊण सयं च भुत्तूण पुणरवि गोणीओ चारिऊण सज्झाए घरमागंतूण कयपाओसियकिच्चा खणमित्तं निद्दासुहं सा अणुहवइ । एवं पइदिणं कुणमाणी घरकम्मेहिं कयत्थिया समाणी जणयमन्नया भणइ—ताय ! अहं घरकम्मुणा अच्चंतं दूमिया, ता पसिय घरणिसंगहं कुणह । इय तीइ वयणं सोहणं मन्नमाणेण तेण एगा माहणी विसद्दुमसारणी सगहिणी कया । साऽवि सायसीला आलसुया कुडिला तहेव घरवावारं तीए निवेसिय सयं ण्हाणविलेवणभूसणभोयणाइभोगेसु वावडा तणमवि मोडिऊण न दुहा करेइ । तओ सा विज्जुप्पहा-विज्जुव्व पज्जलंती चिंतेइ—अहो ! मए जं सुहनिमित्तं जणयाओ कारियं तं निरउव्व दुहहेउयं जायं, ता न छुट्टिज्जई अवेइयस्स दुट्ठकम्मुणो, अवरो उण निमित्तमित्तमेव होई, जओ 'सव्वो पुव्वकयाणं, कम्माणं पावए फलविवागं । अवराहेसु गुणेसु य, निमित्तमित्तं परो होइ ॥ १ ॥ यस्माच्च येन च यथा च यदा च यच्च, यावच्च यत्र च शुभाशुभमा-

त्मकर्म्म । तस्माच्च तेन च तथा च तदा च तच्च, तावच्च तत्र च कृतान्तवशादुपैति ॥ २ ॥ एवं सा असणदुम्मणा गोसे गावीओ चारिऊण मज्झण्हे अरसविरसं सीयलं लुक्खं मक्खियासयसंकुलं भुत्तुद्धरियं भोयणं भुंजइ एवं दुक्खमणुहवंतीए तीए बारसवरिसा वइक्कंता, अन्नंमि दिणे मज्झण्हे सुरहीसु चरंतीसु गिम्हे उण्हकरतावियाए रुक्खाभावाओ पाओ च्छायावज्जिए सतिणप्पएसे सुयंतीए तीए समीवे एगो भुयंगो आगओ–जो उण अइर-त्तच्छो, संचालियजीहजामलो कालो । उक्कडफुंकाराख–भयजणओ सव्वपाणीणं ॥ १ ॥ सो य नागकुमाराहिट्ठि-यतणु माणुसभासाए सुललियपयाए तं जग्गवेइ, तप्पुरओ एवं भणइ य, भयभीओ तुह पासं, समागओ वच्छि ! मज्झ पुट्ठीए । जं एए गारुडिया, लग्गा बंधिय गहिस्संति ॥ १ ॥ ता नियए उच्छंगे, सुइरं ठाविएवि पवरवत्थेणं । मह रक्खेसु इहत्थे, खणमवि तं मा विलंबेसु ॥ २ ॥ नागकुमाराहिट्ठिय–काओ गारुडियमंतदेवीणं । न खमो आणा-भंगं, काउं तो रक्ख मं पुत्ति ! ॥ ३ ॥ भयभंतिं मुत्तूणं, वच्छे ! सम्मं कुणेसु मह वयणं । तत्तो साऽवि दयालू, तं नागं ठवइ उच्छंगे ॥ ४ ॥ तओ तंमि चेव समए करठवियओसहिवलया तप्पिट्ठओ चेव तुरियतुरियं समा-गया गारुडिया, तेहिं पि सा माहणतणया पुट्ठा, बाले ! एयंमि पहे कोऽवि गच्छंतो दिट्ठो गरिट्ठो नागो ?, तओ साविं पडिभणइ–भो नरिंदा ! किं मं पुच्छेह ?, जं अहमित्थ वत्थछाइयगत्ता सुत्ता अहेसि, तओ ते परुप्परं संल-वंति, जइ एयाए बालियाए तारिसो नागो दिट्ठो हुंतो तो भयवेविरंगी कुरंगीव उत्तट्ठा हुंता, अओ इत्थ नागओ

सो नागो, तयणु ते अग्गओ पिट्ठओ य पलोइय कत्थवि अलहंता हत्थेण हत्थं मलंता दंतेहिं उट्ठसंपुडं खंडंता विच्छायवयणा पडिनियत्तिऊण गया सभवणेसु गारुडिया। तओ तीए भणिओ सप्पो–नीहरसु इत्ताहे, गया ते तुम्ह वेरिया, सोऽवि तीए उच्छंगाओ नीहरिऊण नागरूवमुज्झिउण चलंतकुंडलाहरणं सुररूवं पयडिय पभणेइ, वच्छे! वरेसु वरं जं अहं तुहोवयारेण साहसेण य संतुट्ठम्हि, सावि तं तहारूवं भासुरसरीरं सुरं पिच्छिऊण हरिसभर-निब्भरंगी विन्नवेइ ताय! जइ सच्चं तुट्ठोऽसि, ता करेसु मज्झुवरि च्छायं, जेणायवेणापरिभूया सुहंसुहेण च्छायाए उवविट्ठा गावीओ चारेमि, तओ तेण तियसेण मणंमि वीमंसियं, अहो! एसा सरलसहावा वराई जं ममाओवि एवं मग्गइ, ता एयाए एयंपि अहिलसियं करेमित्ति तीए उवरि कओ आरामो महल्लसालद्दुमफुल्लगंधंधपुप्फंध-यगीयसारो च्छायाभिरामो सरसप्फलेहिं पीणेइ जो पाणिगणे सयावि। तत्तो सुरेण तीइ पुरो निवेइयं पुत्ति! जत्थ जत्थ तुमं वच्चिहिसि तत्थ तत्थ महमाहप्पाओ एस आरामो तए सह गमिही। गेहाइगयाए तुह इच्छाए अत्ताणं संखेविय च्छत्तुव्व उवरि चिट्ठिस्सइ, तुमईए उण संजायपओयणाए आवइकाले अहं सरेयव्वुत्ति जंपिय गओ सट्ठाणं सो नागकुमारो सावि तस्सारामस्सामयरससरसाणि फलाणि जहिच्छं भुंजिय विगयच्छुहतण्हा तत्थेव ठिया सयलं दिणं, रयणीए उण गोणीओ वालिऊण पत्ता नियमंदिरं, आरामोऽवि तीए गिहं च्छाइऊण समंतओ ठिओ, जणणीए उण सा वुत्ता–पुत्ति! कुणसु भोयणं, तओ तीए वज्जरियं–नत्थि मे अज्ज छुहत्ति उत्तरं काऊण सा नि-

यसयणीए निद्दासुहमणुहवइ । जाए पच्चूससमए सा गावीओ गहिय तहेव गयाऽरण्णं, आरामोऽवि तप्पिट्ठीए गओ, एवं कुणंतीए तीए कइवासराणि अइक्कंतदिणाइं । एगया मज्झण्हे सुहप्पसुत्ताए सिरिपाडलपुराहिवो चउरङ्गबल-कलिओ विजयजत्ताए पडिनियत्तो जियसत्तु नाम राया आगओ तत्थ । तस्सारामस्स रमणिज्जयाए अक्खित्तचित्तो मंतिं खंधावारनिवासत्थमाइसइ, नियासणं च चारुचूयतरुतले ठाविय सयमुवविसइ, सिन्नंपि तस्स चउद्दिसिंपि आवासेइ, अविय तरलतरंगयलच्छा, बज्झंति समंतओ य तरुमूले । कविका लंबिज्जंति पल्लाणजुया य साहासु ॥ १ ॥ बज्झंति निबिडथुडपायवेसु मयमत्तदंतिपंतीओ । वसहकरहाइवाहण–परंपराओ ठविज्जंति ॥ २ ॥ तम्मिय समए सिन्नकोलाहलेण विजुप्पहा विगयनिद्दा समाणी उट्ठिऊण करहाइपलोयणुत्तट्ठाओ गावीओ दूरंगयाओ पलोइय तासिं वालणट्ठा तुरियतुरियं रायाइलोयस्स पिक्खंतस्सवि पहाविया । तीए समं च करभतुरियाइसमेओ आरामोऽवि पत्थिओ । तओ ससंभंतो राया सपरियणो उट्ठिओ, अहो किमेयमच्छरियंति पुच्छइ मंतिं,सोऽवि जोडियकरसंपुडो रायं विन्नवेइ, देव ! अहमेवं वियक्केमि, जइओ पएसाओ विगयनिद्दामुद्दा उट्ठिऊण करसंपुडेणं नयणे चमढंती उट्ठित्ता पहाविया एसा बाला, इमीए सद्धिं आरामोऽवि, ता माहप्पमेयमेईए चेव संभाविज्जइ । एसा देवंगणावि न संभाविज्जइ, निमेसुम्मेसमात्तेण नूणमेसा माणुसी, तओ रण्णा वुत्तं मंतिराय ! एयं मे समीवमाणेह मंतिणावि धाविऊण सद्दो कओ, सावि तस्सद्दस्सवणेण आरामसहिया तत्थेव ठिया,तओ एहित्ति मंतिणा वुत्ता सा,

पडिभणइ, मम गावीओ दूरं गयाओ, तओ मंतिणा नियअस्सवारे पेसिऊण आणावियाओ गावीओ, सावि आराम-कलिया रायसयासमाणीया, राया वि तीए सव्वमवि अंगमंगमवलोइय कुमारित्ति निच्छीय साणुराओ मंति-संमुहमवलोएइ, तेणावि रण्णो मणोभिप्पायं नाऊण वज्जरिया । विज्जुपहा !—नमिरनरेसरसेहरअमंदमयरंदवासिय-कमग्गं । रज्जसिरिइ सवक्की, होऊण इमं वरं वरसु ॥ १ ॥ तओ तीए साहियं, नाहं सवसा किंतु जणणिजणयाण-मायत्ता । तओ मंतिणा उत्तं—को ते पिया ? कत्थ वसइ, ? तीए वि संलत्तं—इत्थेव गामे अग्गिसम्मो माहणो परि-वसइ, तओ मंति तत्थ गमणाय रण्णा आइट्ठो, सोवि गामे गंतूण तस्स घरे पविट्ठो, तेणावि सागयवयणपुरस्सरं आसणे निवेसिऊण भणिओ—जं करणिज्जं तं मे पसीय आइसह, अमच्चेण भणियं—तुम्हं जइ कावि कन्नगा अत्थि, ता दिज्जउ अम्ह सामिणो, तेणावि दिन्नत्ति पडिस्सुयं, जं अम्ह जीवियमवि देवस्स संतियं किं पुण कन्नगत्ति,? तओ अमच्चेण भणियं—तुमं पायमवधारेसु देवस्स पासे, सोऽवि य रायसमीवं गंतूण दिन्नासीवयणो, मंतिणा वाहरियं वुत्तं, तो रण्णा सहत्थदिन्नासणे उवविट्ठो, भूवइणावि कालविलंबमसहमाणेण गंधव्वविवाहेण सा परिणीया, पुव्विल्लयं नामं परावत्तिऊण 'आरामसोहं'ति तीए नामं कयं । माहणस्स वि दुवालस गामे दाऊण पणइणिं चारामसोहं हत्थिखंधे आरोविऊण सनयरं पइ पत्थिओ पत्थिवो पमोयमुव्वहंतो । कप्पलइव्व इमीए, लंभेण निवो कयत्थमप्पाणं । मन्नइ अहवा वञ्छियलाहाओ को न तूसेइ ? ॥ १ ॥ सिंगारतरंगतरंगिणीइ दिव्वाणुभावकलियाए । किं चुज्जं

भूवइणो, हरियं हियय तया तीए ॥ २ ॥ तओ मंचाइमंचकलियं निवेसियकालागुरुकुंदुरुक्कतुरुक्कधूवमघमघंतघडियं उब्भामियधयवडालोयं उल्लासियवंदणमालं तियचउक्कचच्चरचउम्मुहपयट्टियअउव्वनाडयं बहुठाणठवियपुण्णकलसं वण्णिज्जंतो आरामसोहाइसयसहयरारामचुज्जविलोयणुप्फुल्लविलोयणनलिणेहिं नरनारीगणेहिं, पणइणीकलिओ पाडलिपुरं पविट्ठो महाविभूईए महाराओ । सावि पुढो पासाए ठाविया, आरामो वि तीए पासायमाचरिय समंतओ ठिओ दिव्वाणुभावेण । राया वि परिहरियासेसवावारो तीइ समं भोए भुंजन्तो दोगुंदुगसुरेवि अवमन्नंतो निमेसमित्तं व कालमइक्कमइ । इओ आरामसोहासवक्किमायाए धूया जाया, कमेण जुव्वणमणुपत्ता, तं तहावत्थं दट्ठूण दुट्ठा तज्जणणी एवं चिंतेइ—जइ केणावि पओएण आरामसोहा मरइ, ता राया तीइ गुणक्खित्तचित्तो मम पुत्तिमेयं परिणेइ, तओ य मम मणोरहभूरुहो सहलो होइत्ति परिभाविऊण तीए नियदइओ वाहरिओ—नाह ! वच्छाए परिणीयाए बहुकालो वइक्कंतो, अओ तीसे कए किंपि भक्खभुज्जाइयं पेसिउं जुज्जइ, एसावि पिउहरपाहुडेण मणो रंजिज्जइ, तओ भट्टेण भणियं—पिए ! तीए न किंपि ऊणयं, परमहमेयं वियाणेमि-जं कप्पदुमस्स बोरकरीराइ फलपेसणं नइरागरस्स कायखंडमंडणं मेरुस्स सिलायलेहिं दिढयरणं पज्जोयणस्स खज्जोयपोयउवमाणकरणमणुचियं होइ, तहा तीए अम्हाण पाहुडपेसणं, परमेस विसेसो—जं रायलोओ मुहे हत्थं दाऊण उवहसिस्सइ । तओ तीए पावाए संलत्तं—नूणं सा नो ऊणा परमम्हाणं निव्वुई होइ, तओ तीए

आगगइं नाऊण माहणेण वि तहत्ति पडिवन्नं, तओ तीए हरिसियमणाए बहुदव्वसओएण निम्मिया सिंहकेसरीमोदगा भाविया य महुरयेण, पक्खित्ता य नवकलसे, तम्मुहं मुद्दिऊण तीए भत्ता विन्नत्तो—मा पंथे कोवि पच्चवाओ होउ, तो तुमं सयं गहिय वच्चसु, तओ थेयजडो बंभणो सिंढसिंगंव कुडिलं तीए मणं अमुणंतो तं घडं सिरे करिय जा पत्थिओ ताव तीए भणियं, एयं पाहुडं आरामसोहाए चेव दाऊण सा भणियव्वा—'वच्छे ! तुमए चेव एयं भुत्तव्वं, न अन्नस्स दायव्वं, मा मम एयस्स विरूवत्तेण रायलोओ हसउत्ति' सो वि तहत्ति पडिवज्जिय पत्थिओ, मंदपयपयारेण य वच्चंतो संझाए ठाऊण सयणसमए तं घडं ओसीसए दिंतो कइवइदिणेसु पत्तो पाडलिपुत्तासन्नमहल्लवडपायवस्स तले, तत्थ तं घडं उस्सीसए दाऊण सुत्तो । इत्थंतरे तत्थ दिव्वजोगेण कीलणत्थमागएण तेण नागकुमारेण दिट्ठो सो बंभणो, चिंतियं च—को एस मणुसो ? कलसम्मि य किमत्थि वत्थुत्ति ? नाणं पउंजिय नाओ सयलोवि तीए पावाए बंभणीए वुत्तंतो, अहो ! पिच्छह सवत्तिमाउए दुट्ठचिट्ठियं, जं तीए सरलसहावाए एरिसं ववसियं, परं मइ विज्जमाणे मा कयावि इमीए विरूवं होउत्ति वीमंसिय तेण विसमोयगे अवहरिय अमयमोयगेहिं भरिओ सो कलसो । तओ सो गोसे सुत्तविउद्धो उट्ठिऊण गओ कमेण रायदुवारं, पडिहारनिवेइओ य रायसगासं गंतूण दिन्नासीसो पाहुडघडं रायवामपासट्ठियाए समप्पेइ आरामसोहाए । तओ तेण भणिओ राया—जहा महाराय ! विन्नत्तं वच्छामाउयाए जमेयं पाहुडयं मए जारिसं तारिसं जणणीनेहेण पेसियं, अओ पुत्तीए चेव

भुत्तव्वं, नन्नस्स दायव्वं, जहाऽहं रायलोयमज्झे न हसणिज्जा होमित्ति मणे पच्छन्नो अ धरियव्वो, तओ रण्णा निरिक्खियं देवीए मुहकमलं, तीए वि दासीए सिरंमि दाऊण सभवणे पेसिओ कलसो, माहणो वि कणयरयणवसण-दाणेण संतोसिओ रण्णा, सयं अत्थाणाओ उट्ठिऊण गओ देवीए गिहं, तत्थ सुहासणासीणो विन्नत्तो आराम-सोहाए राया,—पिययम ! करिय पसायं, नियनयणे निअह इत्थ कलसंमि । अवणिज्जइ जह मुद्दा, इय मुद्धा भणइ भूओवि ॥ १ ॥ दइए ! मह मणदइए !, मा हियए कुणह किंपि कुवियप्पं । तं चेवम्हपमाणं, ता उग्घाडेसु घडमेयं ॥ २ ॥ तओ तं घडं उग्घाडंतीए तीए को वि दिव्वो माणुस्सलोयदुल्लहो परिमलो समुल्लसिओ, जेण सय-लंपि रायभवणं महमहियं । तो राया महप्पमाणे मोयगे दट्ठूण परितुट्ठो भुंजंतो य तप्पसंसं कुणेइ, भणइ य—मए रण्णा वि होऊण एयारिसऽसरिसमोयगासायणं कयावि न कयं, तओ आरामसोहं पइ जंपइ नरवरो—एयमज्झ इक्किकं मोयगं भइणीणं कए पेसह, तीए वि रायाऽऽएसो तहेव कओ, तओ रायलोए तज्जणणीए महई पसंसा जाया—अहो सा विन्नाणसालिणी, जीए एरिसा देवाण वि दुलहा मोयगा काऊण पेसिया, इय तप्पसंसं सोऊणाराम-सोहा परमं संतोसं गया, एयम्मि समए अग्गिसम्मेण विन्नत्तो राया—देव ! पिउहरं पेसह मे पुत्तिगं, जहा माउए मिलिऊण थोवकालेणवि तुम्ह पासमुवेइ, तओ रण्णा सो पडिनिसिद्धो, जओ—रायभारियाओ न मत्तंडमंडलमवि

पलोइउ लहंति, किं पुण तत्थ गमणंति भणिओ भट्टो गओ सगिहं, भारियाए नियेइयं सयलं पि तेण सरूवं । तओ सा पावा वज्जाहयव्व चिंतिउं लग्गा, हंत ! मह उच्छुपुप्फं व जाओ निप्फलो उवक्कमो, ता नूणं न मणहरो महुरो, तओ कइवयदिणपज्जंते पुणोवि हालाहलमीसियाणं फीणियाणं करंडयं दाऊण तहेव तीए विसज्जिओ निय-दइओ, पुव्वजुत्तीए चेव तेणेव सुरेण हालाहलमवहरियं, तहेवतीसे पसंसा जाया, पुणो वि तइयवेलं कयपच्चय-तालउडभावियमंडियाहिं पडिपुण्णं करंडयं दाऊण बंभणो भणिओ तीए-वच्छा संपयमावन्नसत्ता सह चेव आणेयव्वा, जहा इत्थ पढमो पसवो होइ, जइ राया कहमवि न पेसेइ, तओ तए बंभणत्तं दंसणीयंति, तव्वयणमंगीकाऊण भट्टो मग्गे गच्छंतो सुत्तो वडपायवस्स हिट्ठा, देवेण वि पुव्वंव अवहडो तालउडो, तओ पुव्वजुत्तीए पुत्तीए पाहुडं दाऊण राया तेण विन्नत्तो-पुत्तिं मम घरे पेसह, तओ तव्वयणं मणयंपि राया जाव न मन्नइ, ताव सो जम-जीहसहोयरिं छुरिं उदयरोवरि धरिय वाहरइ-जइ पुत्तिं न पेसिस्सह, ता अप्पघायं करिस्सामि, तओ राया तन्नि-च्छयं मुणिऊण महया परिवारेण परियरियं मंतिणा सहारामसोहं पेसेइ । तओ असुणियतप्पुण्णपगरिसा आराम-सोहमागच्छंतिं सुणिय सवत्तिमाया सहरिसा नियमंदिरपिट्ठदेसे महंतयं कूवयं खणाविऊण किंपि पवंचं मणे भाविऊण तम्मज्झगयभूमिहरए नियधूयं ठवेइ । अह समागया आरामसोहा सपरियणा, सवत्तिमाया वि तीए पुरो नियमभिप्पायमप्पयडंती किंकरिव्व कज्जाइं करिंती चिट्ठइ । अह संजाए पसवसमये सुरकुमराणुकारं

सा पसूया कुमारं, अन्नया विहिवसओ दूरट्ठिए परियणे समीवट्ठियाए सवत्तिमायाए कायचिंतानिमित्तं नीया आरामसोहा पच्छिमदुवारं, साबि तत्थ कूवं पलोइऊण भणइ–अम्मो ! कया काराविओ ? एस अउव्वो कूवो । तओ सा परमपिम्ममिव पयडंती साहइ, वच्छे ! तुज्झागमणं नाऊण मए एस कराविओ, मा कया वि दूरओ नीरे आणि-ज्जमाणे विसाइसंकमो हुज्जा, तओ सा आरामसोहा कोऊहलेण कूवतलं पलोयंती तीए दुट्ठाए अणुलहियययाए पणुल्लिया अहोमुहा चेव पडिया, तम्मि समए तीए आवयपडियाए सो नागकुमारसुरो समरिओ, तेणावि सुरेण पयडीभूएण करसंपुडेणं अद्धंतराले चेव सा पडिच्छिया, कूवंतरे चेव पायालभवणं विउव्विय ठाविया, आरामो वि तत्थेव देवप्पभावाओ ठिओ, सुरोऽवि बंभणीए उवरि कोवं कुणंतो मा थत्ति भणिय तीए उवसामिओ गओ सट्ठाणं, तओ तीए बंभणीए पसुइयाए तप्पल्लंके णवप्पसूयत्ति नियधूया सुवारिया । खणंतरे तप्पडिचारियाओ समागयाओ तं अप्पलावण्णं किंपि सरिसागारं दट्ठूण धसक्कियहियायाओ जंपन्ति–सामिणि ! संपइ किमन्नारिसीव भगवई पलो-इज्जइ ? सापि साहरइ–किंपि न मुणेमि, परं मह देहो न सत्थावत्थो, तओ ताहिं भयभीयाहिं तज्जणणीए बंभणीए पुरो निवेइयं, तओ सावि पडुकूडकवडनाडयनडिया करेहिं हिययं ताडयंती पलविउं लग्गा, हद्धी दुट्ठदिव्वेणं मुट्ठा, जं वच्छा अन्नारिसरूवा दीसइ, कहं रण्णो मुहं दक्खविस्सं ?, तओ रायभएण विसन्नाओ परिचारियाओ चिट्ठंति । अह तम्मि समए निवइसमाइट्ठो समागओ मंती, तेणवि भणियं–जं देवो आणवेइ–देवीसहियं कुमारं

सिग्घमाणेऊण मह मेलहत्ति, तव्वयणसवणाणंतरं कया सयलावि पत्थाणसामग्गी, तम्मि अवसरे परिवारेण पुच्छिया देवी, कत्थ आरामो ? अज्जवि नागच्छइ, सा भणइ–कूवए नीरपाणट्ठं मए ठाविओ, पच्छा आगमिस्सइ, तओ-तीए सह पत्थिऊण परियणो पाडलिपुत्ते पत्तो, वद्धाविओ निवो, तेणावि पमुइयमणेण पयट्टाविया हट्टसोहा, पारद्धं वद्धावणयं, सयं संमुहगमणेण दिट्ठा देवी तणओ य, तओ पियाए अन्नारिसं रूवं निरूविऊण संभंतेण राइणा पुट्ठं–अहो !! अन्नारिसिच्चिय तुह तणुसिरी निरूविज्जइ, तत्थ को हेऊ ?, तओ दासीहिं विन्नत्तं–महाराय ! एयाए पसूयाए दिट्ठिदोसेण पसूइरोगेण वा अन्नारिसं व रूवं संवुत्तं, न सम्मं जाणेमो, तओ राया सुयजम्मपमुइ-ओवि दइयावइयरसवणओ विच्छाओ जाओ, तहा वि धीरत्तमवलंबिऊण राया तीए सह पुरं पविट्ठो । एगया सा भणिया रण्णा–पिए ! सो तुह सया सहयरो आरामो किं न दीसइ ?, तीए वि संलत्तं–अज्जउत्त ! पच्छा नीरं पियंतो कूवे वट्टइ, समरिओ संतो समागमिही, राया वि जहा जहा तीए सव्वंगं पासइ, तहा तहा संदेहपिसा-एण अक्कमिज्जइ, किमेसा सा अन्ना वा कावि ?, अन्नया सा वुत्ता रण्णा, आणेह तमारामं मणाभिरामं, सावि जंपइ-पियपम ! पच्छावि आणिस्सं, सविसेसं रायमणंमि आसंका जाया । अहारामसोहाए सो सुरो विन्नत्तो–ताय ! सुय-विरहो मं दढं पीडेइ, ता पसीय तहा कुणह, जहा वच्छं पिच्छामि, तओ सा सुरेण आइट्ठा–जइ एवं ता वच्च मम माहप्पेण, परं पुत्तं पासिऊण सिग्घमागच्छेसु, तीए वि तहत्ति तव्वयणमंगीकयं, तओ पुणोवि सा सुरेण साहिया–

जइ तत्थ गया तुमं सूरुग्गमं जाव चिट्ठिहिसि, तओ परं मह दंसणं तुह न हविस्सइ, एस उण संकेओ–जया निय-केसपासाओ मयनागं पडियं पिच्छिहिसि, तओ परं न तुह मह दंसणं होही, तीएवि जंपियं–एयमवि होउ, जइ इक्कवारं कहंपि पलोएमि तणयवयणं। तओ सा पेसिया तियसेण, तप्पभावेण य निमेसमित्तेण पाडलिपुत्तं पत्ता, उग्घाडिऊण वासभवणं पइट्ठा, तं च केरिसं? "जलंतमणिदीवयं, कणयकंतिसंदीवियं। सुपक्कफलपूरियं, महमहंत-कप्पूरियं ॥ १ ॥ पफुल्लकुसुमुक्करं, अगरधूवगंधुद्धुरं। अलंकरणसुंदरं, पणसुगंधियाडंबरं ॥ २ ॥ तं पलो-इऊण पुव्वाणुभूयरयकेलिसुमरणसंजायकुसुमसरवियारपसरावि पिययमपासपसुत्तभइणीनिरूवणईसावसविवसा सव-क्किजणणीकयकूवपक्खेवसंभरणुब्भूयकोवरसा तणयवयणपलोयणसंभवंतप्पमोयरसभरा सा खणं ठाऊण धाइ-सयमज्झसुत्तपुत्तसगासं गया, तं कमलकोमलकरेहिं गहिऊण खणं रमावेऊण चउद्दिसंपि नियारामफुलफल-पगरं खिवेऊण पत्ता नियवासकूवं आरामसोहा। तओ पभायसमए धाईहिं विन्नत्तो राया–सामि! अज्ज कुमारो पुप्फफलेहिं केणावि पूइओ दीसइ, तं सुच्चा रायावि आगओ तस्सगासं, तं च तहा दट्ठूण पुच्छिया सा कूडआ-रामसोहा, सावि भणइ–मया नियारामाओ समरिऊण समाणीयं पुप्फफलाइयं एयं। तओ रण्णा वुत्तं–संपयं किं न आणेसि? तीए वुत्तं–न वासरे आणेउं सक्किज्जइ। तओ विलक्खवयणं तं पिक्खिऊण रण्णा चिंतियं–अवस्समेस कोऽवि पवंचो, एवं तिन्नि दिणा जाया, तओ सा रण्णा वुत्ता–अज्जवस्सं आराममाणेह, तओ सा अच्चंतं विलक्ख-

वयणा हुत्था, दंभो कइदिणे छज्जइ । चउत्थजामिणीए आरामसोहा पुव्वं सव्वं काऊण जाव नियत्ता, ताव भूवइणा करयलेण साहिय साहिया–हा पाणपिए ! पियं जणं पणयपरं किमेवं विप्पयारेसि? तीए वुत्तं–पाणेसर ! न विप्पयारेसि, परमत्थि किंपि कारणं, रण्णा भणियं–वागरेसु, अन्नहा न मिल्हिस्सं, सावि सप्पणयं विन्नवेइ–नाह! मुंचसु मं, कल्ले उण अवस्सं कहिस्सं, तओ य राया वागरेइ–मुक्खोवि किं करयलचडियं चिंतारयणं मुंचइ ?, तीए वि भणियं–एवं कुणमाणस्स तुज्झवि हविस्सइ पच्छातावो, तहवि पुहवीसरो तं न मुंचइ, तओ तीए मूलाओ जणणीए दुव्विलसियं कहंतीए संवुत्तो अरुणुग्गमो, तम्मि समए केसकलावं विलुलियं संठवमाणीए पडिओ मओ नागो, तं पलोइय सा बाला विसायपिसायगहिउव्व झत्ति मुच्छानिमीलियच्छी छिन्नसाहव्व महिवीढे पडिया, सीयलोवयारेहिं पत्तचेयणा सा भणिया राइणा–पाणेसरि ! केण हेउणा अप्पाणयं विसायसायरे पक्खिवसि? तओ सा भणइ–सामिय ! ताउव्व हियकारी एस नागकुमारसुरो जो मज्झ संनिज्झं सया कुणमाणो आसि, तेण य मे पुरओ भणियं हुत्था–जइ मज्झाएसं विणाऽरुणोदयं जाव अन्नत्थ चिट्ठिहिसि, तओ परं मज्झ ते दंसणं न भविस्सइ, केसपासाओ य मयभुयंगो पडिस्सइ, तओ नाह ! तुम्ह अविसज्जियाए मइवि संपयं तं वुत्तं, तओ परं सावि तत्थेव ठिया, तब्भइणिं गोसे तोसेण रहिओ निविडबंधणेहिं बंधिय जाव राया कसाहिं ताडिउं पउत्तो, ताव विन्नत्तो चलणेसु निवडिऊण सहावसरलाए आरामसोहाए–जइ मइ उवरि पसायं, करेसि ता सामि ! मुंच मे भइणिं । करिय दयं

हियदइयं, एयं पुव्वं य पिक्खेसु ॥ १ ॥ रायावि भणइ जइविहु, एयाए देवि ! दुट्ठचित्ताए । ठावणयंपि न जुत्तं, वयणं तुह तहवि दुलंघं ॥ २ ॥ मोयाविया य तीए, नियपासे ठाविया य भइणित्ति । पच्चक्खं सज्जणदुज्जणाण परिपिच्छह विसेसं ॥ ३ ॥ तओ पलयानलं व पज्जलंतेण राइणा नियपुरिसा हक्कारिऊण समाइट्ठा, रेरे दुवालसवि गामे हरिऊण अग्गिसम्मं माहणं तस्स माहणिं च कण्णनासउडे छिंदिऊण मज्झ देसाओ निव्वासेह, एयं रायवयणं वज्जग्गिफुलिंगउग्गं सोऊण आरामसोहा भत्तुणो चलणेसु निवडिऊण विन्नवेइ—जइ कहवि डसइ भसणो, पुणो वि किं कोवि खाइ तं सुयणो । इय मुणिय नाह ! मुंचसु, मह जणए करिय मइ पणयं ॥ १ ॥ एवं देवीए भणिओ रायावि तच्चित्तखेयपणोयणत्थं तेसिं पुव्वं व गामे देइ, तओ तेसिं विसयसुहमणुहवंताणं सुहंसुहेण वच्चइ कालो । एगया परुप्परं धम्मवियारं कुणंताणं एरिसो संलावो संवुत्तो आरामसोहाए—पिययम ! पुव्विमहं दुक्खिया होऊण पच्छा सुहभायणं जाया, ता मन्ने कस्स वि कम्मस्स एस परिणामो, एयमत्थं च पुच्छामि जइ कोवि नाणी एइ, एवं संलवंतीए तीए उज्जाणपालओ आगंतूण पणामपुव्वं नरवरं विन्नवेइ—देव ! नंदणुज्जाणे करकलियमुत्ताहलमिव सयलभावे वियाणमाणो पंचसयसाहुपरियरिओ सिरिवीरचंदसूरी समोसरिओ । तं सुणिय हरिसभरुब्भिन्नरोमंचो राया तस्स पीइदाणं दाऊण विसज्जेइ, तओ रण्णा भणियं—पिए ! उट्ठेसु, संपुण्णो ते मणोरहो, जं अज्जेवागओ महप्पा । तओ राया आरामसोहासहिओ सयललोयपरियरिओ य उज्जाणे गंतूण तिपयाहिणापुव्वं मुणिंदं पण-

मिय जहोचियट्ठाणे उवविट्ठो, भगवयावि पारद्धा देसणा—अपारपारे संसारे, भमंतोवि जणो सया। पावाओ दुक्ख-रिंछोलिं, लहंते धम्मओ सुहं ॥ १ ॥ इच्चाइधम्मदेसणावसाणे जोडियकरसंपुडा आरामसोहा गुरुं विन्नवेइ—भयवं! जं जहा तुम्हेहिं आइट्ठं तं तहेव, परं मए पुव्वभवे किं कयं? तं संपयं पसीय आइसह। तओ सूरीवि सजल-जलहरगंभीरसरेण वागरिउमाढत्तो—इहेव जंबूद्दीवे दीवे भारहे वासे चंपाए नयरीए सयललोयप्पसिद्धो धणउव्व-समिद्धो कुलधरो नामा सिट्ठी हुत्था, तस्स कुलाणंदा नाम भारिया, तीए समं विसयसुहमणुहवमाणस्स कमेण रूवलडहलायण्णपुण्णाओ सत्त धूयाओ जायाओ। तासिं कमेण नामाणि—कमलसिरी, कमलवई, कमला, लच्छी, सिरी, जसएवी, पियकारिणी, य, ताओ धणवंतकुलेसु परिणीयाओ भोगे भुंजमाणीओ सुहं सुहेण विहरंति। अह दिव्ववसा अट्ठमिया वि कन्नया जाया, तम्मि समए मायापियरो अईव दुक्खिया, तीसे नामंपि न कुणंति,सावि अणा-यरेण वड्ढंती जुव्वणमणुपत्ता, निब्भग्गत्ति लोए तीए नामं पयडं जायं, तं पिक्खंताणं अम्मापिऊणं अईव उव्वेओ होइ, अन्नदिणे परियणेण सिट्ठी भणिओ—तुमयेयं (वुड्ढ) कुमारिमपरिणावितो लोए गरुयमववायं पामिहिसि, एवं भणिओवि मणे खेयमुव्वहंतो दुहेण सिट्ठी चिट्ठइ। एगया सचिंतस्स सिट्ठिणो हट्टंमि उवविट्ठस्स मलमइलगत्तो दी-हमग्गुलंघणपरिस्संतो एगो पहिओ दिट्ठीगोयरं गओ, तओ सिट्ठिणा पुट्ठो—कओ तं समागओ?, कोसि तुमं? का य ते जाई?, किंनामासि?, किमत्थमत्थागओऽसि?, तओ तेण संलत्तं—अहं सागरतीरमंडणाओ चउडदेसाओ

समागओ, परं कोसलदेसमंडणाए कोसलाए निवासिणो नंदसिट्ठिणो सोमाए भारियाए कुच्छिसमुब्भूओ नंदणाभिहाणो तणओ, कमेण खीणविहवो अत्थोवज्जणत्थं चोडदेसं गओ, तत्थवि अणुवज्जियदविणो दालिद्दोवहुओ अभिमाणनडिओ न गओ सदेसं, तत्थेव परघरेसु कज्जाइं कुणंतो उअरभरणं करेमि। इओ य पयाओ पुराओ गएण वसंतदेवेण केणावि कज्जेण लेहं दाऊण सभवणेऽहं पेसिओ, दंसेहि पसीय तस्स गिहं, जहा लेहं देमि तप्पिउणो सिरिदत्तसिट्ठिणो। तओ कुलंधरोवि चिंतेइ–महदुहियाए एस वरो जुग्गो निब्भग्गाए निब्भग्गसेहरो परदेसिओ कोवि, एयं च परिणिऊण पुणोवि न इत्थ एस एही, जं अहंकारनडिउव्व पलोइज्जइ, न कइयावि ससुरघरसमीवे एरिसो चिट्ठइ। तओ तं भणइ–वच्छ! मह घरमागच्छ, जेण ते जणओ मज्झ परमो मित्तो आसि, तेणावि वुत्तं-ताय! जेण कज्जेणाहमागओ तं पढमं काऊण पच्छा तुम्ह घरे आगमिस्सं, तओ सिट्ठी नियपुरिसं सिक्खविय तेण समं पेसेइ, भद्द! जया एस देइ लेहं, तओ परं मम समीवे आणेयव्वो, तओ तेण सह गओ सो सिरिदत्तगेहं, तं पणमिऊण सव्वसंदेसपुव्वं समप्पिओ लेहो, तेणावि वाइओ। तओ नंदणेण भणिओ सिरिदत्तो, जहा मह जणयमित्तो कुलंधरसिट्ठी इत्थ परिवसइ, तेणेस पुरिसो मह आहवणत्थं सह पेसिओ, ता तस्स मिलिऊण पुणोवि आगमिस्सं तुम्ह पासं। तओ पुरिसेण समं गओ सिट्ठिघरं, तओ पच्छा ण्हाविय अहिणववत्थाणि नियंसाविय विसिट्ठभोयणं भुंजाविय तंबोलं च दाविय सो सिट्ठिणा भणिओ–वच्छ! मह धूयं परिणेसु, सो भणइ–चउडदेसे

अज्जवि मए गंतव्वं, कुलंधरेण भणियं–एयं धूयं परिणाविय नीविं दाऊण तुज्झेव समं पेसिस्सं, तओ पडिवन्नतव्वयणो नंदणो निब्भग्गनामियं धूयं परिणाविओ, अह सिरिदत्तेण सो भणिओ–जइ तुहं इत्थ चिट्ठसि ता अवरं जणं लेहं दाऊण तत्थ पट्ठविस्सं गुरुयं कज्जमत्थि अम्हाणं, नंदणोवि भणइ–ससुरमापुच्छिय तत्थेव गमिस्सं, तओ गंतूण ससुरयं पुच्छइ, ताय! महंतं कज्जं मह अत्थि, तेण हेउणा चउडविसयं पइ मं पेसेह, सिट्ठीवि चिंतइ–मम मणोरहोच्चियं चेव भणियमणेण, तओ सिट्ठिणा भणियं–वच्छ! वच्चेसु नियभारियासहिओ, तुह जुग्गयं भंडयं तत्थेव ठियस्स पट्ठविस्सं, तओ तेण सिरिदत्तस्स कहिओ वुत्तंतो, मह अग्गे कहह कहणिज्जं, तेणावि तस्स समप्पिओ लेहो, निवेइया य संदेसया, तओ सो घित्तूण दइयं संबलमित्तसहाओ इक्कल्लओ चलिओ, कमेण पत्तो उज्जेणिं, तओ चिंतइ–लहुपयाणएहिं बहुभक्खियं संबलं, इत्थी (इ) सह गमणेण न लब्भइ मग्गपारो, ता एयं सुत्तं मुत्तूण वच्चामि सिग्घं वंछियदेसं, तओ सा वुत्ता–पिए! पक्खीणं संबलं तो किं कज्जइ,? जइ परं भिक्खाभमणेण पूरिज्जइ उयरं ता तुमं मए समं भिक्खं भमिहिसि नवत्ति? एवं वुत्ता, तओ तीए संलत्तं–तुह पिट्ठिलग्गाए भिक्खावि मे मह-सवसारिसी, एवं परुप्परं मंतयंता नयरीए बाहिरियाए अणाहपहियसालाए दोवि सुत्ता, अह सो भिक्खाए लज्जंतो तं भारियं तत्थेव सुत्तं मुत्तूण संबलपुट्टलयं च गहिय सणियं २ उट्ठिय अवरमग्गेण पलाणो, अह संजाए पभायसमए सा पियमपिक्खंती इओ तओ तरलतरले विलोयणे खिवंती संबलपुट्टलमपिच्छंती य चिंतइ–नूणं मं

सुत्तूण गओ दइओ, तओ सा हाहारवमुहरमुही अंसुपवाहण्हवियथणकलसजुयला उत्तट्ठहरिणिव दीणवयणा पलविउं लग्गा--एगागिणिं अणाहं, मं अबलं चइय दइय! कत्थ तुमं? । लंघेऊणं नियकुलमज्जायं संपइ गओऽसि ॥१॥ हाहा!! निलज्जसेहर!! तरुणिं निक्करुण! लहडलायण्णं । निब्भरपिम्मं दइयं, चइत्तु दंसेसि कस्स मुहं? ॥२॥ नयजुव्वणलच्छियंगिं, कहंपि जइ कोवि मं बलेणावि । छिवइ तओ किं न हयइ, वयणिज्जमणज्ज!! तुज्झ कुले? ॥ ३ ॥ अहवा किमेएण परिदेविएण? न छुट्टिज्जए पुव्वकयकम्मुणो, तहावि करेमि किंपि उवायं, जहा जीवियाओऽवि अब्भहियं सीलं सुदिढहियया होऊण रक्खेमि दुस्सीलेहिंतो, ता वच्चामि पिउहरं, अहवा तत्थ गयाए न मज्झ गउरवं, तो इत्थेव धणियं धम्मधणियं कमवि वणियं जणयं काऊण तस्स घरे निरवज्जाणि कज्जाणि कुणमाणी अत्तणो निव्वाहं करेमि त्ति धीरत्तमवलंबिय बाला उज्जेणीए पुरिए पविसिय समंतओ दिसाओ पिक्खंती एगं महापुरिसं वणियं पलोएइ, तच्चलणेसु निवडिऊण सकरुणसरं वज्जरइ--ताय! मज्झ अणाहाए तुज्झ चेव चरणा सरणं, सच्छंदा हि इत्थी खलेहिं खिंसिज्जइ, जओ--बालत्तणंमि जणओ, जुव्वणपत्ताइ होइ भत्तारो । वुड्ढत्तणेण पुत्तो, सच्छंदत्तं न नारीणं ॥ १ ॥ तओ तेण माणिभद्दसिट्ठिणा सा पुट्ठा--वच्छे! काऽसि तुमं? सावि साहइ--ताय! चंपाए नयरीए कुलंधरववहारिणो धूया, वल्लहेण सह चउव्वदेसं पइ पत्थिया सत्थाओ भट्ठा इत्थमागया, अओ परं तुम्हे चेव मे जणया, तओ सिट्ठी तव्वयणामयसित्तुव्व आणंदिओ भणइ--वच्छे! आगच्छह मज्झ घरे

पुत्तिव चिट्ठसु, सत्थाइगवेसणं निवाहं च तुह सवं करिस्सं ति, तेण नियपुरिसा सवत्थ पेसिया, न पत्ता वत्तावि सत्थस्स, तओ तस्स मणे संसओ जाओ, एयाए वयणमवितहं वितहं वा? इय जाणणकए चंपाए कुलंधरसिट्ठिपासे किमवि सिक्खविय पुरिसो पेसिओ, तेणावि तत्थ गंतूण भणिओ सिट्ठी—अहं माणिभद्दसिट्ठिणा तुम्ह पासं पेसिओ, कावि तुम्हधूया अत्थित्ति संबंधं काउं, तओ कुलंधरो साहइ—मह सत्त धूयाओ इत्थेव नयरे परिणीयाओ निय-नियभत्तुणो गेहेसु विलसंतीओ चिट्ठंति, अट्ठमिया पुण संपयं परिणीया पइणा समं चउडदेसे संपत्थिया, अन्ना य कन्ना नत्थि जेण तुम्हेहिं सह संबंधो कीरइ, तओ सो पुरिसो नियनगरमागंतूण सवं सरूवं कहेइ माणिभद्दस्स, सो-विहु विन्नायवुत्तंतो तीए विसेसेण गउरवं करेइ, सावि पइदिणं विणयाइणा गुणेण सपरियणं तमणुरंजइ। जओ—गौरवाय गुणा एव, नतु ज्ञातेयडम्बरः। वानेयं गृह्यते पुष्पमङ्गजस्त्यज्यते मलः ॥ १ ॥ अह माणिभद्देण जिणमयभावियमाणसेण उत्तुंगचंगं काराविय जिणभवणं, तत्थ सा परमगुरुचलणसुस्सूसणपउणी चेइए लिंपणमंडण-संमज्जणाइ सया करेइ, जं जं च दविणजायं भत्तुलयाइकए सिट्ठिणा पावेइ तेण तेण सा जिणभवणे रत्थाइयं कारेइ, तओ विसेसेण तुट्ठो सिट्ठी बहुबहुयरं दविणं वियरेइ, तेण तीए देवस्स छत्तत्तयं कारियं, तं च केरिसं?—माणि-कचक्कजडिउज्जलहेमदंडं, मुत्ताहलावलिपहाणकयावचूलं। चीणंसुएण पडिछन्नुवरिल्लदेसं, चंचंतकंतमणिकंतिविभा-सियासं ॥ १ ॥ तं च जिणोवरि ठावियं, अन्नं च चामरभिंगारालंकाराइ देवस्स देइ, एवं तिहुयणगुरुणो वेयाव-

च्चं कुणमाणी चिट्ठइ, अन्नं च चउव्विहाहारवसणसयणासणाइणा पराए भत्तीए गुरुजणमाराहेइ, साहम्मियवच्छल्लं च करेइ; एवं जिणाणं सुगुरूणं च सुस्सूसणं कुणमाणी सम्पत्तसम्मत्ता सुहंसुहेण कालमइक्कमइ। अन्नया माणिभद्दं सखेयं पिच्छिय भणइ–ताय! किंनिमित्तं चित्ते विसायमुव्वहह?, सो भणइ–पुत्ति! केणावि कारणेण देवारामो फलफुल्लपत्तरमाउलोवि पुव्वंव संपयं सिंचंतोऽवि अहिययरं सुक्कइ, न सस्सिरीओ होइ, अओ मे मणे महई चिन्ता, सा भणइ–ताय! एयंमि अत्थे मा विसायमुव्वहसु, अहं नियसीलमाहप्पेण जाव एयमारामं पुव्वंव फलफुल्लपल्लवसहियं न करेमि ताव चउव्विहाहारमवि न भुंजामि एस मे निच्छओ, तओ सिट्ठिणा वारिज्जंतीवि सासणदेविं मणे धरेऊण जिणचेइयदुवारे उवविट्ठा, तओ तइयरयणीए सासणदेवीए पच्चक्खीहोऊण सा भणिया–वच्छे! मा कुणसु विसायं, अज्जेव पभायसमए पुण नवो होही आरामो तुह सीलपभावनासियपच्चणीयवंतरोवद्दवत्तणेणत्ति कहिऊण जाव सासणदेवया गया सट्ठाणं, ताव विभाया विभावरी, तीएवि एस वुत्तंतो सिट्ठिपुरओ निवेइओ, तओ सोऽवि हरिसुप्फुल्ललोयणो तीइ समं संपत्तो चेइयारामं, सो य केरिसो?–अउव्वउव्विल्लिरपल्लवाउलो, पप्फुल्लफुल्लुक्करसोरभुज्जलो। फलेहि पक्केहि सया मणोहरो, हवेइ नो कस्स जए मणोहरो? ॥ १ ॥ तं च दट्ठूण सिट्ठिणा भणियं–फलिया मे मणोरहा, तं च पंचसद्दनायपुव्वयं समणसंघपरियरिओ सो नेइ नियं भवणं, लोओऽवि तीए सीलमाहप्पचमक्किओ उववूहइ–पिच्छह सुक्कोवि आरामो कहं पुणो सच्छाओ जाओ? ता

जयइ २ जिणसासणं, जत्थ एरिसनरनारिरयणाणि उप्पज्जंति, तओ सा संघं पडिलाभिय पारणं करेइ, अह अन्नया पच्छिमजामिणीए सुत्तविउद्धा नियपुव्ववुत्तंतं सरिऊण चिंतिउं लग्गा—ते धन्ना जे परिणामविरसं आवायमहुरं किंपागफलंव विसयसुहं चइअ अणोरपारसंसारसागरतरिं पव्वज्जं पवन्ना, अहं पुण अउन्ना विसयामिसलुद्धा पत्थमाणावि अलद्धभोगा परं लद्धजिणमयरहस्सावि सामण्णं काउमसमत्था गिहिधम्मं पालयंती विसिट्ठतवोविहाणेसु उज्जमिस्सं, तओ तीए बहुविहेहिं साभिग्गहेहिं तवोकम्मेहिं धम्मसरीरं पोसंतीएवि सरीरमईव सोसियं, तओ अपच्छिममारणंतियसंलेहणं काऊणाणसणं पडिवज्जिय कयपंचपरमिट्ठिसंभरणा सा मरिऊण सोहम्मे कप्पे पत्ता देवत्तणं, तत्थ दिव्वाइं भोगसुहाइं भुंजिय तओ चइऊण अग्गिसम्ममाहणस्स गिहे दुहिया विज्जुपहनामिया तुमं समुप्पन्ना, बालत्तणे किंचि दुक्खिया जाया, माणिभद्दसिट्ठीवि देवत्तणमणुहविय मणुजम्मं पाविय तओ नागकुमारेसु सुरो जाओ, जं च तए मिच्छत्तिणो पिउणो गिहे ठियाए कुदंसणमोहियाए किंचि पावमणुट्ठियं तेण पढमं दुक्खिया जाया, पच्छा माणिभद्दगिहट्ठियाए जं देवगुरुवेयावच्चं कयं, तस्स पुण्णस्साणुभावेण अणन्नसामन्नं सुहमणुपत्तं, जं च तए तया जिणमंदिरारामो सच्छाओ कओ, तेण तुह सह आरामो वच्चइ, जं च छत्तत्तयमउडाइआभरणाइं दिन्नाइं सव्वन्नुणो, तेण सव्वंगभूसिया सियायवत्तच्छायाए हिंडसि, जं च जिणहरे रत्थाइं दिन्नाइं, तेण तुज्झ बहूणि भोगंगाणि जायाणि, किंच—एयस्स जिणगुरुवेयावच्चकरणोवज्जियसुकय-

रुक्खस्स फलेण तुमं देवसुहाणि अणुहविऊण माणुस्सए भवे रज्जसिरिं भुंजिऊण कमेण सिवसंपयं पाविहिसि। एवं नाणिवयणमायन्निऊणारामसोहा मुच्छानिमीलियच्छी पवणाइणा परियणेण समुप्पाइयचेयणा उट्ठिऊण गुरुं पणमिय विन्नवेइ–जं भयवंतेहिं आइट्ठं तं सव्वं जाइसरणेण मह पच्चक्खं जायं, अओ मज्झं संसारवासाओ उव्विग्गं चित्तं संपयं पियमापुच्छिऊण तुम्ह पयमूले पव्वज्जं पडिवज्जिस्सं, इय आरामसोहाए वयणं सुणिय राया भणइ–पिए! मा उस्सुका, अहमवि अवंतभवुव्विग्गमणो मल्लसुंदरकुमारं रज्जे ठविय तए सह पव्वज्जं गहिस्सामि, तओ गुरुं नमिऊण राया देवीसहिओ गिहमागंतूण तणयं रज्जे अहिसिंचिऊण कयजिणसासणप्पभावणो देवीए सद्धिं महाविभूइए गुरुपायमूले पव्वज्जं पडिवज्जिय गहियदुविहसिक्खो कमेण गीयत्थो हुत्था, तओ सूरीहिं सो रायरिसी गणहरपए आरामसोहा य पवत्तिणिपए संठावियाइं, तओ दोवि बहूणि दिणाणि भवजणे पडि-बोहिऊण पज्जंते कयाणसणा गया सग्गं, तओ चविउं माणुसे भवे सव्वविरइं लहिऊण कयसयलकम्मक्खया सिवं पयं पाविस्संति–आरामसोहाइ चरित्तमेयं, निसामिऊणं सवणामियाभं। कुणेह देवाण गुरूण वेया–वच्चं सया जेण लहेह मुक्खं ॥ १ ॥ जिनगुरुवैयावृत्त्यरूपतृतीयलिङ्गे आरामशोभाकथा। इति रुद्रपल्लीयगच्छगगनमण्डनदि-नकरश्रीगुणशेखरसूरिपट्टावतंसश्रीसङ्घतिलकसूरिविरचितायां सम्यक्त्वसप्ततिकावृत्तौ तत्त्वकौमुदीनाम्न्यां सम्यक्त्व-लिङ्गत्रयस्वरूपनिरूपणो नाम द्वितीयोऽधिकारः समाप्तः ॥

द्वितीयं लिङ्गद्वारमुक्त्वा तृतीयं विनयद्वारमाह—

अरहंत सिद्ध चेइय सुए य धम्मे य साहुवग्गे य। आयरिय उवज्झाए, पवयणे दंसणे विणओ॥१७॥

व्याख्या—अत्र विभक्तिलोपादर्हत्सु सिद्धेषु चैत्येषु श्रुते धर्म्मे साधुवर्गे आचार्येषूपाध्यायेषु प्रवचने दर्शने विनयो दशप्रकारो भवति, चकाराः समुच्चयार्थाः, विनय इति कोऽर्थः? विनीयते ऽपनीयते विलीयते वा ज्ञानावरणाद्यष्टविधं कर्म येन स विनय इत्यागमिकी व्युत्पत्तिः, यतः—जम्हा विणयइ कम्मं, अट्ठविहं चाउरंतमुक्खाय। तम्हा उ वयंति विऊ, विणओत्ति विलीणसंसारा ॥ १ ॥ स च दर्शनज्ञानचारित्रतपऔपचारिकभेदात्पञ्चधा, उक्तञ्च—दंसणनाणचरित्ते, तवे य तह ओवयारिए चेव। मुक्खत्थमेस विणओ, पंचविहो होइ नायव्वो ॥ १ ॥ दव्वाइ सद्दहंते, नाणेण कुणंतयंमि कज्जाइं। चरणं तवं च सम्मं, कुणमाणे होइ तव्विणओ ॥२॥ अह ओवयारिओ पुण, दुविहो विणओ समासओ होइ। पडिरूवजोगजुंजण, तह य अणासायणा विणओ ॥ ३ ॥ पडिरूवो खलु विणओ, काइयजोगे य वायमाणसिओ। अट्ठ चउव्विह दुविहो, परूवणा तस्सिमा होइ ॥४॥ अब्भुट्ठाणं अंजलि आसणदाणं अभिग्गह किई यं। सुस्सूसणं अणुगच्छणं संसाहणं कायअट्ठविहो ॥ ५ ॥ हियमियअफरुसवाई, अणुवाईभासि वाईओ विणओ। अकुसलमणोनिरोहो, कुसलमणोदीरणं चेव ॥ ६ ॥ पडिरूवो खलु विणओ, पराणुवित्तिमइओ मुणेयव्वो। अप्पडिरूवो विणओ, नायव्वो केवलीणं तु ॥ ७ ॥ एसो भे(तुभ्यम्)

परिकहिओ, विणओ पडिवत्तिलक्खणो तिविहो । बावन्नविहिविहाणं, विंति अणासायणाविणयं ॥ ८ ॥ तित्थयरसिद्धकुलगणसंघकिरियधम्मनाणनाणीणं । आयरियथेरउज्झायगणीणं तेरस पयाइं ॥ ९ ॥ असणासणाइ भत्ती, बहुमाणो तहय वण्णसंजलणा । तित्थयराई तेरस, चउग्गुणा हुंति बावन्ना ॥ १० ॥" एवंविधो विनयः सर्वगुणमूलत्वेन प्रावचनिकैर्घुष्यते, यदुक्तम्—विणओ सासणे मूलं, विणीओ संजओ भवे । विणयाओ विप्पमुक्कस्स, कओ धम्मो कओ तवो? ॥ १ ॥ यद्यप्येवं प्रवचने विनयभेदा भूयांसः प्रोक्तास्तथाऽप्यत्र ग्रन्थकृता दशैव स्वीकृता इति गाथार्थः ॥ १७ ॥ तत्स्वरूपं चाग्रेतनगाथात्रयेणाह—

अरिहंता विहरंता, सिद्धा कम्मक्खया सिवं पत्ता । पडिमाओ चेइयाइं, सुयंति सामाइयाईयं ॥ १८ ॥
धम्मो चरित्तधम्मो, आहारो तस्स साहुवग्गत्ति । आयरियउवज्झाया, विसेसगुणसंगया तत्थ ॥ १९ ॥
पवयणमसेससंघो दंसणमिच्छंति इत्थ सम्मत्तं । विणओ दसण्हमेसिं, कायव्वो होइ एवं तु ॥ २० ॥

व्याख्या—अरिहन्तत्ति, अर्हन्ति सुरासुरादिकृतां पूजामित्यर्हन्तः, यदागमः—अरिहंति वंदणनमंसणाणि अरिहंति पूयसक्कारं । सिद्धिगमणं च अरिहा, अरिहंता तेण वुच्चंति ॥ १ ॥ अत्रार्हच्छब्देन के उपादीयन्त इत्याह—'विहरंतत्ति' विहरन्तः सम्प्रतिकाले विहरमाणा उत्कृष्टजघन्यभेदात् श्रीसीमन्धरस्वामिप्र-

व्याख्या—'मणत्ति' (इत्यादि) मनोवाक्कायानां शुद्धिः सम्यक्त्वशोधनी भवतीति सम्बन्धः, तत्र-तेष्वादौ मनःशुद्धिस्वरूपमुत्तरार्धेनाह—'मणसुद्धित्ति' जिना-वीतरागा जिनमतम्-अर्हत्प्रणीतं सकलभावाविर्भावकं द्वादशाङ्गीरूपं शास्त्रं, तत्र हि ये भावाः प्रोक्ताः सन्ति ते स्थूलदृग्भिः कथं ज्ञायन्ते भाष्यन्ते च ?, यतः—जीवाण गई कम्माण परिणई पुग्गलाण परिणामो। मुत्तूण जिणं अह जिणमयं च को साहिउं तरइ ? ॥ १ ॥ अतस्तद्वर्जं-ताभ्यामृतेऽन्यं सर्वं लोकं-परतीर्थिकशासनमसारं-फल्गु वल्गुताप्रायं मनुते-जानाति यस्तस्य मनःशुद्धिर्भवति इति गाथार्थः ॥ २५ ॥ भावार्थस्तु नरवर्मनृपदृष्टान्तेन कथ्यते, तथाहि—

अनुक्रमद्विगुणद्विगुणविततसङ्ख्यातीतद्वीपसमुद्रमध्यस्थलक्षयोजनायामवर्षवर्षधराभिरामश्रीस्तूपजम्बूद्वीपदक्षिणप्रान्तनवतिशतभागमानविस्तरभरतक्षेत्रतन्मध्यखण्डमण्डनायमाना धनकनकमण्यादिवस्त्वमाना स्वश्रीविजितभोगावती "विजयवती" नाम नगरी—सौधशुद्धप्रभामिश्रा, यत्राश्वास्तन्वते रवेः । मध्याह्नेऽर्जुनताक्ष्र्याणां, विभ्रमं सारथेरपि ॥ १ ॥ तत्र वैरिवारणवारनिवारणवारणारिसङ्काशः सुरतरुरिव समाकृष्टकोदण्डदण्डवच्च मार्गणधोरणीपूरिताशः परिशीलितसद्धर्मकर्म्मा "नरवर्मा" नाम राजा राज्यं पालयति स्म। यस्य च लावण्यापहसितसुरसुन्दरी "रतिसुन्दरी" नाम प्राणेश्वरी। तयोरुपयाचितशतप्रीणितदैवतदत्तो "हरिदत्तो" नाम तनुभूरभूत्-यस्याव-

दम्भमासाद्य, कूर्मवन्मुदितो नृपः। सुदुर्द्धरं धराभारं, बभार किल हेलया ॥ १ ॥ तस्य महीमहेन्द्रस्यो-
पायज्ञा विज्ञाः सुनया विनीतविनयाश्चातुर्यतर्जिततुर्यग्रहाग्रगग्रहाः सर्वजनसुखावहा निरवद्यविद्या मतिसाग-
राद्या महामात्या अजायन्त। तेषु विन्यस्तराज्यभारः सुरेश्वर इवाभङ्गुरतरभोगानुपभुञ्जते स्म। अन्यदा विदग्ध-
जनदत्तमुदि राजसंसदि नृपे नृपासनोपविष्टे शिष्टजनजनितप्रमोदसंवादाः परस्परं सञ्जज्ञिरे तेषां मन्त्रिणां
धर्मवादाः—तेष्वेको मुखरमुख्यस्तत्संमुखमभाषत—भो भो दक्षदाक्षिण्यवदान्यताशौण्डीर्यधैर्यपरोपकारव्यापा-
रकरणदेशलोकाचारापरिहाररूप एव धर्मो नापरः कश्चिद्विपश्चिद्भिराद्रियते। ततोऽन्यो ज्ञंमन्यः प्रज्ञमवान्-वेद-
निवेदितपवित्राग्निहोत्रसच्चरित्र एव धर्म्मः। अथापरः पामरनरसोदरतरमतिप्रसरो गिरमुच्चचार—स्ववंशावतंसपूर्व-
पुरुषपरम्परायाताचारव्यापार एव धर्म्मः। तत इतरो मिथ्याजल्पनाविकल्पितधिषणो जजल्प नास्तिकः—वस्तु
हि प्रमाणितमेव प्रमाणयन्ति प्रमाणप्रवीणाः, धर्म्माधर्म्मौ हि प्रत्यक्षविपक्षत्वेनानुपलक्ष्यौ न दक्षमुख्यैः कक्षी-
क्रियेते, अतस्तौ पुष्करारविन्दबन्धुरबन्धुतामादधाते। इति बहलवाचालकोलाहलमुत्तालवातूलान्दोलिततूलजाल-
लीलाप्रायमालापमाकलय्य क्षितिपतिश्चेतसि चिन्तयामास—यदेकेन दाक्षिण्यशौण्डीर्यस्थूललक्षतादिको धर्म्मः
प्रोक्तः, स पौरुषोत्कर्ष एव न धर्म्मः, अपरेण च यज्ञ्यवेदि 'वेदोक्तो यज्ञादिकः' सोऽपि नृशंसहिंसोपदेश-
मलीमसो न धर्मतया स्वीकरणयोग्यः, इतरेण च विदुरमानिना प्रणीतः कुलक्रमागत एव धर्मः, सोऽपि

विचारचतुरैर्विचार्यमाणो न चारिमाणमश्नुते, यच्च निःशूकसूनाधनादिभिः प्राणिगणविशसनजातमहापातकपाथोधिमध्यमग्नैर्दुरात्मभिरप्यसाकमयं कुलधर्म इत्यभ्युपगम्यते, सोऽपि न प्रमाणकोटिसण्टङ्कमाटीकते, यत्तु लौकायतिको लोप इव सर्वापहारी वावदूक इव स्वैरालापी वावदीति तदपि न चारु, सुखदुःखभोगवतो जगतोऽवलोकनात्, तच्च निष्कारणं न सम्भोभवीति, अतस्तस्य धर्माधर्मावेव कारणम् । इत्येवं संशयशतदोलान्दोलनं दधानस्य वसुधापतेरुरःस्थलविलुलन्मुक्ताहारः प्रतीहारः समेत्य प्रह्वशिरा व्यजिज्ञपत्—देव! भवतामाशैशवमित्रं मदनदत्तनामा श्रेष्ठी सिंहद्वारे महाराजपादान् दिदृक्षुस्तिष्ठति । ततः क्षितिपतिस्तमभाषत– शीघ्रं प्रवेशय परममित्रमस्माकं, येन चेतः परमप्रीतिस्फीतिमातनोति । तेनापि सादरं प्रवेशितो, विशांपत्या सस्नेहमालिङ्ग्य कृतप्रणामः प्रधानमासनमुपवेश्यापृच्छ्यत—परमवयस्य! त्वमेतावन्तमनेहसं क्व क्वावास्थिथाः? केषु केषु देशेष्वभ्राम्यः? किं किं च धनमार्जयः?। ततः स नम्रमौलिरिलापालं प्रत्यालपत्—देव! बहुषु मण्डलेषु ससम्भ्रमम् भ्राम्यं, विविधान्याश्चर्याण्यद्राक्षं, भूरि भूरि च समुपार्जयम् । अन्यच्च—गुणाभिरामं सद्वृत्तभावजातद्युतिप्रथम् । त्वद्यशःकणवत्तारं, हारं प्रापममुं प्रभो! ॥ १ ॥ तद्वचो निशम्य विशामीशः पुनरशंसत्—ब्रूहि मित्रैकावलिहारप्राप्तिस्वरूपमामूलचूलतः, अत्रार्थे अस्माकं मनसि महत्कौतुकम् । ततः सोऽपि वक्तुमारेभे—देवाहमितः पुरान्निसृतः क्षितिमण्डलमवलोकयन् द्रुपदिकाभिधायामटव्यामटाट्यमानो दिनयौवने तृष्णाशोषितगलताडुपुट

उभयथापि जीवनार्थी हिमांशुमिव शीतलेश्यं शेषाहिमिव क्षमाधारं सागरमिव गम्भीरं शशिनमिव सदपिपरिषन्निषेव्यं नाकिनायकमिव विविधविबुधाराधितपादारविन्दद्वन्द्वं घनाघनमिव पीयूषयूषसधुपोपदेशवृष्ट्या विवेकिजनमनोवनीं सिञ्चन्तं श्रीगुणधरनामानं सूरिमपश्यम्। तत्र च सदेवीकं देवमेकं स्फारतारतरहारालङ्कृतगलकन्दलं सर्वाङ्गीणाभरणविभ्राजमानमपश्यं, तदाऽहमपि भगवद्वचोऽमृतपानतो द्विधापि विलीनतृष्णो मुनिवृन्दारकपादारविन्दमभिवन्द्य यावदुपाविक्षं, तावत्स सुरः पुनः पुनर्मां परमप्रेम्णा प्रेक्षमाणः सूरिमप्राक्षीत्–भगवन्! ममास्मिन् पुंसि परमबन्धाविव निरुपचरिता प्रीतिः केन हेतुना स्फातिं याति?। गुरवोऽपि दशनद्युत्योद्योतयन्तो दिग्मुखमभाषन्त–त्रिदशपुङ्गव! सावधानीभूय श्रूयतां श्रुतिसुखकरं स्वरूपमिदम्, तथाहि—अस्ति स्वस्तिकणशिम्बा कोशाम्बी नाम नगरी, तत्र शत्रुकृतविजयो विजयो नाम राजा, तस्याश्विनीकुमाराविव विजयवैजयन्ताभिधौ तनयौ, तयोर्दैवयोगाच्छैशवेऽपि कीनाशपाशवर्तिनी अजनि जननी, ततो धात्र्या लाल्यमानौ विज्ञातसकलकलाकलापौ तौ क्रमेण कुसुमशरकुञ्जरक्रीडावनं यौवनं प्रापतुतां, ततस्तयोरौदार्यधैर्यशौर्यादिगुणरञ्जितं यौवराज्याभिषेकोन्मुखं राजानं विज्ञाय मत्सरविच्छुरितान्तरा सपत्नीमाता क्रीडोद्याने क्रीडतोर्विजयवैजयन्तयोरन्तकृते विषमविषभावितमोदकान् प्रेषयामास, ताभ्यां च सरलाशयाभ्यां त एव मोदका बुभुजिरे, ततो बहलगरलव्यापमूर्च्छितौ नीलमणिघटितपुत्रकाविव ताविलापीठे लुलुठतुः। तत्र चाशोकतरोर्मूले तद्बन्धुरिव निरुपचरितोपकृतिपरप्रकृतिः पीनध्यानसमा-

धानसावधानमानसो गरुडोपपाताध्ययनं गुणयन् मासक्षपणी दिवाकरनामा महर्षिरास्ते स्म। ततो जातासनप्रकम्पः सम्पासम्पातपीतः पक्षतिस्फीतद्युतिद्योतितदिग्मण्डलो वैनतेयः समेत्य तं यतिपतिमभिनत्य विरचिताञ्जलिकुड्मलः पुरस्तादुपाविक्षत् । तन्निरतिशयातिशयात्तयोर्नृपसुतयोः शरीरात्खरकरप्रसरनिरस्तान्धकारनिकर इव गरविकारो दूरमपासरत् । गरुडोऽप्येकतानमना महात्मना गुण्यमानं गरुडोपपाताध्ययनं शृणोति स्म । ततो विध्वस्तसमस्तविषावेगौ वेगादुत्थाय राजसुतौ सञ्जाताश्चर्यौ मुनिसमीपमागत्य यावत्तस्थतुः, तावत्पक्षिस्वामिनाऽऽचचक्षे–भो राजनन्दनौ ! यद्येष महर्षिरत्र नाभविष्यत् तदा भवन्तौ विमातृदत्तगरौ व्यपरोत्स्येतां, अत एनमेव सम्यक् सेवेतामित्यनुशिष्य शिष्याविव मुनिमभिनम्य स्वयं विनतासुतः स्वास्पदमाससाद। अथ तौ विमातुस्तद्वैशसं विशसनान्तं विज्ञौ विज्ञाय सज्ज्ञानज्ञा(जा)तसम्यग्दर्शनौ संसारापारकान्तारसंसरणरीणौ समुल्लसद्वैराग्योदयौ दिवाकरमहर्षिपादमूले प्रव्रज्य चिरतरं दुश्चरतपश्चरणमाचर्य विशुद्धाध्यवसायौ विपद्य प्रथमदेवलोके विद्युत्प्रभविद्युत्सुन्दरनामानौ विमानवासिनावभूतां, ततो विद्युत्प्रभः सुरसौख्यान्यनुभूय च्युतो विजयवत्यां पुर्यां मदनवर्मनृपस्य परमसुहृन्मदनदत्तो बभूव, स चायं धनार्जनाय परिभ्राम्यन्नत्राजगाम, अत एतद्दर्शनादेव तव पूर्वभवाभ्यासवशादासीदसीमः प्रमोदः। सोऽपि वैमानिकः सूरिमुखारविन्दादेतदाकर्ण्य मुदितमना एनं हारं मम कण्ठपीठे स्वयं चिक्षेप, तदनु स सुरः प्रह्वशिराः सूरिं प्रत्यभाणीत्,–भगवन् ! ममाधुना किमिति निद्रा विमुद्रयति नेत्रे ? किमिति निष्प्रकम्पोऽपि कम्पते

कल्पवृक्षः ? किमित्यरजोऽम्बराण्यम्बराणि रजसा रज्यन्ते, तत्प्रसद्य सद्यो वद मदग्रतः, ततो वाचंयमोऽपि तं प्रत्युवाच—सुरपुङ्गव ! समासन्नस्तव च्यवनावसरः, सुरोऽपि व्याकरोत्—नाथ ! क्वोत्पत्तिर्मे भवित्री ?, कथं वा मम बोधिबीजलाभः ? अत एव तदपि दमीश्वर ! वद मन्मनस्तुष्टिपुष्टये, ऋषिवरोऽपि व्याजहार—अमरोत्तम ! इतो देवभवाद्दैवीं तनुं त्यक्त्वा श्रीनरवर्म्मनृपतेर्हरिदत्ताभिधानस्तनयो भविष्यसि, ततोऽस्यैव हारस्य दर्शनात्तव बोधः सम्पत्स्यते न संशय इति विगतद्वापरः स सुरः सूरिमानम्य स्वर्गं जगाम । ततस्तु महाराज ! क्षितितलमिलन्मौलिना मयाऽमुष्यहारस्योत्पत्तिव्यतिकरं परिपृष्टो मुनिप्रष्ठो व्याचष्टे—पुरा प्रपञ्चितश्रीप्रपञ्चायां श्रीअमरचञ्चायां महानगर्यां सागरोपमैकपरमायुरसुराधीश्वरश्चमरेन्द्रः समुदपद्यत, स सकलान्युत्पत्तिकृत्यानि कृत्वा लोकपालानीकाधिपतित्रायस्त्रिंशसचिवात्मरक्षप्रमुखपरिकरपरिकरितः स्वसभायां सिंहवत्सिंहासनमलञ्चकार, तदोर्द्धमवलोकयन् स्वशीर्षोपरि सिंहासनासीनं स सौधर्माधीश्वरं निरीक्ष्य सम्भवदमर्षप्रकर्षोऽसमानविग्रहतया परिकरेण निवार्यमाणोऽपि मानी युयुत्सया प्रथमकल्पं सोऽल्पधीर्जगाम, ततस्तद्भयभ्रान्ते त्रिदशदेवाङ्गनावर्गे कोपाटोपान्धकारितवक्त्रेण वज्रिणा वज्रे तस्योपरि मुक्ते तद्भिया चाधोमुखे चमरे पलायमाने तद्गलकन्दलादयं हारो धरायामाप तदितो द्वीपादसङ्ख्याततमे द्वीपे । स च विधिनियोगाद्विद्युत्प्रभद्युसदा मत्पूर्वभवभ्रात्रा प्रापे । तेनाप्ययं मह्यं प्रीत्या प्रददे । इत्यहं ज्ञातहारवृत्तान्तो गुरुं प्रणत्य पञ्चविंशतिवर्षाणि यावद्भूरि भूरि समुपार्ज्य नृवर्य ! त्वदन्तिकमागमं, स्वामिन् ! स च सुरस्त्वदङ्ग-

भूरभून्नवेतिनिर्णयो विधीयताम्, राजा स्माह—यद्येवं तर्हि वयस्य ! रहस्यमिव तं हारं प्रदर्श्य हरिदत्तकुमाराय, ततस्तं क्षितिपतिसुतं सभायामाहूय हारमदीदृशत्, सोऽपि तदवलोकनात्प्रादुर्भूतजातिस्मृतिः साद्यन्तं पूर्वभवस्वरूपं मदनदत्तोक्तानुवादमिव नृपपुरो व्याजहार, तदाकर्णनानन्तरमेव राजाऽपि नरकुञ्जरः पूर्वं विवादास्पदीकृतप्रभूतपण्डितजल्पकल्पितधर्म्मविवादच्छेदसानन्दः परमार्थतयाऽऽर्हतमेव धर्म्मं स्वर्गापवर्ग्गमार्गप्रकाशनप्रदीपप्रायं चेतसि परिभावयन् यावदभूत्, तावदप्रतर्कितमेवोद्यानपालः समेत्य प्राञ्जलिर्नृपं विज्ञप्तवान्–देव ! अद्य यथार्थनामनि पुष्पावतंसके भवदुद्याने विनयावनतविनेयपरिचर्यमाणचरणसरसीरुहः सुरासुरनमस्कृतश्चतुर्ज्ञानी श्रीगुणन्धरसूरिः समवासरत्, इति निशम्य विशामीशोऽपि तस्मै पारितोषिकं दत्त्वा राजकुञ्जरमारुह्य मित्रपुत्रकलत्रमन्त्रिप्रभृतिपरिवृतिपरिवृतस्तमाराममागत्य गजराजादुत्तीर्य गुरुपादानभिवन्द्य च यथोचितस्थानमुपविष्टो धर्मदेशनामिमामशृणोत्–उच्छेद्य-

मिथ्यात्वमहत्त्वमुच्चैरासाद्य सद्यो जिनमार्ग्गतत्त्वम् । स्वर्ग्गापवर्गाद्भुतशर्मदायि, सम्यक्त्वमेवाद्रियतां त्रिशुद्ध्या ॥ १ ॥

श्रीवीतरागेष्विह देवबुद्धिर्निःसङ्गचङ्गे गुरुधीर्गुरौ च । सम्यक्त्वमेतद्वृषधीश्च धर्मे, मिथ्यात्वमेतद्विपरीतमेव ॥ २ ॥

सम्यक्त्वनूत्नामररत्नमेतदाराधयन्ते विशदाशया ये, । दौर्गत्यदोषो हि भियेव तेषामस्पृश्यवन्न स्पृशतीह देहम् ॥ ३ ॥

अन्तर्मुहूर्त्तमपि ये समुपासतेऽदः, सम्यक्त्वमौपशमिकादिकमादरेण । तेऽपार्द्धपुद्गलमलं न विलङ्घयन्ति, तन्मध्य एव च शिवश्रियमाश्रयन्ते ॥ ४ ॥ इति गुरोर्मुखादमृतश्रावदेशीयां देशनामापीयावनीजानिस्तनयसहितः सम्यक्त्वपूर्वं

श्रावकधर्म्ममङ्गीकृत्य सूरीश्वरांश्च प्रणिपत्य स्वप्रासादमाससाद । ततः श्रीजिनशासनप्रभावनप्रवणो धरणीरमणो विशुद्धतरं धर्म्ममाराध । अन्यदा सुधर्म्मायां सभायां शक्रसिंहासनासीनो विमानवासिसेवितपदद्वयः सौधर्म्माधीश्वरो धर्म्मपक्षपाती सर्वसुपर्वसमक्षं नरवर्मनृपतेर्मनसाऽपि सुरासुरैरचालनीयं सम्यक्त्वमुपश्लोकितवान् । ततस्तद्वचःकशाप्रहारतः शूकलाश्व इव सुवेगनामा देव उत्प्लुत्य पर्षत्प्रत्यक्षमङ्गुलीमुद्यम्य तन्नियमभङ्गकृतप्रतिज्ञो वैक्रियादिलब्धिदुर्मदो मङ्क्षु महीतलमवातरत् । तस्मिंश्च समये स राजपाटिकायाः प्रतिनिवृत्ताय नरवर्मनृपाय यतिजनमाबालगोपालाङ्गनाविगर्हितं नरकपातुकपातकव्यापारसंसेवनप्रवणं तत्सम्यक्त्वनिश्चलत्वविलोपायादीदृशत् । राजाऽपि तमसाध्वाचारमनगारवारमालोकयन्नपि मनसा मनागपि न विपरिणतिमाप, केवलमिति चाचिन्तयत्—कषादिशुद्धसुवर्णमिव श्रीजिनशासनं सदोषतां कदाचनापि न श्रयति, किन्तु गुरुकर्मत्वाद्विशुद्धेऽपि सितवाससीवार्हन्मते मालिन्यमुपजनयन्ति दुर्वृत्ताः, अतो मया सर्वप्रयत्नेन शासनमालिन्यापोहाय प्रयतनीयमिति विमृश्य सुधाकिरा गिरा नरवरो दुर्व्यापारात्तान् न्यवारयत् । अथ सुवेगसुरोऽपि तच्छिक्षावैचक्षण्येन सम्यग्दर्शनाचालनीयत्वेन सत्यीभूतपुरुहूताकूतत्वेन च रञ्जितः प्रकटीभूय श्रीनरवर्मनृपमुपशुश्लोक—राजंस्त्वमेव धन्योऽसि, यथार्थां यस्य वासवः । स्वयं हि कुरुते श्लाघां, सम्यक्त्वस्वान्तशुद्धिजाम् ॥ १ ॥ इति निवेद्य स्वशीर्षान्मुकुटमुत्सार्य नृपवर्याय वितीर्य च मागध इव वर्णनामुखरमुखो बर्हिर्मुखो दिवमाससाद । ततःप्रभृति विशिष्य नरवर्मराट् सम्यक्त्वमूलं गृहमेधिधर्म्मं चिरतरमासेव्य

तनयादिसमेतः प्रव्रज्य सुगतिपथपान्थीभूय क्रमेण मुक्तिपुरीसाम्राज्यप्राज्यसुखान्यनुभविष्यति–एवं श्रीनरवर्म्मणो नरपतेः पुण्यैकभास्वन्मतेर्वृत्तान्तं श्रुतिशुक्तिसम्पुटतटीमुक्ताफलीकृत्य भोः। सम्यक्त्वे मनसो विशुद्धिमनघामासूत्रयध्वं मुदा, येन स्याच्छिवसुन्दरीकुचतटक्रोडे निवासस्थितिः ॥ १ ॥ मनःशुद्धौ नरवर्मकथा । प्रथमां मनःशुद्धिमुक्त्वा द्वितीयां वचनशुद्धिमाह—

तित्थंकरचलणाराहणेण जं मज्झ सिज्झइ न कज्जं। पत्थेमि तत्थ नन्नं देवविसेसेहिं वयसुद्धी ॥ २६ ॥

व्याख्या—यन्मम तीर्थङ्करचरणाराधनेन–जिनपदसेवनेन, अर्थापत्त्या मनोऽभीष्टोऽर्थो न सिद्ध्यति–न परिपूर्णीभवति, 'तत्र' तस्मिन् प्रयोजने 'अन्यं' देवान्तरं न प्रार्थये–न स्तुतिरूपेण याचे, कैरित्याह—देवविशेषैः–हरिहरविरञ्चिस्कन्दादिभिः, इतरसुरवर्णने सम्यक्त्वमालिन्यं अतस्तीर्थकृत्प्रार्थनमेव करोमीति वचःशुद्धिरिति गाथार्थः ॥ २६ ॥ भावार्थस्तु धनपालपण्डितदृष्टान्ताज्ज्ञेयः, सचायम्—

मालवमण्डलविलयाविसालभालयलतिलयसरिसत्थि, उज्जेणी। वरनयरी, सुरवरनयरीव सारसिरी ॥ १ ॥ जीइ जिणभवणउत्तुंगचंगसिंगग्गलग्गउडुनिवहा । फलिहमणिकलसलीलं, कलयंति निसाइ सयकालं ॥ २ ॥ तत्थ समत्थिमविब्भमपम(मि)लियबलिरायजायजसपसरो । सिरिभोयरायराया, पुरिसुत्तमसत्तमो हुत्था ॥ ३ ॥ नूणं सरस्सईए, तहा सिरीएवि उत्तमो नाउं। जो गयवयराहि कओ, अहियारी निययवावारे ॥ ४ ॥ तस्सासि वेय-

वेई, छक्कम्मपरो परोवयारकई । विउससहपत्तलीहो, दीहगुणो सोमचंददिओ ॥ ५ ॥ सोमसिरी से भज्जा, निरवज्जा वज्जिभज्जसमरूवा । जुण्हुव्व जीइ वयणं, आणंदइ तिहुयणं सयलं ॥ ६ ॥ तक्कुच्छिसरसिहंसीवंसवयंसा गुणाण आवासा । दो तणया बुहपणया, संजाया जायरूवपहा ॥ ७ ॥ पढमो सिरिधणपालो; बालुव्व विभाइ जस्स मइपुरओ । विंदारयवरसचिवुत्तमोऽवि स बुहप्पई नूणं ॥ ८ ॥ बीओ सोहणनामा, जस्स कवित्तं वि-चित्तयं सुणिउं । केहि न विम्हियहियएहिँ पंडिएहिं सिरं धुणियं ॥ ९ ॥ बहुपरियणपरियरिया, अखंडपंडिच्चद-प्पदुप्पिच्छा । सिरिभोयरायरायंगणस्स मुहमंडणं जाया ॥ १० ॥ अह मज्झदेसपरिभूसणाइ वाणारसीइ नय-रीए । गोयमगुत्ता पुत्ता, दियस्स दो कण्हगुत्तस्स ॥ ११ ॥ पढमो सिरिहरनामो, अट्ठारसविज्जठाणपारीणो । बीओऽवि अबीयगुणो, सिरिवइनामा सिरिव्व ॥ १२ ॥ दोवि हु सहोयरा ते, निउणा बम्भन्नएसु कम्मेसु । नय-गुव्व परमपिम्माणुबंधसंबंधबंधुरया ॥ १३ ॥ सुरसरिसलिलंमि सया, ण्हाणं काऊण विगयदेहमला । पूयंति बहुपयारं, विस्सेसरदेवपयकमलं ॥ १४ ॥ अह अन्नया कयाई, ताणं सोमेसदेवजत्ताए । अहिलासो संजाओ, जाइ-जरामरणहरणकए ॥१५॥ फोडेऊणं खंधे, तत्थ य पज्जलिरदीवए ठविउं । सिरिसोमनाहजत्तं, काउं दो भायरो चलिया ॥१६॥ कालक्कमेण दुलङ्घयंपि उलंघिऊण बहुमग्गं । सिरिवड्ढमाणनयरं, पत्ता गुज्जरधरावलयं ॥ १७ ॥ सोमेसरस्स दंसणसमूसुया जाव तत्थ रयणीए । चिट्ठंति हिट्ठहियया, दीवयपीडं अगणयंता ॥ १८ ॥ ता मज्झरत्तिसमए,

एगं पुरिसं अड्डाकडप्पिहं। असमुद्धूलियकायं, गलकंदलठवियसिरमालं॥१९॥ भालयले चन्दकलं, कलयन्तं लोयणं च जलिरग्गं। वासुगिकंठयसुत्तं, गोरीसोहिल्लअद्धंगं॥ २० ॥ खट्टंगसूलपाणिं, उन्नयवरवसहवाहणारूढं। तणुकंतिधवलियदिसं, पुरओ पिच्छंति ते दोऽवि ॥२१॥ कुलयं। आगारचिट्ठिएहिं, हिट्ठमणा मुणिय तं महादेवं। भूमितलमिलियभाला, पणमंति थुणंति विप्पसुया ॥२२॥ अह साणंदो वज्जरइ, संकरो वच्छया! अहं तुट्ठो। तुम्हाणं पुण जत्ता, इहेव सहलीकया होउ ॥२३॥ जं संसारियलाहं, मणंमि संकप्पिऊण इह पत्ता। तं भणह जेण सुरवरतरुव्व वियरेमि अहिलसियं॥ २४ ॥ तो ते जोडियहत्था, भणंति सामिय! न अम्ह इत्थत्थे। अहिलासो किं पुण देहि झत्ति पसिऊण सिववासं॥ २५ ॥ साहइ सिवोऽवि वच्छा!, इत्थत्थे नत्थि अम्ह सामत्थं। जं दुग्गओ परस्स य, ईसरियं दाउमसमत्थो॥ २६ ॥ जइ तुम्हाणं एसा, इच्छा तो इत्थ अत्थि पुरमज्झे। सिरिवद्धमाणजिणवरसासणमंडणसिरोरयणं॥ २७ ॥ सिरिवद्धमाणसूरी, दूरीकयसयलपावपब्भारो। धरणिंदपणयचरणो, चरणायरणंमि चउरमई॥ २८ ॥ जुयलं,। संपइ सिवजिणसासणमज्झंमि न इत्थ एरिसो पुरिसो। जह तारतारएसुं, नहंतरे भासुरो सूरो॥ २९ ॥ जइ महह सिवपुरसिरिं, हणिउं मणविब्भमं कुणह सययं। सूरिस्स तस्स वयणं, इय भणिय सिवो तिरोहूओ॥ ३० ॥ जाए पभायसमए, सहोयरा दोऽवि वद्धमाणपुरे। परिसिय पुच्छिय पोसहसालं सूरीण संपत्ता॥ ३१॥ तत्थ-तवचरणसोसियतणूहिं सज्झायझाणनिरएहिं। मुणिवरगणेहिँ विहिणा, सेवियपयजुयलसरसिरुहो॥ ३२॥

सिंहासणोवविट्ठो, दिट्ठो हिट्ठेहिँ विगयकट्ठेहिं । सूरुव्व तिव्वतेओ, गणहारि वद्धमाणगुरू ॥ ३३ ॥ जुयलं । हरिसभरपुलइयंगा, खंधा उम्मूलिऊण दीर्हीओ । ते निहसियरयसंजुत्ता, पणमंति गुरूण पयकमलं ॥ ३४ ॥ साहंति सूरिसेहर !, तुह दंसणसहसकिरणउग्गमओ । चिरपरिचियमम्हाणं, महातमं झत्ति परिगलियं ॥ ३५ ॥ ता पसिय भवण्णवओ, दुग्गहकुग्गाहनिवहदुग्गाओ । नियदिक्खपोयमारोविऊण अम्हे नयह पारं ॥ ३६ ॥ सूरीवि भणइ वच्छा ! पच्छा गिण्हेसु अम्ह पव्वज्जं । पढमं जिणमयतत्तं, वीमंसह हिययमज्झम्मि ॥ ३७ ॥ जह जह सुणंति ते दोऽवि जिणमयं तेसिं तह तह खिप्पं (क्खिप्पं) । पलयं गच्छइ विज्ञाठाणरुई पावठाणुव्व ॥३८॥ सिद्धंतामयपाणेण, मिच्छत्तविसेसमंतओ तेसिं । नट्ठे गुरूण पासे, पव्वज्जं दोवि गिण्हंति ॥ ३९ ॥ दिन्नं गुरूहिं नामं, पढमस्स जिणेसरुत्ति विक्खायं । बीयस्स बुद्धिसायर, इय नामं बुहजणप्पयडं ॥४०॥ संगहियदुविहसिक्खा, दिक्खदिणाओ अभिग्गहसविक्खा । निस्सेसागमसायरपारगया दोऽवि ते जाया ॥ ४१ ॥ छत्तीसगुणसमिद्धे, गीयत्थे जाणिऊण ते दोऽवि । सूरिपए संठविया, गुरुहिं दिणयरसमंकुव्व ॥ ४२ ॥ जिणिसरसूरी तह बुद्धिसायरो गणहरो दुवे कइया । सिरिवद्धमाणसूरीहिँ एवमेए समाइट्ठा ॥ ४३ ॥ वच्छा ! गच्छह अणहिल्लपट्टणे संपयं जओ तत्थ । सुविहियजइप्पवेसं, चेइयमुणिणो निवारंति ॥ ४४ ॥ सत्तीए बुद्धीए, सुविहियसाहूण तत्थ य पेवसो । कायव्वो तुम्ह समो, अन्नो नहु अत्थि कोऽवि विऊ ॥ ४५ ॥ सीसे धरिऊण गुरूणमेयमाणं कमेण ते पत्ता । गुज्जरधरावयंसं, अणहिल्लभि-

हाणयं नयरं ॥ ४६ ॥ गीयत्थमुणिसमेया, भमिया पइमंदिरं वसहिहेउं । सा तत्थ नेव पत्ता, गुरूण तो सुमरियं वयणं ॥ ४७ ॥ तत्थ य दुल्लहराओ, राया रायत्त सव्वकलकलिओ । तस्स पुरोहियसारो, सोमेसरनामओ आसि ॥ ४८ ॥ तस्स घरे ते पत्ता, सोऽविहु तणयाण वेयअज्झयणं । कारेमाणो दिट्ठो, सिट्ठो सूरिप्पहाणेहिं ॥ ४९ ॥ सुणु वक्खाणं वेयस्स, एरिसं सारणीइ परिसुद्धं । सोऽवि सुणंतो उप्फुल्ललोयणो विम्हिओ जाओ ॥ ५० ॥ किं बम्हा रूवजुयं, काऊणं अत्तणो इह उइन्नो । इय चिंतंतो विप्पो, पयपउमं वंदई तेसिं ॥ ५१ ॥ सिवसासणस्स जिण–सासणस्स सारक्खरं गहेऊणं । इय आसीसा दिन्ना, सूरीहिँ सकज्जसिद्धिकए ॥ ५२ ॥ अपाणिपादो ह्यमनो ग्रहीता, पश्यत्यचक्षुः स शृणोत्यकर्णः । स वेत्ति विश्वं न हि तस्य वेत्ता, शिवो ह्यरूपी स जिनोऽवताद्वः ॥ ५३ ॥ तो विप्पो ते जंपइ, चिट्ठह गुट्ठी तुमेहि सह होइ । तुम्ह पसाया वेयत्थपारगा हुंति दुसुया मे ॥ ५४ ॥ ठाणा-भावा अम्हे चिट्ठामो कत्थ इत्थ तुह नयरे ? । चेइयवासियमुणिणो, न दिंति सुविहियजणे वसिउं ॥ ५५ ॥ तेणवि सचंदसालाउवरिं ठावित्तु सुद्धअसणेणं । पडिलाहिय मज्झण्हे, परिक्खिया सव्वसत्थेसु ॥ ५६ ॥ तत्तो चेइयवासि-सुहडा तत्थागया भणन्ति इमं । नीसरह नयरमज्झा, चेइयवज्झो न इह ठाइ ॥ ५७ ॥ इय वुत्तंतं सोउं, रण्णो पुरओ पुरोहिओ भणइ । रायावि सयलचेइयवासीणं साहए पुरओ ॥ ५८ ॥ जइ कोऽवि गुणट्ठाणं, इमाण पु-रओ निरूवयं भणिही । तं नियरज्जाओ फुडं, नासेमी सकिमिभसणुव्व ॥ ५९ ॥ रण्णो आएसेणं, वसहिं लहिउं

ठिया चउम्मासिं । तत्तो सुविहियमुणिणो, विहरंति जहिच्छियं तत्थ ॥ ६० ॥ तत्तो जिणिसरसूरी, विहरंतो मालवंमि देसंमि । उज्जेणिपुरिं नियपयपंकयपंतीहिँ भूसेइ ॥ ६१ ॥ तत्थन्नदिणे सिरिसोमचंदनामेण भूमिदेवेण । परमा पीई जाया, मायारहियाण सूरीणं ॥ ६२ ॥ रिउजजुसामअथव्वणपमुहाणं सयलविज्जठाणाणं । विसमपयत्थवियारं, मुणिउं विप्पो थुणइ सीसं ॥ ६३ ॥ अहसंवासवसेणं, नहमंसुवमा परुप्परं तेसिं । मित्ती परमं वुड्ढिं, पत्ता अवरण्हछायव ॥ ६४ ॥ यतः—आरम्भगुर्वी क्षयिणी क्रमेण, तन्वी पुरा वृद्धिमती च पश्चात् । दिनस्य पूर्वार्द्धपरार्द्धभिन्नाच्छायेव मैत्री खलसज्जनानाम् ॥ ६५ ॥ अह सोमचंदमाहणवरेण नेहाउ पुच्छिओ सूरी । तुम्हाणं चूडामणिजोइससत्थेसु अत्थि समो? ॥ ६६ ॥ गुरुभिर्भणितम्—तिजयपसिद्धं सिद्धंतवयणअणुवायसंनिहं अत्थि । सोमचन्द्रेणाप्युक्तम्—ता कहसु पसिय वीमंसिऊण पण्हुत्तरं मज्झ ॥६७॥ जुज्जं हिमधवलेहिवि, तस्स गुणोहेहि रंजियमणेहिं । भणिओ गुरूहिं बंधव !, पुच्छसु जं पुच्छणिज्जं ते ॥६८॥ आणंदनिब्भरंगो, पुच्छइ तो दियवरो गुरुं नमिउं । मह पुव्वपुरिसनिहियं, महानिहाणं रयणभरियं ॥६९॥ तट्ठाणं तु न जाणे, ता भणसु करित्तु तं पुणट्ठं । गिण्हिस्सामो सव्वाभावे कज्जं दलेणावि ॥ ७० ॥ यतः—सर्वनाशे समुत्पन्ने, अर्द्धं त्यजति पण्डितः । अर्द्धेन कुरुते कार्यं, सर्वनाशो हि दुस्त्यजः ॥ ७१ ॥ सूरीवि किंपि अत्थं, मणंमि परिभाविऊण तव्वयणं । पडिवज्जइ गुरुयाणं, को जाणइ हिययसब्भावं? ॥ ७२ ॥ अह सूरीहिं सम्मं, सुयनाणेणं खणेण नाऊणं । ठाणं माणं दविणं, निहिणो कहियं

पुरो तस्स ॥ ७३ ॥ मन्नंतेण दिट्ठणं, सहसग्गं गेहवणगिरि सव्वं । तक्खणमेव खणाविय, खोणिं पयडीकओ स निही ॥ ७४ ॥ तं पासिऊण गंतूण मुणिवइं पणमिउं च स भणेइ । आगच्छह सच्छमणा, गिण्हह अद्धं निहाणस्स ॥७५॥ अह वागरइ गुरूविहु, किं कुणिमो सोमचंद! दविणेणं ? । अम्हेहि पुरा गेहे, तं चइऊणं वयं गहियं ॥ ७६ ॥ अन्नं च-गयरागदोसमोहेहिं, भासियं अम्ह जिणवरिंदेहिं । परिहरियव्वो अत्थो, अणत्थसत्थस्स वित्थारो ॥ ७७ ॥ भणियं च—दोससयमूलजालं, पुव्वरिसिविवज्जियं जइवंतं । अत्थं वहसि अणत्थं, कीस निरत्थं तवं चरसि ? ॥७८॥ तं सुणिय सूरिवयणं, धणद्धगहणे परम्मुहं स दिओ । झूरइ हा मह वाया, जीवंतस्सवि मया जाया ॥७९॥ भणियं च-तित्तियमित्तं जंपह, जित्तियमित्तस्स होइ निव्वाहो । वायासुयणे नासइ, जीवं(वो)ता मा सुया होह ॥ ८० ॥ अंसुजलाविलनयणो, पुणो पुणो मुणिवरिंदपयपउमे । विणिवेसियनियसीसो, दीणो करुणस्सरं भणइ ॥ ८१ ॥ नो मन्नइ तव्वयणं, निरीहचूडामणी मुणिंदोवि । तो पुण पुणवि रूवंतं, तं पइ जंपइ पुणोवि गुरू ॥ ८२ ॥ जइ एवं निव्वंधो, वयंस ! तुह इत्थ अत्थि अत्थंमि । ता निसणेसु रहस्सं, न धणं कहमवि गहिस्सामि ॥ ८३ ॥ जं तइया अद्धगहो, वयणछलेणं मयावि पडिवन्नो । तस्सेसो परमत्थो, स कयत्थो कीरउ जहिच्छं ॥ ८४ ॥ दो-तणयाणं मज्झे, एगं सव्वस्सअद्धयसरूवं । अम्हाणं देसु तओ, तुम्ह पइन्ना हवउ पुण्णा ॥ ८५ ॥ अइदुक्करंपि वयणं, मणंमि ठविऊण मुणिवराणं तं । तो निहिधणं समग्गं, पुत्ताणं अप्पए स दिओ ॥ ८६ ॥ सूरीणं तं वयणं, मणंमि

अणमिव सयाविहु वहंतो। सो पुत्ताणं पुरओ, कहिउंपि न सकए विप्पो ॥ ८७ ॥ पुत्तावि विज्जबलिया, सययं रायप्पसायपरिकलिया । सिवमग्गतत्तनडिया, पडिया मिच्छत्तपंकम्मि ॥ ८८ ॥ अह सोमचंदविप्पो, तं सपइन्नं मणंमि सुमरंतो । रोगेहिं पीडियतणू, चरमअवत्थाइ संपत्तो ॥ ८९ ॥ तम्मि समयंमि तणया, पणया पभणंति ताय! उज्जमसु । रिणमुक्खधेणुभूमीकणयाइपयाणकम्मेसुं ॥ ९० ॥ अट्ठ महादाणाइं, दाऊणं पूइऊण देवगणं । जीवियअंतंमि ठिओ, सूरिरिणं तं स सुमरेइ ॥ ९१ ॥ भणियं च—अचला चलंति पलए, मज्जायं सायरावि लंघंति । गरुआ तहिंपि काले, पडिवन्नं नेव सिढिलन्ति ॥ ९२ ॥ किंपि कहणुज्जयं तं, तणया नाऊण तस्स सब्भावं । पभणसु नियकरणिज्जं, जं किंपिवि अत्थि तुम्ह मणे ॥ ९३ ॥ अवलंबिय धीरत्तं, सगग्गएणं सरेण सोमदिओ । एगं मह अत्थि अणं, जइ देह कहिंपि ता भणिमो ॥ ९४ ॥ तो ते भणंति तणया, पसिऊण कहेसु जं तयं कुणिमो । दो कणगमंततत्तं, परमिट्ठीविहु न याणेइ ॥ ९५ ॥ सो आह सुणह वच्छा!, जिणेसरो सूरी अत्थि मह मित्तो । तेण सह मइ पइन्ना, निहिलाभत्थे कया एवं ॥ ९६ ॥ अद्धप्पयाणवयणच्छलेण छलिओऽम्हि तेहि सूरिहिं । दिंतस्सवि तस्सद्धं, गिण्हंति न ते निरीहमणा ॥ ९७ ॥ तो तेहिं भणिओऽहं, जइ अद्धं देसि तो सुयजुयाओ । इक्कं वियरसु तणयं, अन्नह विहवेण पज्जत्तं ॥ ९८ ॥ इय तेसिं रिणं वच्छा!, अज्जवि सल्लुव्व सल्लुए हियए । इण्हिं कहियं पुरओ, तुम्हाणं कुणसु जह जुत्तं ॥ ९९ ॥ इय सुणवि दुवे तणया, तव्वयणं जोडिऊण करकमले । पभणंति ताय! देसो, तुम्ह

रिणं कुणह मा खेयं ॥ १०० ॥ तो सोमदेवविप्पो, तणयंगीकारवयणसमसमयं । पाणेहिं परिचत्तो, पत्तो परलोग-मग्गम्मि ॥ १०१ ॥ धणपालसोहणेहिं, कुडुंबसहिएहिँ सोगविवसेहिं । उत्तरकिरिया सयला, विहिया तायस्स परभविया ॥ १०२ ॥ तत्तो दुहसंतत्ता, परुप्परं भाउणो पयंपंति । अहह महाधुत्तेहिं, सियंबरेहिं कहं छलिया ? ॥ १०३ ॥ इय कारणाउ भणियं, जं तेसिं चेइएसु य मढेसुं । पीडिज्जंतोऽविहु मयगलेहिँ न कहिंपि पविसिज्जा ॥ १०४ ॥ अह लहुभायं जंपइ, धणपालो वच्छ! कुणसु घरकज्जं । अहयं पिउरिणसोहणहेउं सूरिं पवज्जेमि ॥ १०५ ॥ अह सोहणो पयंपइ, मए न निव्वहइ भाय! घरभारो । तो गंतूणं सेयंबराण वयणं करिस्समहं ॥ १०६ ॥ इय आउच्छिय सयणे, रुयमाणे कोवणे य जिणधम्मे । जिणिसरसूरिसमीवं, सोहणनामा दिओ पत्तो ॥ १०७ ॥ सायरं भणइ गुरुं, पिउसंधासायरं तरिउकामो । पयणतणउव्व पत्तो, ता करणिज्जं समाइससु ॥ १०८ ॥ सूरीवि कहइ अम्हं, हढेण नहु हुंति धम्मकम्माइं । किंपुण नियमणभावणवसेण जायंति सहलाइं ॥ १०९ ॥ ता पढमं सुणसु तुमं, जिणागमं जाणिउं च तस्सत्थं । जइ भवसायरतरणे, मई हवे ता गहसु दिक्खं ॥ ११० ॥ अन्नह सगिहे वच्चसु, इय वयणामयरसेण संसित्तो । विज्झायकुग्गहग्गी, सो विप्पो सूरिपासंमि ॥ १११ ॥ जह जह जिण-मयसत्थाइ पढइ पुव्वावराविरुद्धाइं । तह तह मिच्छत्तं परिगलेइ तुहिणुव्व रविउदए ॥ ११२ ॥ जुयलं । लद्धट्ठो गहियट्ठो, विणिच्छियट्ठो य मुणियपरमत्थो । आपुच्छिऊण गुरुणो, स सोहणो लेइ पव्वज्जं ॥ ११३ ॥ सन्नहिय-

दुविहसिक्खो, निरविक्खो कुणइ तिव्वतवचरणं । पढियसुओ कविचक्के, स चक्कवट्टित्तणं पत्तो ॥ ११४ ॥ अह निव्व-भोयसहाए, कलाकलावेण विजियविबुहेणं । धणपालेणं पत्ता, कित्ती सुत्तिव्व सोमस्स ॥ ११५ ॥ तत्तो तेण सहोयरविरहाउरमाणसेण विप्पेणं । नियदेसंमि निसिद्धो, बारसवरिसे जइपवेसो ॥ ११६ ॥ तद्देसवासिसावयपरमब्भत्थणवसेण मुणिवइणो । सयलागमपारीणं, सोहणसाहुं पुरो काउं ॥ ११७ ॥ मालवदेसंमि वहिं धारानयरीइ जाव वच्चंति । तो दट्ठुं धणपालो, बंधुमनाऊण इय हसइ ॥ ११८ ॥ जुयलं । गद्दहदंत! नमो ते, भदंत! तह सोहणोऽवि तं भणइ । कविवसणवयण! संपइ, वयंस! तुह अत्थि सुहमणहं ॥ ११९ ॥ तो धणपालो चिंतइ, जित्तोऽहमणेण पयडवयणेणं । घाओ नणु सलहिज्जइ, रिउणोविहु अवसरे दिन्नो ॥ १२० ॥ तत्तो तेणं भणिया, कस्स भविस्सह तुमित्थ पाहुणया? । सोहणमुणी पयंपइ, तुम्हाणं चेव बुहराय? ॥ १२१ ॥ तो लहुबडुयं सह पेसिऊण नियमंदिरस्स पासंमि । संठावइ सूरिवरे, स जङ्गमे पुण्णकप्पदुमे ॥ १२२ ॥ परियणसहिओ सूरिं, सोहणबंधवसिणेहओ भणइ । धणपालो मह गेहे, गिण्हह असणाइयं सव्वं ॥ १२३ ॥ तो ते भणंति पंडिय!, एगगिहे नेव कप्पए भिक्खा । सिवसासणंमि जिणसासणेऽवि सा जेण पडिसिद्धा ॥ १२४ ॥ उक्तञ्च—भजेन्माधुकरीं वृत्तिमपि म्लेच्छकुलादपि । एकान्नं नैव भुञ्जीत, बृहस्पतिसमादपि ॥ १२५ ॥ महुकारसमा बुद्धा, जे हवंति अणिस्सिया । नाणापिंडरया दन्ता, तेण वुच्चंति साहुणो ॥ १२६ ॥ इय तव्वयणं कप्पिय भिक्खागहणे परम्मुहं नाउं ।

रंजियहियओ सगिहं, गंतूण भणेइ नियमज्जं ॥ १२७ ॥ तुम्हेहिं परिसुद्धो, आहारो सोहणस्स मुणिवइणो । भत्तिब्भरनिब्भराहिं, दायव्वो पणयनिरयाहिं ॥ १२८ ॥ अह भिक्खाए पत्तो, नमंसिओ सोहणो मुणी ताहिं । पडिलाभिऊण भणिओ, भिक्खट्ठा इज्ज निच्चंपि ॥ १२९ ॥ तेसिं बोहनिमित्तं, स महप्पा सुद्धमेव आहारं । लिंतो तिदिवसदहियं, न य गिण्हइ दिज्जमाणंपि ॥ १३० ॥ धणपालेणं हसिओ, तुम्ह गुरूणं न रुचए अम्बं । तिदिवसदहियं तेणं, नो गिण्हह महुररसिया जं ॥ १३१ ॥ तं पइ जंपइ सोऽविहु, साहू अम्हाण विबुह ! सिद्धंते । भणियं तिदिवसदहियं, जियसंसत्तं तओ चइमो ॥ १३२ ॥ तो धणपालो जंपइ, अहो अहो दंभविलसियमि- मेसिं । जं दहियंपिहु पूयरयसंकुलं वज्जरंति इहा ॥ १३३ ॥ साहिक्खेवं पुणरवि, भणेइ सो नियगुरूण सा- हेसु । चिंतिज्जसु इत्थत्थे, उत्तरमेहामि मज्झण्हे ॥ १३४ ॥ तेण दहिभायणं तं, तहेव संठावियं तओ स मुणी । गंतूणं गुरुपुरओ, भणेइ तव्वइयरं सव्वं ॥ १३५ ॥ अह विहियभोयणो सो, धणवालो बहुजणेण संजुत्तो । पत्तो सूरिसगासं, बुद्धिबलेणं जिणिउकामो ॥ १३६ ॥ पुच्छेइ दहिसरूवं, अतुच्छमिच्छत्तमुच्छिओ एस । सूरिं सोऽवि पयंपइ, हुंति हु संमुच्छिमा जीवा ॥ १३७ ॥ जओ भणियमागमे—मुग्गमासाइपभिई, विदलं कच्चंमि गोरसे पडइ । ता तसजीवुप्पत्ती, भणंति दहिएवि तिदिणुवरिं ॥ १३८ ॥ तं सुणिय भणइ विप्पो, विलग्गपेउव्व धूणि- ऊण सिरं । अहह असंबद्धपलावि्राण किं भन्नए एसिं ? ॥ १३९ ॥ तप्पच्चयत्थमाणाविऊण तं दहियभायणं

गुरुणो । ठावंति तवणतेए, अलत्तवडियं मुहे दाउं ॥ १४० ॥ तिबायवसंतत्ता दहिगयसत्ता समंतओ चलिउं । चडिया लत्तयवडियं, सुसीयलं जीवियधकए ॥ १४१ ॥ ते पासिऊण जीवे, धणपालो चिंतए नियमणंमि । अहह अहो जिणधम्मो, धम्मेसु अवितहो एस ॥ १४२ ॥ जत्थेरिसया भावा, अरहंतेणं सयं समुल्लविया । ता एसच्चिय धम्मो, पमाणभूओ किमन्नेहिं ? ॥ १४३ ॥ इय तस्स मणवणाओ, मिच्छत्तुम्मत्तकरिवरो नट्ठो । सम्मत्तहरी सहसा, तत्थ पविट्ठो अइगरिट्ठो ॥ १४४ ॥ धन्ना ते जियलोए, जे जिणधम्मंमि उज्जुया सययं । ते उण वयं अधन्ना, सुविणेवि न जेहिँ सो दिट्ठो ॥ १४५ ॥ इय चिंतिऊण नमिऊण, गुरुपए विन्नवेइ धणपालो । भयवं! कहसु रहस्सं, धम्मस्स तओ गुरू आह ॥ १४६ ॥ धम्मु सुचि सचराचरि जीवह दयसहिओ, सो गुरुवि घरघरिणि-सुरयसंगमरहिओ । उज्झिय विसयकसाउ देउ जो मुक्कमलु, एहु लहुय रयणत्तउ चिंतियदिन्नफलु ॥ १४७ ॥ सविसेसं इय वयणामएण सित्तस्स तस्स चित्ताओ । मिच्छत्तविसो नट्ठो, जह न पविट्ठो पुणो तंमि ॥ १४८ ॥ देवगुरुधम्मतत्तं, तत्तो सो मुणिय चिंतइ हहाहं । हिंसादोसमलीमससत्थग्गहणे कहं नडिओ ? ॥ १४९ ॥ तत्तो गुरूण पासे, दंसणमूलाइं बारस वयाइं । परियणसहिओ गिण्हइ, धणपालो परमभावेणं ॥ १५० ॥ आजम्मं जिणसासणदेवगुरू मुत्तु नेव वण्णेमि । परतित्थिआण देवे, अभिग्गहो तेणिमो गहिओ ॥ १५१ ॥ तत्तो कम्मप्पयडिप्पमुहे सत्थे सुदुग्गमत्थेऽवि । लीलाइ मइबलेणं, संगहई सुगुरुवयणाओ ॥ १५२ ॥ रोमंचियगत्तो सो,

अणन्नचित्तो जिणिंदपयकमलं । पइदियहं तिकालं, पूइवि एवं भणइ पच्छा ॥ १५३ ॥—कतिपयपुरस्वामी काय-
व्ययैरपि दुर्ग्रहो, मितवितरिता मोहेनाहो मयाऽनुसृतः पुरा । त्रिभुवनगुरुर्लब्धाराध्योऽधुना स्वपदप्रदः, प्रभुर-
धिगतस्तत्प्राचीनो दुनोति दिनव्ययः ॥ १५४ ॥ सव्वत्थ अत्थि धम्मो, जा मुणियं जिण ! न सासणं तुम्ह । कण-
गाउराण कणगुव्व ससियपयमलभमाणाणं ॥ १५५ ॥ एवं जिणवरपवयणपभावणाए सया कयमइस्स । पक्खा-
लियपावमलस्स तस्स वच्चंति दियहाइं ॥ १५६ ॥ अन्नदिवसंमि राया, हयगयपाइक्कपण्डियसमेओ । वागुरिय-
गिद्धमण्डलकलिओ मिगयाइ संचलिओ ॥ १५७ ॥ उच्चुच्चझंपयाहिं, पलायमाणं भएण मयमिहुणं । दट्ठूण
चोइयहओ, सरेण राया हणइ हरिणं ॥ १५८ ॥ तम्मि पडिएऽवि हरिणिं, तट्ठाणाओ पयंपि अचलंतिं । दट्ठुं राया
पिक्खइ, कइणो तो ते भणंति इमं ॥ १५९ ॥ श्रीभोजे मृगयागतेऽपि सहसा चापे समारोपितेऽप्याकर्णान्त-
गतेऽपि लक्ष्यनिहितेऽप्येणाङ्कलग्नेऽपि च । न त्रस्तं न पलायितं न चलितं नो जृम्भितं नोत्प्लुतं, मृग्या मद्दशिनं
करोति दयितं कामोऽयमित्याशया ॥ १६० ॥ अपिच—किं कारणं तु कविराज ! मृगा यदेते, व्योमोत्पतन्ति
विलिखन्ति भुवं वराहाः ? । देव ! त्वदस्त्रचकिताः श्रयितुं स्वजातिमेके मृगाङ्कमृगमादिवराहमन्ये ॥ १६१ ॥ इय
कवियणकयवन्नणमायन्निय भोयरायमहिनाहो । नियपुरओ सयलंपिहु, तिणं व मन्नेइ भुवणयलं ॥ १६२ ॥ एगं
सुविसन्नमणं, करुणारससायरं निएऊणं । धणपालं भणइ निवो, किं न हु वन्नसि ? स तो पढइ ॥ १६३ ॥ रसातलं

यातु यदत्र पौरुषं,कुनीतिरेषाऽशरणो ह्यदोषवान् । प्रहन्यते यद्बलिनाऽतिदुर्बलो,हहा महाकष्टमराजकं जगत् ॥१६४॥ इय भच्छणवयणेणं, कोवा अंबिरमुहो महीनाहो, । तं पुच्छइ किं एयं, ? सो विबुहो भणइ सुणु राय ! ॥१६५॥ वैरिणोऽपि हि मुच्यन्ते, प्राणान्ते तृणभक्षणात् । तृणाहाराः सदैवैते, हन्यन्ते पशवः कथम् ? ॥ १६६॥ इय सुणिय जायकरुणो, भंजिय बाणासणं च बाणं च । आजंमं मिगयाए, नियमं गिण्हेइ भोयनिवो ॥१६७॥तत्तो चलिओ करुणारसिओ सरसाहिवो पुराभिमुहं। थंभनियड्ढियछागं, जन्नस्स य मंडवमुवेइ ॥१६८॥ तत्थ भयवेविरंगं, छागं विरसंतमइतरं करुणं । राया पिक्खिवि पुच्छइ, पण्डिय ! किं एस बुब्बुयइ ? ॥ १६९ ॥ अवसरवेई निवबोहणाय सच्चं स पंडिओ भणइ । मरणभयकंपिरतणू , छागो एवं वयइ देव ! ॥ १७० ॥ नाहं स्वर्गफलोपभोगतृषितो नाभ्यर्थितस्त्वं मया, सन्तुष्टस्तृणभक्षणेन सततं साधो ! न युक्तं तव। स्वर्गं यान्ति यदि त्वया विनिहता यज्ञे ध्रुवं प्राणिनो, यज्ञं किं न करोषि मातृपितृभिः पुत्रैस्तथा बान्धवैः ? ॥ १७१ ॥ एयवयणायन्नणसमणंतरमेव राइणा पुट्ठो । विबुहो सुहसंतायं, कहिउं निवइं विबोहेइ ॥ १७२ ॥ यूपं छित्त्वा पशून् हत्वा, कृत्वा रुधिरकर्दमम् । यद्येवं गम्यते स्वर्गो, नरके केन गम्यते ? ॥ १७३ ॥ सत्यं यूपं तपो ह्यग्निः, प्राणाः समिधयो मम । अहिंसामाहुतिं दद्यादेष यज्ञः सनातनः ॥ १७४ ॥ सत्थाणुवाइवायाइ, रंजिओ रक्खसुव मन्नन्तो । जन्नस्स कारिणो तो, राया वन्नेइ जिणसमयं ॥ १७५ ॥ तो साणन्दो साहइ, तं राया दयनिहीवि जिणधम्मो । नो रुच्चइ अन्नेसिं, को हेऊ ? तत्थ सो भणइ ॥ १७६ ॥

हिंसा त्याज्या नरकपदवी सत्यमाभापणीयं, स्तेयं हेयं सुरतविरतिः सर्वसङ्गान्निवृत्तिः । जैनो धर्म्मो यदि न रुचितः पापपङ्कावृतेभ्यः, सर्पिर्दुष्टं किमलमियता यत्प्रमेही न भुङ्क्ते ॥ १७७ ॥ सरसइकंठाहरणे, सिवपासाए निवेण कार-विए । कइयावि महीनाहो, धणपालजुओ गओ तत्थ ॥ १७८ ॥ वन्नइ नाणं सो जिणमयंमि अच्चब्भुयं तओ रण्णा । वुत्तं अज्जवि किंचिवि, अत्थि नवा नाममित्तं वा ? ॥ १७९ ॥ तो भणइ सोऽवि नरवर!, नाणं अत्थित्थ केवलिप्पणीए । अरहंतसिरीचूडामणिगंथे अइसयपसत्थे ॥ १८० ॥ तीआणागयसंपइपवट्टमाणाण सव्ववत्थूणं । नाणं अइप्पमाणं, परूवियं तत्थ सुमुणीहिं ॥ १८१ ॥ तस्स कलंकारोवणकए निवो भणइ पंडिय! कहेसु । तिदुयारमंडवाओ, केण पहा निग्गमिस्समहं ? ॥ १८२ ॥ तो धणपालो आणा-विऊण पण्हं वियारिऊण तयं । बुद्धिपवंचेण फुडं, फलं च लिहिऊण पत्तम्मि ॥ १८३ ॥ मट्टियमयगोलब्भंतरंमि खिविऊण थगियधारिस्स । तं दाऊणं साहइ, पायं अवधारसु धरेस ! ॥ १८४ ॥ जुयलं । चिंतइ निवोऽवि एवं, इमेण तिदुवारमंडवाउ मह । एगेण दुवारेणं, निग्गमणं नियमओ लिहियं ॥ १८५ ॥ ता तह करेमि जेणं, एयं गुरुदेवआगमेहिं समं । नाण-विसंवायाओ, असच्चवाइत्ति धरिसेमि ॥ १८६ ॥ आणविय सुत्तधारे, पउमसिलं मंडवस्स अवणेउं । मग्गेण तेण राया, नीहरिउं वायए पत्तं ॥ १८७ ॥ सिरिभोयरायराया, कवडेणुग्घाडिऊण पउमसिलं । उड्डपहेणं तह मंडवाउ सिद्धुव्व नीसरिही ॥ १८८ ॥ सच्चं तं तव्वयणं, जाणिय राया मणंमि परितुट्ठो । जिणसासणं पसंसइ, सारं सव्वेसु

धम्मेसुं ॥ १८९ ॥ अह सिवसिरिपरिरंभणसंरंभमई कई स धणपालो । रिसहंसरगुणवन्नणपउणं पंचासियं कुणइ ॥ १९० ॥ तं उक्करिय सिलाए, ठाविय निवकारियंमि पासाए । सरसइकंठाहरणे, तत्तो वन्नइ निवं एवं ॥ १९१ ॥ अभ्युद्धृता वसुमती दलितं रिपूरः, क्रोडीकृता बलवता बलिराज्यलक्ष्मीः । एकत्र जन्मनि कृतं तदनेन यूना, जन्मत्रये यदकरोत्पुरुषः पुराणः ॥ १९२ ॥ नियवन्नणमिममायण्णिऊण परिओसपोसओ राया । रिसहथुइपट्टियाए, उवरिं ठावेइ मणिकलसं ॥ १९३ ॥ अन्नदिणे सिवभवणे, दुवारदेसे निएवि भिंगिगणं । किं एस दुब्बलो ? इय, निवपुट्ठो भणइ धणपालो ॥ १९४ ॥ दिग्वासा यदि तत्किमस्य धनुषा ? तच्चेत्कृतं भस्मना, भस्माथास्य किमङ्गना यदि च सा कामं प्रति द्वेष्टि किम् ? । इत्यन्योऽन्यविरुद्धचेष्टितमहो पश्यन्निजस्वामिनो, भृङ्गी सान्द्रसिरावनद्धपरुषं धत्तेऽस्थिशेषं वपुः ॥ १९५ ॥ तत्तो पुरओ पिक्खइ, सहत्थतालं हसंतयं रूवं । रइमयणाणं राया, सविम्हओ पुच्छइ बुहं तं ॥ १९६ ॥ किं कारणमेएसिं, एवं हासो समंतओ फुरइ ? । तो आह कई निसुणसु, कणणं दाऊण नरनाह ! ॥ १९७ ॥ स एष भुवनत्रयप्रथितसंयमः शङ्करो, बिभर्त्ति वपुषाऽधुना विरहकातरः कामिनीम् । अनेन किल निर्जिता वयमिति प्रियायाः करं, करेण परिताडयन् जयति जातहासः स्मरः ॥ १९८ ॥ अट्ठंगपणामेणं, सिवं नमेऊण भोयरायनिवो । जंपइ कवीसरं पइ, तं किं न नमेसि तिपुरारिं ? ॥ १९९ ॥ धणपालोऽविहु चित्ते, वयणेणावि अन्नदेवसंथवणं । न कुणेमि जिणं मुत्तुं, इय चिंतिय नरवरं भणइ ॥ २०० ॥ जिनेन्द्रचन्द्रप्रणिपातला-

लसं, मया शिरोऽन्यस्य न नाम नाम्यते । गजेन्द्रगण्डस्थलदानलम्पटं, शुनीमुखे नालिकुलं निलीयते ॥ २०१ ॥ इय असमंजसवयणं, तस्स सुणेऊण सम्मदिट्ठिस्स । रोसमहुग्गभुयंगमडसिओ इय चिंतइ नरिंदो ॥ २०२ ॥ एस अवज्झो विप्पियभासी अम्हं सिवाइदेवाणं । विप्पुत्ति तओऽवि धुवं, नयणविहीणो विहेयव्वो ॥ २०३ ॥ इय रायाभिप्पायं, सुविरुद्धं जाणिऊण धणपालो । चिन्तइ नियमब्भंसं, कुणेमि नाहं जुगंतेऽवि ॥ १०४ ॥ राया नीहरिउं देउलाउ गच्छंतओ पहे नियइ । एगं वुड्ढि वुड्ढत्तणेण सीसं पकम्पंतिं ॥ २०५ ॥ तत्तो सहयरविबुहा, तीए सिरकंपकारणं पुट्ठा । किंचिवि वण्णंताविहु, ते निवचित्तं न रंजंति ॥ २०६ ॥ तत्तो अजंपिओऽविहु, धणपालो अवसरुत्ति विन्नवइ । देव ! इमीए सिरकंपकारणं पसिय निसुणेसु ॥ २०७ ॥ किं नन्दी किं मुरारिः किमु रतिरमणः किं विधुः किं विधाता, किं वा विद्याधरोऽयं किमुत सुरपतिः किंनरः किं कुबेरः ?। नायं नायं न चायं न खलु नहि न वा नैव नासौ न चासौ, क्रीडां कर्त्तुं प्रवृत्तः स्वयमिह हि हले ! भूपतिर्भोजदेवः ॥ २०८ ॥ इय धणपालमहाकविवण्णणवयणामयस्स पाणाओ । धाराहिरायमणओ, पविलीणो रोसफणिगरलो ॥ २०९ ॥ विहसियवयणो राया, वरं वरेसुत्ति पंडियं वयइ । पडिभणइ सोऽवि नरवर !, नयणजुयं पसिय मह देसु ॥ २१० ॥ तव्वयणं पडिवज्जिय, वज्जिअपावस्स तस्स धम्मिस्स । दाऊण विविहकणयं, सप्पणयं पेसए राया ॥ २११ ॥ अह एगया नरिंदं, पंडियसामंतमंतिपरिकलियं । नियपरिसाइ निविट्ठं, पडिहारो नमिय विन्नवइ ॥ २१२ ॥ देव दुवारे चिट्ठइ,

सिद्धी पोयाओ आगओ दट्ठुं । अहिलसइ कोऽवि तुम्हं, चलणे को इत्थ आएसो ? ॥ २१३ ॥ आणेसुत्ति निवेणं, भणिए तेणावि आणिओ सिद्धी । सिरिधरियकरयलजुओ, पणमेइ नरिंदपयपउमं ॥ २१४ ॥ नरवरदावियआसण- उवविट्ठो सोऽवि दंसइ निवस्स । मयणमयपट्टियाठियपसत्थिवित्ताणि वित्ताणि ॥ २१५ ॥ भूवइणा सो पुट्ठो, कत्थ तुमेहिं इमाणि पत्ताणि ? । सिद्धीवि भणइ सामिय !, अवधारसु मइ पसन्नमणो ॥ २१६ ॥ जलहिम्मि अकम्हा पवहणम्मि खलियंमि मज्झ मग्गम्मि । निज्जामएहिं सोहिज्जमाणए गिरिवे सिवभवणं ॥ २१७ ॥ सलिलंतरंमि पत्तं, तब्भित्तीएवि एगदेसंमि । अक्खरपंती दिट्ठा, लिहियाउ अपुव्ववण्णेहिं ॥ २१८ ॥ जुलयं । अक्खरगहणनिमित्तं, मयणमया पट्टिया मए ठविउं । संकंतवन्नया सा, उवणीया तुम्ह पासंमि ॥ २१९ ॥ रायावि तीइ पिट्ठे, मट्टियमयपट्टियं निवेसित्ता । समअक्खराणि काउं, पण्डियलोयाओ वाएइ ॥ २२० ॥ आबाल्याधिगमान्मयैव गमितः कोटिं परामुन्नतेरस्मत्संकथयैव पार्थिवसुतः सम्प्रत्ययं लज्जते । इत्थं खिन्न इवात्मजेन यशसा दत्ताऽवलम्बोऽम्बुधेर्यातस्तीरतपोवनानि तपसे वृद्धो गुणानां गणः ॥ २२१ ॥ देव ! दिग्विजयोद्यते धृतधनुःप्रत्यर्थिसीमन्तिनीवैधव्यव्रतदायिनि प्रतिदिशं क्रुद्धे परिभ्राम्यति । आस्तामन्यनितम्बिनी रतिरपि त्रासान्न पार्श्वं करे, भर्त्तुर्धर्त्तुमदान्मदान्धमधुपी नीलीनिचोलं धनुः ॥ २२२ ॥ चिन्तागम्भीरकूपादनवरतचलद्भूरिशोकारघट्टव्याकृष्ट

---

१ 'सो रायएसेणं समागओ नमिय दंसए तत्थ । मयणमयपट्टियाठियपसत्थिवित्ताणि वित्ताणि' इति प्रत्यन्तरे । २ भणइ तत्थ सिव० प०.

निश्वसन्त्यः पृथुनयनघटीयन्त्रमुक्ताश्रुधारम् । नासावंशप्रणालीविषमपथपतद्वाष्पपानीयमेतद्देव ! त्वद्वैरिनार्यः स्तनकलशयुगेनाविरामं वहन्ति ॥ २२३ ॥ अथ खलु विषमः पुराकृतानां, भवति हि जन्तुषु कर्मणां विपाकः । राया खण्डियमेयं, कयं नाऊण पण्डियजणाओ। पूरवइ परं चित्ते, अत्थो न चमकए तस्स ॥२२४॥ धणपालं पइ जंपइ, तो राया किं इमं न पूरेसि ? । सोऽवि भणइ पयजुयलं, एअं सुइभूसणं कुणसु ॥ २२५ ॥ हरशिरसि शिरांसि यानि रेजुर्हरिहरितानि लुठन्ति गृध्रपादैः ॥ २२६ ॥ सचमुक्कारं राया, जंपइ संवयइ एस चेवत्थो। तो विच्छाया अन्ने, विबुहा वज्जाहया जाया ॥ २२७ ॥ जइ रामेसरभित्तिंमि, एरिसो एस नो हवे गुम्फो । आजम्मं सन्नासो, कवित्तकरणंमि ता मज्झ ॥ २२८ ॥ इय धणपालपइन्नं, आयण्णिय तक्खणा धरणिनाहो । निज्जामए पवेसइ, वहणारूढे जलहिमज्झे ॥ २२९ ॥ तेहिवि छम्मासेहिं, तद्देव लहिऊण आणिउं दिन्नं । वायंति तयं विउसा, सामरिसा तम्मि धणपाले ॥ २३० ॥ तं खंडकवउत्तरपयजुयलं तारिसं नियवि तत्थ । धणकणयदाणपुव्वं, पसंसए पण्डियं राया ॥ २३१ ॥ कइयावि नियवसेवाविमुहं दट्ठूण तं भणइ भूवो । कीस दुवेलं न सहं, मह मण्डह ? पंडियवयंस !॥ २३२ ॥ सो जंपइ भूवासव !, पारद्धा अत्थि भरहरायकहा । गुंफेउमओ तुम्हं, सेवावसरस्स नावसरो ॥ २३३ ॥ रायाऽऽह मं सुणावसु, सिसिरनिसापच्छिमंमि जामंमि । सो समओ रमणीओ, जओ अभावाउ कज्जाणं ॥ २३४ ॥ सो निवसंसियसमए, तं वाएउं पयट्टए निच्चं । रायाऽवि सेसइंदियवावारं चइय निसुणेइ

॥ २३५ ॥ तइया पुत्थयहिट्ठा, सुवण्णथालं कचोलयसणाहं । ठावेइ निवो मा पुण, एस रसो जाउ अन्नत्थ ॥ २३६ ॥ सालंकारा लक्खणछंदजुया महरसा सुवन्नसुई । कस्स न हरेइ हिययं ?, कहुत्तमा तरुणरमणिव्व ॥ २३७ ॥ तीसे विचित्तकवियाचित्तियचित्तो नराहिवो भणइ । पंडिय ! इह मह भणियं, कुणेसु मुंचेसु कुवियप्पं ॥ २३८ ॥ मं इह कहाहिययं, विणीसिवसरीसवंहि उज्जेणिं । सक्कावयारठाणे, महकालं जइ निवेसेसि ॥ २३९ ॥ ता तुह गरुयं माणं, धणं च मणइच्छियं पयच्छेमि । इय भणिरे भोयनिवे, धणपालो चिंतए एवं ॥ २४० ॥ जं मह जिणपयपंकयआराहणओ न होइ मणइट्ठं । तेणं नहु मह कज्जं, इय विप्पो रायमक्खिवइ ॥ २४१ ॥ जह रंकवासवाणं, जह जुइरिंगणसहस्सकिरणाणं । जह सरिसवमेरूणं, जह छिल्लरखीरसिंधूणं ॥ २४२ ॥ जह धत्तूरसुरेसरतरूण जह कायदेवरयणाणं । तह तुह तेसिं अंतरमत्थि भणंतो पढइ एवं ॥ २४३ ॥ दोमुहय निरक्खर लोहमइयनाराय ! किंत्तियं भणिमो ? । गुंजाहिं समं कणयं, तुलंतु न गओऽसि पायालं ॥ २४४ ॥ इय नियनिंदादारुणवयणकसाए हरिव्व आहणिओ । कोवायंबिरनित्तो, मूलपइं खिवइ सो दहणे ॥ २४५ ॥ अह महनिव्वेयपरो, आवेउं सगिहपच्छिमे भागे । जुन्नयमंचयपडिओ, धणपालो चिंतए एवं ॥ २४६ ॥ पुणरवि कहमेईए कहाइ कवणं करिस्समेरिसयं ? । हा कह दुट्ठनिवेणं, खेयसमुद्दंमि पक्खित्तो ॥ २४७ ॥ नीसासे दीहरए, मुंचंतो चत्तअवरवावारो । तो तिलयमंजरीए, दिट्ठो पुट्ठो य तत्थ पिया ॥ २४८ ॥ तेणवि तीइ सुयाए, पुरओ दुक्खस्स

कारणे कहिए। साविहु भणेइ मा ताय! खेयमुवहसु इह कज्जे ॥ २४९ ॥ एयं कहारहस्सं, मणफलए मज्झ अत्थि संकंतं। ता ताय! पसिय उट्ठसु निट्ठवसु मणाउ निव्वेयं ॥ २५० ॥ तो धणपालो तुट्ठो, उट्ठिय ण्हा-ऊण पहविय जिणरायं। भुंजिय तीए सुहाओ, लिहावए तं कहारयणं ॥ २५१ ॥ सा तिलयमंजरिकहा तन्नामेणं जणंमि विक्खाया। सहयारमंजरी इव, सुहमहुयरसेविया जाया ॥ २५२ ॥ रायपराभवरुट्ठो, धणपालो उज्झिऊण तं रज्जं। सच्चरिओ सच्चउरे, संपत्तो पत्तबहुमाणो ॥ २५३ ॥ तम्मि समयम्मि धम्मो, वाई उज्जेणिमागओ नयरिं। भोयनिवविबुहनिवहे जिणित्तु गज्जेइ सिंहुव्व ॥ २५४ ॥ तत्तो विसन्नचित्तो, चिंतइ राया हहा ममावि सहा। धणपालदिणयरेणं, विणा तमेणं विलुत्तपहा ॥ २५५ ॥ तो तस्साणणहेउं, पहाणपुरिसा निवेण पट्ठविया। तेणवि इय लिहिऊणं, पच्छा संपेसिया ते उ ॥ २५६ ॥ पृथुकार्त्तस्वरपात्रं, भूषितनिश्शेषपरिजनं देव!। विलसत्करेणुगहनं, सम्प्रति सममावयोः सदनम् ॥ २५७ ॥ आगंतूणं राया जइ मं मन्नावए तओ अहयं। आगच्छामि न इहरा मणंमि भो! एस नियमो मे ॥२५८॥ तत्तो सयं नरिंदो गन्तुं विबुहं बहुत्तिजुत्तीए। परितोसिय परिपोसिय ध-णेण आणेइ अप्पसभं ॥ २५९ ॥ तं कविरायं भूवइ–परिसाइ ठियं अयाणमाणो सो। रयणीसमए धम्मो, सगव्वमेवं वयइ वयणं ॥ २६० ॥ श्रीच्छित्तपे कर्दमराजपुत्रे, सभ्ये सभाभर्त्तरि भोजदेवे। सारस्वते श्रोतसि मे प्लवन्तां, पलालकल्पा धनपालवाचः ॥२६१॥ तं सुणिऊणं खंडइ, तव्वयणं पंडिओ असंडमई। हे धणपआ(ला)लवाया, मह

सारसए दुयं जंतु ॥ २६२ ॥ तज्जाणवणनिमित्तं, धणपालं भणइ भोयदेवनिवो । पंडियसेहर! पुरसु एयं मह पुच्छियसमस्सं ॥ २६३ ॥ इयं व्योमाम्भोधेस्तटमनु जवात् प्राप्य तपनं, निशानौर्विश्लिष्यद्घनघटितकाष्ठा विघटिता । तओ पण्डिएण वज्जरियं । चणिकृचक्रानन्दोत्थितविघे शकुनिकोलाहलबले, इमास्ताराः सारास्तदनु च निमज्जन्ति गिरयः ॥ २६४ ॥ तो धम्मवाइराओ, धणपालं आगयं वियाणित्ता । पवणेण व वारिनिही, संखुद्धो चिंतई एवं ॥ २६५ ॥ चइऊणं धणवालं, इक्कं वायंमि तुह जओ होही । इय सरसईइ वयणं, सरिउं रयणीइ सो नट्ठो ॥२६६॥ जाए पभायसमए, तस्स जयत्थं सहागओ विउसो । तच्चरियं नाऊणं, रायसमक्खं पढइ एवं ॥ २६७ ॥ धर्मो जयति नाधर्म, इत्यलीकं कृतं वचः । इदं तु सत्यतां नीतं, धर्मस्य त्वरिता गतिः ॥ २६८ ॥ मिच्छत्तिसुराईणं, न कयावि पावकारणं कुणइ । वण्णंतो जिणचंदं, वयणविसुद्धिं समुक्कसइ ॥ २६९ ॥ सम्मद्दंसणपुव्वं, सम्मं पालित्तु सावयवयाइं । जिणिउं व गओ सग्गं, धणपालो देवरायगुरुं ॥ २७० ॥ एवं सुणेउं धणपालवित्तं, संमत्तसंसत्तिमहापवित्तं । वायाविसुद्धिं भविया कुणेह, जहा लहुं सिद्धिसुहं लहेह ॥ २७१ ॥ इति वचनविशुद्धौ धनपालपण्डितकथा ॥ द्वितीयं वचोविशुद्धिद्वारमुक्त्वा तृतीयं कायशुद्धिद्वारमाह—

छिज्जंतो भिज्जंतो पीलिज्जंतो य डज्झमाणोऽवि । जिणवज्जदेवयाणं, न नमइ जो तस्स तणुसुद्धी ॥ २७ ॥

व्याख्या—छिद्यमानः—खड्गादिभिः, भिद्यमानः—क्रकचशूचिकादिभिः, पीड्यमानो—बन्धनयन्त्रादिभिः, दह्यमानः—

अनलतप्ततैलादिभिः, चापिशब्दान्महासङ्कटपतितोऽपि यो जिनवर्जदेवेभ्यः—अर्हद्रहितशाक्यशङ्करादिसुरेभ्यो न नमति-न प्रणतिं विधत्ते तस्य, सम्यक्त्ववतः प्राणिनस्तनुशुद्धिः शरीरनैर्मल्यं भवति, अत्र प्राकृतत्वाच्चतुर्थी स्थाने षष्ठीति गाथार्थः ॥ २७ ॥ भावार्थस्तु कथानकादवसेयः, स चायम्—

अत्थि इत्थ सुपसत्थवत्थुवित्थारसुंदरा कंतकंतिमणिमयमंदिरा सिरिभरविसाला कोसला नाम नयरी, तत्थ इक्खागुवंसावयंसो भुयबलविजियभरहवासो महारहो दसरहो नाम राया, तेण य केकिइपियमायवरदाणवसेण बारसवारिसियं बणवासं कारिया सीयासमेया रामलक्खणा, तेऽवि कमेण पंचवडिमग्गं वचंता पत्ता अवंतिदेसं, तत्थ य एगं देसमहिणवमुव्वसं पासन्ति। अपिच—परिपुण्णपणे हट्टे, धणकंचणपूरियाइं गेहाइं। अगहियधन्ने खित्ते, बहुफुलफले य आरामे ॥ १ ॥ अद्धपहमुक्कदुब्बलवइल्लतुरए विभिन्नसगडे य। पिक्खंता ते माणुस—जायंपि न चेव पासंति ॥ २ ॥ तत्तो विस्सामकए एगत्थ सवित्थरपवरतरुछायाए ते निसीयंति, तओ रामेण लक्खणकुमारो वाहरिओ वच्छ! अतुच्छवत्थुसंकिन्नो नवुव्वसिउव्व एस जणवओ लक्खिज्जइ, तो कमवि पुरिसं पुच्छह एयस्स सरूवं, तओ सो उच्चयरं तरुमारुहिय चउद्दिसिं चक्खुक्खेवं कुणंतो एगं पुरिसमिंतं पासइ, तओ तं वाहरिऊण रामपासे समाणेइ, सोऽवि पुरिसो कयप्पणामो रामेण पुट्ठो समाणो सविसयउव्वसकारणं साहेइ—सुकरं सयससिरीयं, वित्तगुणालंकियं लसंतकलं। रयणीयरबिम्बं पिव, अत्थि इहं दसउरं नयरं ॥ १ ॥ तत्थ सामंतसत्तमो वज्जयन्नो नाम राया, जो—सुगुणरयणभूमीगंभीरो

सत्तवं सिरिकलिओ । दुलंघो सुविसालो, समुद्दलीलं समुव्वहइ ॥ २ ॥ सो सयलकलाकलिओ, अमयतणू कुमुयवल्लहोवि दढं । रयणीयरुव्व मिगया—वसणकलंकाउलो जाओ ॥ ३ ॥ सो य अन्नया अहम्मबुद्धिपारद्धलुद्धो सुन्नारन्नंमि मिगाइघायणपसत्तो बाणेण संपुन्नगब्भं हरिणीं हणेइ, तीए सरपहारवेयणाविहुरियाए उयरं वियारिऊण पडिओ गब्भो धरणियले, रायावि तं वेयणाए तडफडंतं हरिणभूणं निरूविऊण संजायकायकंपो विसायपरो चिंतइ—हा मए मूढयाएण महंतं पावमुवज्जियं ! । जओ—सवणाण माहणाणं, वुड्ढाणित्थीण भूणयाणं च । निक्करुणमणो हणई, सो बुड्डइ नरयपंकम्मि ॥ १ ॥ इय जाव जायकरुणो धरणिधणो वेरग्गरंजियहियओ इओ तओ भमइ, ताव एगसिलायलोवरि अत्ताणमायावयंतं मुणिवरं पिक्खइ, एस कोऽवि दंसणिज्जि नमिऊण राइणा पुट्ठो—किमित्थ सुन्नारन्ने एगागी तुमं करेसि ?, तओ मुणी भणइ—महाराय ! अप्पहियं, तओ रण्णा वुत्तं, सीउण्हछुहपिवासाइवेयणं सहमाणस्स किं ते अत्तणो अहियं हियं ?, मुणीवि तं पइ जंपइ—नरवर ! अप्पा दुविगप्पो—सासओ असासओ य, तत्थ जीवरूवेण सासओ, देहरूवेण पुण असासओ, अओ जइ स इहलोइयभोगेहिं सुही कीरइ, ता परभवे अहिअयरं दुक्खिओ होइ, जं पुण तवनियमसञ्जमेहिं सोसिज्जइ तं परमसुहलम्भेण सुही होइ, तओ नरनाह ! जं जीवनिवहे निक्करुणो वावाएसि, ता नूणं नरयनिवडिओ सुइरं तिव्वयरं वेयणमणुहविस्ससि, इय तव्वयणं सवणाणंतरमेव पडिबुद्धो राया महरिसिं विन्नवेइ—भयवं ! संसारसायरे पडंतं मं धम्महत्थावलंबणदाणेण

निस्थारेसु, तओ मुणी तमुवएसदाणेण अणुग्गहेइ–देवो जिणिन्दो गयरागदोसो, गुरूवि चारित्तरहस्सकोसो । जीवाइतत्ताण य सद्दहाणं, सम्मत्तमेयं भणियं पहाणं ॥ १ ॥ जस्सारिहन्ते मुणिसत्तमेसु, मुत्तुं न नामेइ सिरो परस्स । निव्वाणसुक्खाण निहाणठाणं, तस्सेव सम्मत्तमिणं विसुद्धं ॥ २ ॥ हिंसालियचोरिकयमेहुन्नपरिग्गहाण परिहारो । जत्थत्थि सुवित्थारो, स एव धम्मो जए सारो ॥ ३ ॥ निंदियकसायविजओ, नवि राओ जीवरक्खणे न मई । जत्थत्थि तत्थ धम्मो, न लेसओऽवि हु नहसुमं व ॥ ४ ॥ इच्चाइ धम्मदेसणं सुणिय वज्जयन्नराया संजायसड्ढो परमेसरगुणरओ सम्मद्दंसणसहिए दुवालसवि वए गहिय एवं अभिग्गहमभिगिण्हइ–मिल्हिवि जिणवरु अनु सुगुरु, गुणमणिरयणकरंडु । अन्नह नमए न मज्झ सिरु, जइ करिज सयखंडु ॥ १ ॥ इय मेरुगिरिंपिव सुदुद्धरं नियमभरं गहिय मुणिवरं नमिय पत्ततेलुकरज्जंपिव अप्पाणं मन्नंतो पुरं पविसिय जिणजइपूयणासासणपभावणपसत्तो चित्ते चिंतेइ–मइ एस नियमो गुरुसगासे सहसा अंगीकओ कहं पालेयव्वो?, जं उज्जेणिनयरिसामिणो सीहरहस्स रण्णो सेवगोऽहं, तम्हा तत्थ गएण स मए पणमियव्वो, तम्मि कए गहियतारिसनियमस्स भंगो होइ, तओ नियाभिग्गहरक्खणट्ठा अंगुट्ठोवरि सिरिमुणिसुव्वयजिणस्स रयणमयं बिम्बं उक्किरावेमि, तं च पुरओ काऊण मणसा तन्नमंसणं परमत्थओ कुणंतो तस्स निवस्स पए पणमिस्सं, एवं कुणमाणस्स तस्स वच्चंति वासरा, । अन्नया केणवि खलेण खलत्तणं पयडंतेण सीहरहस्स रण्णो तव्वइयरो वागरिओ, जओ एरिसो चेय खलजणो होइ–दोजीहो

कुडिलगई, परच्छिद्दगवेसणिक्कतल्लिच्छो । कस्स न दुज्जणलोओ, होइ भुयंगुव्व भयहेऊ ? ॥१॥ उवयारेण न घिप्पइ- न परिचएणं न पिंमभावेणं । कुणइ खलो अवयारं, खीराईपोसियअहिव्व ॥ २ ॥ तओ तं संपासंपायसरिच्छं तच्चरियं सुच्चा राया तं पइ कुविओ इय कुविगप्पसंकप्पणं कुणेइ—अहो एस कयग्घसिरोमणी जं मम रज्जं भुंजंतोऽवि पणामंपि न करेइ, तो सासेमि एयं दुरासयं, इय वियारिऊण पयाणभेरिं दाविऊण चउरंगबलबलकलिओ सीह- रहराया पत्थिओ वज्जयन्नउवरिं । इओ य एगो पुरिसो वज्जयन्ननिवं पणमिय विन्नवइ—देव ! अत्थि किं पि तुम्हाणं पुरो कहणिज्जं, तो राया तस्स संमुहं वज्जरई—कोऽसि तुमं ? कओ आगओ ? किंच कहणिज्जं, ? इइ रण्णा वुत्तो सो पुरिसो कहिउं लग्गो—देव कुंडउरे नयरे गुणसमुद्दाभिहाणवणिणो भारियाए जउणाए कुच्छीए अहं विज्जुओ- (विच्चओ)नामेणं सुओ जाओ, सो आजम्मजिणधम्माणुरत्तो गहियकलाकलावो जुव्वणमणुपत्तो, अन्नया बहुयं पणियं गहिय उज्जेणिं गओ, तत्थ वसंतूसवे वट्टमाणे पावनिलया विवेयपलया तणुलट्ठी सिरीविजयचंपयलया अणं- गलया नाम गणिया मज्झ चक्खुगोयरं गया । तीए दंसणमित्तेऽवि कयसीधुपाणुव्व मोहिएण मए सुइरं तीए सह विसयसुहमणुहवंतेण सयलंपि धणं निधणं नीयं । एगया सा गणिया रण्णो अग्गमहिसीए चउद्दसतिलयाहरणे थुणंती अत्तणो य भूसणे निंदंती मए सुया, तओ मम तीइ मणोरहपूरणकए चिंता संवुत्ता, अहो ! मइविवज्जासो कोऽवि कामुयजणस्स, अहवा को को न दड्ढमहिलाहिं भमाडिज्जइ, जओ—ता ऊणी ता माणी वियक्खणो ताव

पंडिओ ताव । जाव घरट्ठव नरो, न भामिओ दड्ढमहिलाहिं ॥ १ ॥ तओ तीए मणवंछियपूरणत्थं रयणीए राय-मंदिरे पट्टमहादेवीए आहरणाइं चोरिउं पविट्ठो, तत्थ तेसिं परुप्परालावं सुणमाणो चिट्ठामि, तम्मि समए देवीए राया पुट्ठो—किं चिंताउरा इव लक्खीयह ?, तओ राया भणइ—पिए ! मज्झ सेवगोऽवि वज्जयन्ननिवो अंगुट्ठनि-वेसियजिणपडिममेव नमंसइ, न मम सीसमवि नामइ, अओ मए स दुरप्पा साहणीओत्ति, तीणमालावं सुणिय मज्झ महई चिंता जुत्ता, धन्नो सो निवो, जो न मिच्छदिट्ठिंमि सिरोनमणमित्तेणवि समत्तं मलिणेइ, अहं पुण दुरप्पा, जो जिणमयं जाणंतोवि विडकोडिविनडियाए अईव दुट्ठाए विट्ठंव परिट्ठवणजुग्गाए वेसाए वसणपरवसो धणियं धणं निहणं नेऊण हा हारियमणुजम्मो गयधम्मो चोरियं काउं पविट्ठो, तो इयाणिं तीए कज्जं चइय वेगेण गंतूण तस्स धम्मियसेहरस्स साहम्मियस्स निरवज्जनियनियमपालणवज्जरेहासरिसस्स सिरिवज्जयन्नस्स रण्णो साहेमि एयं सव्वं वुत्तंतं, जहा स सावहाणो होइत्ति वियारिऊण चोरियवावारं परिहरिय तेहिं चेव पएहिं नियत्तिय सिग्घमि-त्थमागंतूण तुम्ह पुरओ मए एयं कहियं, ता जं जुत्तं हवइ तं करिज्जासु । तओ रण्णावि एवं सुणिय तमालिंगि-ऊण साहियं—भद्द ! तं मज्झ साहम्मिओ धम्मवन्धू हियकारओऽसित्ति सम्भाणिय तओ देससुवासिय दुग्गदुग्गब्भन्तरे सयलं लोयं ठावेइ विहियजलधन्निंधणसङ्गहो राया, तयणु गोउरं पिहिय उब्भडसुहडपउणं काऊण रोहगसज्झो होउं पुरमज्झे चेव ठिओ, तम्मि समए कडएणेव सकडएणं दसउरं उरं वेढिय सीहरहो ठिओ, तेण य दूयं पे-

सिय भाणिओ–अरे ! तुरियमागंतूण मज्झ चलणे नमंसिय रायसिरीमणुहवसु, अन्नहा तुमं कीणासवसवत्तीणं विहिस्संति । तओ वज्जायन्नोऽवि इय दूयवयणं सुणिय वागरइ, अरे–दूय मह सव्वहा नत्थि रज्जेण कज्जं, निरवज्जा चेव होउ मे नियममेरा, किं पुण ? मह देउ धम्मदुवारं, जेणाहमन्नत्थ गन्तूण नियनियमधुरं धरेमि, तओ सो दूओ पत्त-पच्चुत्तरो नियपहुणो पुरओ गन्तूण सव्वं तव्वइयरं वागरइ । तओ सुट्ठुयरं सो रुट्ठो तप्पुरिं रुन्धिय ठिओ। इय देव ! तुम्ह पुरओ देसुव्वसणकारणं मए निवेइयं, अहुणा उण अहं नियकज्जसाहणत्थं तुरियं वच्चेमि जइ होइ तुम्हाणमाएसो, तओ रामोऽवि तस्स कडिसुत्तयं पसाईकाऊण विसज्जेइ । तयणु रामो लक्खणकुमारमेवमाइसइ–वच्छ ? गच्छामो दसउरं पिच्छामो चुज्जं, तस्स य साहम्मियस्स विपक्खपराभूयस्स साहिज्जं विहिय अतुल्लसाहम्मियवच्छलपुण्णमज्जिणेमो, न एरिससमो अन्नो धम्मलाहो, जओ—साहम्मियाण वच्छल्लं, कायव्वं भत्तिणिब्भरं। देसियं सव्वदंसीहिं, सासणस्स पभावगं ॥ १ ॥ तओ दसउरबाहिं सिरिचंदप्पहसामिपासाए गया । तत्थ लक्खणादेविनंदणपडिमं वंदिऊण खणं ठिया, लक्खणो उण भोयणट्ठं पुरमज्झे पेसिओ, कमेणं भमंतो रायपासायं पत्तो, तत्थ वज्जयन्नेण पिक्खिऊण नियसूयारा आइट्ठा, एयस्स महापुरिसस्स भोयणं कारावेह, तओ लक्खणेण भणियं–अम्हं सामी सभज्जो बहिं चिट्ठइ, तम्मि अजिमिए नाहं भुंजामि, तओ राया सव्वेसिं कए मणुन्नमाहारं दावेइ, सोऽवि तं गहिय रामपासंऽगओ, कयभोयणो रामोऽवि वन्नेइ वज्जयन्नं–अहो महाणुभावस्स महिच्छया, तं अयाणमाणेणावि अम्हेसु एवं व-

वसियं, ता नूणं अम्हेहिंपि तस्स साहिज्जं करणिज्जं, तओ लक्खणो इमं रामवयणं सुणिय तक्खणा चेव सीहुइ गओ सीहरहसगासं, तत्थ तमेवं वागरइ—अहो सीहरह ! अहं सायरपज्जंतमहीसामिणा दासरहिणा सिरिभरहभूमिवइणा तुम्ह पासे पेसिओ, भो ! तए किमत्थं वज्जयन्नेण सह जुद्धमारद्धं ? अओ मुंच समरसंरंभं, वच्च नियनयरं, अन्नहा न ते जीवियं, इइ सुणिय सीहरहो पडिभणइ—भो दूय ! भरहो एयस्स गुणागुणं न याणइ, जमेसमऽज्ज सेवगोऽवि होऊण पणाममित्तंपि न करेइ, ता कहं दुट्ठमेयमविणासिउं मुंचामि ?, अन्ना का इत्थत्थे भरहस्स तत्ती ? तओ सोमित्ती भउडिवियडभालउडो हक्कइ—अरे ! जइ भरहरण्णो आणमवमन्नेसि, ता मज्झ आणाए एएण सद्धिं चएसु वेरं, इहरा कयंतदंतजंततरं भवंतं खिविस्सामि । तओ तेण एवमक्खित्तो सरोसारत्तनित्तो नियभडे आइसइ—रेरे इमं मम सत्तुमित्तं अप्पसत्तुं गिण्हह मारह २, सिग्घं बंधिऊण मज्झ चलणाणं पुरओ आणेह, एवं तेणं ते आइट्ठा सन्नद्धबद्धकवया जोहसंघाया तेण सह जुज्झिउं पउत्ता । तओ तेण ते करयलचवेडपायतलपहारेहिं जज्जरिया समाणा जरिणुव्व केऽवि महिमंडलं पडिया केऽवि जमपुरपन्थिया जाया केऽवि रुहिरुग्गारपरंपराहिं अलत्तयरसेहिं व भूमिमंडलमंडणकारणत्तणं पत्ता केऽवि भग्गसगड्डुव्व चूरियंगोवंगा ठिया केऽवि पञ्चाणणदंसणउत्तट्ठहरिणुव्व दिसोदिसं नट्ठा । तओ सीहरहो तहा दट्ठूण मयमत्तदन्तिखन्धमारुहिय तं पइ जुज्झिउं लग्गो सयलबलकलिओ, लक्खणोऽवि तक्खणा अत्ताणयं पबलपरबलवेढिअं पलोइय पलयकालुव्व भीसणो आलाणखम्भमुम्मूलिऊण घरट्टविवरमज्झन्तर-

पडियचणयनियरुव्व उव्वरियसिन्नं चुन्नयन्तो सिंहुव्व सिंहारवं कुणन्तो जाव चिट्ठइ, ताव पुरगोउरदारोवरि ट्ठिओ वज्जयन्ननिवो तं वेरिबलपलयं पलोयन्तो विम्हियविप्फारियनयणो नियसामन्तमन्तिणो उल्लवेइ—भो भो! पिच्छह पिच्छह अच्छरियं, जं एगागिणा केणावि वीरसेहरेण समिरेणेव घणाघणं सयलमवि पराणीयं विहडियं, ता मन्ने एस कोऽवि देवो विज्जाहरो सिद्धो वा, इय भणन्तस्स तस्स सहसा सीहरहो करिक्खन्धाओ पाडिऊण पच्छाहुत्ते भुयदण्डे काऊण चेलंचलेणं बन्धिऊण रज्जुनियंछियवसहुव्व पुरओ काउं नीओ रामसगासे, तओ भत्तुणो भिक्खं देहित्ति करुणस्सरं विलवन्तीओ तस्सन्तेउरिओ [illegible] तत्थेवागयाओ, सीहरहोवि पच्चभिनाऊण रामं भूलुलियभालयलो विन्नवेइ—सामिय! न मए इत्थ तुम्हे आगया विन्नाया, ता पसीयसु, अवराहं खमसु, जं च तुब्भे आइसह तं तहेव कुणेमि, रामोऽवि तं पइ जंपइ—मम धम्मसाहम्मिएण वज्जयण्णराएणा समं कुणसु संधिं, तम्मि समए वज्जयन्नोऽवि आगंतूण रामं सोमित्तिसीयासमेयं साहम्मिओत्ति करे जोडिय कुसलं पुच्छइ, रामोऽवि तग्गुणरंजिओ तमेवं विन्नवइ—साहम्मियस्स सच्चपइन्नस्स जिणाणाधारगस्स धण्णस्स परमबन्धवस्स तुज्झ कुसलेणं अम्हाणं कुसलमेव वट्टइ, तओ रामो तेसिं परुप्परं कंठालिंगणेण पीइं कारवेइ, हयगयरहसहियमद्धरज्जं च सीहरहाउ वज्जयन्नस्स दावेइ। तओ दसउरसामिणा वणमाला नाम नियधूया सोमित्तिणो परिणाविया। तयणु सव्वेऽवि हरिसिया नियनियट्ठाणेसु संपत्ता—सो वज्जयन्नो परिपालिऊणं, नियं वयं दंसणसुद्धिजुत्तं। रामित्तु सत्ते कयभत्तचाओ,

दिवं गओ गच्छिहिही य सिद्धिं ॥ १ ॥ एवं चरित्तं सिरिवज्जयण्णरण्णो मणुन्नं परिभाविऊणं । कायस्स सुद्धीइ कुणेह जत्तं, सियंगणाऽऽलिंगइ जेण सिग्घं ॥ २ ॥ कायशुद्धौ वज्रकर्णकथा । इति रुद्रपल्लीयगच्छगगनमण्डनदिनकरश्रीगुणशेखरसूरिपट्टावतंसकश्रीसङ्घतिलकसूरिविरचितायां सम्यक्त्वसप्ततिकावृत्तौ तत्त्वकौमुदीनाम्न्यां त्रिशुद्धिस्वरूपनिरूपणो नाम चतुर्थोऽधिकारः समाप्तः ॥ चतुर्थं शुद्धित्रयस्वरूपद्वारमुक्त्वा—पञ्चमं दोषपञ्चकपरिहारद्वारमाह—

दूसिज्जइ जेहि इमं, ते दोसा पंच वज्जणिज्जा उ । संका कंख विगिच्छा परतित्थिपसंससंथवणं ॥२८॥

व्याख्या—दूष्यते—दोषत्वमापद्यते यैरिदं—सम्यक्त्वं ते दोषा-दूषणानि, कतिसङ्ख्याः ? पञ्च-पञ्चप्रमाणा वर्जनीयाः-परिहरणीयाः, यतो निर्दूषणमेव वस्तु सद्भिरुपादीयते सदूषणं च मुच्यत इति भावः । तन्नामान्याह—शङ्का काङ्क्षा विचिकित्सा परतीर्थिप्रशंसा परतीर्थिकसंस्तवनमिति गाथार्थः ॥ २८ ॥ एषां स्वरूपमग्रेतनगाथाभिर्ग्रन्थकारः प्रथयन् प्रथमं गाथापूर्वार्द्धेन शङ्कालक्षणमाह—

देवे गुरुंमि तत्ते अत्थि नवत्थित्ति संसओ संका ।

व्याख्या—'देवे' केवलज्ञानावलोकितलोकालोके विघटितरागद्वेषमोहे सद्भूतार्थवादिनि 'गुरौ' च पञ्चमहाव्रतधरे समशत्रुमित्रे सद्धर्म्मोपदेशदायिनि धर्म्माचार्ये 'तत्त्वे' च जीवादिनवपदार्थस्वरूपनिरूपके सर्वनयसंनिवेशे श्रीमदर्ह-

द्धर्म्मोऽस्ति नवाऽस्तीति संशयः—सन्देहावहा बुद्धिः शङ्का, सा च सर्वविषया देशविषया च, तत्र सर्वविषयाशङ्का अस्ति नवास्तीति धर्मः, देशशङ्का त्वेकैकवस्तुधर्मगोचरा, यथा—अस्ति जीवः परं सर्वगतोऽसर्वगतो वा? सप्रदेशोऽप्रदेशो वेति। इयं द्विधाऽप्यर्हत्प्रणीतप्रवचनेऽप्रत्ययरूपा सम्यक्त्वदूषिका, केवलागमगम्या अपि पदार्थाः अस्मदादिप्रमाणपरीक्षाया निरपेक्षा आप्तप्रणीतत्वान्न सन्देग्धुं योग्याः, यत्रापि क्वचन मोहवशात्संशयो भवति तत्राप्यप्रतिहतेयमर्गला,—यथा—कत्थइ मइदुब्बलेण, तव्विहायरियविरहओ वावि। नेयगहणत्तणेण य, नाणावरणोदएणं वा ॥ १ ॥ हेऊदाहरणासंभवेवि जइ सुट्ठु जं न बुज्झिज्जा। सव्वन्नुमयमवितहं, तहावि तं चिंतए मइमं ॥ २ ॥ अणुवकयपराणुग्गहपरायणा जं जिणा जुगप्पवरा। जियरागदोसमोहा य नन्नहावाइणो तेणं ॥ ३ ॥ किञ्च—सूत्रोक्तस्यैकस्याप्यरोचनादक्षरस्य भवति नरः। मिथ्यादृष्टिः सूत्रं, नः प्रमाणं जिनाभिहितम् ॥ १ ॥ अत एव शङ्का परिहार्येति गाथापूर्वार्द्धार्थः, भावार्थस्तु श्रीमदाषाढभूतिदृष्टान्तादवसेयः, सचायम्—

इहैव भारते वर्षे, हर्षोत्कर्षकरी सताम्। पैरैरयोध्याऽयोध्याऽस्ति, स्वःपुरीजित्वरी श्रिया ॥ १ ॥ तस्यामन्येद्युराजग्मुः, श्रीआर्याषाढभूतयः। सूरयो भूरिनामानोऽनूचानश्रेणिशेखराः ॥ २ ॥ शस्यशिष्यपरीवारा, देशनामृतवर्षिणः। त्रिगुप्ताः पञ्चसमिता, रत्नत्रयविभूषणाः ॥ ३ ॥ युग्मम्। यो योऽनगार आहार—परिहारं करोति हि। तं तं निर्जरयामासुस्ते निर्वेदकिरा गिरा ॥ ४ ॥ तान् कृतानशनांस्तेऽथ, व्याहार्षुरिति सूरयः। सुरभूयमितैर्भूयो, देयं

स्वं दर्शनं हि नः ॥ ५ ॥ तथेति प्रतिपेदाना, अपि ते स्वःपुरीं गताः । वैयग्र्यात्सुरकृत्यानां, न ददुर्दर्शनं गुरोः ॥६॥ एकदैको बहुमतः, शिष्यः पुष्यन् विरागताम् । कृताशनपरित्यागः, सूरिभिः प्रार्थितो भृशम् ॥ ७ ॥ यत्त्वया वत्स ! वेगेन, गतेन त्रैदशं पदम् । अवश्यमेत्य देयं नो, दर्शनं स्वं महाशय ! ॥ ८ ॥ यतिः कृतप्रतिज्ञोऽपि, दिवोऽभ्येत्य न दर्शनम् । गुरुभ्यः प्रददे दिव्यभामिनीभोगलालसः ॥ ९ ॥ स तादृग्ज्ञाततत्त्वोऽपि, ही सूरिः कर्मयोगतः । व्यचिन्तयदिति व्यक्तं, परलोककथा वृथा ॥ १० ॥ यदि हि स्यात्परो लोको, मच्छिष्याः कृतसङ्गराः । तदेत्य दर्शनं दद्युस्तस्मान्नास्ति खपुष्पवत् ॥ ११ ॥ शरीरादपरो नास्ति, जीवोऽयं मूढकल्पितः । अत एव मृतः शिष्यो, नादान्मे कोऽपि दर्शनम् ॥ १२ ॥ जीवासद्भावतो नूनं, परलोको न विद्यते । तस्मादयं व्रतक्लेशः, सह्यते कस्य हेतवे ? ॥ १३ ॥ परस्परविरुद्धैस्तु, कृतं मे दर्शनान्तरैः । त्रिधास्येऽतः परं स्त्रीणां, दर्शनं निर्वृतेः कृते ॥ १४ ॥ उक्तं च—प्रियादर्शनमेवास्तु, किमन्यैर्दर्शनान्तरैः ? । प्राप्यते येन निर्वाणं, सरागेणापि चेतसा ॥ १५ ॥ द्रव्यलिङ्गिगणं सुप्तं, मुक्त्वा दुर्वासनावशात् । निःससार निशायां स, ही दुरन्ता विमूढता ॥ १६ ॥ अथ स क्षुल्लकामर्त्यः, प्रयुक्तावधिना गुरुम् । मत्वोज्झितव्रतं मार्गे, विचक्रे ग्राममेककम् ॥ १७ ॥ तत्पार्श्वे नृत्यमत्यन्तं, कान्तमारभते स सः । तत्पश्यन्नेकपादेन, तस्थौ सूरिः स्थिराशयः ॥ १८ ॥ दिव्यप्रभावतस्तृष्णाक्षुधे—नैव विदन्नयम् । षण्मासीमतिचक्राम, प्रेक्षणीयधृतेक्षणः ॥ १९ ॥ विसृष्टे प्रेक्षणे चैष, प्रस्थितस्य गुरोः पुरः । बालकं पृथिवीकायनामकं

पथ्यदर्शयत् ॥ २० ॥ भूषणैर्भूषितं दृष्ट्वा, तं सूरिरजने वने । अध्यायदस्यालङ्कारैर्भोगान् भोक्ष्येतरां हृतैः ॥ २१ ॥ जिघृक्षुर्भूषणान्यस्य, यावत्प्रासारयत्करम् । तावत्तेन बभाषे स, कथामेकां शृणु प्रभो ! ॥ २२ ॥ अलङ्कारास्त्वदायत्ताः, पश्चादपि विभो ! मम । ततः स तेनानुज्ञातः, पृथ्वीकायशिशुर्जगौ ॥ २३ ॥ क्वापि ग्रामे कलाशाली, कुलालः ख्यातिमानभूत् । मृत्तिकोद्भूतभाण्डाद्यैरपुषत्स कुटुम्बकम् ॥ २४ ॥ अन्यदा स खनन् खानिं, पतन्त्या च तयाऽधिकम् । समाक्रान्त इति स्माह, तटस्थितनरं प्रति ॥ २५ ॥ अदां यया बलिं भिक्षां, धिनोमि च कुटुम्बकम् । सा मामाक्रामति क्षोणी, जातं शरणतो भयम् ॥ २६ ॥ सोऽहं दस्युभयात्पृथ्वीकायनामा कुमारकः । शरणं त्वां प्रपन्नोऽस्मि, त्वं मां मुष्णासि चाधुना ॥ २७ ॥ रे दारक ! विदग्धोऽसीत्युक्त्वा छित्त्वा च तद्गलम् । सूरिर्गृहीतालङ्कारैः, स्वं पात्रं समपूपुरत् ॥ २८ ॥ प्रस्थितोऽथापरं बालं, स पुरो वीक्ष्य साभृतिम् । तस्य भूषामुपाहर्तुं, करं व्यापारयत्कुधीः ॥ २९ ॥ सोऽपि तं प्रति दृष्टान्तमेकं वक्तुं प्रचक्रमे । तालाचरः पटुर्वाचाऽभवत्पाटलनामकः ॥ ३० ॥ विवेश सोऽन्यदा गङ्गां, गन्तुमिच्छुः परं तटम् । तस्यां चोपरि वृष्ट्याऽभूत्तदा पूरो दुरुत्तरः ॥ ३१ ॥ स्रोतसा ह्रियमाणं तं, तीरसंस्थोऽखिलो जनः । विलोक्याभाषतात्यन्तस्मितपूतरदच्छदः ॥ ३२ ॥ हे प्राज्ञ ! पाटलाभिख्य !, गङ्गा त्वां वहते ततः । किञ्चित्सूक्तं पठेतर्हीत्युक्तस्तैः सोऽप्यवोचत ॥ ३३ ॥ बीजानि येन रोहन्ति, जीवन्ति च कृषीवलाः । म्रियेऽहं तस्य मध्यस्थो, जातं शरणतो भयम् ॥ ३४ ॥ पाटलस्येति वृत्तान्तमु-

त्वोचे तं स दारकः । अप्कायाख्यस्य मेऽप्येवं, बभूव तव संश्रयात् ॥ ३५ ॥ तस्याप्यामोच्य स ग्रीवां, गृहीत्वाऽऽभरणानि च । गच्छन् पुरस्तादद्राक्षीत्तेजःकायाह्वयं शिशुम् ॥३६॥ भूषणान्याददानोऽसौ, सूरिणेन न्यवार्यत । ऊचे च कथ्यमानं त्वं, शृणुष्वैकं कथानकम् ॥ ३७ ॥ आश्रमे क्वाप्यभून्मूलफलाशी तापसाग्रणीः । अग्नित्रितयमाढ्या, पोषयामास सोऽनिशम् ॥ ३८ ॥ अन्यदाऽभ्रकालेनोद्दीपिना जातवेदसा । दग्धं स स्वोटजं दृष्ट्वा, तटस्थानूचिवानिति ॥ ३९ ॥ यं तर्पयाम्यहं शश्वन्मध्वाज्यैर्जातवेदसम् । स ददाहोटजं मेऽद्य, जातं शरणतो भयम् ॥ ४० ॥ यद्वा केनापि हि व्याघ्रभीत्याऽग्निः शरणं श्रितः । दग्धं तदङ्गं तेनैव, जातं शरणतो भयम् ॥ ४१ ॥ तन्ममापि प्रभो ! जातमग्निकायस्य सम्प्रति । विज्ञोऽसीति ब्रुवन् भूषामादात् छित्त्वा स तद्गलम् ॥ ४२ ॥ चतुर्थो दारकोऽदर्शि, गच्छताऽग्रेऽथ सूरिणा । सोऽप्यूचे मुष्यमाणस्तं, कथामेकां शृणु प्रभो ! ॥ ४३ ॥ महाबलः पुमानेको, नीरोगः सुभगाग्रणीः । खातिकागाधपानीयतरणप्रवणः सदा ॥ ४४ ॥ कोऽपि तं वातभग्नाङ्गं, दण्डधारिणमब्रवीत् । दृढाङ्गः पूर्वमासीस्त्वमधुना यष्टिभृत्कथम् ? ॥ ४५ ॥ सोऽप्यूचे पवनो योऽभूद्ग्रीष्मर्त्तौ सुखकृन्मम । भज्यते तेन कायोऽयं, जातं शरणतो भयम् ॥ ४६ ॥ ममापि वायुकायस्य, जज्ञे तत्साम्प्रतं प्रभो ! । प्राग्वदेतं प्रजल्पन्तं, सोऽमुष्णाच्छ्रमणब्रुवः ॥ ४७ ॥ प्रस्थितोऽग्रे ततोऽद्राक्षीत्पञ्चमं दारकं पुरः । भूषणाच्छेदिनं सूरिं, प्रति सोऽप्यवदत् कथाम् ॥ ४८ ॥ खगश्रेणिनिवासस्य, विशालस्य तरोरधः । प्ररूढा तं लता सर्वं, वेष्टयामास मूलतः ॥ ४९ ॥

तामारुह्य क्रमात्सर्पः, प्रासवांस्तत्तरोः शिखाम् । तत्र नीडस्थितान् पक्षिपोतान् भक्षितवानयम् ॥ ५० ॥ पक्षिणोऽन्ये स्फुरत्पक्षा, उड्डीयागुस्तरून् परान् । उद्दिश्य तं तरुं चोचुरेवं शोकभयातुराः ॥ ५१ ॥ स्थितमस्मिंस्तरौ कालमेतावन्तं सुसुखम् । मूलोत्थभुजगीभोगाज्जातं शरणतो भयम् ॥ ५२ ॥ तद्वनस्पतिकायस्य, संघृसं मेऽपि पक्षियत् । इत्याख्यातोऽपि तस्याऽऽदादपूर्वबद्भूषणानि सः ॥५३॥ ततः सूरिः पुरो गच्छन्नन्यं बालं न्यभालयत् । तद्भूषणजिघृक्षुं तं, सोऽप्यूचे शृणु मे वचः ॥ ५४ ॥ भगवन् ! भरतेऽत्रास्ति, श्रीवसन्तपुरं पुरम् । जितशत्रुर्जितशत्रुर्भूपालस्तदपालयत् ॥ ५५ ॥ अन्यदा परचक्रेण, वेष्टितेऽस्य पुरेऽभितः । वैरिमारणतो भीतान्, विशतोऽन्तर्जेनङ्गमान् ॥ ५६ ॥ पौरैर्निष्काश्यमानांस्तांश्छुत्तिभीत्या पुराद्बहिः । उदासीनैर्जैनैः कैश्चिद्विलोक्येति प्रजल्पितम् ॥ ५७ ॥ युग्मम् । मध्यस्थिता जनाः क्षुब्धा, बहिस्तात् प्रेरयन्ति वः । दिशं भजत मातङ्गा ! जातं शरणतो भयम् ॥ ५८ ॥ यद्वा कापि पुरे राजा, दिवा दृष्टं पुरोधसा । रात्रौ स्वयं च मुष्णातीतिज्ञात्वा जनता जगौ ॥ ५९ ॥ चौरः स्वयं नृपो यत्र, पुरोधा भण्डकः पुनः । तत्पौराः ! काननं यात, जातं शरणतो भयम् ॥ ६० ॥ अथवाऽऽसीत्पुरे कापि, यज्ञकर्त्ता त्रिविक्रमः । स सरोऽचीकरच्चारुनीरं पालिद्रुशालितम् ॥ ६१ ॥ पालिप्ररूढवृक्षान्तःकुण्डेषु नरकेष्विव । अग्निभ्रयं जुहावायं, परमाधार्म्मिकायितः ॥ ६२ ॥ छेदं छेदं स्वहस्तेन, जुह्वन् स नृपशुः पशून् । स्वं पातकैर्नभो होमधूमैश्चाविलमातनोत् ॥ ६३ ॥ स पापीयान् द्विजस्त्वार्त्तध्यानान् मृत्वा छगोऽजनि । रेमे च स्वसुतैः सार्कं,

तैश्च यज्ञं चिकीर्षुभिः ॥ ६४ ॥ नीयमानः स होमार्थं, भीतो मेमेस्वरच्छलात् । व्यर्थं भवद्वयं जातमितिव्यक्तमची-
कथत् ॥ ६५ ॥ मध्येकोऽतिशयज्ञानी, मरणार्त्तस्य तस्य सः । तत्पुत्राणां च बोधार्थमुच्चारेति भारतीम् ॥ ६६ ॥
आरोपिताः स्वयं वृक्षाः, खानिता खातिका स्वयम् । सरोऽकारि स्वयं चाज !, किमु बूत्कुरुषेऽधुना ? ॥ ६७ ॥
तद्वचःश्रवणाज्जातजातिस्मृतिरसायजः । तं सर्वं स्वकृतानर्थं, जानन् मौनमशिश्रियत् ॥ ६८ ॥ तन्मौनहेतो-
राश्चर्यं, पृच्छतां तत्तनुभुवाम् । स जगौ जगदानन्दी, वृत्तान्तं सर्वमादितः ॥ ६९ ॥ तादृग्यज्ञादिकृत्येषु, प्रसक्त-
स्येदृशी गतिः । कथं स्यादिति ते प्रोचुः ?, कमपि प्रत्ययं वद ॥ ७० ॥ मुनिः स्माह गृहस्यान्तर्दर्शयिष्यत्यसौ
निधिम् । नीतस्तैस्तत्र पादाग्रसंज्ञयाऽदीदृशच्च तम् ॥ ७१ ॥ इतिप्रत्ययभाजस्ते, तत्सुताः श्रावकव्रतम् । भेजुः
छागोऽप्यनशनान्, मृत्वाऽगात्रिदशालयम् ॥ ७२ ॥ श्रितस्त्वां शरणं तस्मात्त्रसकायाभिधोऽस्म्यहम् । त्वमेवाशरणं
जातो, लुण्टन्नाभरणानि मे ॥ ७३ ॥ अपूर्वं तव पाण्डित्यमरे ! डिम्भेत्युदीरयन् । आच्छिद्य तदलङ्कारान्, सूरि-
श्चिक्षेप पात्रके ॥ ७४ ॥ पुरो व्रजन्नजितार्क्षीं, कङ्कणादिविभूषणाम् । साध्वीमेकां समालोक्य, दुष्टधीरवदत्स ताम्
॥ ७५ ॥ दधाना कुण्डले हारं, कटकौ मुद्रिकास्तथा । दृक्पथाद्व्रज मे दूरं, शासनोड्डाहकारिके ! ॥ ७६ ॥
तयाऽप्यूचे स आचार्यः, श्रमणोऽसि गणी गुणी । ज्येष्ठार्य ! प्रोच्यतां मेऽद्य, किमेतद्भाजनेऽस्ति ते ! ॥ ७७ ॥
अपि सर्षपमात्राणि, परच्छिद्राणि पश्यसि । आत्मनो बिल्वमात्राणि, पश्यन्नपि न पश्यसि ॥ ७८ ॥ मर्मण्येवं तया

षिद्धो, मौनी स प्राचलत्पुरः । तत्रैकं दृष्टवान् भूपमभ्यायान्तं बलान्वितम् ॥ ७९ ॥ नत्वा तेन महीशेन, भक्तार्थं स न्यमन्त्र्यत । भूषणान्येष मा पश्यत्विति मेने न तद्वचः ॥ ८० ॥ तत आकृष्टवान् पात्रं, धरित्रीशस्तदा हठात् । अतर्जयच्च तं सूरिं, भ्रूभङ्गकुटिलाननः ॥ ८१ ॥ हहा त्वया हताः किं ते, सर्वेऽपि मम दारकाः ? । अलङ्कारा निरीक्ष्यन्ते, तेषां यद्भाजने तव ॥ ८२ ॥ विलक्षवदनं राज्ञो, भीतभीतं स्वकर्मणा । सूरिमूचे क्षुल्लकस्य, रूपं कृत्वा सुरोऽथ सः ॥ ८३ ॥ मा भैरिदं दारकादि, त्वद्बोधाय मया कृतम् । गणधार्यपि चारित्रत्यागी जातः कथं वद ? ॥८४॥ सोऽप्यूचे प्रीतिमान् भक्तः, कृतसन्धोऽपि नागतः । यत्त्वं तेन मम भ्रान्तिः, सजज्ञे सायमे विधौ ॥ ८५ ॥ तद्धर्मशङ्कापोहाय, ततः स क्षुल्लकामरः । दर्शयित्वा निजं रूपं, सूरिमेवमवोचत ॥ ८६ ॥ अभङ्गुरमहाभोगनिरताः सततं सुराः । नैवायान्ति विना हेतुं, सुदुर्गन्धाविलामिलाम् ॥ ८७ ॥ षण्मासीं प्रेक्षमाणेन, प्रेक्षणं निर्म्मितं मया । विविदे न त्वया तृष्णाक्षुदादि रसिकात्मना ॥ ८८ ॥ दिव्योऽयं विषयग्रामः, सङ्गीतादिः सुदुस्त्यजः । विहाय त्रिदशैरत्र, कथमागम्यते ? विभो ! ॥ ८९ ॥ तस्मात्त्वयाऽर्हते मार्गे, शङ्कापङ्कानुलेपनात् । सम्यग्दर्शनमालिन्यं, न विधेयं कदापि हि ॥ ९० ॥ यद्यज्जिनेश्वरैः प्रोक्तं, तत्तथैवेति चेतसि । धार्यमाचार्य ! निर्वाणरमा त्वां वृणुते यथा ॥ ९१ ॥ इत्थं प्रबोध्य स्वगुरुं प्रमादिनं, स त्रैदशं धाम जगाम निर्जरः । गच्छं समाश्रित्य स सूरिपुङ्गवोऽप्याराध्य दीक्षां कृतकृत्यभागभूत् ॥ ९२ ॥ इत्यार्याषाढभूतेः श्रमणगणपतेश्चारु चित्रं चरित्रं, पुण्यत्वी-

यूषयूषद्रवमिव नियतं श्रोत्रपात्रैर्निपीय । शङ्कादोषापहारात्तनुत भवभृतोऽर्हन्मते सन्मतिं भो !, येन त्रैलोक्यलक्ष्मीः श्रयति झगिति चः सर्वदाऽऽनन्ददात्री ॥ १३ ॥ आशङ्कायामार्याषाढकथा । आद्यं शङ्कादोषमुक्त्वा द्वितीयं काङ्क्षालक्षणं दूषणं गाथोत्तरार्द्धेनाह,

कंखा कुमयभिलासो दयाइगुणलेसदंसणओ ॥ २९ ॥

व्याख्या—काङ्क्षा कुमताभिलाषः–अन्यान्यदर्शनग्रहणेच्छा कस्माज्जायते ? 'दयादिगुणलेशदर्शनात्' क्वापि कमपि जीवदयादिकं गुणमवलोक्य तदेव दर्शनमाकाङ्क्षति, सा च द्विधा-सर्वविषया देशविषया च, तत्र सर्वविषया सर्वपाखण्डिधर्म्माकाङ्क्षारूपा, देशाकाङ्क्षा त्वेकादिदर्शनविषया यथा–सुगतेन भिक्षूणामक्लेशको धर्म उक्तः स्नानान्नपानविलेपनाच्छादनशयनीयादिषु सुखानुभवनद्वारेण, तथा–परिव्राजकलौकायतिकब्राह्मणादयोऽपि विषयानुपभुञ्जाना एव परलोकेऽपि सुखेन युज्यन्त इति साधीयानयमपि धर्मः । एवमाकाङ्क्षाऽपि परमार्थतोऽर्हत्प्रणीतागमानाश्वासरूपा सम्यक्त्वं दूषयतीति गाथार्थः ॥ २९ ॥ भावार्थस्तु जितशत्रुनृपमतिसागरमन्त्रिदृष्टान्तात् ज्ञेयः, स चायम्—

अस्ति स्वस्तिमत्समस्तसम्पदावासं वस्वोकसारासङ्काशं सज्जनावदानप्रवरं वसन्तपुरं नाम नगरम्,–यत्रोच्चसौधशृङ्गाग्रजाग्रद्ध्वजपटोच्चयः । स्वर्नदीनीरसम्पृक्तो, बुधैरपि न लक्ष्यते ॥ १ ॥ तत्र यथार्थनामा जितशत्रुर्महीमहेन्द्रो राज्यं पालयति स्म–यस्यासिः स्वाधिनाथस्य, जगद्विजयसम्भवाम् । प्रशस्तिं शस्तवर्णौघैर्व्यनक्तीव निरन्तरम् ॥ २ ॥

तस्य चाभूत्प्रभूतविचारचातुरीलहरिसागरो मतिसागरो नाम मन्त्रीश्वरः—उपायचतुरा यस्य, धिषणा सर्वतोमुखी । रोहाभयकुमारादिप्रतिभावर्णिकायते ॥ १ ॥ अन्यदा सुधर्म्मासाधर्मिकायां सामन्तामात्यमण्डितायां सभायामासीनस्य महीनस्य प्रतिहारनिवेदितः कश्चिदश्वव्यवहारिकस्तेजोभटजकाम्बोजपारसीकवाह्लीकप्रभृतिनीवृत्समुद्भूताश्चतुरतरगतिपराभूतपुरुहूतवाजिनो वाजिनः समादायाजगाम । राजाप्यश्वपरीक्षादक्षतया शेषानशेषानश्वानसारान् परिहृत्य चिन्तामण्याद्यावर्त्तयविवर्त्तमनोहरं चपलचपलाविलासहासकारिगतिप्रसरं हिमकरकिरणधवलं तुरगयुगलं जग्राह । ततस्तद्वंहःपरीक्षेक्षणाय क्षणादश्ववारमानितयाऽवमत्यामात्यादिराजलोकप्रतिषेधोक्तिं स्वयं मूलामात्येन सह राजा वाजिनमारुह्य वाह्यालीमहीतलमलञ्चकार सारसैन्यपरीवारः । तत्राधोरितवल्गितोप्लुतप्लुतोत्तेजितोत्तेरितमण्डलीभ्रमादिगतिदर्शनचमत्कृते राजलोके सति राजामात्यौ वेगवत्तादर्शनाय दत्तकशाप्रहारावधरीकृतपवनजवनाभ्यां खेलवत् दूरीकृतस्वचक्राभ्यां स्वभावचक्राभ्यां कुशिष्यवद्विपरीतशिक्षिताभ्यां ताभ्यां तार्क्ष्याभ्यां क्वाप्यमानुषे दत्तदैन्ये शून्येऽरण्ये पातितौ । श्रमक्षुत्पिपासाविधुरितशरीरौ मूर्च्छामतुच्छामनुभूय शिशिरसमिरप्रेङ्खोलनाप्तचैतन्यौ सर्वतः प्रसारितनयनौ संसारमिव दुरन्तकान्तारमसारतरुनिकरपरिपूरितमवलोकयन्तौ परासुभूततुरगौ व्यालाद्यवलोकनकान्दिशीकौ जलफलनिभालनाय पर्यटन्तौ क्वापि स्वजीवितव्यमिव निर्झरमेकमापतुः । तत्र स्नानपानीयपानादिना स्वस्थचित्तौ तन्निकटवर्त्तिफलमूलकन्दाद्याहारयन्तौ दैवस्थितिचिन्तनेन मनो धीरयन्तौ कियन्तमपि समयं

गमयामासतुः । अथ तत्सैनिका अपि क्रमेण शोधयन्तः प्रभूततरैर्वासरैर्निजस्वामिनौ तत्रावापुः । ततस्तावपि सैन्ययुतौ समन्तात्कृतप्रवेशमहोत्सवे स्वपत्तने प्रविविशतुः । ततो राजाऽरण्यजया क्षुधया पीडितो जडतया कान्दविकानादिदेश—मत्कृते चणकचणकवल्लाद्यारभ्य मोदकादिसकलरसवतीभेदैः सर्वरसाहारपाकः करणीयः, यथाऽहं सर्वाहाररसास्वादमनुभवामि चिरकालेन । ततः सूपकारा अपि पृथक् पृथक् सर्वान्नपाकमाधाय राज्ञः पुरो ढौकितवन्तः । सोऽप्यत्यन्तक्षुत्क्षामकुक्षिः स्वदेहस्थितिमजानानः श्राद्धोपविष्टवाडव इव वडवाग्निरिव च सर्वग्रसनेनाप्यधृतिर्मांसदाहारादिकमन्यान्यरसोत्तरतया स्वैरमाहारयन्नसुर इव न तृप्तिमाप । ततो जठरान्तरेऽमान्तमप्याहारमतिलोलुपतया स्वपनान्तर्निक्षिप्याङ्गुल्यादिनाऽतोऽप्यतश्चम्पयन्सौहित्यसौख्यमश्नुते स्म, तस्मात् समुद्भूताजीर्णेन तूर्णमेवोत्पन्नगूढविसूचिकाविधुरितकाय इतस्ततो वेल्लनादिनाऽप्यसञ्जातसातोऽनन्यसामान्यां वेदनामनुभूयार्तध्यानपरो नृपः सद्यो विपद्य दुर्गत्यतिथितामभजत् । अथ, यथार्थनामा मतिसागरो मन्त्री चिकित्सादिक्रियाकुशलः स्वशरीरस्थितिं जानन् वमनविरेचकादिना शोधनमाधायोचिताहारस्वीकारेण वपुः पुष्णन्नारोग्यश्चिरकालं सुखभाग् बभूव । अत्रोपनयः—यथा राजामात्यौ तथा संसारिणो जीवाः, तत्र ये किमपि तपश्चरणादिकबाह्यगुणमात्रमप्यालोक्यान्यान्यदर्शनाकाङ्क्षिणः पवनप्रेरितध्वजपटा इवावस्थानमलभमानाः, ते ह्याहारलम्पटनृपवदप्राप्ततृप्तयो दुर्गतिभाजनं भवेयुः, ये तु विनिश्चितपरमार्थाः क्रियाकल्पविहितशुद्धयः सम्यक्त्वलब्धनिर्णीतगुणदूषणा निःसारतयाऽपह-

स्तितापरदर्शना: तेऽमास्त्रवत्परमसुखभाज: स्यु: । श्रुत्वेति भूमिपतिमन्त्रिचरित्रमत्रा–काङ्क्षाख्यदूषणमिदं परिहृत्य सम्यक् । सम्यक्त्वशोधनविधावधिकं यतध्वं, येन श्रिय: शिवपुरस्य वशीभवेयु: ॥ १ ॥ काङ्क्षायां नृपमन्त्रिकथा । द्वितीयमाकाङ्क्षादूषणमुक्त्वा तृतीयं विचिकित्सादोषं गाथापूर्वार्द्धेनाह–

विचिगिच्छा सफलं पइ संदेहो मुणिजणम्मि उ दुगंछा ।

व्याख्या—विचिकित्सा– जिनवचनाराधनफलं प्रति सन्देह:, सा हि सत्यपि युक्त्यागमोपपन्नेऽर्हद्धर्म्मेऽस्य महत्तपस: क्लेशस्य सिकताकणकवलवन्नि:स्वादस्यायत्यां फलसम्पद्भविता ? अथ क्लेशमात्रमेवेदं निर्जराफलविफलमिति ?, उभयरूपा हि क्रिया विलोक्यन्ते–सफला निष्फलाश्च, कृषीवलादीनामिव तथेयमपि सम्भाव्यते । यदाह—अवरपुरिसा जहुचियमग्गचरा घडइ तेसि फलजोगो । अम्हेसुं धीसंघयणविरहओ न तहा तेसि फलं ॥१॥ इति विचिकित्सा भगवद्वचनानामविश्वासरूपत्वात्सम्यक्त्वदोष:, इयं तु शङ्कातो भिद्यते, शङ्का हि सकलपदार्थभाक्त्वेन द्रव्यगुणविषया, विचिकित्सा तु क्रियाविषयैव, अत: सफलं प्रति सन्देह:, यद्वा मुनिजनेषु जुगुप्सा, सा च सदाचारमुनिविषया, यथा– अस्नानेन प्रस्वेदजलबिन्दुक्लिन्नमलत्वाद्दुर्गन्धवपुष एते, को दोष: स्यात् ? यदि प्रासुकवारिणाऽङ्गप्रक्षालनं कुर्वीरन्निति । अत इयमपि भगवद्धर्मानाश्वासरूपत्वात्सम्यग्दर्शनदोष इति गाथापूर्वार्द्धार्थ: ॥ भावार्थस्तु शुभमतीदृष्टान्तेन निष्टङ्क्यते—

तथाहि—जंबूदीवे दीवे भारहखित्तस्स माणदंडुवमे । सिरिवेयड्ढगिरिंदे, जोयणपणवीसउव्विद्धे ॥ १ ॥ पन्नासं विच्छिन्ने, भूमीओ दस य जोयणे गंतुं, । तावइयं विच्छिन्नं, सेणिजुयं अत्थि सुपसत्थं ॥ २ ॥ जुयलम् । तत्थ य दाहिणसेणीविभूसणं गयउरं महानयरं । जयसूरो जयसूरो, तं पालइ खेयराहिवई ॥ ३ ॥ सयलंतेउरतिलया, विलया तस्सासि सुहमईनाम । तीइ समं भुंजंतो, भोए राया गमइ कालं ॥ ४ ॥ अन्नदिणे सुरलोया, चविऊणं कोवि सम्मदिट्ठि सुरो । सुहमइकुच्छीसरसीमरालळीलं समुव्वहइ ॥ ५ ॥ तग्गब्भवसा संजायदोहला पुच्छिया पिएणेसा । पभणइ अट्ठावयमाइएसु तित्थेसु गंतूणं ॥ ६ ॥ पिय ! तुमए सह गंधाइएहिं पडिमाउ जिणवरिं-दाणं । भावेण पूइऊणं पूरेमि मणोरहं निययं ॥ ७ ॥ जुयलं । इय सुणिय खयरराया भज्जं आरोविउं विमाणंमि । अट्ठावयगिरिसिहरे संपत्तो देवपूयकए ॥ ८ ॥ पणसद्दनायपुव्वं ण्हवणं काऊण नट्टगीयजुयं । वरगंधेहिं विलेवइ जिणघरपडिमा नरिंदपिया ॥ ९ ॥ पूरियमणोरहा सा जा गिरिणो उत्तरेइ हरिणच्छी । ता घाणिंदियदुसहं, अग्घाइ वणे दुरभिगंधं ॥ १० ॥ विम्हियहियया दइयं, पुच्छइ सा एरिसंमि वणसंडे । सुरहितरुकुसुमरम्मे, दुग्गंधो कीस उच्छलइ ? ॥ ११ ॥ खयरो तं पइ जंपइ, दइए । पुरओ मुणिं सिलावट्टे । उड्ढिगभुयं दिणयरे, नि-विट्ठदिट्ठिं न पिच्छेसि ? ॥ १२ ॥ एयस्स महारिसिणो, खरकरकिरणोहतावियतणुस्स । पिच्छिलमलदुग्गंधो, समंतओ पसरइ वणम्मि ॥ १३ ॥ सा साहइ सव्वं चिय जिणभणियं सुंदरं न उण एयं । जं फासुयसलिलेणं, मुणीण

ण्हाणं न आइट्ठं ॥ १४ ॥ रागावि भणइ दइए!, मा तं साहेसु एरिसं वयणं । जं मुणिणो सयसुइणो, वरिस-जलपूयसव्वंगा ॥१५॥ साविहु भणेइ पिययम! मुणिअंगं तहवि फासुयजलेणं । खालसु जेण दुगंधो, नासेइ कयायरा-हुव्व ॥ १६ ॥ इय तन्निब्बंधेणं, खयरो पउमिणिपुडेहिँ निज्झरओ । आणिय फासुयसलिलं, पक्खालइ जइवरस्स तणुं ॥ १७ ॥ तत्तो जायपमोओ, दइयासहिओ स खेयराहिवई । वरगन्धेहिँ विलेवइ, मुणिवइणो सव्वमवि अंगं ॥ १८ ॥ वंदिय ते दोवि मुणिं, पवरविमाणं चडित्तु वेगेणं । आयासम्मि भमंता, तित्थाइ नमंति भावेणं ॥ १९ ॥ पुणरवि तम्मि पएसे, समागया जत्थ सो मुणी आसि । तत्थ अपिच्छंती सा, भणेइ पिय! दीसइ न साहू ॥ २० ॥ तेणवि सा पडिभणिया, स एस दीसेइ दड्ढकीलुव्व । सामलियसव्वगत्तो, मुणीसरो भमरनियरेहिं ॥ २१ ॥ जं अम्हेहिं विलित्तो, सिरिखंडाईहिं सुरहिगंधेहिं । नूणं तेण महप्पा, चंदणरुक्खुव्व भसलेहिं ॥ २२ ॥ फुल्लंध-एहिं गंधंधएहिं धइऊण सुरहिवणकुसुमे । परिवेढियपीडिज्जइ, इहागुणो अवगुणो जाओ ॥ २३ ॥ हद्धी मयमसेहिं अकज्जकज्जुज्जएहिं अम्हेहिं । दुक्खम्मि ठविय साहुं, अप्पा नयरम्मि पक्खित्तो ॥ २४ ॥ तो खयरो वेगेणं, मुणिंददेहाउ भमरविंदाइं । बहुदुहसज्जणयाइं, निद्धाडइ नियकुकम्माइं ॥ २५ ॥ तम्मि समयम्मि मुणिणो, तं दुसहपरीसहं सहंतस्स । घाइचउक्के खीणे, केवलनाणं समुप्पन्नं ॥ २६ ॥ तत्तो चउव्विहसुरा, केवलमहिमं कुणंतया मुणिणो । गंधोदएण सहियं, वासिंसु सिरे कुसुमवुट्ठिं ॥ २७ ॥ जयसूरखेयरोविहु, दइयासहिओ नमित्तु

मुणिपाए । वज्जरइ खमाहु सामिय ! जं दुच्चरियं कयं म्हेहिं ॥ २८ ॥ पडिजंपेइ मुणीविहु खेयर ! मा खेयसायरे पडसु । कम्मं जं जेण कयं, तं पावइ जं सुए भणियं ॥ २९ ॥ "कडाणं कम्माणं पुव्विं दुचिण्णाणं दुप्पडिकंताणं वेइत्ता मुक्खो, नत्थि अवेइत्ता, तवसा वा झोसइत्ता" । पिच्छिय जो मलमइलं मुणिं मणे कुणइ जिनमयदुगंछं । सो दूसियसम्मत्तो, भवे भवे पावइ दुगंछं ॥ ३० ॥ जे संजमसलिलेणं, सम्मं पक्खालियंतरंगमला । आयास-फलिहसरिसा, ते च्चिय निम्मलयरा भुवणे ॥ ३१ ॥ इय मुणिवयणं सुणिउं, संभंतमणा सुहमई भणइ । भयवं ! पावाइ मए, दुगंछिया हा तुमे पुव्विं ॥ ३२ ॥ इय सा सं निंदंती, पुणो पुणो मुणिवरं तु खामंती । पडिभणिया मुणि-वइणा, मा वच्छे ! खेयमुव्वहसु ॥ ३३ ॥ एवं निंदंतीए कम्मं खवियं तयं तए सव्वं । किंपुण एगभवेणं अवस्स-भुत्तव्वयं अत्थि ॥ ३४ ॥ तत्तो सम्मं सुणिउं केवलिणो धम्मदेसणं खयरो । तं नमिय पियाजुत्तो संपत्तो नियय-नयरम्मि ॥ ३५ ॥ सो पालिय पव्वज्जं, निरवज्जं गहिय मरिय जयसूरो । सोहम्मे उववन्नो, तद्देवी सुहमईवि हुया ॥ ३६ ॥ तत्तो सा चविऊणं, सुरपुरनयरम्मि सीहरहरण्णो । जाया जाया मयणावलित्ति नामेण विक्खाया ॥ ३७ ॥ स च्चिय रण्णो इट्ठा जं एईए चइत्तु सयरिंदं । वरिओ सयंवरम्मी पयचारीवि हु सिणेहेणं ॥ ३८ ॥ तीए पिएण अइसयपिएण विसए पभुंजमाणीए । साहुदुगंछाजणियं, सहसा तं कम्ममोइन्नं ॥ ३९ ॥ उच्छलिओ दुग्गंधो, वणरहियाओऽवि तीइ देहाओ । जेण सयलोवि लोओ थुत्थुत्ति कराविओ अहियं ॥ ४० ॥ तीए तारिस-

गंधं, नियवि निवो नियमणम्मि अइदुहिओ। विज्जाणं दंसेइ तेवि असज्झत्ति मुत्तु गया ॥ ४१ ॥ तत्तो अरण्णमज्झे, पासाए ठाविया अबीया सा। रण्णा तीए रक्खणकए भडा चउदिसं ठविया ॥ ४२ ॥ किं खेएण कएणं, अवस्सभु(त्त)वयम्मि पावम्मि ?। ता सहसु न छुट्टिज्जइ पलायमाणेहिं कम्माओ ॥ ४३ ॥ एवं सा धीरंती, अप्पाणं जाव चिट्ठइ दुहत्ता। ता पासायगवक्खे, कीरजुयं नियइ निवदइया ॥ ४४ ॥ रयणीएँ पढमपहरे, कीरीए वल्लहो इमं भणिओ। किंपि अपुव्वं साहसु, कहाणयं मणविणोयकए ॥ ४५ ॥ तीए वयणं सुणिउं, हियए मयणावलीवि चिंतेइ। सुट्ठु सुईए वुत्तं, खेयविणोओ मयावि जओ ॥ ४६ ॥ कीरेण तओ कीरी भणिया, पियए! दुहा कहा होइ। चरिया व कप्पिया वा ता भण कीए मणिच्छा ते ? ॥ ४७ ॥ तीए वुत्तं पिययम! चरियं चरियं कहेसु सो भणइ। आसि जयसूरखयरो, तब्भज्जा सुहमई नाम ॥ ४८ ॥ जिणपूयं काऊणं, अट्ठावयपव्वयम्मि पियसहिया। पुव्विं विहियदुगंछा, पच्छा पूएइ सा साहुं ॥ ४९ ॥ पालिय सावयधम्मं, सोहम्मे सा सुरी समुप्पन्ना। चविय तओ मयणावलिनामा निवल्लहा जाया ॥ ५० ॥ मयणावलीवि एवं, पुव्वभवं सुयमुहाओ सोऊणं। संजायजाइसरणा, अप्पाणं निंदए सुइरं ॥ ५१ ॥ तत्तो साहइ कीरी, सा कत्थ वसेइ संपयं नाह!। सो आह तुज्झ पुरओ, एसा मयणावली दइए! ॥ ५२ ॥ पुव्वभवे अन्नाणा दुगंछिओ जं मुणी तओ पावा। दुस्सहदुगंधदेहा, संजाया इत्थ जम्मम्मि ॥ ५३ ॥ जइ एसा सत्तदिणे, सम्मत्ते निच्चला तिसंझमवि। गंधेहिँ जिणं पूयइ, तो मुचइ दुरभिगंधाओ

॥ ५४ ॥ तं सोउं सुयवयणं, तुट्ठा मयणावलीवि चित्तंमि । नियआहरणं पुरओ, निक्खिवई कीरमिहुणस्स ॥५५॥
तो सुयमिहुणे सहसा, नयणाणमगोयरत्तणं पत्ते । सा परिभावइ हियए, कहं सुओ मुणइ मह चरियं ? ॥ ५६ ॥
एयं सुयवुत्तंतं, पुच्छिय नाणिं विणिच्छयं काहं । पूएमि सुगंधेहिं, पढमं भत्तीइ ताव जिणं ॥ ५७ ॥ इय वीमं-
सिय पूयं, कुणमाणिए सुगंधवत्थूहिं । देहाओ तीइ नट्ठो, दुग्गंधो दुट्ठसुमिणुव्व ॥ ५८ ॥ मयणावलीवि नाउं,
दुग्गंधं जिणसरीरओ भट्ठं । अमंदामयतायपत्तजिरहियव संवुत्ता ॥ ५९ ॥ आरक्खनरेहि तओ, निवई
वद्धाविओ महाराय ! । देवीए पुण्णेहिं, दुग्गंधो देहओ नट्ठो ॥ ६० ॥ तं कण्णामयपाणं, काउं वयणं च पीइ-
दाणेणं । तोसिय ते नरनाहो, देवीए सन्निहिं पत्तो ॥ ६१ ॥ तं तहरूवं दट्ठुं, परमाणंदोहसंगएणिमिणा । आरो-
विय गयखंधं, देवी नियगेहमाणीया ॥ ६२ ॥ तीए जा नरनाहो, आगमणमहूसवं करावेइ । उज्जाणपालएणं तावेवं
नमिय विन्नत्तो ॥ ६३ ॥ देवामयतेयमुणीसरस्स तुम्हं मणोरमारामे । जायं केवलनाणं, लोयालोयप्पयासयरं
॥ ६४ ॥ देवीएँ तओ राया, विन्नत्तो हियय‌दइय! अइरम्मं । जं ऊसवस्स मज्झे, एयं परमूसवं जायं ॥ ६५ ॥
ता गंतूणं पणमह मुणिपयकमलं तओ निवो हिट्ठो । मयणावलीसमेओ, संपत्तो केवलिसमीवे ॥ ६६ ॥ पणमिय
मुणिपयकमले, सपरियणो नरवरो समुवइट्ठो । केवलिणो धम्मकहं, सुणेइ अइसावहाणमणो ॥ ६७ ॥ लद्धावसरा
मयणावलीवि पुच्छेइ नाणिणं नमिउं । भयवं ! सो को कीरो, ? दुहिया पडिबोहिया जेणं ॥ ६८ ॥ मुणिणा सा

पडिभणिया, भद्दे! जो तुम्ह पुव्वभवभत्ता। देवो आसी सो सुयरूवेण तुहंतियं पत्तो ॥ ६९ ॥ पमुइयहियया पुणरवि पुच्छइ भयवं! सहाइ तुम्हाणं। चिट्ठइ सो सुरकीरो नवत्ति पसिऊण साहेह ॥ ७० ॥ तेणवि भणिया जो तुह पुरओ चिट्ठेइ भूसणसणाहो। सो एसो तियसवरो तुह पुव्वभवस्स पाणपिओ ॥ ७१ ॥ सा जोडियकरकमला तं देवं भणइ साहु उवयरियं। जं जम्मसहस्सेहिवि, तुम्हाउ न ऊरिणं होमि ॥ ७२ ॥ तियसो तं पइ जंपइ, अज्ज-दिणा सत्तमंमि दिवसम्मि। चविउं सुरलोयाओ, खयरसुओऽहं भविस्सामि ॥ ७३ ॥ तत्थ तए पडिबोहो, मह कायवत्ति तीइ सो भणिओ। जइ मह होही नाणं, नूणं तो बोहइस्सामि ॥ ७४ ॥ इय सोऊणं देवो सपरियणो झत्ति सुरपुरं पत्तो। मयणावलीवि निवेयसंगया विन्नवेइ निवं ॥ ७५ ॥ देव! नराइभवेसुं बहुसो विविहाइँ विस-यसुक्खाइं। अणुहवियाइं तहाविहु मणतित्ति न होइ जीवस्स ॥ ७६ ॥ तो सुरभवम्मि भोगा तुम्ह समं नरभ-वम्मिवि पभुत्ता। तो पव्वज्जत्तमियेर्हि, पसीय हे सामि! सिवमग्गं (ग्गे) ॥ ७७ ॥ राया भणेइ सुंदरि! कप्पलयं कहवि पाणिकमलगयं। परिहरइ कोऽवि कुसलो, किं सुविणेविहु कयावि पिए! ॥ ७८ ॥ देवी जंपइ सामिय! मुणेमि नेहाइ तुम्ह विहियाइं। तहवि पसिऊण सिग्घं दिक्खत्थं मं विसज्जेसु ॥ ७९ ॥ तन्नेहमोहियमई पडिवयणं जा न देइ नरनाहो। ता सहसा गुरुपासे, सा पव्वज्जं पवज्जेइ ॥ ८० ॥ बाहजलाविलनयणो पढमं मुणिपुंगवं नमइ राया। दुक्खसग्गरवयणो मयणावलिअज्जियं पच्छा ॥ ८१ ॥ सिरिकेवलिणो पासे सावयधम्मं गहेवि नरनाहो। निय-

नयरे संपत्तो, जिणसासण उन्नइं कुणइ ॥ ८२ ॥ सा समणी समणीहिं, विहरंती सिक्खए दुविहसिक्खं । उग्गतवं च कुणंती मुसुमूरइ पावकम्माइं ॥ ८३ ॥ अह स सुरो चविऊणं, मयंकनामेण खेयरो जाओ । पढिय निरवज्जविज्जो, जुव्वणलीलं समणुपत्तो ॥ ८४ ॥ अह सा रयणीसमए, अज्जा मयणावली ठिया पडिमा । वसहीदुवारदेसे, पलोइया तेण खयरेणं ॥ ८५ ॥ तं पिक्खिऊण सहसा, लद्धावसरेण विसमबाणेणं । सव्वंगं बाणेहिं विद्धो सुहडुव्व समरम्मि ॥ ॥ ८६ ॥ नियरिद्धिं दंसंतो विमाणवासीव वरविमाणगओ । कंदप्पसप्पविसघारिउव्व इय भणइ तं समणिं ॥ ८७ ॥ उप्पलदलसुकुमालं, गयगमणि ! मणोहरं सुराणंपि । तवकढिणकुठारेणं, कीस विणासेसि तणुलट्ठयं ? ॥ ८८ ॥ जइ एएण तवेणं, महेसि मणवंछिया ! इँ भोगाइं । ता मह वयणं सुंदरि ! कुणेसु नियसवणअवयंसं ॥८९॥ खयरिंदकुमारेणं मयंकनामेण रयणमालाए । जंतेण करगहत्थं, पलोइया तं मए इहइं ॥ ९० ॥ ता आरुहसु विमाणं भुंजसु भोए मए समं तरुणि ! । तुह संपत्तीए पुण, चत्ता सा रयणमालावि ॥ ९१ ॥ एवं बहुप्पयारं खयरिंदे चाडुयं कुणंतेवि । तिलतुसमित्तंपि मणं नहु चलियं तीइ झाणाओ ॥ ९२ ॥ पुव्वभवनेहनडिओ जह जह रायं पयासए खयरो । तह तह सा तं तज्जइ परगेहपविट्ठभसणुव्व ॥ ९३ ॥ अणुकूले उवसग्गे, खयरपउत्ते झडित्ति हणिऊणं । सुहझाणरया अज्जा, समज्जइ केवलं नाणं ॥ ९४ ॥ केवलमहिमं देवे, कुणमाणे पिक्खिऊण स मयंको । विम्हियफारियनयणो, पुणो पुणो तं पलोएइ ॥ ९५ ॥ तो भगवईइ भणिओ मए समं खयर ! सुरभवे रमिउं । पुण-

रवि जाओ खयरो, ता कीस चएसि नहु नेहं ? ॥ ९६ ॥ तो संसारियमोहं, चइत्तु नेहं करेसु जिणधम्मे । इय निसुणंतस्स इमं, जाइसरणं खयरस्स ॥ ९७ ॥ तत्तो संवेगमहारसेण संपोसिऊण सुहझाणं । सो उम्मूलइ सहसा किलेसजालं व सिरकेसे ॥ ९८ ॥ अह तच्चलणविलग्गो, सो साहइ नियपयंपियं तुमए । पालंतीए भयवइ ! पडि-उवयारो कओ मज्झ ॥ ९९ ॥ इय खयरो भणिऊणं, सम्मं गहिउं जिणिंदपव्वज्जं । तवखवियसयलकम्मो, संपत्तो सासयं ठाणं ॥ १०० ॥ मयणावलीवि अज्जा, परिपालिय केवलस्स पज्जायं । पक्खालियकम्ममला, सिवसुहसिरि-सोक्खमावन्ना ॥ १०१ ॥ सुहमईए चरियं सुणेउ—मेवं दुगंछं सयथं चए ह । काऊण सम्मत्तसुनिमलत्तं, जहा सिवे वाससुहं लहेह ॥ १०२ ॥ जुगुप्सायां शुभमतीकथा । तृतीयं विचिकित्सास्वरूपमुक्त्वा चतुर्थं मिथ्यादृष्टिप्रशंसा-लक्षणं दोषं गाथातृतीयपादेनाह,

गुणकित्तणं पसंसा ।

व्याख्या—गुणानां- ज्ञानादीनां कीर्त्तनम्—उच्चारणं प्रशंसा—श्लाघा अर्थापत्त्या मिथ्यादृशामिति, सा च द्विधा—सर्वविषया देशविषया च, तत्र सर्वविषया— सर्वाण्यपि कपिलादिदर्शनानि युक्तियुक्तानीति माध्यस्थ्येन स्तुतिः, देश-विषया तु इदमेव बुद्धवचनं साङ्ख्यकणादादिवचनं वा तत्त्वमिति रूपा स्तुतिः । अथ उभयथाऽपीयं सम्यक्त्वदूष-णमिति गाथातृतीयपादार्थः । भावार्थस्तु भीमकुमारदृष्टान्तादवसेयः, स चायम्—

अत्थि सुपसत्थसिरिभरहृखित्तसिरीए निहेलणं कमलपुरं नाम नगरं ।—उप्पन्नमइपवंचा, नूणं जडसंगदूसियं कमला । कमलं परिहरिऊणं, सच्छंदं जत्थ निवसेइ ॥ १ ॥ तत्थारिवीरतिमिरनियरनिरायरणहरिवाहणो हरिवाहणो नाम राया ।—जस्स पयावपयासं, असहंतो कुपुरिसुव्व स हरीवि। ससुरजलरासिमंदिरवासं अज्जवि न मुंचेइ ॥१॥ तस्स सीलाइगुणपरिमलविजयमालई मालई नाम पाणपिया, तीए कुच्छीसरसीए रायहंसो नियवंसावयंसो असमाणदुद्धर-वेरिवीरकउरववग्गवारणभीमो भीमो नाम महाकुमारो, तस्सापरिमियबुद्धिपवंचिणो बुद्धिलमंतिणो तणओ विण-याइगुणरयणमयरहरो मयरहरो नाम परममित्तो । अन्नया पभायसमए भीमकुमारो कुमारुव्व दढपइन्नो वयंसपरिय-रिओ रायसहं पविसिय पिउणो परमभत्तीए पायपउमं नमंसेइ, पिउणावि परमनेहनिब्भरमालिंगिऊण खणमुच्छंग-संठाठियं काऊण उप्पलदलसोमालपाणियलेहिं पायपउमं संवाहयंतो भद्दासणे निवेसिय जाव अणुसासिज्जइ, ताव उज्जाण पालएण कयपणामेण विन्नत्तो राया—देव ! वंदारुविंदारयविंदवंदियपायारविंदो अरविंदो नाम मुणिंदो तुम्ह कुसु-माकरुज्जाणमलंकरेइ । एवं तव्वयणमायण्णिय राया हरिसभरनिब्भरंगो विइन्नपीइदाणो अणेगमंतिसामंतकुमारनाय-रपरियरिओ संपत्तो मुणिपासं । तओ विहिणा सुविहियमुणिजणसमेयं अरविंदनामधेयं मुणिरायं नमंसिय राया निविट्ठो । तओ गुरुणावि तप्पडिबोहणकए पारद्धा धम्मदेसणा,—तहाहि—माणुस्सखित्तवरजाइकुलरूवआरु-ग्गआउसुमई समणुग्गहे य । सद्धाइ संजमसमागमणाणि लोए, चिंतामणिव्व दुलहे लहिउं जएह ॥१॥ देवगुरुधम्म-

तत्तेहिं सुद्धरयणोवमेहिं अणवरयं । जे भूसयंति अप्पं, परमा सोहा हवइ तेसिं ॥ २ ॥ निद्दोसदंसणजुए, जो जइसावयवए सया धरइ । अणुहविय सुरनरसुहे स सिवसिरीए पिओ होइ ॥ ३ ॥ इय गुरुमुहकमलाओ धम्मुवएसरहस्सं सुणिय भीमकुमाराइसमेओ राया सम्मत्तरम्मं सावयधम्मं पडिवज्जिय गुरुपए नमंसिय पासायमागओ । गुरूवि भवपडिबोहणत्थमन्नत्थ विहरइ । एगया नियभवणासीणं बुद्धिमयरहराइचयंसभूसियपासं सूरीण नाणाइगुणे पुणो पुणो वण्णयंतं भीमकुमारं नमिय पडिहारो विन्नवेइ–कुमारसेहर ! पयंडनररुंडमालामंडियगलकंदलो सुरूवो तरुणो एगो कावलिओ दुवारदेसट्ठिओ तुम्ह दंसणं समीहेइ । तओ कुमाराएसेण तेणवि पवेसिओ दिन्नासीसोसमुचियासणासीणो लद्धावासरो जोगिवरो रहम्मि भीमं पइ जंपइ–रायसुय ! कयदुवालसवरिसपुव्वसेवा भुवणक्खोहिणी नाम विज्जा मए साहिया विज्जइ, तं संपइ कसिणचउद्दसीए उत्तरसेवाए साहिउमिच्छामि, तत्थ तुमं साहसियसिरोवयंसं उत्तरसाहगं काउमहिलसामि, न अवरेण सक्कसमेणावि ममेरिसमुवयारं काउं सक्किज्जइ, तो परोवयाररसिय ! पसिय मह मणोरहं पूरेसु । कुमारेणावि पडिवन्नं एयमत्थं सरंतेण–याचमानजनमानसवृत्तेः, पूरणाय बत जन्म न यस्य । तेन भूमिरतिभारवतीयं, न द्रुमैर्न गिरिभिर्न समुद्रैः ॥ १ ॥ तओ कुमारेण सो भणिओ–अज्ज दिणाउ दसमे दिणे सा रयणी ता वच्चसु नियं ठाणं, तओ जोगी भणइ–देव ! तुम्ह पासट्ठिओ चेव चिट्ठिस्सं, तेणऽवि अणुन्नाओ, सो नियसुयसयासे सयणभोयणाइयं कुणंतो नाणाहिं कलाहिं कुमारं रंजंतो चिट्ठइ, कुमारोवि तग्गुणरंजिओ बुद्धिमय-

रहरं पइ जंपइ-वयंस! एयस्स कावालियस्स अउव्वाओ नाणविन्नाणाइयाओ कलाओ दीसंति, जाहिं मणो चमक्कइत्ति, तओ मंतिपुत्तेण वुत्तं,-सामि! मा पासंडिपसंसाए सम्मत्तं कलंकिज्जउ, जओ-मिच्छादिट्ठिनराणं गुणकित्तणरयभरेण निब्भंतं। अह विमलं पिहु मलिणीहवेइ सम्मत्तवररयणं ॥ १ ॥ तओ कुमारेण भणियं-मित्त! न विज्जमाणगुणवण्णणे सम्मत्तब्भंसो, किंतु दक्खिण्णवसओ मए एयस्स किंपि पडिवन्नं कज्जं विज्जइ, तं च जहा तहा कायव्वमेव, भणियं च-छिज्जउ सीसं अह होउ बंधणं चयउ सव्वहा लच्छी। पडिवन्नपालणे सुपुरिसाण जं होइ तं होउ ॥ १ ॥ तओ एवं सुणिय मोणमल्लीणे मंतिपुत्ते रायपुत्तो पासंडिपसंसं न मुंचेइ, पत्ते य किण्हचउद्दसी-दिवसे परियणदिट्ठिं वंचिय करकलियकरालकरवालो भूवालबालो रयणीए अइभीसणे मसाणे तेण पासंडिणा समं गओ। तत्थ जोगिणा मंडलमालिहिऊण मंतदेवयं नमिऊण कवडपडुणा सिहाबंधच्छलेण तं बंधाइउकामेण जाव उट्ठियं ताव कुमरेण संलत्तं-कावालिय! अलमेएण संभमेण, मज्झ नियसत्तं चेव सिहाबंधो किमवरेण?, ता कुणसु नियकज्जं भयवज्जिओ, तओ तप्पासे खग्गमुग्गिरिऊण ठिओ कुमरो, जोगिणावि चिन्तियं-मज्झ ताव सि-हाबंधमाया जाया निप्फला, तहावि एयस्स सीसं हढेण घित्तव्वंति विमंसिय गिरिवराणुगारं विगरालकेसं फूवस-माणसवणं करालकत्तियसणाहहत्थं रुहिरसहस्सोहियसोणियवलयं अइविरूवं रूवं तेण विउव्वियं, कुमरोवि तं तस्स दुव्विलसियं दट्ठूण सिंहुव्व अखुद्दचित्तो जाव खग्गं पउणेइ ताव जोगी धागरेइ-अरे बाल! तुज्झ सीसेण अज्ज कुल-

देविमच्चिऊण मणोरहं पूरेमि, तओ कोवायंबिरनयणो निवनंदणो हक्कइ— रे रे पासंडिपास ! जणंगमाधम ! वीसासविससियनरकयमुंडमालवयरेण सह तुह सीसं छिंदिस्सं, तओ रोसाऊरिएण जोइणा तव्वहणत्थं मुक्का कत्तिया, भीमेणावि कत्तिया नियासिणा पडिखलिय तदंसदेसं हरिब्व आरुहिय चिंतियं—किमेयस्स सीसमसिणा कप्पेमि ?, अहवा न जुज्जए मह एयं काउं, जइ एस मह कहयि सेवं पडिवज्जइ, ता जिण सासणुन्नइं करिय अप्पाणं संसारसागराओ तारेइत्ति मणोमाणसिएण कुमरो तं मुद्धाणंमि वज्जकढिणेहिं मुट्ठिघाएहिं ताडेइ, तओ जोगीवि तं मारिउकामो जाव करयलजुयलेण गहिउमिच्छइ, ताव सो तस्स कण्णकूवविवरंतरे करकलियकरवालो भूवालबालो पविसिय वराडुव्व खरनहरेहिं पहरेइ, तओ जोई दुस्सहसवणवेयणावाउलिओ कडु रडंतो कहंपि कण्णाओ करेण कुमरं चरणे धरिऊण कोहग्गिपलित्तगत्तो कंदुगंपिव गयणंगणे उक्खिवइ, तओ तं पुव्वकयपुण्णप्पभावेण भूमीए अपत्तं चेव कमलक्खा जक्खिणी रयणं व करसंपुडेण गहिय नियभवणं नेइ । तत्थ य भीमो अप्पाणं सिंहासणट्ठियं देवुव्व पिक्खिऊण किमियंति विम्हिओ जाव चिंतेइ, ताव कमलक्खा जोडियकरसंपुडा पुरओ ठाऊण विन्नवेइ— कुमार ! एसा विंझगिरिसमीववत्तित्तणेण विंझाडवी, तीइ गुरुगिरिगुहागयं मणिमयमेयं मह भवणं, एयस्स सामिणी कमलक्खा नाम अहं जक्खिणी, अज्ज उण अट्ठावयपव्वए रिसहेसरपमुहे चउवीसंपि जिणे पणमिय वलमाणा भयंतं कावालिएण गयणयले पक्खित्तं महियले अ निवडंतं गहिय इत्थागया, ता संपयं मयणग्गिपलित्तगत्तं मं

उल्लवेसु नियंगसंगमाभिरूए । तओ मणयं हसिऊण कुमारो वागरेइ,—देवि ! किंपागफलासायणं व परिणामविरसेसु नरयगइगमणमूलमंतेसु धम्मियजणकुच्छणिज्जेसु को सचेयणो विसएसु रमइ ?, जओ भणियं—विसयविसमोहियाणं, काममहागयपणट्ठसत्ताणं । होइ पडणं नराणं, अवस्स बहुवेयणे नरए ॥ १ ॥ अविय—खणमित्तसुक्खा बहुकालदुक्खा, पगामदुक्खा अणिगमसुक्खा, । संसारमुक्खस्स विपक्खभूया, खाणी अणत्थाण उ कामभोगा ॥ १ ॥ एएसु बहुसो सेविएसुवि न कयावि तित्ती होइ, भणियं च—न जातु कामः कामानामुपभोगेन शाम्यति । हविषा कृष्णवर्त्मेव, भूय एवाभिवर्द्धते ॥ १ ॥ तम्हा असुइमए सत्तधाउपिच्छिले मह दड्ढकलेवरे तुह दिव्वदेहाए रायहंसियव्व कद्दमाउलनयरनइल्लसलिले अभिरुइं काउं न जुज्जइ, अओ मुंचसु विसएसु गिद्धिं, कुणसु जिणनाहवयणे सुद्धिं, इय तव्वयणपीऊसपाणगलियविसयपिवासा जक्खणी विन्नवेइ—कुमार ! मह तुह पसायाओ विसयकामाए सुलहा चेव परभवे सुगई, अओ तिहुयणजणपुज्जणिज्जो जिणवरो चेय मह मणे रमउ देवो, सुसाहुणो गुरुणो य । इत्थंतरम्मि कुमरो महुरज्झुणिणा सुयं गुणिज्जमाणं सुणिय देविं पुच्छइ—केसिमेस सवणपिऊसमाणसरिसो महुरज्झुणी ? सावि भणइ—निवनंदण ! इत्थ मुणिणो चाउम्मासखवणधरा परिवसंति सज्झायज्झाणनिरया । अह कुमरो चिंतइ—सुट्ठु जायं, जं इत्थवि मे सुसाहुसामग्गी, अओ एसा आवयावि मह महूसवसमा संवुत्ता, तओ तेसिं पासे रयणिसेसं समइवाहेमित्ति चिंतिय देविमब्भत्थिऊण कुमरो तेसिं समीवं गओ । देवीवि चिंतेइ— पभायसमए मए

सपरियणाए साहवो वंदेयव्वत्ति कुमरोवएसं मणे सुमरंती तत्थेव चिट्ठइ, रायसुओवि गुहामुहनिविट्ठं सूरिं नमंसिय लद्धधम्मलाहो उवविसिय पुच्छइ–भयवं! कहमिमीए अइभीसणाए असणाइविरहियाए अडवीए तुम्हाणमवट्ठाणं?, तओ जाव गुरू किंपि पडिभणइ, ताव कुमरेण गयणंगणाउ उयरंतो कज्जलसामलो अइविसालो जमदंडाणुगारो रत्तचंदणरसविलित्तो एगो भुयदंडो साहूणं पुरओ महीए पडिय कुमारखग्गं मुट्ठिए गहिय नहयले उप्पयंतो दिट्ठो, तओ भीमो संजायकोउहल्लो मणंमि वीमंसेइ– कस्स एस भुओ? किं ममासिणा करिहित्ति उट्ठिऊण गुरुं पणमिऊण हरिव्व कालियनागं विज्जुक्खित्तकरणेण तं भुयमणुगहिय महावेगेण गच्छंतो सचराचरं धरायलं पलोयंतो एगाए अइवियडाए महाडवीए कालियाभवणब्भंतरे महिसवाहिणिं रुंडमालामंडियं एगबाहुरहियपुव्वपरिचियकावालियवामकरगहियएगपुरिससमीवं कालियादेविं पासइ, तओ स भुयदंडो कुमारमुत्तारिय कावालियस्स खग्गं दाऊण दक्खिणखंधे लग्गो, तओ भीमो विचिंतेइ–एस पासंडियपासो किं करिस्सइ? इमस्स करगहियकेसपासस्स पुरिसस्स? तो पच्छन्नो चेव एयस्स विलसियं पलोएमि, पच्छा जं करणिज्जं हविस्सइ तं करिस्सामित्ति कवालिणो पुट्ठिदेसंमि ठिओ निवसुओ। अह पासंडीवि तं पुरिसं पइ साहिक्खेवमुल्लवइ–अरे! सुमरसु इट्ठदेवयं पडिवज्जसु किंपि सरणं, एएणासिणा तुज्झ सीसं छिंदिय कालियाए देवीए पूयं रइस्सं, तओ सोवि नरो जंपइ– भो दुट्ठकावालिय! मज्झ पसत्थासु अपसत्थासु य अवत्थासु सुमरणिज्जो करुणारससायरो भयवं जिणवरो,

तहा केणवि पासंडिपासेण भोलविय कहिंपि नीओ कुलसामी भीमकुमारो य मह सरणमसरणस्स, तओ सहासं जोई तं पइ जंपइ— रे वराय ! तुज्झ पहू मह भएण काउरिसुव पलाणो कहं सरणं होही ?, संपयं कालियाए मह पुरो कहियं— स तुह सरणदाया विंझाडवीए सेयभिक्खूणं पासे चिट्ठइ, तस्स एसो असी, तस्स ठाणे वराय ! तुज्झेव संपइ सीसं छिंदिस्सं, तओ ताणमन्नुन्नमालावमायण्णिय भीमो भीमभीउडविवियडभालयलो चिंतेइ—हा कह- मेस दुरप्पा मम पाणसमाणं सिरं बुद्धिमयरहरं निउंतेइ ?, तओ समुल्लसियपोरिसो कुमरो तं हक्कइ—रे पाव पासंडि- याहम ! संपयं सज्जो होहिही, एस ते सीसं छिंदेमित्ति, तव्वयणं सुणिय सम्भंतचित्तो जोई तं नरमुज्झिय कुम- रसंमुहं खग्गमुग्गिरिय धावेइ, भीमोवि दुवारकवाडघाएण तस्स कराओ करवालं पाडिय दाहिणकरे तं गहिय वामहत्थेण केसेसु गहिय कालीए पुरओ पाडिय हियए पायं दाऊण जाव कावालियसिरं लुणिही ताव काली अंतरे ठाऊण भणइ—हे वीरसेहर ! मा एयं मम वच्छलं मारेहि, जओ एएण मज्झ सत्ताहियसएण नरसिरेण पूया निम्मिया, अज्ज उण अट्ठुत्तरसयपूरणमेएण सिरेण करिय संतोसिहिही, तओऽहं पयडीहोउण जाव सिज्झिस्सं ताव वीराहिवीर! तुमित्थागओ, तो तुहासमसाहसेणऽहं तुट्ठा, वरसु वरं, भीमोवि वागरइ—जइ सम्मं मम वरं देसि, ता तुमं तिगरणसुद्धीए सव्वजीवाणं मारणनिवारणं कुणेसु, तहा—करुणामयं जिणमयं, जइ पुव्विं सेवियं हवे तुमए । ता कुच्छियदेवभवे, परिसए नो पडिज्जासि ॥ १ ॥ तम्हा चय जीववहं, तुह भिच्चा अवि हवंतु दयनिरया ।

अब्बसु लिंगं एमारगु, मुसालं धरसु पम्हरं ॥ २ ॥ तओ अज्जपभिइं मए जीवा अत्तणो जीवुव्व रक्खेयव्वत्ति भणिय तिरोहूया कालिया । अह पणामपरं मंतिसुयमालिंगिय भीमो पुच्छइ–मित्त! कहं तुममेयस्स दुट्ठचिट्ठियं सुणंतोवि वसे पडिओ ?, सोवि साहइ–सामि! सुणेसु, अज्जेव रयणीए पढमे जामे तुम्ह वासभवणं सुन्नं पलोइय पिया पाहरिए वाहरइ–रे तुम्ह सामी अज्ज केण हेउणा इत्थ न पलोइज्जइ ?, तेवि ससंभमं भणंति–जहा केणावि अम्हे जागंतावि मुसिया, तओ सव्वेवि पलोइउं लग्गा, न कत्थवि तुम्हे पत्ता, तो गंतूण पिउणो पुरओ निवेइयं–देव ! केणवि कुमारो अवहरिओ परं न नज्जइ । तओ राया सव्वंतेउरसहिओवाउलीहूओ पलविउं लग्गो, पुरजणो य, तम्मि समए पत्तस्स गत्तं संकमिय कुलदेवयाए संलत्तं–महाराय ! मा अधिइं कुणेसु, तुह नंदणो पावेण जोइणा उत्तरसाहगमिसेण तस्स सीसं गहिउकामेणावहरिओ, पुण्णप्पभावेण तओ नीओ कमलक्खाजक्खिणीए नियभवणे, थोवदिणेहिं चेव महाविभूइए आगंतूण तुम्ह नयणे आणंदिहित्ति जंपिय गया सट्ठाणं देवी । अहं पुण तव्वयणसंवायणनिमित्तं उवस्सुइं गहिउं सगिहाओ निग्गओ, तओ केणवि पुरिसेण वज्जरियं–तुह कज्जसिद्धी झत्ति होउत्ति, पसत्थउवस्सुइवयणसवणरंजिओ जाव चलिओ सगिहाभिमुहं, ताव नट्ठंगएण एएण जोइणा उप्पाडिऊण इहाणीओ, पुण्णवसेण उण तुम्हाण मिलिओ, अओ एस कवाली परमोवयारी मज्झ ता एयं धम्मोवएसदाणेण उवगरेसु । तओ जोईवि जोडियकरसंपुडो भणइ– कुमार ! जो कालीए जीवदयापरिपालणरम्मो धम्मो अंगीकओ,

सुचिय मएवि पडिवन्नो, अओ वरं तप्परूवगो जिणो देवो मे सरणं, परमोवयारकारी भीमकुमारो चेव सामी होउ, एवं ते जाव परुप्परं संलवंति ताव सूरे उइए घोरकरो करी जवक्खो नाम तत्थागंतूण सुंडादंडेण समित्तं कुमारं उप्पाडिऊण नियखंधे आरोविय कालीभवणाओ नहयले उप्पइऊण एगस्स सुन्ननयरस्स दुवारे मुत्तूण सयं कहिंपि गओ। तओ भीमो मित्तं तत्थेव मुत्तूण सयं सुन्नपुरमज्झे वच्चंतो मा मं मारेहत्ति विरसं रसंतं अइसुरूवं एगं पुरिसं वयणकुहरे धरंतं नरसिंहरूवं जीवं पिक्खिय समुप्पन्नकोउगो कारुण्णरसपूरियंगो तं पइ जंपइ–मुंचसु एयं नरवरायं, न जुज्जइ भवारिसाण सुपुरिसाणमेवमकिच्चं काउं, तओ सो मणागमुम्मीलियविलोयणो कुमारं दट्ठूण विगयकोहुव तं नरं मुहाओ गहिऊण चलणहिट्ठओ ठविंत्तु जंपिउं लग्गो–भो भद्द! मए सत्तदिणच्छुहिएण एयं भक्खं लद्धं, कहं चएमि ?, कुमारोवि वागरेइ–भाविभद्द! कयविक्कियकाओ देवुव तुमं लक्खिज्जसि, देवा य ओयाहारिणो हवंति न कवलाहारिणो, जओ भणियं—"ओयाहारा मणभक्खिणो य सव्वेवि सुरगणा चेव। सेसा हवंति जीवा, लोमाहारा मुणेयव्वा ॥ १ ॥" ता एयस्स वरायस्स मरणभयविहुरियस्स सव्वदाणप्पहाणं देसु अभयदाणं, जओ— जो जलहिबिंदुमाणं, जाणइ गयणंमि रिक्खपरिमाणं। सो अभयदाणपुण्णं वण्णेउं सक्कए नन्नो ॥ १ ॥ जीववहपावेण य दुग्गदुग्गइदुक्खाइं बहुसो अणुहवइ जीवो। भणियं च–"पाणिवहो दुक्खफलो, दुक्खणुबंधी भयावहो घोरो। नरयाइतिक्खदुक्खाण कारणं एस खलु पढमो ॥ १ ॥ अइतत्ततउयरसमंसकुट्टियवेयरणीपाणिअं जीवा।

चिरसं रसमाणा पाणिघायफलओ पवज्जंति ॥२॥ करवत्तदारणं सत्थ–घायणं कुंभिपाडणं नरए । असिवत्तछेयणं मूल–भेयणं जीववघायाओ ॥ ३ ॥ खरकाससाससोसाइ–सोसिया माणुसावि दीसंति । अप्पाउया उ विच्छोहियाउ ते जीववहफलओ ॥ ४ ॥ जारिसया नियदेहे, पीडा हणओ न भारओ वावि । तारिसयावि परस्स य,*सत्तवहो तो न कायवो ॥ ५ ॥ तओ सोऽवि करुणारसपूरियंगो भीमं पइ जंपइ–सच्चं चेव तुम्हाण वयणं, परमहमणेण दुरप्पेण पुरा अच्चत्थं कयत्थिओ, तेण चारसहस्संपि चुल्लिगणिमिणा गेम्हे मह हियगाओ न उसरइ, अओ बहुकयत्थणा-पुव्वं वावाइस्सामि, तओ भीमेणुत्तं-- अणुवयारीवि उवयारसारं मुणंतेण भवया एस मुत्तव्वो, जओ—उपकारिणि वीतमत्सरे वा, सदयत्वं यदि तत्र कोऽतिरेकः ? । अहिते सहसापराधलब्धे, सदयं यस्य मनः सतां स धुर्यः ॥ १ ॥ इय अणुसासिओवि तं पुरिसं मारणत्थं पुट्ठिए ठाविय भीमकुमारस्सवि गिलणत्थं कूवविवराणुगारं मुहं पसारिय जाव धावेइ, ताव कुमरेण चरणे गहिय सिरउवरिं चक्कंव भामिज्जंतो खुड्डमसरीरो होउं नीसरिय अद्दिस्सो होऊण तप्पोरिसरंजिओ तत्थेव चिट्ठइ, तओ पत्तजीविएण तेण नरेण सह तद्दिन्नबाहू निवसुओ नयरस्स घरसिरिं पि-च्छंतो कोऊगेण रायभवणं पविसेइ । तत्थ स सत्तभूमियपासायसिहरे पत्तो समाणो निवनंदणो सायरं सागयभ-णिरीहिं पंचालियाहिं दिन्नासणे पुरिससहिओ जाव उवविसइ, ताव नहंगणाओ ण्हाणभोयणाइसामग्गिं पुरओ उइन्नं पासइ, तत्तो पंचालियाहिं ण्हाणत्थं विन्नत्तो कुमरो वागरेइ–मम मित्तं पुरदुवारदेसे चिट्ठइ, तेण विणा किंपि

करणिज्जं न करेमि, तओ ताहिं तक्खणा चेव सोऽवि समाणीओ, ण्हाविओ मित्तेण समं कुमारो, स महुराहारेण भोइओ य, भीमोवि जायकोउहल्लो दुगुल्लपडिछन्ने पल्लंके जाव चिट्ठइ ताव कयंजली पुरो ठाउं एगो सुरो विन्नवेइ–कुमर ? तुम्ह परक्कमेणाहं रंजिओ ता वरसु वरं, तओ भीमोवि तं वागरेइ–जइ तुमं तुट्ठोऽसि, ता कहेसु को तुमं ?, को अवयारो ? किंनिमित्तं पुरं सुन्नं संजायं ?, तओ सुरो भणइ–कुमर ! सुणसु एयं सरूवं, तहाहि–कणयपुरं नाम एयं नयरं, तत्थ कणयरहो राया एस जो तए मारिज्जंतो रक्खिओ, तस्साहं चंडो नाम पुरोहिओ पगईए कडुयभासी अकारणरोसणो, तेण मज्झोवरि सव्वोऽवि पुरजणो वेरमुव्वहइ, न य कोवि मित्तत्तणं पडिवज्जइ, एस रायावि कण्णदुब्बलो अवियारियकज्जकारी य, अन्नया केणावि मज्झ वेरिणा एस एवं वुत्तो जं–तुम्ह पुरोहिओ डुंबीए समं पलित्तो, सोऽवि तव्वयणसवणाणंतरमेव जुत्ताजुत्तमवियारिय दिव्वसुद्धिं मग्गंतोवि सहसा सणेण वेढिय तिल्लेण छंटाविय कडुयमारडंतो पज्जालिओ, तओ कयनियाणो मारिउं सव्वगिलनामओ रक्खसो जाओ, तओ मए सुमरियपुव्ववेरेण सयलंपि पुरलोयं तिरोहिय रुद्दरूवं नरसिंहरूवं विउव्विय जाव एस विडंबिउमारद्धो ताव तए करुणारसरंजिएण नियपोरिससुकरिसं पयासंतेण मोइओ, तओ तुम्ह गुणविम्हिएण मए अदिस्सेण दिव्वसत्तीए परमभत्तीए मज्जणभोयणाइ उवयारो एस कओ, पयडिओय नयरलोओ, ता पसिय समंतओ दिट्ठिपयाणेण पुरं कयत्थीकरेसु, तओ कुमरस्सवि सव्वओ पुरं पलोयंतस्स गयणाओ उवयरंतो नयरगोउरदुवारे चारणसमणो सुरविरइय–

कणयपंकयासीणो दिट्ठिगोयरं गओ । तन्नमंसणत्थं भीमो मित्तसवगिलकणयरहनायरजणसमेओ गओ, मुणिवरं नमिऊण उचियट्ठाणे उयविसिय इय धम्मदेसणं सुणेइ—क्रोधः सन्तापकरः सर्वस्योद्वेगकारकः क्रोधः । वैरानुषङ्ग-जनकः, क्रोधश्चायं सुगतिहन्ता ॥ १ ॥ तओ भो भवा ! जइ सिवपुरगमणं वंछह ता सवहा अणत्थमूलं कोहं चएह, उवसमरम्मे जिणधम्मे पयत्तह, इय सुणिय सवगिलो मुणिं नमिय भणइ—भयवं ! अज्जप्पभिइ कणयर-हनरिंदेण सह मए चत्तो कोहो, एसोवि भीमकुमारो मए गुरुवाराहणीओ, जेणेरिसाओ अकज्जाओ नियत्तिओम्हि । एयंमि समए तत्थ गलगज्जिं कुणंतो एगो गयवरो आगओ, तं रुद्दरसंपिव सक्खा पिक्खिय सहा महाखोभमुव-गया, तओ भीमो तं वप्पुकारिय धीरवेइ, सोऽवि हत्थी हत्थं संकोइय पयाहिणातिगेण सपरिवारमणगाररायं पणमेइ, तओ तवुत्तंतं मुणी वागरेइ, एस महाजक्खो हत्थिरूवधरो कालियाभवणाओ भीमं नियपडिपुत्तयकणयरह-रक्खणत्थमाणीय संपइ नियनयरनयणकए उच्छाहेइ । इय मुणिवयणमायन्निऊण करिरूवं परिहरिय भासुरसुंदीच-लिरकुंडलाहरणो स जक्खो जाओ, तओ भणइ—भयवं ! एवमेव जहा तुम्हेहिं वुत्तं, परं विन्नवणिज्जमिमं सुणेह— जं अहं पुवभवे सम्पत्तसम्मत्तोवि कुलिंगिसंसग्गाओ दूसियदंसणो इह्वि अप्पड्ढियवंतरेसु जक्खो जाओ, तम्हा पसिय मइ सुविसुद्धं सिद्धिसिरिवसियरणं सम्मदंसणमारोवेसु । तओ कणगरहरक्खसाइहिंपि विन्नत्तं—भयवं ! अम्हाणंपि एयस्सेव संमत्तपडिवत्ती होउ, तओ गुरुपायमूले सवे सम्मत्तं पडिवज्जंति । भीमोवि कुलिंगिसंथवाइयारं सम्म-

मालोइय मुणिंदं वंदिय तेण परियणेण परियरिओ कणगरहरायपासायं पत्तो । तओ सामंताइजुएण कणगरहेण रण्णा विन्नत्तो निवपुत्तो—कुमार ! रज्जं जीवियं रिद्धीओ सम्मत्तसम्पत्तीओ य जं मए लद्धाओ स समग्गोवि तुज्झ पसायदुमंकुरो, तम्हा एस किंकरजणो कत्थवि कज्जे वावारिय अणुग्गहेयव्वो, कुमारोवि तं पइ जंपइ—जीवा सव्वे सुहासुहं सकम्मवसओ अणुहवंति, नवरमन्नो निमित्तमित्तमेव होइ, परं तए एसो अत्थो निच्चमेव कायव्वो—"सा-हम्मियवच्छल्ले, जिणवरसुस्साहुसेवणे सययं । परहियकरणे सम्मत्तपालणे चेव जइयव्वं ॥ १ ॥" तओ कयंजलिउडो सपरियणो राया विन्नवइ— कुमार ! जइ तुम्हे इत्थ कइवयदिणे चिट्ठह ता जिणधम्मकिरियासु कुसलो हवेमित्ति सुणिय जाव भीमो पडिवयणं भणिउं लग्गो ताव डमडमंतडमरुयसद्दरुद्दा कावालियसमेया उल्लसिरबीसभुयदंडा कालिया देवी तत्थागंतूण कुमारं नमिय तद्दिन्नासणे उवविसिय एवं कहिउमाढत्ता—तया तुम्हे हत्थिणा अवहरि-ज्जमाणे जाणंतीवि परिणामसुंदरं सुहविवागं मुणिय न तुम्ह सगासमल्लीणा, संपयमहं कज्जविसेसेण तुम्ह नयरं गया, तत्थ तुम्ह मायापियरो पोरलोयसमेया तुह विरहसायरनिमग्गा मए तुम्ह चरियकहणहत्थावलंबणदाणेण समुद्ध-रिया, किंच— अहुणा कयजयउवयारो समित्तो तुम्ह पुत्तो कणगपुरे चिट्ठइ, दिणदुगमज्झेऽवस्समाणेमि तुम्ह पा-संमि इ पइन्नं काऊणमागया । कुमरोवि तव्वयणं सुणिय जाव पत्थाणुम्मुहो जाओ, ताव गयणे भेरिभंभाइवाइत्त-सद्दो समुल्लसिओ, तयणंतरं विमाणपरंपरामज्झठिए महाविमाणे कमलनयणा पलोइया एगा सुरी भासुरसरीरसिरी,

अहो किमेयंति रक्खसो सत्थं गहिय उट्ठिओ, जक्खोवि करयले मुग्गरमुल्लालयंतो सज्जीहूओ, कावालियकलिया कालियावि पयडियदित्तकत्तियाइपहरणा जाया सावहाणा, कुमरो उण असंभंतचित्तो जाव चिट्ठइ, ताव जय जीव चिरं नंद हरिवाहणनरिंदनंदण! इय भणंता देवा कमलक्खाजक्खिणीए आगमणं निवेयंति साचि विमाणाओ उय-रिऊण कुमरं नमिय तद्दिन्नासणे उवविसिय एवं बयासी—साहम्मिय! तया मम संमत्तं दाऊण विंझगुहाए सूरि-पासे तुम्हे ठिया, तओ जाए पभाए अहं सपरियणा मुणिंदपासे गया, तत्थ तुम्भे न पलोइया, तओ ओहिना-णेण इत्थ मए मज्जणभोयणाइ कुणमाणा तुम्हे दिट्ठा, तत्तो कज्जंतरेण खलिया इयाणिं पुण पुण्णजोगेण तुम्ह मुहकमलं पलोइयं। तओ जक्खेण पहाणं विमाणं रइऊण कुमरो विन्नत्तो—सामिय! आरुहसु इत्थ विमाणे, जहा कमलपुरे जाइज्जइ। तओ भीमो उट्ठिय कणगरहरायं विणयपरं तंमि चेव नयरे ठाविय मंतिसुयसमेओ चडिओ विमाणे, तस्स पुरो हरिसुक्करिसेण देवा देवंगणा य नच्चंता तुरगुव्व हिंसंता मयगलुव्व गुलगुलंता भेरीभंभापमुहपंचसद्दनिना-एण गयणंगणं परिपूरयंता निमेसमित्तेण पत्ता कमलपुरासन्नगामं, तत्थ जिणभवणे पूयं काउं कुमारो पविट्ठो, जक्खाईहिंपि दिन्नो समहत्थो पडुपडहतालकंसालमुयंगझल्लरिभेरिढक्कहुक्कत्रंबक्कपभिइवाइत्तनिनायपुरस्सरं, तम्मि समए तहा तेसिं नाओ समुल्लसिओ जहा अत्थाणमंडवसंठिएण राइणा सकन्नेहिमायन्निओ, तत्तो राया मंतियणं पुच्छइ—अज्ज किं कस्सवि मुणिणो नाणमुप्पन्नं? अहवा नयरे कोऽयि महूसवो, जं एस पंचसद्दो सुणिज्जइत्ति

रण्णा वुत्ते समीवगामसामी आगंतूण रायं नमिय विन्नवेइ–देव ! देवदेवीगणजुओ तुम्ह सुओ अम्ह गामे समागओ जिणभवणे पूयं कुणमाणो संमित्तो चिट्ठइ, तं सुणिय राया तस्स सव्वंगाहरणाणि दाऊण पडिहारं भणेइ– आइससु सामन्ताइणो जहा समग्गसामग्गीए कुमरस्स संमुहं गम्मइ । तओ हट्टसोहाइयं काऊण पभायसमए सपरियणो भूधणो तस्संमुहं गंतूण पिच्छइ सक्कमिव इंतं तणयं विमाणट्ठियं, सोऽवि उयरिऊण जणणिजणयाणं पयपउमं नमंसइ, पिउणावि आणंदभरनिब्भरमालिंगिऊण कुमारो मंतिपुत्तजुत्तो करिवरखंधमारोविऊण महूसवपुरस्सरं धवलहरं नीओ, भुत्तुत्तरं पिउणा भीमो वुत्तंतं पुच्छिओ मंतिपुत्ताओ कहावेइ, इत्थंतरे उज्जाणपालएण अरविंदमुणिंदागमणं विन्नत्तो राया, तव्वंदणत्थं पत्थिवोवि भीमाइपरियणपरिवुडो गओ नियउज्जाणे, तत्थ मुणिवरिंदं वंदिय उचियट्ठाणे निविट्ठो, भगवयावि धम्मदेसणाए अणुग्गहिओ, तओ राया संसारुव्विग्गमाणसो भीमं रज्जे ठविय महरिसिपासे दिक्खं गहिय सुहज्झाणाणेलण कम्मिंधणं दहिय संजायकेवलनाणो सिवं पत्तो, भीमनरिंदोवि चिरं जिणसासणं पभाविय जायवेरग्गो पुत्ते रज्जभारमारोविय गहियपवज्जो निट्ठवियअट्ठकम्मो सिवसिरीए आलिंगिओ । भीमस्स एयं चरियं सुणित्ता, पासंडिसंगं सययं चएह । विसुद्धसम्मत्तविभूसियंगा, जहा तुमे सिद्धिसिरिं वरेह ॥ १ ॥ मिथ्यादृष्टिप्रशंसायां भीमकुमारकथा । चतुर्थं मिथ्यादृक्प्रशंसारूपं दूषणमुक्त्वा पञ्चमं मिथ्यादृष्टिपरिचयलक्षणं दोषं गाथाचतुर्थपादेनाह—

परिचयकरणं तु संथवणं ॥ ३० ॥

व्याख्या—तैर्मिथ्यादृष्टिभिरेकत्र संवासात् परस्परालापादिजनितः परिचयस्तस्य करणं तु संस्तवनमिति । एकत्र-वासे हि तत्प्रक्रियाश्रवणावलोकनयोर्दृढसम्यक्त्वस्यापि दर्शनभेदः सम्भाव्यते, किमुत मन्दबुद्धेर्नवधर्मस्य ?, अतस्तत्सं-स्तवोऽपि सम्यक्त्वदूषणमिति गाथार्थः ॥ ३० ॥ भावार्थस्तु सुराष्ट्रवासिश्रावकदृष्टान्ताद् ज्ञेयः ॥

स चायम्—देशे श्रीमत्सुराष्ट्रायां, सर्वराष्ट्रविभूषणे । कोऽपि सुश्रावको जज्ञे, सम्यग्ज्ञानादितत्त्ववित् ॥ १ ॥ दु-ष्प्रापभिक्षे दुर्भिक्षे, प्रवृत्ते तत्र दैवतः । सोऽन्यदा बौद्धसार्थेन, प्रतस्थेऽवन्तिमण्डलम् ॥ २ ॥ स शाक्यैरौच्यतान्ये-द्युरस्माकमुपधिं यदि । मार्गे वहसि तत् तुभ्यं, दद्महे भोजनादिकम् ॥ ३ ॥ तद्वचः क्षुधितः सोऽङ्गीकृत्य तद्भा-ण्डभृत्पथि । व्रजन्नश्रंश्च तद्भावभावितात्माऽभवत्कृशम् ॥ ४ ॥ सौगते शासने प्रीति-मतीव दधतोऽस्य तु । मार्गे यातः समुत्पेदे, रोगोऽसाध्यतमस्तनौ ॥ ५ ॥ अक्षमः सह सार्थेन, गन्तुं पथि स तस्थिवान् । गैरिकारक्तवस्त्रे-णा-च्छाद्य तं सौगता गताः ॥ ६ ॥ सोऽपि दूषितसम्यक्त्वो, रोगतः पञ्चतां गतः । यक्षीभूयावधिज्ञानं, प्रायुङ्क्ता-व्यक्तचेतनः ॥ ७ ॥ मया पूर्वभवे किं किं, कृतं सुकृतमद्भुतम् ? । येन प्रापेदृशी यक्षपदवी सम्पदोज्ज्वला ॥ ८ ॥ रक्तेन वाससाच्छन्नं, तदा स स्वकलेवरम् । मार्गे दृष्ट्वा बहिर्दृष्टिर्ह्येवं पर्यभावयत् ॥ ९ ॥ अनुभावेन भिक्षूणां, लब्धा देवश्रियो मया । तन्वेऽहमपि माहात्म्यमतोऽमीषां हि शासने ॥ १० ॥ वटवासी स यक्षोऽमी, भिक्षवो

भुङ्क्ते मठे । तत्र कङ्कणकेयूर–मुद्राभिर्मण्डितं करम् ॥ ११ ॥ प्रकटीकृत्य शाक्येभ्यो, ददानो मोदकादिकम् । समस्तं कृतवांल्लोकं, सादरं बौद्धशासने ॥ १२ ॥ युग्मम् । तत्प्रभावमदोन्मादप्रोल्लण्ठाः शठचेतसः । अपनिन्द्यं तु निन्दन्ति, भिक्षवो जिनशासनम् ॥ १३ ॥ किमन्यैर्दर्शनैर्लोकाः !, सेवध्वं शाक्यशासनम् । यत्र देवा अपि सदा, सेवाहेवाकशालिनः ॥ १४ ॥ एकदा केऽपि सूरीन्द्रा, विद्यासिद्धा वसुन्धराम् । विहरन्तः समाजग्मुरुज्जयिन्यां महौजसः ॥ १५ ॥ श्राद्धैस्ते बौद्धवृत्तान्तं, ज्ञापिता ज्ञानभानवः । प्रैषिषन् शिक्षयित्वेति, गीतार्थौ द्वौ महामुनी ॥ १६ ॥ सौगतानां मठे हस्तो, यदा निर्याति दैवतः । तं विधृत्य स वक्तव्यो, युवाभ्यामुच्चकैरिदम् ॥ १७ ॥ अहो बुध्यस्व बुध्यस्व, मा मुह्य गुह्यकोत्तम ! । स्मर पञ्चनमस्कारं, पाथेयं शिववर्त्मनः ॥ १८ ॥ मठायातौ यती बौद्धैर्निमन्त्र्येतां मदोद्धुरैः । अन्तःप्रविष्टौ तौ हस्तमद्राष्टां च विनिर्गतम् ॥ १९ ॥ निरुध्य हस्तं तौ व्यक्तमवक्तां गुरुवाचिकम् । तदाऽऽकर्णनतो यक्षः, प्रत्यबुध्यत तत्क्षणात् ॥ २० ॥ अचिन्तयच्च हा धिग्मां, यस्य मे जिनशासने । विज्ञस्यापि कथं मोहोऽभून्मिथ्यादृष्टिसङ्गतः ? ॥ २१ ॥ आविर्भूय ततो यक्षः, सौगतांस्तदुपासकान् । अपरानप्युवाचोच्चैः, श्रूयतां भो ! वचो मम ॥ २२ ॥ अन्ये दर्शनिनः सर्वे मिथ्यारूपाः प्रकीर्त्तिताः । तथ्यमेकं तु विज्ञेयं, श्रीजिनेश्वरशासनम् ॥ २३ ॥ तद्भो मिथ्यादृशस्त्यक्त्वा, श्रयध्वं जिनशासनम् । यथा करतलक्रोडीस्यात् श्रीः स्वर्गापवर्गयोः ॥ २४ ॥ इत्युदीर्य ततो गत्वा, सूरीन्नत्वाऽतिचारजम् । पापमालोच्य जैनं स, मार्गमुद्भाव्य

जग्मिवान् ॥ २५ ॥ निपीय केऽपि तद्वाक्य–मरन्दं मधुपा इव । श्रीमज्जिनमतोद्याने, जगुरर्हद्गुणावलिम् ॥ २६ ॥ श्रुत्वा सुराष्ट्रवणिजश्चरित्रं, कुलिङ्गिसङ्गं त्यजताशु भव्याः ! । येन ध्रुवं दर्शनशुद्धिमाप्य, स्वर्गादिसौख्यैः सुहिता भवेयुः ॥ २७ ॥ मिथ्यादृष्टिपरिचये सुराष्ट्राश्रावककथा ॥

इतिश्रीरुद्रपल्लीयगच्छगगनदिनकरश्रीगुणशेखरसूरिपट्टावतंसश्रीसङ्घतिलकसूरिविरचितायां सम्यक्त्वसप्ततिकावृत्तौ तत्त्वकौमुदीनाम्न्यां शङ्कादिपञ्चदूषणस्वरूपनिरूपणो नाम पञ्चमोऽधिकारः । पञ्चमं शङ्कादिदूषणाधिकारमुक्त्वा षष्ठं प्रभावकाधिकारमाह—

सम्मद्दंसणजुत्तो, सइ सामत्थे पभावगो होइ । सो पुण इत्थ विसिट्ठो, निद्दिट्ठो अट्ठहा सुत्ते ॥ ३१ ॥

व्याख्या—'सम्यग्दर्शनयुक्तः' अतीचाररहितसम्यक्त्वसहितः सामर्थ्ये विद्यमाने–तत्तल्लब्धिविशेषसबलत्वे 'प्रभावकः' श्रीजिनशासनप्रभावनाप्रवीणधिषणो 'भवति' जायते, स पुनरत्र सूत्रे जिनप्रणीतसिद्धान्ते 'विशिष्टः' प्रोद्यसज्ज्ञानादिगुणैः प्रकृष्टोऽष्टधा–अष्टभिः प्रकारैर्निर्दिष्टः–कथित इति गाथार्थः ॥ ३१ ॥ तानेवाष्टौ भेदान् स्पष्टयन्नाह—

पावयणी धम्मकही वाई नेमित्तिओ तवस्सी य । विज्जा सिद्धो य कवी, अट्ठेव पभावगा भणिया ॥३२॥

व्याख्या—प्रावचनिक एकः, धर्म्मकथिको द्वितीयः, वादी तृतीयः, नैमित्तिकश्चतुर्थः, तपस्वी पञ्चमः, विद्यावान् षष्ठः, सिद्धः सप्तमः, कविरष्टमश्चेत्यष्टौ ॥ ३२ ॥ प्रभावकस्वरूपं गाथापूर्वार्द्धेनाह—

कालोचियसुत्तधरो, पावयणी तित्थवाहगो सूरी ।

व्याख्या—'कालोचियत्ति' काले-सुषमदुष्षमादिके उचितं-योग्यं सूत्रं-सिद्धान्तं श्रीपुण्डरीकश्रीगौतमादिवद्धरतीति कालोचितसूत्रधारः 'पावयणीत्ति' प्रवचनं-द्वादशाङ्गं गणिपिटकं तदस्यास्तीति प्रवचनीयुगप्रधानागमः यस्मान्मुक्तिमार्गमिच्छुभिः प्रवचनोक्तपरिशीलने यतनीयं, यदागमः—"जम्हा न मुत्तिमग्गे, मुत्तूणं आगमं इह पमाणं। विज्जइ छउमत्थाणं, तम्हा तत्थेव जइयव्वं" ॥ १ ॥ 'तित्थत्ति' तीर्थं चतुर्विधः श्रीसङ्घस्तस्य वाहकः-शुभे पथि प्रवर्तकः "सूरिः" आचार्यः स्यादिति गाथापूर्वार्द्धार्थः ॥ आद्यं प्रावचनिकस्वरूपमुक्त्वा द्वितीयं धर्मकथिकस्वरूपं गाथोत्तरार्द्धेनाह—

पडिबोहियभव्वजणो धम्मकही कहणलद्धिल्लो ॥ ३३ ॥

व्याख्या—'पडिबोहिय'त्ति प्रतिबोधिताः-मिथ्यात्वनिद्रामुद्रिताः सम्यग्ज्ञानभानुप्रकाशेनोज्जागरिता भव्याः-सेत्स्यन्तो जना-लोका येन स प्रतिबोधितभव्यजनः । ननु यदि भव्या मुक्तिगामिनस्तर्हि समसमयं शिवं न व्रजेयुः?,

सत्यं, सामग्र्यभावान्न निर्वृत्तिमासादयन्ति, यदुक्तं—"सामग्गिअभावाओ, ववहारियरासिअप्पवेसाओ। भव्वावि ते अणंता, जे मुक्खसुहं न पावंति ॥ १ ॥" अभव्यानां तु दूरापास्तैव मुक्तिकथा, अत एव भव्यशब्दोपादानं। 'धम्म कहित्ति' धर्मकथाऽस्यास्तीति धर्म्मकथी 'कहणलद्धिलुत्ति' कथने-व्याख्याने लब्धिर्यस्य स कथनलब्धिकः, कथ्नापि घटप्रदीपवत्स्वयमवबुध्यमानोऽपि न परं बोधयितुं क्षमः अत प्रवचनव्याख्यानार्हः, यस्तु क्षीरमध्वाश्रवादिलब्धिमान् हेतुयुक्तिदृष्टान्तैः परं प्रतिबोधयति स एव धर्म्मकथानुयोगार्हः, यदागमः—जो हेउवायपक्खम्मि हेउओ आगमम्मि आगमिओ। सो समयप्पन्नवओ, सिद्धंतविराहगो अन्नो ॥ २ ॥ अत एव कथनलब्धिक इति विशेषणं युक्तियुक्तमिति गाथोत्तरार्द्धार्थः ॥ ३ ॥ भावार्थस्तु प्रावचनिकधर्म्मकथिकप्रभावकयोः श्रीवज्रस्वामिचरित्रेणैव प्रतन्यते।

तथाहि—अस्त्यपहसितसमस्तक्लेशः श्रीमानवन्तिदेशः, तत्रामन्दसम्पदामादेशस्तुम्बवनामाख्यः सन्निवेशः, तस्मिंश्च यशोधवलिम्ना पराभूतधनदगिरिर्धनगिरिनामा नैगम इभ्यसुतो गुणवसतिर्वसति स्म, स शैशवादपि विज्ञातसर्वज्ञप्रवचनसारो विषयपराङ्मुखो दीक्षाभिमुखो यां यामिभ्यकन्यां पितरावाददाते तां तां न्यवारयत्, यदहं दीक्षामादास्ये, विरागसूचकं वच इत्यपीपठच्च—यस्यां नृत्यति निर्भरं प्रमुदिता माया महाराक्षसी, यस्यां मोह इतस्ततश्चलयति प्रेताधमः प्राणिनः। यस्यां प्रज्वलति स्मराग्निरनिशं तां कोविदः कामिनीं, कल्याणी क इह श्मशानविषमामा-

सेवते कर्हिचित् ? ॥ १ ॥ इतश्च तत्रैव धनपालश्रेष्ठिसुता कृतपरिजनानन्दा सुनन्दा पितरावित्यवादीत्—मां दीयतां धनगिरये येन तं वशवर्त्तिनमातन्वे, तदा सा धनगिरिणा प्रोक्ता—भद्रे ! मा मद्वचोऽन्यथा विद्धि, यत्र च ते भ्राताऽऽर्यसमितः प्राव्राजीत् तत्राहमपि दीक्षां कक्षीकरिष्ये न संशयः । ततस्तन्निशम्य तद्रागाग्रहात्तमेव सोपायंस्त, विवाहानन्तरमेव तामवादीत् धनगिरिः—प्रिये ! संप्रत्यहं प्रतिज्ञातं व्रतमादाय स्वं वचःसफलयामि, सापि तद्वचः श्रुत्वा विषादेनाश्रुमिश्रलोचना तमवोचत्—नाथ ! मामनाथामेकाकिनीं विहाय कथं प्रयातासि ?, ततो मम सहायं सुतमुत्पाद्य यदभिलषितं तत् कुर्याः, अहमयं मोहकर्मोदयाल्लुभ्यत इत्यवगत्य स तया समं भोगान् भुञ्जानः सुतलाभोन्मुखो दिनान्यतिचक्राम, अन्यदा सुनन्दायाः कुक्षिशुक्तौ सुस्वप्नसूचितः श्रीमदष्टापदमहातीर्थयात्रायातश्रीगौतमस्वामिप्रबोधिततिर्यग्जृम्भकामरो दिव्यं वपुरपहाय मुक्ताफलमिवावातारीत्, ततः प्रशस्तसुतलाभमङ्कुलं विज्ञाय धनगिरिः सुनन्दामेवमुवाच—प्रिये ! सलक्षणो विचक्षणः कृतनयना नन्दनो भवत्या भावी, तदवलोकनेन ममापि मोहमहोदधिमज्जनं भविष्यति, यतः—अहह गृही क नु कुशली, बद्धा संसारसागरे क्षिप्तः । यदि बत लभते पोतं, तेनापि निमज्जति नितान्तम् ॥ १ ॥ अतस्तनुजन्मनः प्रागेव प्रव्रजिष्यामीति प्रोच्य कथंचन तां मुत्कलाप्य महामहेन श्रीसिंहगिरिगुरुचरणमूले धनगिरिः प्रवव्राज । सुनन्दापि पूर्णेषु मासेषु प्राचीव प्रद्योतनं सुतमसूत, तत्र सूतिकासदने मदनभामिनीसमानलावण्याः कामिन्योऽन्योऽन्यं मिलित्वैवमालपन्—'यद्यस्य शिशोः पिता न प्राव्रजि-

ष्यत्, तदेदानीमतुच्छं जन्मोत्सवमकरिष्यद्' इति। तासामबलानामालापान् 'श्रवणसबालमतिः स बालः सञ्जात-जातिस्मृतिरिति चिन्तितवान्– कथं मम दत्तनिर्वृतिः सर्वसङ्गविरतिर्भवित्री? सवित्र्यां मन्मोहमोहितस्वान्तायां, अतो मातृदुःखदानमनुचितमपि परमसुखलाभाय क्रियमाणं न दोषपोषाय, तस्मादम्बां तथा क्लेशयामि यथोद्विज्य मामुज्झति 'बालानां रुदितं बल'मिति विचार्य तथा स रोदितुं प्रावर्तिष्ट यथा माता न शेते न भुङ्क्ते नोपविशति न च गृहकर्माणि विधत्ते, एवं दुष्टकष्टाम्भोधिमग्नायास्तस्याः कथमपि षण्मासीमतिचक्राम। अत्रान्तरे पुरीपरिसरोद्याने सपरिकराः श्रीसिंहगिरिसूरयः समवासरन्, प्रवृत्ते च गोचरचर्यायाः समये धनगिर्यार्यसमितमुनी स्वाध्यायं विधाय कृतोपयोगौ गुरुभिरुदीरितौ– वत्सावद्यास्माकं किञ्चिदुत्तमं निमित्तमजनि, ततो गोचरचर्यायां यदचित्तं सचित्तं वा वस्तु लभेतां तत्प्रतिग्राह्यमेवेति गुरुणाऽनुज्ञातौ ज्ञातेयसदनेषु भ्रमन्तौ तौ सुनन्दागृहं प्रविष्टौ। ततः सा करकमलसम्पुटगृहीताङ्गजा दुःखविधुरिता धनगिरिमवोचत्–एष तेऽङ्गजः षण्मासीं यावन्महाक्लेशविवशया मया पालितः, सम्प्रति तु त्वमेनमुपादत्स्व, यथा त्वमपि मद्वत्सुखमनुभवसि, नाहमतः परं पालयितुं क्षणमपि क्षमा, तदनु धनगिरिरवादीत्–भद्रे! यद्येनमहमुपादास्ये तदा पश्चात्तापं त्वमनुभविष्यसि, तस्मान्मैनं वितर, सहसा हि क्रियमाणं कृत्यं सन्तापाय संपनीपद्यते, यतः–सगुणमपगुणं वा कुर्वता कार्यजातं, परिणतिरवधार्या यत्नतः पण्डितेन। अतिरभसकृतानां कर्म्मणामाविपत्तेर्भवति हृदयदाही शल्यतुल्यो विपाकः॥ १॥ एवमुक्ताऽपि सा तस्मादा-

महात्र विरराम, समीपस्थान् साक्षिणश्चाभाषत—अनेन तनयेन सह न मम प्रयोजनं, अत एतज्जनक एवासावमुं गृह्णात्विति तया निश्चिते धनगिरिः साक्षिसमक्षं चिन्तारत्नमिव तं शिशुं गृहीत्वा पात्रबन्धे न्यवेशयत्, ततः स ज्ञानवान् भावश्रमणो जातोऽहमिति रोदनान्न्यवर्त्तत, धनगिरिणा च तद्भारभुग्नभुजेन स सिंहगिरिगुरूणामभ्यर्णमानिन्ये, तेऽपि तं तथा वीक्ष्य तरसोत्थाय भृतपात्रधिया यावत्पात्रबन्धमुपाददते तावत्तं बालमालोक्य महाभारत्वाद्वज्रोऽयमिति जगदे स, ततस्तस्य वज्र इति नाम जगति पप्रथे । ततस्तं सुरकुमारानुकारमुदारलक्षणलक्षिताङ्गं वीक्ष्य सूरय इत्यवोचन्—यदेष प्रवचनाधारो भावीति सम्यग्रक्षणमर्हतीति निश्चित्य गुरुभिस्तपोधनाभ्यः स बालः पालनाय दत्तः, ताभिरपि स्तन्यपानादिहेतवे शय्यातरीभ्यः प्रददे, ततस्ताभिः स्वपुत्राणां स्तन्यपानमण्डनादि यदा यदा क्रियते, तस्यापि तदा तदा प्रासुकविधानेन विधीयते, गुरवोऽपि शिक्षां दत्त्वाऽन्यत्र विजहुः । अथैकदा सुनन्दा नन्दनस्नेहेन शय्यातरगृहेषु याताऽऽयातानि कुर्वती शय्यातरीभ्यस्तमयाचत, ताभिरपि साऽभ्यधीयत—गुरूणामयं न्यासो नान्यस्मै जातुचिद्वितीर्यत इति निषिद्धापि सा प्रत्यहमेत्य तं स्तन्यपानादिकं कारयति स्म । एवं वर्षत्रये व्यतीते सूरयः समेयरुः, तदोभयोरपि पक्षयो राजसमक्षं शिशुहेतवे महान् कलहः समभूतत्, ततो राज्ञा धनगिरिरपृच्छ्यत—किमर्थमेनं दारकं सुनन्दायै न वितरसि ?, तेनाप्यभाणि—महाराज ! न मया स्वयमेव जगृहे, किं त्वनयैव जनसमक्षमस्मभ्यं वितीर्णः, ततोऽत्र को विवादः ?, नृपोऽपि तदाकर्ण्य सर्वं जनं तत्पक्षपातिनमवगत्य

किमपि हृदि विचिन्त्य च सभासमक्षमेवमादिक्षत्–भो भोः शृणुत न्यायं, येनाकारितः सन्नेष शिशुरभ्येति तस्यैवैष नान्यस्य, किन्तु पूर्वंभक्ता जननी समाहूयत्वेनं, ततो जनक इति । तदनु माता राजसभायां भक्ष्यभोज्यनानाक्रीडनकफलानि वस्तूनि मन्मनोल्लापपटुचटुसकरुणागद्गदस्वरपूर्वं दर्शं दर्शं समाह्वास्त नृपवामपार्श्ववर्त्तिनी, वज्रोऽपि दुष्प्रतिकारौ मातापितराविति विदन्नपि परं सङ्घोल्लङ्घनपातकमनन्तसंसारपरिभ्रमणाय जायत इति मत्वा तद्वस्तु दशाऽपि परमयोगीव न पश्यति स्म, तदनु मेदिनीश्वरदक्षिणपार्श्ववर्त्तिश्रीसङ्घमध्यवर्त्तिना धनगिरिणा चारित्रमहाराजविजयविजयन्तीं रजोहरणमुद्रां दर्शयित्वा शिशुरभाष्यत–वत्स ! यदि ते दीक्षाग्रहणेऽभिलाषस्तदैनां जिनमुद्रामादत्स्व, ततो वज्रो वज्रवन्मोहमहीध्रं विदार्य प्रव्रज्यामादातुकामः सङ्घोन्नतिं च चिकीर्षुस्तामग्रहीत्, सङ्घोऽपि जयति जयति जिनशासनमिति सानन्दः सिंहनादमकार्षीत्, सुनन्दाऽपि विगतानन्दा मनस्येवं विममर्श–मम पतिभ्रातृपुत्रा गृहीतचारित्राः, अतोऽहं केन हेतुना गृहवासे वसामीति जातसंवेगा सप्तक्षेत्र्यां धनं नियुज्य श्रीसिंहगिरिसूरिपादमूले प्रवव्राज, वज्रोऽपि त्यक्तस्तन्यपानो विहाराक्षमतया व्रतिनीनामुपाश्रये गुरुभिः स्थापितः, स च सोपाङ्गामेकादशाङ्गीं ताभ्यः पठन्तीभ्यः समाकर्णयन् प्रज्ञानिधिः सुखेनैवाग्रहीत्, क्रमेणाष्टाब्ददेश्यो गुरुभिर्दीक्षयित्वा स्वसमीपं स्थाप्यत। तेऽपि क्रमेण विहरन्तोऽवन्त्यामुद्यानमठेऽत्रस्थिताः, तदा वारिदे वर्षति भिक्षाग्रहणपराङ्मुखेषु साधुषु वज्रमुनिपूर्वभवसुहृत्तिर्यग्जृम्भकदेवास्तद्देशवर्त्तिनस्तं मुनिमालोक्य जहृषुः, अचिन्तयंश्च–कियानस्य संयमे परिणाम इति ते

तत्परीक्षार्थं वणिक्सार्थं विकृत्यावात्सुः, तत्र रसवत्यादिरचनामासूत्र्य गुरून् प्रणिपत्य च वज्रं प्रातराशाय निमन्त्रया-
मासुः, सोऽपि गुरुभिराज्ञप्तो विहर्तुमुद्यतो नभसःपतन्तीरम्बुकणिका विलोक्य व्रतभङ्गभीरुर्व्यावर्त्तत, तेऽपि देव-
मायया वृष्टिमवरुध्य पुनराग्रहं विधायाहारग्रहणाय तं न्यमन्त्रयन्, सोऽपि दत्तोपयोगस्तत्सार्थमागत्य द्रव्याद्युपयोगं
ददानो हृद्येवमचिन्तयत्– सम्प्रतीदं पुष्पफलादिकं द्रव्यमेतत्सार्थे विलोक्यमानं न सम्भवत्यस्मिन् समये क्षेत्रे तु
उज्जयिन्यां काले वर्षासमये भावे चामी जना अस्पृष्टमहीपृष्ठा अनिमिषलोचनत्वेनावश्यं देवाः, एवं द्रव्याद्यविशुद्धो
देवपिण्डो महात्मनामनुपादेयो भगवद्भिरादिष्टः, तस्मान्मयैभिः सादरं प्रदीयमानोऽपि न ग्राह्य इत्यगृहीतभिक्षः स
यावद्व्याघुटत्, तावत्तच्चरित्ररञ्जितास्ते निर्जरास्तमभिनत्य विज्ञपयांचक्रुः–मुनिपुङ्गव! भवद्दर्शनार्थं प्रीतिप्रेरिता वय-
मत्राजग्मिम, तत्प्रसीद, गृहाण बहुरूपिणीं विद्यां, अनुगृहाण नः, ततो विनयविनता विद्यां दत्त्वा सुरा अन्तर्दधुः।
पुनरन्यदा ज्येष्ठमासे त एव देवाः कृतकृतकरूपा बहिर्भुवं गतं वज्रं घृतपूरैर्न्यमन्त्रयन्, सोऽपि पूर्ववत्कृतोपयोगो
घृतपूरपूरं नोपाददे, अहो निरतीचारचारित्रपरिणामोऽमुष्य शिशोरपीति प्रशंसामुखरमुखास्ते जृम्भकामरा आमानु-
षोत्तरगिरियायिनीं विद्यां तस्मै वितीर्य तिरोऽभवन्। एवं स शैशवेऽपि वयसि वर्त्तमानो ग्रामाकरनगरादिषु
गुरुभिः सह विहरन्मुनिजनस्पृहणीयोऽजनि, यतः—बालस्यापि रवेः पादाः, पतन्त्युपरि भूभृताम्। तेजसा सह
जातानां, वयः कुत्रोपयुज्यते? ॥ १ ॥ यच्च तेन साध्वीनां मध्यवर्त्तिनाऽङ्गादि श्रुतमधीतमभूत्तत्पदानुसारिलब्ध्या

प्रवर्द्धमानतामभीयत, ततः साधुसंनिधौ पूर्वगतश्रुतेन श्रवणमात्राधीतेन बहुश्रुतीभूय स्वात्मानमप्रकाशयन् स्थविराणां पार्श्वे सालस इव गिणगिणध्वनिमधीयानः स तैरज्ञाततत्स्वरूपैः पठनाय प्रेर्यमाणः कियन्तं समयं गमयामास। एकदा दिनयौवने विहर्त्तुं गतैः साधुभिः शरीरचिन्तार्थं च गुरुभिर्बहिःप्रासैर्वज्रर्षिरेकाकी वसतिस्थितः साधूनामुपकरणवेष्टिका मण्डलीक्रमेण निवेश्याध्ययनपरिपाटिमनुसरन्मेघगम्भीरस्वरेण वाचनां वितरीतुमारब्धवान्। अथ द्वारस्थैः पूर्वायातसाधुशङ्किभिर्गुरुभिः क्षणमुपयोगं दत्त्वा यावत् अस्थीयत तावत्पूर्वाङ्गोपाङ्गाध्ययनपठनरूपो वज्रस्यैव ध्वनिरश्रूयत, ततश्चित्ते चमत्कृता गुरवोऽचिन्तयन्, माऽसौ सहसाऽस्मान् वीक्ष्य लज्जेतेति दूरस्थ एवोच्चैर्नैषेधिकीशब्दमकार्षुः, ततो मञ्क्षु वज्रो वेष्टिकादि यथास्थाने मुक्त्वा गुरुक्रमौ रजोहरणेन प्रमार्ज्य करकमलाद्दण्डकमादाय यथास्थाने निषसाद। अथ श्रीसिंहगिरिसूरयो हृदीत्यचिन्तयन्–मैनं गुणरत्नरत्नाकरं साधवः पराभवन्त्विति, तद्गुणज्ञापनाय ग्रामान्तरगमनव्याजात्साधून् प्रति स्माहुः–हंहो वत्सा! वयं कतिचिद्दिनानि केनापि हेतुना विजिहीर्षवः, ततः पठनशीलाः साधवो गुरून् विज्ञपयांचक्रुः–पूज्याः! कोऽस्माकं वाचनां दाता?, ततः सूरयो न्यगदन्–एष वज्रो भवतां वाचनाचार्यो वाचनामनोरथरथसारथीभावमाश्रयिष्यति, तेऽप्याश्चर्यचर्याचर्याभृतो विनीतविनयत्वादोमितिगुरुवचः प्रत्यपद्यन्त, ततो गुरुषु विहृतेषु गुरुवत्तं वाचनाचार्यीकृत्याङ्गपूर्ववाचनामधिकाधिकमाददानाः साधवो विसिष्मियिरे, ये च तेषु मन्दमतयस्तेऽपि तन्माहात्म्याद्विषमतमानप्यालापकान् हेलयैवाकलयामासुः, एवं च

चिन्तयामासुः—यदि तत्र गुरवो बहुकालं विलम्बन्ति तदास्माकमङ्गाध्ययनं स्यात्पारमियर्त्ति, कियद्भिर्दिनैरतीतैर्गुरवः तत्र समेताः सुखवाचनां साधूनपृच्छन्, तेऽपि विकसितमुखपङ्कजा वाचनाचार्यं वज्रमेवायाचन्त, गुरवोऽप्यूचुः—वत्सा ! अवश्यमसौ भवत्प्रार्थनापूरको भविष्यति, परं न सम्प्रति योग्यतामर्हत्यकृतोपधानत्वात्, किन्तु युष्मज्ज्ञापनार्थमेव अस्माभिरयमसं कृतं यतोऽमुं स्थविरा मा ! परिभवन्तु। यतः—अप्रकटीकृतशक्तिः, शक्तोऽपि नरस्तिरस्कृतिं लभते। निवसन्नन्तर्दारुणि, लङ्घ्यो वह्निर्न तु ज्वलितः ॥ १ ॥ ततः कृतानुयोगं सूत्रार्थपौरुषीक्रमेण सूरयस्तमपाठयन्, सोऽपि प्रज्ञोन्मेषात्पदानुसारिलब्धियोगाच्च गुरूणामप्यधिकतमः समवृतत, यदागमः—चत्तारि सीसा पन्नत्ता— अइजाए सुजाए अणुजाए कुलिंगाले, एवमेव कुडुंबीणं चत्तारि पुत्ता पन्नत्ता—चत्तारि हुंति सीसा अइजायसुजायहीणजायत्ति। तिन्नि कमेणं हीणा, सव्वविहीणो कुलिंगालो ॥ १ ॥ गुरुणो गुणेहिं अहिओ, पढमो बीओ समाणओ तेण। तइओ य किंचिदूणो, सव्वविहीणो कुलिंगालो ॥ २ ॥ ततः सूरयो विहरन्तो दशपुरपुरमैयरुः। अत्रान्तरे श्रीमदुज्जयिन्यां श्रीभद्रगुप्तसूरयो दशपूर्विणो वृद्धवासं स्थिताः सन्ति स्म, तेषामन्तिके सम्पूर्णदशपूर्वपठनाय श्रीवज्रः सङ्घाटकेन गुरुभिः प्रैषि, श्रीभद्रगुप्ताचार्या अपि पश्चिमरात्रौ स्वप्नमपश्यन्—यत्कोऽपि प्रातीच्छको मत्पतद्ग्रहादखिलमपि पयः पपौ, प्रातः स्वसाधुभ्यः स्वप्नं न्यवेदयन्, तेऽप्यलब्धपरमार्थाः किमपि जल्पन्ति स्म, तावद्गुरुभिरुक्तं—वत्सा ! न यूयं वित्थ, आकर्णयत कर्णं दत्त्वा यदद्य कोऽप्यतिथिः प्रातीच्छकः साधुरेष्यति, स मयि

वर्तमानं दशपूर्वधरं भवीष्यतीति स्वप्नफलं, वज्रोऽपि तस्यां निशि पुर्या बहिरुषित आसीत्, स तेषामकुण्ठोत्कण्ठावर्तां वसतिं ययौ, तैरप्यानन्दामृतश्राविण्या दृशा ददृशे, श्रीवज्रोऽयमित्युपालक्ष्यत च, ततः सम्मुखमुत्थाय सूरिभिः स आलिलिङ्गे, मुनिभिरप्यातिथेयं विधिना प्रतिपेदे, तेनापि विनयविनीतेन गुर्वन्तिकेऽधीतानि दशापि पूर्वाणि, तदध्ययने चैषा युक्तिः-पूर्वाणां यत्रोद्देशस्तत्रैवानुज्ञा विधीयते, यतः—जत्थुद्देसोऽणुन्नावि तत्थ कप्पइ कमो इमो अत्थि। दिट्ठीवायमहागम-सुत्तत्थाणं तओ पुच्छा ॥ १ ॥ तेन हेतुना श्रीसिंहगिरयो वज्रस्वामिने सर्वद्रव्यपर्यायानुज्ञारूपामाचार्यपदवीं दित्सवो दशपुरमलंचक्रुः, तदा तत्सुहृदस्तिर्यग्जृम्भकसुरा अवसरज्ञाः श्रीवज्रसूरिपदस्थापनायां महामहं पुष्पगन्धादिवृष्ट्याऽकार्षुः। ततः सिंहगिरिगुरवः श्रीवज्रस्वामिनि न्यस्तप्रशस्तगणभारा गृहीतानशना महर्द्धिकदेवपदवीमासेदुः। ततो भगवान् युगप्रधानः श्रीमुनिपञ्चशतीयुतो रूपादिगुणैर्जनतां रञ्जयन् ग्रामपुरादिषु विहरति स्म। इतश्च कुसुमपुरे धनो नाम श्रेष्ठी वसति स्म, तस्य शीलादिगुणैर्मनोज्ञा मनोज्ञा नाम गृहिणी, तयोर्लावण्योपहसितरुक्मणी रुक्मणी नाम तनया, सा च क्रमेण पञ्चशरप्रसरलीलावनं यौवनं प्रपन्ना। कदाचित्सा स्वयानशालास्थितसाध्वीनां सविधमगमत्, ताभिरखिलकलाकुशलं वज्रस्वामिनमनुदिनं वर्ण्यमानमाकर्ण्य सा तद्गतचित्ता तमेव पतीयितुमिच्छन्ती न्यषेधि-वत्से! मैवं कदाग्रहमकार्षीः, स महात्मा सर्वथा विजितविषयो रागमन्थरया दृशाऽपि त्वां नेक्षितुमर्हति, तन्निशम्य सा सहस्रगुणीकृतानुरागैवं प्रतिज्ञातवती-यदि स मां नोप-

यन्ता, तदा सुहुतहुताशन एव शरणम्, उत तच्चरणौ शरणीकृत्य प्रव्रजिष्यामि । अत्रान्तरे श्रीवज्रस्वामी पाटलीपुत्रपत्तनपरिसरवसुन्धरां स्वचरणारविन्दैरमण्डयत्, राजाऽपि निजपरिजनयुतः सूरिभूरिगुणश्रवणसञ्जातोत्कण्ठः सम्मुखमेत्य फङ्कक्रमेण मुनीनागच्छतो विलोकयंस्तेषु यं यमुदाररूपं यतिं पश्यति तं तं श्रीवज्रस्वामिनं मन्वानः पृच्छति स्म—किममी गुणगुरवो गुरव उत न?, ततस्तेऽपि ब्रुवते स्म—न वयं सूरयः, किन्तु ते पश्चादागच्छन्तः सन्ति, एवमुत्कण्ठितस्य तस्य राज्ञो मुनिराजहंसश्चक्रारितसमीपाः सूरयो दृक्पथमैयरुः, तदोत्फुल्लनयनेन भूपेन प्रणताः स्तुताश्च ते पुरोद्यानमलंचक्रुः । तत्र संसारवैराग्यकारिणीं देशनां व्यधुः—"दुःखं स्त्रीकुक्षिमध्ये प्रथममिह भवे गर्भवासे नराणां, बालत्वे चापि दुःखं मललुलिततनुः स्त्रीपयःपानमिश्रम् । तारुण्ये चापि दुःखं विरहदहनजं वृद्धभावोऽप्यसारः, संसारे रे मनुष्या! वदत यदि सुखं स्वल्पमप्यस्ति किञ्चित् ॥ १ ॥ अनया देशनया हृतहृदयः सहृदयो राजा पौरपरिवृतः स्वप्रासादमासाद्य श्रीवज्रस्वामिरूपादिस्वरूपमन्तःपुरीणां पुरः प्रकाशयामास, ता अपि विस्मयोत्तानमानसाः प्राणेशं विज्ञपयामासुः—स्वामिन्! वयमपि तद्रूपं निरूपयितुं स्पृहयामो यामोऽभिवन्दितुं च, ता अपि नृपादिष्टा विस्मेरदृष्टयो लावण्यामृतसृष्टिं सूरिं दृष्ट्वा परमानन्दपुष्टा वन्दन्ते स्म । इतश्च धननन्दिनी तद्दर्शनाभिनन्दिनी विज्ञातश्रीवज्रागमनस्वरूपा रणरणकसमाकुलितस्वान्ता पितृमातृभ्रातृप्रभृतिस्ववर्गं दशनद्युता द्योतितरदच्छदा व्यजिज्ञपत्,—दत्त मां सुभगशिरोमणये श्रीवज्रस्वामिने, नो चेन्मम प्राणान्निधनीकुरुत सुहुतहुतभुजि,

इति तद्वचः श्रवणाभरणीकृत्य सपरिजनो धनो धनकोटीः सहादाय दृक्कटाक्षच्छटाविघटितसुभगजनानन्दिनीं नन्दिनीं च श्रीवज्रसंसदमाससाद। तस्मिन् क्षणे भूयिष्ठो जना धर्मदेशनया प्रतिबुद्धाः परस्परमित्यभाषन्त—यादृग् गुरूणां स्वरादिगुणः सरसस्तादृग् चेद्रूपसौभाग्यमभविष्यत्तदा सुवर्णं सुरभि(भ)मज्ञनिष्यदिति सभ्यजनाभिप्रायं विज्ञाय भगवान् सुवर्णसहस्रपत्रकमलस्थसिंहासनस्योपरि सूर्यवत्तेजःपुञ्जमयं रूपं निर्माय तस्थिवान्। ततो विस्मयविस्फारितविलोचनो लोकोऽहो अहो उभयथापि स्मरजयिनो भगवतः स्वाभाविकं रूपं, पश्यत, पश्यत पूर्वं मा स्त्रीजनक्षोभाय भवेयमित्यात्मानं कुरूपं दर्शितवान्, अतः किमुच्यतेऽस्य महात्मनो माहात्म्यमिति वर्णनोन्मुखमुखो बभूव, भगवानप्युवाच—भो भो मा विस्मयं कुरुत, ये महात्मानस्ते विविधै रूपैर्जम्बूद्वीपाद्यसङ्ख्यद्वीपानपि पूरयन्त्यतः किमत्र चित्रं?, अत्रान्तरे धनश्रेष्ठी भूतलमिलन्मौलिः कोमलवचनैर्धनकोटिभिः सह स्वसुताविवाहमहमयाचिष्ट, ततो निःस्पृहशिरोमणिः स्वामी विषयवैमुख्यमेवं व्याचक्षौ—किम्पाकफलसमानाः, कटुकविपाका इमे सुखे मधुराः। भोगाः श्मशानभूवत्समन्ततो भूरिभयजनकाः॥ १॥ किं वचनैर्बहुरूपैर्विषयान् दुःखौघकारणं मत्वा। कः श्रेयोनिःश्रेयसपदाभिलाषी निषेवेत?॥ २॥ यद्येतस्या मय्येकान्ताभिलाषः तदेयं सर्वसङ्गविरतिमाचरतु, एवं श्रुत्वा रुक्मिण्यपि प्रक्षीणविषया महोत्सवपूर्वं प्रवव्राज। भगवानपि पदानुसारिलब्ध्या महापरिज्ञाध्ययनोद्धृतगगनगामिविद्यया तिर्यग्जृम्भकदेवदत्तविद्याभिश्चेच्छासञ्चारपरः समयूतत। एकदा पूर्वदेशात् सूरय उत्तरां दिशं विजह्रुः, तत्र विधिव-

शात्करालं दुष्कालमजनिष्ट, बहिर्निर्गन्तुमपि न पार्यते, सर्वेऽप्यवतस्थिरे मार्गाः, तदा सङ्घः क्षुत्कण्ठगतप्राणो भगवन्तं व्यजिज्ञपत्—नाथ ! त्वयि तीर्थाधारे सति येदनार्त्तः सङ्घो विपद्यते तदा भवतामेव लज्जा, यदुक्तम्—"रयणायरतीरपरिट्ठियाण पुरिसाण जं च दालिद्दं । सा रयणाधरलज्जा, न हु लज्जा इयरपुरिसाणं" ॥ १ ॥ सूरयोऽप्येतद्वचोऽवधार्य सङ्घं पटेऽध्यारोप्य यावद्गगनाङ्गणेऽचलन् तावद् द्विजन्मा शय्यातरस्तथा पश्यंस्तृणं दन्तैश्छिन्दान एवं जगाद—अहमपि युष्माकमधुना साधर्मिको जातोऽस्मि, ततो भगवता कारुण्यामृतसिन्धुना तत्रारोहणाय सोऽनुज्ञात इति श्रुतिवचः स्मरता "साहम्मियवच्छलम्मि उज्जुया उज्जुया य सज्झाए । चरणकरणेसु य रया, तित्थस्स पभावगा हुन्ति ॥ १ ॥" ततो गुरवो गगनवर्त्मना महीमाक्रामन्तः सुभिक्षदेशे महापुरीपुरीमवतेरुः । तत्र सर्वोऽपि राजादिजनो बौद्धधर्म्मयिजैनं धर्मं तृणायापि न मन्यते, क्रमेण श्रमणोपासकानां सौगतोपासकानां च स्पर्द्धया स्वस्वचैत्येषु पुष्पादिपूजाऽहंपूर्विकया क्रियमाणा सजज्ञे । तदनु मेदिनीपतिमान्यतया सौगताः श्रावकानभिभवन्ति, तेषां च पुष्पाण्यादातुं न ददते, अथ सांवत्सरिकपर्वण्यायाते तैर्नृपं विप्रतार्य राजाज्ञादानपूर्वकं सर्वथा श्रावकाणां पुष्पग्रहणं निवारितं, तत्परिभूताश्च ते श्रीवज्रं व्यजिज्ञपन् सूरयोऽपि सावद्यसेवनं संसृतिपातनिबन्धनं जानाना अपि सङ्घसमुन्नतिनिमित्तं तदपि सेवितं महते गुणायेति विमृश्योपासकान् सन्तोषयामासुः, मा यूयमत्रार्थे खेदमुद्वहत, वयं युष्मन्मनोरथं पूरयिष्यामः । ततः सूरयो नभोमार्गे उत्पत्य मालवकमण्डले रेवाकूलिनीकूले माहेश्वरीपुर्यां हुताश-

नव्यन्तरमन्दिरपार्श्वस्थोद्यानेऽनुदिनमुत्पद्यमानपरिमलमिलद्भृङ्गाङ्गनाध्वनिमनोहरपुष्पकुञ्जे जग्मुः, तत्र पितृमित्रं तद्वि-
ज्ञामकं मालाकारमाकारयामासुः, सोऽपि ससम्भ्रमस्तं नमस्कृत्याह स्म–केन वस्तुना कार्यं ? तत्प्रसद्य सद्य आ-
दिशत, सूरयोऽप्यूचुः–पुष्पैर्नः प्रयोजनम्, तानि च प्रगुणीकुरु, प्रत्यावृत्ता वयं ग्रहीष्याम इति प्रोच्य लघुहिमवत्-
पद्महदे श्रीदेवीपार्श्वे ययुः, तयापि देवार्चाकरणायोपात्तं सहस्रपत्रकमलमलिमालाझङ्कारसारं सूरिवरं नमस्कृत्यो-
पदीकृतं, सूरयोऽपि तदाऽऽदाय ज्वलनगृहमागत्य पुष्पाण्यादाय अनणुमणिरणत्किङ्किणीक्वाणश्रुतिसुखकरं समु-
ल्लसत्पटुध्वजापटवरिष्ठं विमानमारचय्योपविश्य च स्मृतिमात्रोपस्थिततिर्यग्जृम्भकामररचितगीतनृत्यवादित्ररवपूरि-
तदिगन्तराः शिरउपरिधारितसहस्रपत्रसरसीरुहाः क्षणेन महापुर्या उपरि समेयरुः । तं विमानमालोक्य जातसम्भ्रमा
भिक्षवस्तदुपासकाश्च हर्षादात्मदेवप्रभावोत्कर्षं भावयन्तो जयति जयति सुगतशासनमिति स्तुवन्तस्तूर्यरवपूर्वमर्घपा-
द्यपाणयो यावत्पुरान्निरीयुः, तावत्तेषां विहारं मातङ्गागारमिव दूरं परिहृत्य विध्वस्तवैरिमानाः सविमानाः सूरिवराः
श्रीमज्जिनमन्दिरमैयरुः । तत्र सुरैरतुच्छो महोत्सवो व्यरचि, तद्विलोक्य नृपो बहुपौरपरिवृतः परित्यक्तसौगताचारः
श्रावकत्वमङ्गीकृत्य स्तुतिमेवमकरोत्–प्रवचनरहस्यविद्या–धर्मकथाप्रवरमन्त्रतन्त्राद्यैः । श्रीमद्वज्रादपरः, प्रभावयेच्छा-
सनं कोऽत्र ! ॥ १ ॥ अथ दक्षिणदेशे विहरतां गुरुणामेकदा शिरोऽर्त्तौ जातायां तन्नाशाय गीतार्थैः शुण्ठी सम-
र्पिता, तैरपि भुक्तोत्तरभक्षणाय कर्णेऽवस्थापिता, तथैव तेषां सा तत्र विस्मृता, ततः प्रादोषिकावश्यकमुखवस्त्रिका-

प्रतिलेखनेन पुरतः खटत्कारपूर्वं पतितायां शुण्ठ्यां गुरुभिरचिन्ति—अहो मे कोऽप्यपूर्वः प्रमादः, एतस्मिंश्च प्रादुर्भूते कुतः संयमः ?, तस्मादनशनमादातुं युज्यते, तदनु द्वादशाब्दिकं दुष्कालं मत्वा सूरिभिर्दूरदेशे वज्रसेनो नाम शिष्यः पूर्वमेव प्रैष्यत, तदग्रे चैवं न्यवेदि—वत्स ! यत्राहनि त्वं लक्षदीनारनिष्पन्नामेकां क्षैरेयीस्थालीमालोकयिष्यसि, तस्मात् द्वितीयाह्नि प्रातः सुभिक्षं भविष्यतीति वचो हृदये निधेयम् । अथ प्रवृत्ते कराले दुष्काले भगवान् विद्याबलानीतपिण्डेन साधून् पुष्णन्नेकदैवमवादीत्—वत्सा ! यदि संयमयात्राविनाशमिच्छथ तदाऽभ्याहृतपिण्डमिमं भुञ्जीध्वम्, अथ संयमसापेक्षाः स्थ तदाऽनशनमाददीध्वं, ततस्ते प्रणत्य प्रोचुः—भगवन्न नश्चारित्रभ्रंशेन प्रयोजनं, किन्तु भक्तत्यागमस्य परमं साधयिष्यामः, तदनु श्रीवज्रस्वामी यतिपञ्चशतीयुतः पर्वतमेकमेत्यानुज्ञाप्य च शैलदैवतं देवगुरुचरणस्मरणपरायणः संविग्नमना देशनामृतसन्तर्पितसाधुः समाधिस्थो विहितानशनः शिलातलमधितष्ठौ, साधवोऽप्यालोचितप्रतिक्रान्तपापा मेरुवन्निष्प्रकम्पाः कृतभक्तत्यागा अदीनमनसः शिलाशालीनाः । अथ श्रीवज्रसूरिभिरुत्तमार्थं गच्छद्भिरेको लघुको मुनिरनशनार्थी वारितोऽपि तद्दृक्पथं परिहृत्य पृष्ठलग्नः शैलाधस्तात्कृतानशनस्तप्तशिलातले मदन इव गलित्वाऽच्युतभावोल्लासो दिवमाससाद, तत्र स्थाने मुदा त्रिदशास्तूर्यादिवादनपूर्वं महोत्सवं विदधुः । तद्विज्ञाय महात्मानश्चमत्कृताश्चिन्तयांचक्रुः—अवश्यमुत्तमार्थेन क्षुल्लकेन स्वसाध्यं साधितं, ततो विशिष्योल्लसितसंवेगरङ्गा अनगाराश्चेतसि दध्युः—यत्तेनापि स्वल्पदिनपालितसंयमेन साधुमार्गः साधितः, तद्वयं

चिरकालं परिशीलितचारुचारित्राः कथं न साधयिष्यामः ? । अत्रान्तरे प्रत्यनीकैका देवता श्राविकारूपमास्थाय पुरोभूत्वा भक्तेव साधूनामन्त्रयते स्म, प्रसद्याद्य मद्गृहे पारणकं कुरुत मामनुगृह्णीत, ततः स्वामी तं गिरिमयोग्यावस्थानमाकलय्य समीपतरं भूधरमन्यमत्युग्रं जगाम, तत्र [illegible] क्षेत्रदेवताकायोत्सर्गो विदधे, साऽपि प्रत्यक्षीभूय प्रणत्य गुरूनवादीत्—शीघ्रमविघ्नं साधयध्वमुत्तमार्थं, मद्भाग्याकृष्टा इव यूयमत्रागताः, ततस्ते यथायोग्यं शिलातलमलञ्चक्रुः । तदेन्द्रेण रथारूढेन प्रदक्षिणीकृत्य ते नमस्कृताः, यानि तत्र रथेन तरुशिखराणि कुब्जीकृतानि तान्यद्य यावत्तथैव सन्ति, तस्य शैलस्य रथावर्त्त इति नाम प्रसिद्धिमगमत् । श्रीवज्रस्वामिपादाः स्थविराश्च सम्यगनशनं संसाध्य त्रिदिवाभरणीबभूवुः, तस्मिन्नस्तमिते दशपूर्व्यर्द्धनाराचसंहनने व्युच्छेदं जग्मतुः । अथ वज्रसेननामा मुनिः सोपारकपत्तने गणचतुष्टयस्थापनं कृत्वाऽर्हच्छासनप्रभावकः समजनि । श्रीवज्रसूरेरिति सच्चरित्रं, हृदम्बुजे षट्पदवत्समाप्य । सिद्धान्तपाठे सुकृतैकसार—कथाप्रबन्धे च विधत्त यत्नम् ॥ १ ॥ प्रावचनिकधर्मकथिकप्रभावकद्वयविषये श्रीवज्रस्वामिकथा । प्रावचनिकधर्मकथिकप्रभावकद्वयलक्षणमुक्त्वा तृतीयवादिप्रभावकस्वरूपं गाथापूर्वार्द्धेनाह—

वाई पमाणकुसलो, रायदुवारेऽवि लद्धमाहप्पो ।

व्याख्या—'वाइत्ति' स वादी कथ्यत इति सम्बन्धः, यः 'प्रमाणकुशलः' प्रमाणानि सौगतादिमतप्रतीतानि प्रत्यक्षादीनि, यदुक्तं—चार्वाकोऽध्यक्षमेकं सुगतकणभुजौ सानुमानं सशाब्दं, तद्वैतं पारमर्षः सहितमुपमया तत्त्रयं

चाक्षपादः । अर्थापत्त्या प्रभाकृद्वदति तदखिलं मन्यते भट्ट एतत् । साभावं द्वे प्रमाणे जिनपतिसमये स्पष्टतोऽस्पष्टश्च ॥१॥ तत्र कुशलः–प्रवीणः, अज्ञातप्रमाणो हि वादाय प्रवर्त्तमान उपहास्यतामेति, अतः प्रमाणप्रवीण एव गवेष्यत इति । पुनः किंविशिष्टः ? 'लब्धमाहात्म्यः' 'लब्धं माहात्म्यं–प्रतिष्ठा येन सः, न केवलं लोके किन्तु राजद्वारेऽपि पण्डितान्वितायां सभायामपि, अत एव लब्धमाहात्म्य इति विशेषणं सार्थकम्, अप्राप्तप्रतिष्ठो हि जने यातुलवधदपि तदपि प्रलपन्न गौरवास्पदीभवतीत्यत एवंविधो यः स वादी, वादिप्रतिवादिसभ्यसभापतिसनाथायां प्रतिपक्षनिरासपूर्वं स्वपक्षस्थापनमवश्यं वदतीति वादीति गाथापूर्वार्द्धार्थः । भावार्थस्तु मल्लवादिचरित्रादवसेयः, स चायम् ,—

अत्थि इह भरहवासे, भरुयच्छं नाम पट्टणं पवरं । अस्सावबोहचेइय–धयमिसओ हसइ जं सग्गं ॥ १ ॥ तत्थासि जेणसासणविभूसणं गणहरो जिणाणंदो । बुद्धाणंदेण यबुद्धवाइणा सो इमं भणिओ ॥ २ ॥ अनुवं वाएणं जो जिणइ तेण इत्थ रहियव्वं । गन्तव्वं अवरेणं, इय भणिय तओ कओ वाओ ॥ ३ ॥ दिव्ववसा सूरीहिं, तस्स पुरो हारियं कए वाए । तत्तो निहरिऊणं, संघजुया ते गया वलहिं ॥ ४ ॥ तेणं अवमाणेणं बुद्धाणंदक्खभिक्खुजिणिएणं । आलाणखंभनियलियगउव्व सूरी दुही वसइ ॥ ५ ॥ इत्तो सूरिवराणं दुल्लहदेवी समासि लहुभइणी । तीए य तओ पुत्ता अजियजसजक्खमल्लक्खा ॥ ६ ॥ सा सिरिदुल्लहदेवी वेरग्गाओ चइत्तु रयणाई । पुत्तत्तयपरिकलिया, चित्तं रयणत्तयं लेइ ॥ ७ ॥ सा सूरीण पसाया, समग्गगुणरयणभायणं जाया । विहिया सुर-

तरुसेवा, कयावि किं निप्फला होइ ? ॥ ८ ॥ तीए सुविचारत्तं सामत्थं सयलधम्मकम्मेसुं । नाउं संघो चिंतइ एसुचिया कोसकज्जेसु ॥ ९ ॥ तो संघसम्मएणं, भंडाराईण सयलकज्जम्मि । सूरिहिं सा ठविया, गुणेहिं परमुन्नइं पत्ता ॥ १० ॥ तिन्निवि ते तीइ सुया मुणिणो सिद्धंतसारमयरंदं । भसलुब्व सया गुरुमुहकमलाउ पिवंति आकंठं ॥ ११ ॥ सिक्खविया विज्जाओ, सव्वाओ ताण सूरिराएणं । पुव्वगयं नयचक्कं पमाणगंथं पमुत्तूणं ॥ १२ ॥ जं तं सूरिवरेहिं, सारुद्धारं करित्तु निम्मवियं । सत्थं नयचक्काक्खं, पुव्वस्स पमाणवायस्स ॥ १३ ॥ आईमज्झवसाणे, सपाडिहेरस्स तस्स पढणम्मि । गुरुचेइयसंघाणं, कीरइ पूया अइमहेणं ॥ १४ ॥ एयस्स सुरेहिं अहिट्ठियस्स पुव्वा-गया इमा नीइ । कायव्वा सेयत्थं महाअणत्थो हवइ इहरा ॥ १५ ॥ सूरी अब्भुयपन्नाकलियं मल्लं पलोइउं चित्तं । नूणं सयमेवेसो, वाइस्सइ पुत्थयं एयं ॥ १६ ॥ तो भणइ गुरू तं पइ सक्खं काऊण अज्जियं जणणिं । नयचक्क-गंथपुत्थयमेयं तं मा पढिज्जासु ॥ १७ ॥ इय सिक्खं दाऊणं, मुत्तुं तं अज्जियासगासम्मि । जणपडिबोहनिमित्तं, सूरी विहरेइ अन्नत्थ ॥ १८ ॥ तो मल्लमुणी चिन्तइ किमहं सुयसायरेहिं सूरीहिं । नयचक्कतक्कगन्थप्पवायणेवि हु पडिनिसिद्धो ॥ १९ ॥ अभिलप्पाण सुयाणं, वण्णा सव्वत्थ हुन्ति सारिच्छा । वालुव्व रक्खसाओ, ता किं एयाउ बीहविओ ? ॥ २० ॥ ता इत्थ अत्थि अत्थो कोऽवि अउव्वो तओ निसिद्धोऽहं । तम्हा एयं वाइय कया भवि-स्सामि सुकयत्थो ? ॥ २१ ॥ जओ—चारियवामा वामा वाला बाला य हुंति णियमेणं । जुत्ताजुत्तवियारं कुग्गह-

जोगाउ न चयंति ॥ २२ ॥ दिव्वसा बाहूहिं तरिज्जए सायरो अपारोऽवि । नहु नियमणसंभूओ मयणुव्व असग्गहो कइया ॥२३॥ कयनिच्छओ मणंमि मल्लमुणी तस्स वायणरक्खए । मज्झं कज्जे सक्कंति हु न य .पुच्छेइ विग्घकए ॥ २४ ॥ तो लद्धावसरो सो दिट्ठिं परिवंचिऊण अज्जाए । गहिऊण पुत्थयं तं मल्लो इय वाइउं लग्गो ॥ २५ ॥ हरिसेण पढमपत्तं, करे करेऊण आइमसिलोगं । वाएइ गंथवित्थर—परमत्थपयासणं एयं ॥ २६ ॥ विधिनियमभङ्गवृत्तिव्यतिरिक्तत्वादनर्थकमबोधम् । जैनादन्यच्छासनमनृतं भवतीति वैधर्म्यम् ॥ २७ ॥ चिंतइ आइसिलोगं जा मीलिवि नयणपंकए एयं । ता सासणदेवीए अवहरिओ पुत्थओ सहसा ॥ २८ ॥ उम्मीलिय नयणो उण पुरओ सो पुत्थयं अपिच्छंतो । रोरुव्व गयनिहाणो, विहत्थचित्तो मलइ हत्थे ॥ २९ ॥ हाहा धिट्ठत्तेणं लंघतेणं गुरूण इय आणं । पुत्थयरयणं गमियं नवरि मए चरणरयणंपि ॥ ३० ॥ अविहिपरेण मएणं, जारिसयं कम्म काउमारद्धं । तारिसयं संपत्तं फलमवियलदुक्खसयजणयं ॥ ३१ ॥ पच्छातावेण मुणिं अज्जा दीणाणणं पलोइत्ता । पुच्छइ वच्छ ! विसन्नो किं दीससि ? मुसियसारुव्व ॥ ३२ ॥ तो जणणीए पुरओ नियवुत्तंतं भणेइ मल्लमुणी । सावि हु संघस्स पुरो कहेइ अइदुक्खसंजणयं ॥ ३३ ॥ तं सुणिय अइविसन्नो संघो झूरेइ नत्थि अन्नत्थ । नयचक्कपुत्थयमिणं कहिंपि चिंतामणिव्व जए ॥ ३४ ॥ ता मल्लो उल्लवइ नयचक्कं जाव नेव पावेमि । ता वल्लभोयणपरो, गिरिवासमहं करिस्सामि ॥ ३५ ॥ उग्गमभिग्गहमेयं सुणिउं मल्लस्स साहुमल्लस्स । संघो अईव दुक्खं धरइ मणे

निहियसल्लुव ॥ ३६ ॥ तक्खणे लग्गेउं संघो, अइदुम्मणो मुणिं भणइ । केवलवल्लाहारेण वाएण तणू विणस्सिहिइ ॥ ३७ ॥ ता पसिऊणं विगइं तुम्हे गिण्हेसु देहरक्खट्ठा । इय संघस्सुवरोहा, तं वयणं तेण पडिवन्नं ॥ ३८ ॥ भणियं च– कयकिच्चेहिवि तिहुयणगुरुहिं सिरिधरियपाणिपउमेहिं । जं मन्निज्जइ संघो आणं को तस्स लंघेइ ? ॥ ३९ ॥ चउमासस्स य पारण–दिणम्मि पडिवज्जिऊण तं वयणं । वलहीनयरसमीवे, गिरिविवरे सो ठिओ साहू ॥ ४० ॥ पढमसिलोगस्सत्थं, नयचक्कस्सेस चिंतमाणो सो । साहूहिं गंतूणं, उवरिज्जइ भत्तपाणेहिं ॥ ४१ ॥ तयणु चउविहसंघो आराहइ पूयणेण सुयदेविं । सा वि हु [illegible] गिण्हइ [illegible] भणइ एवं ॥ ४२ ॥ के मिट्ठा ? तो मल्लो भणेइ वल्ला, पुणोवि सुयदेवी । छहि मासेहि गएहिं तहेव पुच्छेइ केहिँ समं ? ॥ ४३ ॥ अवधारणाधुरीणो सोऽवि हु जंपेइ घयगुलेहिँ समं । इय पच्चुत्तरसवणा सुयदेवी विम्हिया चित्ते ॥ ४४ ॥ पच्चक्खीहोऊणं सा साहइ मल्ल ! वंछियं अत्थं । मग्गसु मं जेण तयं । पूरेमी कप्पवल्लिव ॥ ४५ ॥ सो भणइ जइ पसन्नासि ता देसु जिण-रहस्समयं । नयचक्कगंथपुत्थय–रयणं करसररुहे मज्झ ॥ ४६ ॥ सुयदेवीवि हु जंपइ पढमाओ चेव वरसिलोगाओ । सविसेसमग्गिमाओ होही तुह वयणनलिणाओ ॥ ४७ ॥ नयचक्कगंथरयणं इय दाऊणं वरं च इणमत्थं । कहिउं संघस्स तओ तिरोहिया सासणसुरि सा ॥ ४८ ॥ जुयलं ॥ तत्तो मल्लमुहाओ कुंडाउ सरस्सईपवाहुव । नीहरिउं अवइण्णो नयचक्कमहासमुद्दम्मि ॥ ४९ ॥ तस्स य माहप्पाओ स जए सञ्जायपवरजसपवरो । संखेव वित्थरेणं पवे-

सिओ वलहिनयरीए ॥ ५० ॥ संघेण पसन्नेणं मल्लं अब्भत्थिऊण मुणिपवरं । नयचक्कविवरणम्मि धुरंमि लिहिओ इय सिलोगो ॥ ५१ ॥ जयति नयचक्रनिर्जित–निःशेषविपक्षलक्षविक्रान्तः । श्रीमल्लवादिसूरिर्जिनवचननभस्तलविवस्वान् ॥ ५२ ॥ तयणु जिणाणंदगुरू संघेणऽब्भत्थिऊण आणीओ । अजियजसजक्खमल्ले संठावइ सूरिपयवीए ॥५३॥ तिन्निवि गुणमणिनिहिणो पडिवक्खजयम्मि लद्धमाहप्पा । तेसुवि अजियजसेणं पमाणसत्थं कयं पवरं ॥ ५४ ॥ पुव्वगयसुत्तधारी पमाणविज्जाइ विजियसुरसूरी । मल्लो वाइयसल्लो मणम्मि इय चिंतिउं लग्गो ॥ ५५ ॥ जिणसासणमालिन्नं, अम्ह गुरूणं जयम्मि जं जायं । बुद्धाणंदाओ तं सल्लुव खुडुकए चित्ते ॥ ५६ ॥ कइया सो महदियहो होही ? जेणं जिणित्तु गुरुवेरं । जिणसासणगयणयलं उज्जोइस्सामि सूरुव ॥ ५७ ॥ इय चिंतिय भरुयच्छे गंतूण भणावए नरिंदाओ । मल्लो मल्लुव बली वायकए बुद्धसीसवरे ॥ ५८ ॥ तो तक्खणेण राया बुद्धाणंदं भणेइ आहविउं । सो पडिभणइ रणाओ परम्मुहा हुंति किं सूरा ? ॥ ५९ ॥ राया सयं सहाए सब्भा सब्भूयनयणगुणकुसला । वाइपडिवाइणो उण सपक्खकलिया समुवइट्ठा ॥ ६० ॥ सब्भेहिं ते भणिया को तुम्हाणं भणिस्सइ पढमं ?। बुद्धाणंदेण तओ वुत्तमिणो चेव जंपेउ ॥ ६१ ॥ पुव्वं विबुहसमक्खं गुरुणो एयस्स खंडियं माणं । तो इमिणा बालेणं लज्जाहेऊ मह विवाओ ॥ ६२ ॥ नूणं इमस्स लज्जा होही वाए जियस्स इय मल्लो । हत्थिव्व गज्जयंतो पुव्वं जंपेइ निस्संको ॥ ६३ ॥ जिणमयसम्मयपणविहपक्खपरुक्खतिक्खबाणेहिं । मल्लो मल्लुव रणे, बुद्धबलं खंडइ

णंडो ॥ ६४ ॥ [illegible]लियनयचक्कमहासमुद्दलहरीसु । सुगयमयधरणिवलयं समंतओ बोलियं तेण ॥६५॥ दोबायालपमाण वाणुवल्ढीमहल्लचिक्खिल्ले । बुद्धगवी तह खुत्ता जह नीहरिउं न सक्केइ ॥ ६६ ॥ बहुहेउजुत्तिजुत्तं अइगुविलत्थं पसत्थवण्णेहिं । वुत्तूण पुव्वपक्खं दिणलक्कं निव्वइपक्खं ॥ ६७ ॥ सत्तमदिणम्मि मल्लो बुद्धाणंदं भणइ अणुवायं । काउं मह वयणाणं वत्तव्वमिओ ठिओ मोणे ॥ ६८ ॥ जुयलं । सव्वंमि नरिंदाइलोए उट्ठित्तु नियगिहं पत्ते । बुद्धाणंदोवि गओ तब्भणियं चिंतइ निसाए ॥ ६९ ॥ सो मल्लवाइदिणयर–भणियविगप्पाइकिरणनियरम्मि ! । घूउव्व अईवंधो भमेइ तड्ढाणमलहंतो ॥ ७० ॥ जं जं वाइयवयणं दीवं काऊण उयरिया मज्झे । लिहियं तं जं जाणइ बुद्धाणंदो नउण अन्नं ॥ ७१ ॥ तत्तो वीसरियम्मी सयलम्मिवि पुव्वपक्खवयणम्मि । हद्धी रायसहाए किमुत्तरं तस्स दाहामि ? ॥ ७२ ॥ एवं बुद्धाणंदो खडिया–हत्थो अकित्तिभयभीओ । पाणेहि परिचत्तो खलुव्व सो सज्जणजणेहिं ॥ ७३ ॥ रायसहाए मिलिए लोए सयलम्मि मल्लवाइजुए । इक्को नवरि न एओ बुद्धाणंदो पुणो तत्थ ॥ ७४ ॥ किं नागओ स अज्जवि पडिवाई ? तो भणंति तब्भत्ता । निच्चिंतो निद्दसुहं अणुहवमाणो धुवं होही ॥ ७५ ॥ जग्गइ अज्जवि न हु सो बुद्धाणंदुत्ति तो निवो भणइ । कुसलं तस्स न नज्जइ एसा जं दीहिया निद्दा ॥ ७६ ॥ निवपुरिसा पट्ठविया रण्णा तं पिक्खिऊण आवेह । ते गंतूणं उग्घाडिउं च दारं निहालंति ॥७७॥ बुद्धाणंदो दिट्ठो दुहावि गयपाणओ तओ तेहिं । उद्धमुहो खडियाए भूमीए किंपि विलिहंतो ॥ ७८ ॥ तत्तो आ-

गंतूणं बुद्धाणंदस्स वइयरं एयं । रायपुरिसेहिँ रण्णो पुरओ सवंपि वाहरियं ॥ ७९ ॥ तम्मि खणे पुप्फाणं वुट्ठी सिरिमल्लवाइणो उवरिं । सासणसुरीइ मुक्का नहाओ इय जंपिरीइ निवं ॥ ८० ॥ एस नरेसर ! बुद्धाणंदो सिरिमल्लवाइभणिएसुं । भंगेसुं गुविलेसुं पडिओ जालम्मि मच्छुव ॥ ८१ ॥ अमुणंतो नीहरिउं चिंतासंताविओ य लज्जाए । हिययं फुट्टित्तु मओ जलसित्तो चुण्णपुंजुव ॥ ८२ ॥ जुयलं । इय वुत्तंतं सोउं, रण्णा निव्वासिया तहा सुगया । मइबोहे गंतूणं जह पुणरवि नागया तत्थ ॥ ८३ ॥ भत्तिभरेणं रण्णा भरुयच्छे अइमहन्तमहिमाए । आयरियजिणाणंदप्पमुहो आणाविओ संघो ॥ ८४ ॥ सिरिमल्लवाइगुरुणा तओ नयचक्कनामगंथो नंदो । गुरुभणियविहाणेणं पुइत्ता वाइओ सम्मं ॥ ८५ ॥ सिरिवद्धमाणसासणपभावगो इह जिणित्तु वाइगणं । जेउं च तियससूरिं, स मल्लवाई गओ सग्गं ॥ ८६ ॥ दित्तीए नयचक्कमक्कसरिसं चक्किव्व गोभासुरं, लद्धूणं पडिवक्खलक्खदलणं जेणक्कयं भारहे । तस्सेवं सिरिमल्लवाइगुरुणो चारुचरित्तं बुहा !, नाऊणं जिणसासणुन्नइकए वाए कुणेहादरं ॥ ८७ ॥ वादिप्रभावकविषये श्रीमल्लवादिकथा, तृतीयं वादिप्रभावकस्वरूपमुक्त्वा चतुर्थं नैमित्तिकस्वरूपं गाथोत्तरार्द्धेनाह—

नेमित्तिओ निमित्तं कज्जंमि पउंजए निउणं ॥ ३४ ॥

व्याख्या—'नेमित्तिओत्ति' दिव्यौत्पातिकान्तरिक्षभौमाङ्गस्वरलक्षणव्यञ्जनपरिज्ञानरूपमष्टाङ्गनिमित्तमस्यास्तीति नैमित्तिकः, स च निमित्तमतीतानागतवर्त्तमानकालप्रकाशकं 'कार्ये' प्रवचनोन्नतिहेतौ प्रयुङ्क्ते, अकार्ये तु निमित्तं प्रयु-

ज्यमानं महतेऽनर्थाय तपःक्षयाय च महात्मनामुपजायते, यदाहुर्धर्म्मदासगणयः—जोइसनिमित्तअक्खर–कोउय-आएसभूइकम्मेहिं । करणाणुमोयणेहिं साहुस्स तवक्खओ होइ ॥ १ ॥ तदपि कथं प्रयोज्यमित्याह– 'निपुणं' सुनिश्चितं यथा भवति, यदृच्छया प्रलापे प्रत्युतापभ्राजनैव जागर्त्तीति गाथोत्तरार्द्धार्थः ॥ ३४ ॥ भावार्थस्तु श्रीभद्र-बाहुस्वामिदृष्टान्तेन प्रकाश्यते, तथाहि,—

अत्थि सिरिभरवरिट्ठे सयलट्ठगरिट्ठे मरहट्ठे धम्मियजणागण्णपुण्णपडिपुन्नगपण्णपसहणपइट्ठाणं सिरिपइट्ठाणं नाम नयरं–मुनिसुव्वयमुणिसुव्वयजिणवयणामयरहस्सपाणेणं । अज्जवि जत्थ जणेसुं विबुहत्तं फुडयरं फुरइ ॥ १ ॥ तत्थ य चउदसविज्जाट्ठाणपारगो छकम्ममम्मविऊ पयइए भद्दओ भद्दबाहुनाम माहणो हुत्था । तस्स परमपिम्मभरसरसी-रुहमिहरो वराहमिहरो सहोयरो । अन्नया तत्थ चउद्दसपुव्वरयणमहेसरो नवतत्तवरनिहाणपत्तमहाभद्दो सिरिमं ज-सोभद्दसूरिचक्कवट्टी उज्जाणवणे समोसढो, तं नमंसणकए अहमहमिगाए सयलनयरलोयं गच्छंतं पलोइय किंचि संजायपमोओ वराहमिहरेण सद्धिं भद्दबाहू सूरीण वंदणत्थं गओ, ते वंदिय कमवि परमाणंदमुव्वहंतो समुचियभू-भागे निविट्ठो । तओ सूरीहिं विहिया निव्वेयसजणणी देसणा,–संसारो दुक्खरूवो चउगइगुविलो जोणिलक्खप्प-हाणो, इत्थं जीवाण सुक्खं खणमवि पवरं विज्जए नेय किंचि । तम्हा तच्छेयणत्थं जिणवरभणिए उज्जमा होह धम्मे, खंताइए मुणीणं गुणगणकलिए सावयाणं च सारे ॥ १ ॥ तं सुणिय वेरग्गतरंगरंगिओ आगमेसिभद्दो पणट्ठमोह-

निद्दामुद्दो भद्दबाहू सहोयरं वराहमिहरं भणइ—वच्छाहं संजायभवविरागो एसिं गुरूणं चरणमूले सव्वसंगपरिच्चायं करिय अणवज्जं पव्वज्जमायरिस्सं, भवया पुण घरकज्जेसु सज्जेण होयव्वं, तओ वराहमिहरो तं पइ जंपइ—भाय! जइ तुमं संसारसायरं तरिउमिच्छसि ता कहमहं भग्गपवहणजणुव्व तत्थ मज्जेमि, जओ—सक्करसहिया, खीरी दियाण जह वल्लहा हवइ अहिया। ता किं सा इयराणं, नराण नहु होइ अभिरुइया? ॥ १ ॥ एवं दिक्खासाहिलासं जाणिऊण मा एसो भवाडवे निवडउत्ति भद्दबाहुणा अणुमन्निओ। तओ दोवि भायरा गुरुपच्चक्खं सव्वं सावज्जं पच्चक्खयंति। तओ भद्दबाहू गहियदुविहसिक्खो कमेण गुरुवयणकमलाओ भसलुव्व मयरंदं चउद्दसपुव्वसुत्तत्थरहस्सं पाऊण सुहिओ सुविहियचूडामणी जाओ। इओ य सिरिमं सिरिजसभद्दसूरीण तस्समाणविज्जाठाणो असमाणचरित्तो अज्जसंभूयविजओ नाम सीससेहरो आसि, अन्नम्मि दिणे सूरिपयजुग्गे सुयकेवलिणो मुणिय संभूयविजयभद्दबाहुनामए मुणिवरे गणहरपए ठाविऊण सयं सिरिजसभद्दसूरिणो संलेहणं करिय सुरपुरसिरीए अवयंसभावमुवगया। तओ ते ससिसूरुव्व मिच्छत्ततिमिरं गोवित्थरेण हणंता महिमंडले पुढो पुढो विहरंति। अह सो वराहमिहरमुणी अप्पमई चंदसूरपन्नत्तिपमुहे केऽवि गंथे मुणिऊण अहंकारविकारनडिओ सूरिपयमहिलसंतो अजुग्गुत्ति गुरुहिं नाणबलेण नाऊण न गणहरपए ठाविओ इय सुयवयणं सरंतेहिं—बुड्ढो गणहरसद्दो, गोयममाईहिं धीरपुरिसेहिं। जो तं ठवइ अपत्ते, जाणंतो सो महापावो ॥ १ ॥ तओ वराहमिहरस्स जिट्ठसहोयरेऽवि सिरिभद्दबाहुगणहरे परमा

अपीइ जाया, जओ इमेहिं मह माणखंडणा कया, अओ इत्थट्ठाउं न जुज्जइ, भणियं च—माणि पणट्ठइ जइ न तणू तो देसडा चइज्ज । माडु जणकरपल्लविहिं दंसिज्जंतु भमिज्ज ॥ १ ॥ तेण पावकम्मोदएण अप्पा गुणपव्वया-रूढोऽवि दोसावडे पाडिओ, अहो दुरंतया कम्माणं, जं तिव्वकसाओदएण उत्तमगुणट्ठाणेहिंतो मिच्छत्तगुणट्ठाणे पडिओ दुवालसवरिसे परिपालियचरित्तो, जिणमुद्दं मुत्तूण पुणरवि सहावसिद्धं माहणत्तमुवगओ वराहमिहरो, भणियं च—प्रकृत्या शीतलं नीरमुष्णितं वह्नियोगतः । पुनः किं न भवेत् शीतं ?, स्वभावो दुस्त्यजो यतः ॥ १ ॥ तओ चंदसूरपन्नत्तिपमुहागमगंथेहिंतो किंपि किंपि रहस्सं गहिऊण सनामेण वाराहीसंहियत्तिनामयं जोइससत्थं सवा-यलक्खप्पमाणं करेइ, तं च सिद्धंताओ उद्धरियत्ति पाएण सच्चं होइ, अओ लोएसु पसिद्धं तं जायं, अन्नं च अंगोवंगेहिंतो दव्वाणुओगओ मंततंताइ मुणिउं पउंजिऊण य जणमणाइं रंजेइ । मिच्छद्दिट्ठीण पुरओ नियचरियमेवं परूवेइ—जं अहं दुवालसवरिसे दिणयरमण्डले ठिओ, भयवयावि भाणुणा सयलगहमंडलस्सुदयत्थमणवक्काइया-रठिइजोगविवागाइयं पसिय मह दंसियं, पेसिओ य अहं महियले, तओ मए इमं जोइससत्थं कयं, जइ असच्चं ता किं परिमियं भासिज्जइ ?, मिच्छत्तंधियमइणो धिज्जाइया वज्जपायसरिसंपि तक्कव्वं तहेव पडिवज्जंति, अहो अन्ना-णविलसियमएसिं । जओ—वत्थंचले सिलायलखंडं बंधित्तु मोयगमिमंति । धुत्तेहिं भणिरेहिं बाला लहु भोलवि-ज्जंति ॥ १ ॥ तयणु भूदेवा देवस्सेव तस्स वन्नणमेव कुणंता चिट्ठंति— जमेस वराहमिहरो मोहणवहगमणाइबहु-

रूवाहिं विज्जाहिं दिप्पंतो गहगणेहिं सह दुवालसवासाइं भमिऊण जोइससत्थं च काऊण महियलमोइन्नो, चउद्दसविज्जाट्ठाणपारगो जाओ, अज्ज जाव तस्स इयप्पसिद्धी लोए विप्फुरइ । पइट्ठाणपुराहिराओऽवि नियक्खणुत्ति तं थुणइ, जओ 'लोओ पूइयपूयगो न परमत्थविऊ'स कायखंडसमोऽवि इंदनीलमणित्ति संगहिऊण रण्णा स पुरोहिओ विहिओ, न य वियारसारा हवंति रायाणो, तं च रायपसायपत्तं पत्तं सुणिऊण जणो विसेसेण सम्माणेइ । अह सिरिभद्दबाहुपहू सयलभवणिट्ठाणं वयणामएण सिंचंतो पइट्ठाणपुरबाहिरुज्जाणे समोसरिओ, तत्थागयं सूरीसरमायन्निऊण राया पोरपरियरिओ वंदिउं गओ, रायाणुवित्तीए वराहमिहरोऽवि, तम्मि समए रायाइसमक्खं एगेण पुरिसेण वराहमिहरो वद्धाविओ, देव ! संपयं चेव तुम्ह घरे पुत्तो उप्पन्नो, तं सुणिय राया हरिसिओ वद्धावयनरस्स पारिओसियं दाणं दाऊण पुरोहियं वाहरेइ—साहेसु तुमं, एस तुज्झ पुत्तो केरिसविज्जो कियप्पमाणाऊ अम्हं च पूयणिज्जो होही नयत्ति, संपइ सव्वन्नुपुत्तो समसत्तुमित्तो सिरिभद्दबाहुसूरी, तहा जोइसचक्कनिरिक्खणवियक्खणो तुमं च, अओ दुवेऽवि नाणचूडामणिणो वियारिऊण आइसह । तओ वराहमिहरो सहावचलमाहणजाइत्तणेण नियनाणुक्करिसं च जाणावयंतो वागरेइ महाराय ! मए एयस्स जम्मकाललग्गगहाइयं वियारियं, एस सिसू वरिससयपमाणाऊ तुम्हाणं तुह पुत्ताणं च पूइओ अट्ठारसविज्जाठाणपारगामी भविस्सइ, एयम्मि समए जिणसमए निमित्तकहणं निसिद्धंपि मुणंतो नरिंदाइलोयाओ जिणमयपभावणत्थं कडुओसहपाणं रोगच्छेयणकए कीरंतं गुणट्ठमुवजा-

यइत्ति वियारिऊण गीयत्थसिरोमणी सिरिभद्दबाहुमहामुणी तस्स दारगस्स सत्तदिणंते बिडालियाओ मरणमाइसइ । तं वयणमायण्णिऊण कोवेण पज्जलिरो वराहमिहरो नरवरं पइ जंपइ—देव ! जइ एयं एयाण वयणमन्नहा होइ ता तुज्झेहिमेयाणं पासंडीणं कोऽवि पयंडो दंडो कायव्वो । एवं वाहरिऊण रोसारुणनयणो वराहमिहरो रायसहिओ नियघरं गओ, तओ तेण झडत्ति गंतूण स बालो मंदिरब्भंतरे गुत्तट्ठाणे ठाविओ, चउदिसिं च घरबाहिं उब्भडसुहडा सत्थहत्था निवेसिया, धाई उण भोअणाइसामग्गीसहिया अब्भंतरे चेव निविडं कवाडसंपुडं संघडिऊण जागरमाणी बालं रक्खेइ । संपत्ते सत्तमे दिणे तहेव तेसिं रक्खंताणं उक्किरियबिडाला महाथूला दुवारग्गला सहसा बालगोवरि पडिया, तग्घाएण य दारगो मओ, धाइए हाहित्ति हलबोलो कओ, जं एस मए रक्खंतीए चेव उच्छंगट्ठिओ हयासेण कयंतेण बालगो निहओ, तं वज्जनिवायसरिसं वयणं सुणिय पुरोहिओ मुच्छानिमीलियच्छो धसत्ति धरणीयले पडिओ, सिसिरोवयारेहिं पुणरवि पत्तचेयणो उग्घाडिऊण कवाडसंपुडं तं सुयं मयं पासिऊण हिययं ताडयंतो रोइउं पवत्तो, हाहा दुरंत रे दिव्वं रोविऊण सुरदुमं । समुम्मूलेसि किं पाव ! सत्तदंतिव मे सुयं? ॥ १ ॥ एयाओऽवि दुहाओ अहिययरं दूमेइ सल्लुव मे हिययं नाणाऽसच्चत्तणं । एवं सोयं करंतेण तेण जणोऽवि रोयाविओ, रायावि विन्नायवइयरो आगंतूण तं पुराणाइभणियसंसाराणिच्चयावयणेहिं पडिबोहेइ, इय साहेइ य—भो वराहमिहर ! सिरिभद्दबाहुनिवेइयं नाणमवितहं जायं, परं बिडालाओ जं तस्स मरणमुवइट्ठं तं असच्चं दीसइ, अओ तम्मर-

णहेउं धाइं पुच्छइ, धाईएवि सा अग्गला आणेऊण रण्णो दंसिया, तीए अग्गविभागे उक्किरियं बिरालियं दट्ठूण संजायविम्हओ राया सूरिरायगुणकित्तणमुहरियमुहो वज्जरइ–अहो पिच्छह पिच्छह लोया ! सेयंबराणं नाणलद्धि-लच्छीओ, तं सच्चं चेय सव्वन्नुपुत्तया जं एवमविसंवाइवयणा । एवं चमक्किओ राया उट्ठिऊण सिरिभद्दबाहुगुरुं पणमिय पुच्छइ–भयवं ! केण हेऊणा पुरोहियवयणमसच्चं जायं ? । तओ गुरू भणइ–महाराय ! एस गुरुपडि-णीओ बयाउ परिवड्ढिओ विणट्ठमग्गो तुह पुरोहिओ, तेण हेउणा एयस्स वयणं न सच्चं होइ, जं च सव्वन्नुणा पणीयं वयणं तं जुगंतेऽवि नन्नहा होइ । तओ राया नायपरमत्थो जंपइ–हा मिच्छत्तधत्तूरपाणवामोहियम-इणा सयलमवि महियलं कणयमयं मन्नमाणेण मए निरत्थयं मणुयजम्मं निग्गमियं, ता भयवं ! पसिय मह सिक्खं देह, जेण सकयत्थो होमि । तओ गुरू दुग्गइगमणपडिवक्खं धम्मसिक्खं सहासमक्खं रण्णो वियरइ, सोऽवि तं सेसुव्व सिरसा पडिच्छइ । जप्पभिइं मयकलेवरं व पुरोहियमइं चइय राया जिणधम्मं पडिवज्जइ तप्पभिइं च णं लोओ तमुवहसइ, सोऽवि नियतणयमरणेण नाणासच्चत्तणेण लोयापवाएण य संजायसंसारनिव्वेओ सव्वहा विगय-सम्मत्तो संगहियमिच्छत्तो परिव्वायगपव्वज्जं पडिवज्जिय मुणिजणे पओसमावहंतो अन्नाणकट्ठतवाइं सुइरमायरिय अ-णुद्धियपावसल्लो मरिऊण अप्पड्ढिओ वंतरो जाओ । अह सो वाणमंतरो विभंगनाणेणं नियपुव्वभवमाभोइत्ता मिच्छ-त्तोदयवसेण जिणसासणे परमवेरं वहंतो चिंतेइ–कया णं अहं पुव्वभववेरसायरं पवणनन्दणुव्व उल्लंघिय सुहिओ

हविस्सं ?, तओ देघकिच्चमकाऊण जिणभत्तिरत्ताणं साहुसावयाईणमुवसग्गं काउकामो तच्छिद्दाणि गवेसेइ । तओ सया अप्पमत्ताणं सायज्जजोगविरत्ताणं साहुसाहुणीणं अंसुव न किंपि पिच्छइ दूसणं, तेसिं च केसमवि मुसमुरिउमसमत्थो हत्थेण हत्थं मलंतो दंतेहिं उट्ठे खंडंतो मुट्ठीए हिययं ताडयंतो भित्तीए सीसं फोडंतो विहत्थो होत्था । तत्तो तप्पुट्टिं छंडिऊण किरियाकलावसिढिलाणं समणोवासयाईणं छिड्डं लहिऊण स दुट्ठवाणमंतरो विविहे उवसग्गे कुणइ । तओ सावगा सुयसायरसुवियारा बुद्धिवियारेण तं वंतरकडामुवसग्गं जाणिय परुप्परं मंतयंति–जहा सीहं विणा करी न वियारिज्जइ, जहा भाणुं विणा तिमिरपडलं न फेडिज्जइ, जहा पवहणं विणा सायरो न लंघिज्जइ, जहा ओसहं विणा वाही न छिंदिज्जइ, तहा गुरूहिं विणा एस उवद्दवो न विद्दविज्जइत्ति । तओ एयस्सत्थस्स संसूयगा तेहिं सिरिभद्दबाहुसूरीणं पासे पेसिया विन्नत्तिया । तेहिंवि नाणबलेण वराहमिहरवंतरस्स दुट्ठचिट्ठियं नाऊण सिरिपाससामिणो उवसग्गहरथवणं काऊण संघकए पेसियं, सव्वेहिवि तं पढियं, तओ तप्पभावेण वायपिल्लियवद्दलुव्व विहुओ तकओ उवद्दवो, कप्पवल्लिव्व मणवंछियत्थजणणी जाया संती । अओ अज्जवि तं थवणं सप्पभावं पढिज्जमाणं सव्वसमीहियत्थं संपाडेइ । अह जुगप्पहाणागमो सिरिभद्दबाहुसामी आयारंगसूयडंगआवस्सयदसवेयालियउत्तरज्झयणदसाकप्पववहारसूरियपन्नत्तिउवंगरिसिभासियाणं दस निज्जुत्तीओ काऊण जिणसासणं पभाविऊणं पंचमसुयकेवलीपयमणुहविऊण य समए अणसणविहाणेण तियसावासं पत्तो–भद्दबाहुगुरुणा

निक्कोहरो, निम्मिओ जह निमित्तबलेणं । सासणुन्नइकए तह भवा, ! उज्जमं लहु तयंमि कुणेह ॥ १ ॥ निमित्तप्रभावकविषये श्रीमद्रबाहुस्वामिकथा । चतुर्थं नैमित्तिकलक्षणमुक्त्वा पञ्चमं तपस्विस्वरूपं गाथापूर्वार्द्धेनाह—

जिणमयमुब्भासंतो विगिट्ठखमणेहिं भण्णइ तवस्सी ।

व्याख्या—विशिष्टानि यानि क्षपणानि अष्टमादीनि सांवत्सरिकपर्यंतानि तपांसि, अथवा बाह्याभ्यंतरानशनावमौदर्यवृत्तिसंक्षेपरसत्यागकायक्लेशसंलीनताप्रायश्चित्तविनयवैयावृत्त्यस्वाध्यायध्यानव्युत्सर्गभेदैर्द्वादशप्रकाराणि तैर्विकृष्टक्षपणैः 'जिनमतं' श्रीमदर्हच्छासनम् 'उद्भासयन्' प्रभावयन् 'तपस्वी' तपश्चरणकृद्भण्यत इति गाथापूर्वार्द्धार्थः, भावार्थस्तु विष्णुकुमारचरित्रादवसेयः तथेदम्—

भरते भरतः श्रीणां, भूमौ निश्चलतां गतम् । हस्तिनागपुरं भाति, कुरुमण्डलमण्डनम् ॥ १ ॥ तत्रेक्ष्वाकुलसद्वंशपद्मपद्मसुहृन्निभः । पद्मोत्तर इति क्ष्मापः, क्षात्रक्षेत्रजयाङ्कुरः ॥ २ ॥ नानावर्णमयं विश्वं, विश्वस्य जयवादिना । येनैकवर्णतां नीतं, यशसा हारहारिणा ॥३॥ तस्याभूत्प्रेयसी ज्वाला, ज्वालामालोज्ज्वलद्युता । मन्ये यया जिता विद्युज्ज्वालाऽम्भोदे न्यलीयत ॥ ४ ॥ सत्पक्षा विशदच्छाया, विवेकगुणशालिनी । या चाऽऽर्हद्धर्मकासारे, राजहंसीयतेतराम् ॥ ५ ॥ गर्जत्पञ्चाननस्वप्न—सूचितस्तनयोऽनया । विक्रान्तः सुषुवे विष्णु—कुमार इति विश्रुतः ॥ ६ ॥ चतुर्दशमहास्वप्न—सूचितस्तूचितः सताम् । महापद्मोऽपरः पद्म—बन्धुवत्तेजसोल्बणः ॥ ७ ॥ युग्मम् । क्रमाच ताव-

वर्द्धेतां, कलाभिर्वपुषा श्रिया । शिश्रियाते स्मरस्मेर–क्रीडोद्यानं च यौवनम् ॥ ८ ॥ ततो विष्णुकुमारेण, निःस्पृहत्वादनादृते । यौवराज्यपदे पित्रा, महापद्मो न्यवेश्यत ॥ ९ ॥ उज्जयिन्यामथ पुरि, नरवर्ममहीपतेः । मिथ्यात्वपोषितमतिर्नमुचिः सचिवोत्तमः ॥ १० ॥ मुनिसुव्रतस्वामिनः शिष्यः, सुव्रतः सुव्रतोऽन्यदा । पवित्रयन्महीपीठं, तत्पुरोद्यानमासदत् ॥ ११ ॥ गच्छतस्तत्पदौ नन्तुं, वीक्ष्य पौरानमी क नु । सोत्कण्ठुला व्रजन्तीति, पप्रच्छ नमुचिं नृपः ॥ १२ ॥ सोऽप्यब्रवीन्महीभर्त्तरुद्यानेऽत्र सिताम्बराः । केऽप्यैयरुर्नमस्कर्त्तुं, तानमी यान्ति नागराः ॥ १३ ॥ अथोचे सचिवं भूमि–वासवो वासनोदयात् । आवामपि हि गच्छावो, नमावश्च मुनीश्वरम् ॥ १४ ॥ तद्वचःश्रवणोत्पन्नान्तःकुन्नमुचिरब्रवीत् । यद्येवं तन्महाराज !, गत्वा वादं करोमि तैः ॥ १५ ॥ परं माध्यस्थ्यमास्थाय, स्थातव्यं स्वामिना पुनः । इति निश्चित्य तान्नन्तुं, जग्मतुर्नृपमन्त्रिणौ ॥ १६ ॥ नरेन्द्रः सुव्रताचार्यं, यावन्नत्वाऽविशत्पुरः । तावन्मन्त्री रुषाऽऽकीर्णस्तूर्णमाक्षिप्तवानिति ॥ १७ ॥ भो भो ! दाम्भिकचक्रेशास्त्रयीशून्या अलौकिकाः । ब्रूत जानीत चेत्तत्त्वं, धर्मस्य पुरतो मम ॥ १८ ॥ तं दुष्टचेष्टितं मत्वा, सूरयो मौनमाश्रिताः । फेरौ रटति किं सिंहः, क्षोभमेति कदापि हि ? ॥ १९ ॥ यद्वा—उपद्रवत्सु क्षुद्रेषु, न क्षुभ्यन्ति महाशयाः । उत्फालैः शफरैः किं स्याल्लोलः कल्लोलिनीपतिः ? ॥ २० ॥ अभिभूतिं गुरोरेवं, श्रुत्वैकः क्षुल्लको जगौ । अस्ति वादे यदीच्छा ते, कण्डूमपनयामि तत् ॥ २१ ॥ क नकुलः क पाथोधिः, क्वाङ्गारः क च काञ्चनम् । क त्वं जडः क सूरीन्द्राः, सकलागम-

पारगाः ? ॥ २२ ॥ तस्मात्त्वया सह कथं, विवदंते मुनीश्वराः ? । सिंहस्य हि त्रपाकारि, युद्धं गोमायुना समम् ॥ २३ ॥ स प्रत्यक्षानुमानाभ्या–मागमप्रोक्तयुक्तिभिः । संस्थाप्य धर्म्ममाक्षिप्य, तं चाकार्षीन्निरुत्तरम् ॥ २४ ॥ विविक्षुरिव पातालं, त्रपावेशादधोमुखः । मुनिना हृतसर्वस्व, इवागान्नमुचिर्गृहम् ॥ २५ ॥ मुनिष्वनुशयं बिभ्र–दभ्रं तद्वधाय सः । निशीथे निशितं खड्गमादायागाद्वनान्तरे ॥ २६ ॥ असिं यावत्समाकृष्या–धावन्नमुचिरातुरः । हन्तुं साधूंस्तावदाश्व–स्तम्भात्तं शासनामरी ॥ २७ ॥ गुरुत्वादिव पापस्य, विचेष्टो दुष्टधीरभूत् । तद्वृत्तज्ञापनायेवो-दगच्छचाहिमद्युतिः ॥ २८ ॥ तद्दृशसं जनाः प्रातर्देवीतः श्रुतपूर्विणः । निनिन्दुर्नमुचिं पापं, हाहा धिग् धिग् धि-गित्यहो ॥ २९ ॥ अभ्यर्थ्य सूरयो देवीं, करुणार्द्रहृदस्तकम् । बन्धनान्मोचयामासुः, सन्तः सर्वहिता यतः ॥ ३० ॥ राज्ञाऽपि ज्ञातवृत्तेन, दुर्वृत्तः सचिवोऽथ सः । निरवासि निजाद्देशात्सकृमिश्चेव मन्दिरात् ॥ ३१ ॥ विहस्तो नमु-चिर्मन्त्री, श्रीहस्तिनपुरं गतः । महापद्मकुमारस्य, सचिवत्वं प्रपन्नवान् ॥ ३२ ॥ इतश्च कुरुदेशस्य, सीम्नि सिंहबलो नृपः । निसर्गदुर्गतो दुर्गान्निर्गत्य मृगराजवत् ॥ ३३ ॥ सदाऽवस्कन्ददानेन, श्येनवन्निश्चलच्छलः । महापद्म-कुमारस्य, ग्रामाद्यं प्रबभञ्ज सः ॥ ३४ ॥ युग्मम् । एकदा श्रीमहापद्मो, नमुचिं स्माह कोऽपि मे । योधेष्वस्ति महा-योधो, योऽमुं सिंहबलं जयेत् ? ॥ ३५ ॥ महापद्मकुमारं स, कृताञ्जलिपुटो जगौ । स्वाधीने मयि भृत्ये किं, स्वा-मिन्नादिश्यते परः ? ॥ ३६ ॥ धीसखः स तदादिष्टो, बलच्छलकलागृहम् । भङ्क्त्वा दुर्गं च तं बध्वाऽनैषीत्सिंह-

बलं नृपस्य ॥ ३७ ॥ वरं गृहाण दे भक्तिमिति भूपमुवाऽर्थितः । सोऽप्यवादीदुपादास्येऽवसरे कापि तं प्रभो ? ॥ ३८ ॥ अथ श्रीज्वालया देव्या, जिनशासनभक्तया । यात्रायै कारयांचक्रे, प्रगुणस्त्वार्हतो रथः ॥ ३९ ॥ लक्ष्मीनाम्नी सपत्न्यस्या, मिथ्यादृष्टिस्तदीर्ष्यया । रथं भ्रमयितुं धातुरीहांचक्रे पुरे पुरा ॥ ४० ॥ न तादृग् देवदैत्यानां, नापि सर्पसुपर्णयोः । यादृग् वैरं सपत्नीनां, हृदि जागर्त्ति मूर्त्तिमत् ॥ ४१ ॥ सपत्नीचेष्टितं तादृग्, मत्वा कोपसमीरणैः । ज्वाला ज्वालेव जज्वाल, जजल्प च धराधिपम् ॥ ४२ ॥ लक्ष्मीर्यदि पुरा ब्राह्मं, भ्रमयित्री पुरे रथम् । तदा मे मरणं नाथ ?, नान्यथा वितथं मद्वचः ॥ ४३ ॥ तयोः स्पर्द्धामनर्थाध्व–पान्थां ज्ञात्वा धराधिपः । सुधीर्निषेधयामास, रथयात्रां द्वयोरपि ॥ ४४ ॥ महापद्मोऽथ मातुस्तां, मानम्लानिं निशम्य सः । दध्यौ धिग्मां हि यस्यैवं, जननी दुःखिनी भृशम् ॥ ४५ ॥ मम मातुर्विमातुश्च, साम्यं रीरीसुवर्णवत् । यत्र तत्र न मे वासो, युक्तो मुक्तवदसा ॥ ४६ ॥ इत्यालोच्य महापद्मः, सद्मपद्माकराद्ययात् । द्विरेफ इव निर्गत्य, विजहार वनावनीम् ॥ ४७ ॥ यत्र यत्र जगामासौ, व्रियते तत्र तत्र सः । रमाभी रमणीभिश्च, विद्युद्धारामिरब्दवत् ॥ ४८ ॥ नवमश्चक्रवर्त्ती स, वशीकृत्य वसुन्धराम् । पितुः पाददिदृक्षायै, हस्तिनापुरमीयिवान् ॥ ४९ ॥ तस्मिन् राज्यं समारोप्य, पद्मोत्तरनरेश्वरः । समं विष्णुकुमारेण, वैराग्यरसरङ्गिणा ॥ ५० ॥ श्रीसुव्रतगुरोः पाद–मूले निर्वृत्तिहेतवे । प्राज्यं राज्यं समुत्सृज्य, परिव्रज्यामुपाददे ॥ ५१ ॥ सन्दानीतकम् । महापद्ममहीनाथः, खण्डानि भरतस्य षट् । साधु-

वत्साधयामासेन्द्रियाणीव महोद्यमौ ॥ ५२ ॥ तस्य चक्रिपदप्राप्ति–सूचकं द्वादशाब्दिकम् । अभिषेकं व्यधुर्भूपा, जिनस्येव सुरासुराः ॥ ५३ ॥ ज्वालाया लक्ष्मीकायाश्च, तावत्कालमवस्थितौ । नियन्त्रितौ नरेन्द्राज्ञा–योगाद्धुजगव-द्रथौ ॥ ५४ ॥ नरकान्धाध्वनीनं तं, लक्ष्म्या रुद्ध्वा रथं नृपः । मातू रथं शिवश्रीदं, भ्रमयामास पत्तने ॥ ५५ ॥ प्रतिस्थानमकार्यन्त, प्रासादाः श्रीमदर्हताम् । तेन क्ष्माभुजा कीर्त्तिस्तम्भा इव महोच्चकैः ॥ ५६ ॥ अथ पद्मोत्तरः साधुः, साधयित्वाऽक्षमण्डलीम् । ध्यानानलविनिर्दग्ध–कर्मा शर्माय शाश्वतम् ॥ ५७ ॥ भृशं विष्णुकुमारर्षि, स्पर्द्धयेव तपःश्रिया । सर्वाङ्गमालिलिङ्गुस्तं, वैक्रयाद्या महर्द्धयः ॥ ५८ ॥ सुव्रतानथ सूरीन्द्रान्, ज्येष्ठकल्पमवस्थि-तान् । श्रीमन्नागपुरेऽज्ञासीन्नमुचिः पूर्वशात्रवः ॥ ५९ ॥ सोऽचिन्तयत्कथंकारं, केनोपायेन वैरिणः । एतान् श्वेता-म्बरान् हत्वाऽहं स्यां पूर्णमनोरथः ? ॥ ६० ॥ एतद्भक्तिपरे राज्ञि, दुष्पूरो मे मनोरथः । बली स्वपक्षपाते हि, केनापि किमु मुच्यते ? ॥ ६१ ॥ आ ज्ञातमस्त्युपायो मे, यो वरः सेवधीकृतः । नरेन्द्रदत्तस्तेनाद्य, साध्यं साध-यितेहितम् ॥ ६२ ॥ इति ध्यात्वा ययाचे तं, चक्रिणः सोऽप्यदान्मुदा । स्वप्रतिज्ञातमर्थं किं, विलुम्पन्ति महा-शयाः ? ॥ ६३ ॥ राजन् सप्त दिनान् राज्यं, तस्मै दत्त्वा स्थितोऽन्तरे । सोऽपि यज्ञचिकीस्तत्र, स्वं च श्वेताभ्यषि-ञ्चयत् ॥ ६४ ॥ ततः पाखण्डिनस्तस्मा, आशिषो दातुमैयरुः । मुक्त्वा जैनमुनीनेकांस्ते हि निर्ममचक्रिणः ॥६५॥ [illegible] ! श्वेताम्बरा एव, नैयुर्मेऽत्रोत्सवे त्विति । स ओतुक्यच्छलं प्राप्या–जूहवत्सूरिसुव्रतान् ॥ ६६ ॥ प्रोचे च

यो यदा राज्यं, पालयेद्ब्राह्मणादिकः । दर्शनैरपि सेव्योऽसौ, यतो विघ्नविनाशकृत् ॥ ६७ ॥ किन्तु यूय व्यवहृतेर्वाह्या दर्शननिन्दकाः । तस्मान्निर्गच्छत क्षिप्रं, मद्राज्यान्मृतिरन्यथा ॥ ६८ ॥ सूरिर्दध्यौ तमाचष्ट, नैषाऽस्मद्दर्शने स्थितिः । क्रियते नैव कस्यापि, निन्दा निर्ममतादृतैः ॥ ६९ ॥ शीतयाऽपि हि तद्वाणी–सुधयाऽप्युष्णतैलवत् । प्रज्वलन् ज्वलनप्रायां, नमुचिर्वाचमुज्जगौ ॥ ७० ॥ दत्तं वोऽस्ति मयैवात्रावस्थानं दिनसप्तकम् । यं यं द्रक्ष्याष्टमे पश्चे, तं तं नेष्ये यमान्तिकम् ॥ ७१ ॥ विहस्तास्तत उत्थाय, मुनीनाहूय सूरयः । प्रोचुः किं किं विधातारोऽनर्थेऽस्मिन् समुपस्थिते ? ॥ ७२ ॥ गुरुस्तैर्जगदेऽस्मासु, न तादृकोऽपि लब्धिमान् । यः कुर्यात्तत्प्रतीकारं, सद्वैद्य इव रोगिणः ॥ ७३ ॥ परं प्रभो ! समस्त्येकः, प्राज्यलब्धिमहाम्बुधिः । चक्रिणः सोदरो विष्णु–कुमारस्तज्जयक्षमः ॥ ७४ ॥ षष्टिं वर्षसहस्राणि, तप्त्वा येन महत्तपः । भूरिशः समुपार्ज्यन्त, वैक्रियादिकलब्धयः ॥ ७५ ॥ सोऽधुना भूधरे मेरौ, चतुर्मासीमवस्थितः । तं विनाऽन्यो मुनिर्नास्ति, नमुचिं शास्ति योऽधमम् ॥ ७६ ॥ गुरुरूचे नभोयाना–भावात्कस्तमिहाऽऽनयेत् ? । प्रांशुलभ्यं फलं पङ्गु–रादत्ते किमु पाणिना ? ॥ ७७ ॥ ममास्ति मन्दरे गन्तुं, शक्तिर्व्यावर्त्तने न तु । इत्येकः प्रवदन् साधुः, सूरिभिः समभाष्यत ॥७८॥ त्वामागच्छन्निहाऽऽनेता, स विष्णुर्मुनिपुङ्गवः । श्रुत्वेत्युत्प्लुत्य सोऽगच्छद्यत्राऽऽस्ते स ऋषीश्वरः ॥ ७९ ॥ तं वीक्ष्य विष्णुनाऽचिन्ति, यद्वर्षासमयान्तरे । मुनिरेतदहं जाने, कार्यं सङ्घस्य किञ्चन ॥८०॥ नत्वा श्रीविष्णवे तेन, सङ्घकृत्ये निवेदिते । सोऽपि तं सममादाय, गुरुपादानवन्दत ॥ ८१ ॥

आदिष्टः सुव्रताचार्यैर्नमुचेः संसदं ययौ । तं विनाऽन्यैर्नृपैर्नत्वा, न्यवेश्यत स आसने ॥ ८२ ॥ स तेन यतिनाऽभाणि, पश्यन्नपि न सम्मुखम् । स्वकार्ये हि खरस्यापि, मर्थन्ते चरणा न किम् ? ॥ ८३ ॥ यदत्र मुनयो राजन्!, वर्षाः सम्पूरयन्त्वमी । ततोऽन्यत्र विहर्त्तार, इति स्वीकुरु मद्गिरम् ॥ ८४ ॥ दिनानि पञ्च तिष्ठन्तु, नमुचाविति भाषिणि । मुनिः स्माह वने तर्हि, पुरं त्यक्त्वा वसन्तु ते ॥८५॥ सरोषो नमुचिः प्रोचे, वनादीनां हि का कथा ? । न स्थेयं मम राज्येऽपि, यदि वोऽस्ति जिजीविषा ॥८६॥ ततो विष्णुर्विहस्योचे, राज्यं ते भरतेऽखिले । तस्मात्पदत्रयस्थानं, वासायैभ्यः प्रदेहि भोः ! ॥८७॥ द्विजमुखोऽब्रवीदित्थं, परं नैवाद्धिः कश्चित् । द्रष्टाऽस्मि वस्तदा नूनं, निहन्ताऽस्म्यपराधिवत् ॥८८॥ ततो ज्वालभवो ज्वालाजिह्ववद्ववृधे क्रुधा । स्पर्द्धयेवारुणज्योतिर्वपुषाऽम्बररोधिना ॥८९॥ लक्षयोजनमानाक्रोऽरौत्सीत्पद्भ्यां वसुन्धराम् । तृतीयचरणन्यासस्थानं तन्मस्तकं व्यधात् ॥९०॥ औचित्यवेदी पादेन, सम्यगाक्रम्य कीलवत् । द्विजन्मानं चकारासौ, द्विजिह्वस्थानकातिथिम् ॥९१॥ चलाचलाऽचला जज्ञे, तत्पादोद्धुरदर्दुरैः । भियेव यदसौ पापी, मयोत्सङ्गेऽत्र धारितः ॥ ९२ ॥ तदा चकम्पे शैलेन्द्रैर्ग्रहैर्निपतितं भुवि । काननक्ष्मारुहैर्भग्नं, प्रक्षुब्धं तोयराशिभिः ॥ ९३ ॥ त्रस्तं दिग्घस्तिभिः सिन्धुजलैरुच्छलितं द्रुतम् । नागै रसातले लीनं, चन्द्रसूर्यैरभिद्रुतम् ॥ ९४ ॥ नखायितं स्फुरत्तारा–गणैर्यत्पदयोर्द्वयोः । अर्च्याऽऽसं नमुचेरित्यातङ्काद्गङ्गाऽग्रतोऽलुठत् ॥ ९५ ॥ मूर्द्धाभिषक्तो देवानां, मूर्द्धानं मेरुसन्निभम् । मुनेस्तस्य निरीक्ष्याथ, विस्मयाकुलितोऽभवत् ॥ ९६ ॥ अवधिज्ञानतो

ज्ञात्वा, यतिं प्रकुपितं हरिः । गन्धर्वीं गायनीः प्रैषीत्, तत्प्रबोधाय बुद्धिमान् ॥ ९७ ॥ तत्कर्णाभ्यर्णमेत्यैता, गीतिका जगुरुच्चकैः । रोषोरगगरावेग–भङ्गायामृतसारणीः ॥ ९८ ॥ क्रुधं मुञ्च क्षमाधार!, यदर्थमियमादृता । स पापी नमुचिर्निन्ये, भवता श्वभ्रगह्वरम् ॥ ९९ ॥ कुरुष्वोपशमे बुद्धिं, कुरुवंशशिरोमणे! । नायं पन्था मुनीन्द्राणां, क्षमासारा हि साधवः ॥ १०० ॥ कोपो मूलमनर्थद्रोर्विपद्वल्लीघनागमः । भवपाथोधिशीतांशुः, शिवद्वारमहार्गला ॥ १०१ ॥ एवं गन्धर्वनारीभिर्गीयमानं निशम्य सः । न प्राप कोपाटोपस्योपशमं श्रवणोऽपि हि ॥ १०२ ॥ ससङ्घाः सुव्रताचार्यास्ततोऽमृतकिरा गिरा । तं मुनिं शमयामासुः, क्रोधाग्नेर्नीरपूरवत् ॥ १०३ ॥ महापद्मोऽपि विज्ञातवृत्तान्तस्तस्य शान्तये । चरणाग्रे विलग्नोऽभात्कीटिकेव महीधरे ॥ १०४ ॥ सोऽपि सम्प्राप्तचैतन्यो, रूपं मुक्त्वाऽथ वैक्रियम् । सहजस्थं तनुं भेजे, सहजो दुस्त्यजो यतः ॥ १०५ ॥ तमुपालब्धवान् विष्णु–साधुरेवं नराधिप! । पद्मोत्तरभुवस्त्वत्तो, युक्तमीदृग्विचेष्टितम्? ॥ १०६ ॥ जानीषे त्वं न किं भूप!, यदवज्ञा जिनेशितुः । पराभवश्च साधूनां, दुर्गदुर्गतिहेतवे ॥ १०७ ॥ पतित्वा पदयोस्तस्य, सापराधं धराधिपः । क्षमयामास नैवाहं, वेद्म्येतत्तद्विजृम्भितम् ॥ १०८ ॥ पूर्वदत्तवरस्तेन, वञ्चितो हा दुरात्मना । खलानां भुजगानां च, कौटिल्यं केन लक्ष्यते? ॥ १०९ ॥ एवं प्रसादयित्वा तं, प्रणत्य च विशां प्रभुः । ययौ ततो विष्णुराप, त्रिविक्रम इति प्रथाम् ॥ ११० ॥ गुरूणां सन्निधौ विष्णु–कुमारोऽप्यथ पातकम् । समालोच्य प्रतिक्रम्य, शुद्धोऽभूत्स्फटिकाश्मवत् ॥ १११ ॥ यदागमः—आयरिए

गच्छम्मि य, कुलगणसंघे य चेइयविणासे । आलोइयपडिकंतो, सुद्धो जं निज्जरा विउला ॥ ११२ ॥ आर्हतीं सुचिरं दीक्षामासेव्यौरपाव्य चेदरम् । मुनिर्विष्णुकुमारो द्रागप्रीणान्निर्वृतिश्रियम् ॥ ११३ ॥ इत्यद्भुतं विष्णुकुमारसाधोर्निशम्य वृत्तं सततं सुवृत्ताः ! । सङ्घस्य कार्ये तपसां प्रयोज्या, शक्तिर्भवद्भिर्भवभीतिभित्त्यै ॥ ११४ ॥ तपःप्रभावविषये विष्णुकुमारकथा ॥ पञ्चमं तपस्विप्रभावकस्वरूपमुक्त्वा षष्ठं विद्यावत्प्रभावकलक्षणं गाथोत्तरार्द्धेनाह—

**सिद्धो बहुविज्जमंतो, विज्जावन्तो य उचियन्नू ॥ ३५ ॥**

व्याख्या—सिद्धा–जापहोमादियथावत्पूर्वसेवोत्तरसेवाभ्यां सिद्धिं गता, बहवो–भूयसो रोहिण्यादिषोडशविद्यादेव्यधिष्ठिताऽष्टचत्वारिंशत्सहस्रप्रमिता विद्याः सिद्धशाबरादिपुरुषदैवताधिष्ठिताश्च मन्त्रा यस्य स सिद्धबहुविद्यामन्त्रः, पुनः किंविशिष्टः ?–'उचितज्ञः' सङ्घादिप्रयोजनकुशलो विद्यावान् भवति, चः समुच्चये, इति गाथोत्तरार्द्धार्थः ॥ ३५ ॥ भावार्थस्त्वार्यखपटाचार्यदृष्टान्तेन विष्टङ्क्यते, तथाहि—

परैरजेयशासने श्रीवर्द्धमानशासने खण्डितानार्याः श्रीमदाऽऽर्यखपटाचार्याः अभूवन्, शेषाहिक्षीरपाथोधि–स्वःसरिद्रोधसां छलात् । येषां विद्योद्भवा कीर्त्तिर्जगत्त्रयममण्डयत् ॥ १ ॥ तेषाममेयभागधेयोऽन्यवादिभिरजेयो भागिनेयो भुवननामधेयः परमविनेयः समजनि । निराबाधमवस्थानं, भवितेतीव योऽत्र नः। विद्याभिरनवद्याभिर्भुवनो भवनीकृतः ॥ १ ॥ एकदा कपटकरटिकरटतटपाटनपटुतरहरयः श्रीआर्यखपटसूरयः सहस्रकरा इव भव्यमनस्तमः

स्तोममपहरन्तो वसुन्धरायां विहरन्तो गात्रयष्टिशर्मदाननिदाननर्मदानदीजलप्लवोल्लासितलताकच्छे श्रीभरैरतुच्छे श्रीभृगुकच्छे स्वच्छपरिच्छदसितच्छदविराजमानाः समवासार्षुः । तत्र सौगतमतवासितस्वान्तो महसाऽधरीकृतमित्रो बलमित्रो नाम राजा प्रजाः पालयति स्म । तत्र च भक्तिभरनिर्भरवसुन्धरेश्वरमान्यतया सोन्मादा वादविद्याविशारदाः सुगतशासनोद्भावनां विदधानाः श्रीमज्जिनशासननिन्दनमुखरमुखाः स्वाज्ञैश्वर्यमिव सर्वत्र प्रवर्त्तयन्तो वर्त्तन्ते स्म शौद्धोदनिविनेयाः । तदा विवेकच्छेकाः श्रमणोपासका गुणगुरून् गुरून् प्रणिपत्य विज्ञपयन्ति स्म—भगवन् ! वयमकुण्ठशाठ्योल्लुण्ठश्रीमदर्हच्छासननिन्दावचनमार्गणगणैर्बोधिसत्त्वैरुक्तियुक्तिसमुल्लासितस्वतत्त्वैर्विध्यमानाः सुतरां च पीड्यमानाः सकष्टं तिष्ठामः स्म । तस्मादमी भषणा इव भषन्तो वारणीयाः केनाप्युपायेन, यतः—खलानां कण्टकानां च, द्विविधैव प्रतिक्रिया । उपानन्मुखभङ्गो वा, दूरतो वाऽपसर्पणम् ॥ १ ॥ ततः सूरयो दशनविशदच्छविविच्छुरितरदच्छदास्तानवदन्—भो भोः ! श्राद्धा न वयं क्षमाधना नरकपतननिबन्धनं परैः सह वादं कुर्म इत्युक्त्वा विरते गुरुभिस्तज्जामेयो भुवनाभिधानो मुनिर्यमवहुर्द्धर्षस्तथागतानां स्पर्द्धिष्णूनां गोमायूनामिव शार्दूलो निन्दामसहमानो वादमनिच्छूनामपि प्रभूणां वचनमुपादाय सम्राडिव वादरणाङ्गणे वचनरचनाखरतरशरप्रहारैर्जर्जरयन् सौगतप्रत्यर्थिनोऽजैषीत् । तमसमानमपमानमाकर्ण्य वृद्धकराभिधानो बौद्धाचार्यो जैनजयमृगतृष्णातरलितो गुडशस्त्रपुरादेत्यानात्मज्ञः सर्वज्ञपुत्रकेण भुवनर्षिणा सह राजसंसदि राजसभावतो विवदिषुः स्वमताभिमतमेवं पूर्वपक्षं

कक्षीचकार—'यत्सत्तत्क्षणिकं यथा जलधरः सन्तश्च भावा इमे' इति सौगतमतमनुमानमवितथं मन्वानो ब्रूते स्म—, क्षणिकमेव वस्तु वस्तुत्वमावहति विचार्यमाणं, नित्यं हि वस्तु विचारचतुरैर्विचार्यमाणं प्रबलपवनप्रेङ्खोलनातरलितजलदलीलामाकलयति, तथाहि—अप्रच्युतानुत्पन्नस्थिरैकस्वभावं नित्यं, तच्च क्रमेणार्थक्रियां कुर्याद्यौगपद्येन वा ?, न तावत्क्रमेण, क्रमो हि पौर्वापर्यं, तच्च प्रमाणैर्विचार्यमाणं स्वभावभेदमापादयति, तथा च सति स्वभावभेदादेवानित्यत्वं, नापि यौगपद्येन, यौगपद्यं हि समकालमेव सर्वार्थक्रियाकरणेन भावस्वभावाज्जगच्छून्यत्वप्रसङ्गः, अतो बलादेवायातं क्षणिकत्वं । किञ्च-एकं वस्तु सदसद्रूपं नित्यानित्यं चेति पक्षोऽप्यसम्भवी, विरोधव्याघ्राघ्रातत्वात्, अतो दूरापास्त एव । इत्युदित्वा विरते वृद्धकरबौधाचार्ये अनल्पकल्पान्तवातकल्पजल्पो मुवनर्षिस्तमाक्षिप्तवान्—अरे देवानांप्रिय ! यत् त्वया अक्षणिके वस्तुन्यर्थक्रियाकारित्वदूषणमुद्घुष्टं तद्भवदभ्युपगते क्षणिकेऽपि सममेव, यतः क्षणिकोऽप्यर्थोऽर्थक्रियायां प्रवर्त्तमानः क्रमेण यौगपद्येन वाऽवश्यं सहकारिकारणसव्यपेक्ष एव प्रवर्त्तते, यतः सामग्री वै जनिका, न ह्येकमेकस्माज्जायत इति । न च सहकारिणा कश्चिदतिशयः कर्तुं पार्यते, क्षणस्याविवेकित्वेनानाधेयातिशयत्वात्, क्षणानां च परस्परोपकारकोपकार्यत्वानुपपत्तेः सहकारित्वाभावः, सहकार्यनपेक्षायां च प्रतिविशिष्टकार्यानुपपत्तिरिति । तदेवम्—'अनित्य एव कारणेभ्यः पदार्थः समुत्पद्यते' इति, तत्रापि चैतदालोचनीयं—किं क्षणक्षयित्वेनानित्यत्वमाहोस्वित्परिणामानित्यत्वेनेति, तत्र क्षणक्षयित्वे कारणकार्यत्वाभावात्कारकाणां व्यापार

एवानुपपन्नः, कुतः क्षणिकानित्यकारणेभ्य उत्पादः ? इति । अथ पूर्वक्षणो विनश्यन्नुत्तरक्षणमुत्पादयति, तुलान्तयोर्नामोन्नामवत्, एवं तर्हि क्षणयोः स्पष्टैवैककालताऽऽश्रिता, तथाहि— याऽसौ विनश्यदवस्था साऽवस्थातुरभिन्ना, उत्पादावस्थाप्युत्पित्सोः, ततश्च विनाशोत्पादयोर्यौगपद्याभ्युपगमे तद्धर्मिणोरपि पूर्वोत्तरक्षणयोरेककालावस्थायित्वमिति, तद्धर्मत्वानभ्युपगमे च विनाशोत्पादयोरवस्तुत्वापत्तिरिति प्रलीनः क्षणिकवादः । एवं सर्वथा निरुत्तरीकृतो वृद्धकरो वृद्धकरवत् प्रकम्पमानः सत्रपमानसद्दोऽभिनिमग्नश्चिन्तयामास—अहो कथममुना शिशुनाऽपि पञ्चाननेनेव विद्यामदोन्मत्तो मतङ्गज इव पराजिग्ये ?, अतः कथं स्ववदनं जने दर्शयिता ?, तस्मान्मरणमेव शरणमिति- जैनमुनिषु मन्युमादधानो गृहीतानशनो विपद्य गुडपुरे वृद्धकराभिख्यो यक्षो भूत्वाऽर्हच्छासननिबद्धवैरानुबन्धस्तद्भक्तजनमुपदुद्राव, यतो न कदाचिदपि ऋणं वैरं च पुराणतामासादयति । सङ्घोऽपि तदुपद्रवोपद्रुतः श्रीआर्यखपटाचार्यान् व्यजिज्ञपत्—भगवन् ! भवन्तः एवात्र सपत्ने प्रत्यनस्थातुं प्रत्यलाः, यथा क्षुति नष्टायां सूर्यस्मरणं यथाऽहिदष्टे गरुडानुध्यानं तथाऽत्र व्यतिकरे भवतामेव स्मरणमिति सङ्घवचो हृदि निधाय स्वल्पपरिच्छदोपेता गुह्यकगृहे एकाकिनः प्रविश्य दुष्टदमनाय पुरातनोपानहौ तत्कर्णकुण्डलीकृत्य तद्धृदये च चरणयुगं दत्त्वा समन्तात्कन्थावृतशरीराः सूरयः सुखं शेरते स्म । तदा तस्य यक्षस्य पूजकास्तां तादृशीं स्वस्वामिनोऽनन्यसामान्यामवज्ञामालोक्य तद्भक्ताय भूपाय सरभसमभाषन्त । राजाऽपि भ्रुकुटीभीषणललाटपट्टो दन्तपङ्क्तिदष्टोष्ठपुटः सहसोत्थाय

यक्षायतनं प्रविश्य तमाह स्म– भोः ! कस्त्वं ? किमर्थमेवं धृष्टं विचेष्टसे ?, ततस्तस्याजल्पतस्तज्जागरणाय यत्र यत्र प्रावरणपटमुत्सारयामास तत्र तत्र शकृद्द्वारमेव विलोकयामास भूवासवः, ततोऽसौ कोपाटोपसमुत्कटभ्रकुटिर्यष्टि-मुष्ट्यादिभिस्तमताडयत् । ते च प्रहारास्तस्मिन्नलगन्तः प्रत्युत राजान्तःपुरीशरीरेषु सहस्रगुणीभूय यातनां जनयांचक्रुः, तदाऽवरोधवध्वः ससाध्वसा रोदसीपूरं पूचक्रुः, हा हाऽन्तःपुररक्षकाः ! पटुकटुतरप्रहारैः केनाप्यदृष्टेन दुष्टेन पटहा इव ताड्यामहे इत्यस्मत्स्वरूपं भूपतये गत्वा निवेदयत, यथाऽस्मान् प्रतिकरोति, तैरपि सत्वरं गत्वा नृपाय तन्न्यवेदि, सोऽपि चेतसि चिन्तयामास–नूनमेष कोऽपि विद्यासिद्धः, तस्यादेतद्विलसितमेतत्, ततः स चकितस्तं चरणयोर्लगित्वा क्षमयामास क्ष्मावासवः–प्रसीद क्रोधमुपसंहरेति वचनैस्तमुपशमयामास, तदा त्वार्यखपटाचार्या उत्थाय प्रस्थातुकामास्तं गुह्यकं स्माहुः–रे यक्ष ! मद्गु त्वमपि समागच्छ मत्समं, सोऽपि बालकवत्तत्पृष्ठलग्नश्चचाल, लोकोऽपि तमदृष्टपूर्वं स्वरूपं विनिरूप्य विस्मयापगायां स्नान्ति स्म । अथ यक्षायतनपुरोदेशे स्थितं बृहत्पाषाणयुगलं सूरिशक्त्या यक्षपृष्ठलग्नं चचाल, ततः कौतुकोत्तानमानसोदरविधुरान्तरश्च नरवरः प्रह्वमौलिमौलिनिघृष्टतत्पदपद्मो गुरुं विज्ञपयति स्म–प्रभो ! एताभ्यामुपलशकलाभ्यां घरट्टान्तःपतितचणकवत्पौरजनः सञ्चूरयिष्यते, तस्मादत्रैवै-तयोर्निषेधः क्रियतां मयि प्रसत्तिमाधाय, यक्षोऽपि वृक्षवदुत्खातप्रतिरोपितः स्वस्थान एव स्थाप्यतां, तद्वचसा सूरयोऽपि तथैव कृतवन्तः । तेऽप्येतच्छासनप्रभावनाकृते कृतवन्तो न कोपाटोपात्, न हि तादृशाः सम्परायैः परा-

भूयन्ते महात्मानः, यतः—बुद्धिविहवाइगवो, तुच्छाणं होइ न उण गरुयाणं। खीरोयहिणो दुद्धं, छालिदुद्धं व बुप्फिणइ ॥ १ ॥ ततः क्षितिपतिर्महोत्सवपुरस्सरं सूरीन् पुरे प्रवेश्य स्वयं सपौरजनपदः श्रीमदर्हद्धर्माराधनसावधानः समभूत्। सूरयोऽपि श्रीजिनशासनसाम्राज्यमेकच्छत्रमासूत्रयन्तस्तत्रैव तस्थिवांसः। अन्यदा भृगुकच्छात्सङ्घानुज्ञातं यतिसङ्घाटकं सूरीनाह्वातुमियाय। तेनाऽऽर्यखपटाचार्याः सङ्घविज्ञप्तिमिमां श्राविताः कश्चिदविपश्चिद्विनेयः कपरिकास्थितान्यागमपत्राणि द्रव्यानुयोगरहस्यमयानि सहसोपादाय वाचितवान्, तत्रस्थामाकृष्टिविद्यां स्वयमभ्यस्य तया कल्पलताकल्पया सरसरसवत्यादिकमानीयानुदिनं भुञ्जानो गीतार्थैर्वार्यमाणोऽपि रसगृध्नुः क्रुधं विधाय बुद्धमते स शठोऽगात्, स तदाश्रयमाश्रितस्तदाश्रयिणां पात्राणि नभोमार्गे प्रेषयित्वा विविधभक्ष्यभोज्यभृतान्यानीय च सौगतानां भुजिक्रियां सूत्रयामास यतिपाशः। तदेतस्यामानं महिमानं वीक्ष्य गतानुगतिकतया सर्वोऽपि जनता सौगतमतानुगतिका संवृत्ता, जैना अप्यैहिकफललिप्सवः केऽपि तन्मतमूरीचक्रुः। तस्मादेतज्जैनशासनपराभवमेत्यापाकुरुध्वं नाऽन्यनीला अपरे साधवोऽस्मिन्नध्वनीति सङ्घादेशमासाद्य सद्य एव सूरयस्तेनैव साधुसङ्घाटकेन समं समन्ततो जिनशासनप्रभावनार्थं विपक्षानर्थार्थं च भृगुकच्छपुरमेत्य दुष्टशिष्यप्रहितपात्राणि भक्ष्यपूर्णानि नभोवर्त्मना प्रत्यावृत्तानि गुरुतरगुरुकल्पितेषु व्योमस्फटिकशिलातलेष्वास्फालितानि मुद्गराहतघटवत्सहस्रं खण्डीभूतानि भूमाववपातयन्, सोऽप्रशस्यशिष्योऽपि स्वप्रहितपात्रभङ्गेन गुरूणामागमनं मत्वा काकनाशं ननाश।

अथश्रीमदार्यखपटाचार्याः परैरनिवार्यवीर्याः सौगतनिकेतनं स्वयं गताः सन्तो बौद्धैरौच्यन्त–भो भोः ! श्वेताम्बराः। सकलदैवतशिरोरत्नं रत्नत्रयाधारमपारगुणाकरं सुगतं भूतलमिलन्मौलयः किं न नमत, ? ततः कशाहततेजस्विवाजिन इवोत्तेजिताः सूरयस्तद्वचसा गूढरोषमुद्वहन्तः प्रोचिरे–अरे बोधिसत्त्व ! समुत्थाय मदीयपादारविन्दद्वन्द्वं वन्दस्व । तद्वचःपरममन्त्रशक्त्या सा सुगतप्रतिमा सुशिक्षितकापालिकासनेव तत्पदपद्माग्रतो लुलोठ, बौद्धाण्डमपि प्रचण्डदण्डप्रणामचिकीर्षयेव तच्छक्त्या ननाम । अद्य यावत्तद्बौद्धाण्डं निग्रन्थनमितमिति जने प्रसिद्धिमावहति स्म । एवं भृगुकच्छे जिनशासनोन्नतिमासूत्र्य सूरिश्चारयो अन्यत्र व्यहार्षुः । इतश्च पाटलिपुत्रे दाहडनामा भूपतिर्भूमिदेवभक्तानुभक्तः तानेव देवपितृगुरुत्वेनामंस्त, अनुदिनं पूजयति स्म च, अन्येद्युस्तन्मयमनसा नृपेण सर्वेऽपि दर्शनिनः समाकार्येदमूचिरे–हंहो चेद्भवतां प्राणितुमिच्छा तदा सर्वदेवमयानां वर्णगुरूणां ब्रह्ममूर्त्तीनामेतेषां ब्राह्मणानां चरणपरिचरणं कुरुतेति राज्ञा भाषितैर्जैनादन्यैः सर्वैरपि तीर्थान्तरीयैर्जीवितव्यलिप्सुभिर्भूतलन्यस्तमस्तकैर्विप्राः प्रणेमिरे । ततो जैनमुनिभिर्नरेन्द्रात्सप्त दिनानि याचित्वोपाश्रयमेत्य परस्परमालोचयांचक्रे । वरं मरणं न पुनरविरतधिग्जनपदवन्दनं, यतस्तद्वन्दने कृते श्रीमदर्हत्तीर्थकृतामाज्ञालोपः कृतः स्यात्, तस्माच्चानन्तसंसृतिरेव जिनशासनाऽपभ्राजनापि, तद्यदि कस्यापि कापि शक्तिः प्रपोस्फुरीति तदा स स्फोरयतु प्रभावयतु चार्हच्छासनम्, अत्रान्तरे साधुरेकोऽभाणीत, भोः ! अत्र कोऽपि न तादृगतिशयवानस्ति, परं श्रीमदार्यखपटाचार्याणां फलावत्सु प्रशस्यः शिष्यो महे-

न्द्रनामोपाध्यायः श्रीभृगुकच्छपुरादत्र देशे समेतः क्वापि सन्निवेशे समीपवर्त्ती वर्त्तते,स एवास्मान्निस्तारयितुमीशो नान्यः, यतः—सन्त एव सतां नित्यमापत्तारणहेतवः । गजानां पङ्कमग्नानां, गजा एव धुरन्धराः ॥१॥ इति तन्मुखादवगत्य श्रीसङ्घेन तत्पार्श्वे साधुयुग्मं प्रजिघ्ये, तेनापि तौ मुनी समागतौ वीक्ष्य सहसोत्थाय सादरमभिगत्य पृष्टौ–हेस्वच्छौ! केन सङ्घप्रयोजनेन चरणचङ्क्रमणरीणताऽऽदृता ? सद्यः प्रतिपाद्यतां, तावप्यामूलचूलं विशाम्पतिवैशसवृत्तं तत्पुरो निवेदयामासतुः, सोऽपि सङ्घादेशेनोत्सुकमनाः पाटलीपुत्रपत्तनं तेन यतियुगेन समं प्राप, तत्र सर्वानपि मुनीन् सम्मील्य प्रतिहारनिवेदितो दूरीकृतविषादः स वाचको राजसंसदमाससाद । नृपोऽपि तानागच्छतो ज्ञात्वा स्वसमानासनेषु पार्श्वद्वयेऽपि भषणानिव कृतालङ्कारान् ब्राह्मणानुपवेशितवान् । अथ स महेन्द्रः करवीरतरूद्भूतकरवीरलम्बकम्बाद्वयं पृथक् पृथक् कराभ्यामुपादाय सप्रश्रयमिव नृपमप्राक्षीत्–राजन्! कस्मिन् पक्षे द्विजातीन्नमस्कुर्म्मः, नृपोऽपि तदपायमजानानस्तेषामुत्कर्षं प्रोल्लासयन्नाह स्म– सर्वेऽप्यमी पूज्या एव तस्माद्यथास्वैरमादरपरा वन्दध्वं श्रेणिद्वयस्थानपि, ततो महेन्द्रो महेन्द्र इव समुल्लसन्माहात्म्यो वज्रपातप्रायकम्बायुगलमेकपक्षात् द्वितीयपक्षं यावद्भ्रमयामास, तावत्तेषां शिरांसि कन्दुकवद्भूम्यामपसन्, ततोऽकस्मादेव राजलोकैः कोलाहले कृते द्विजसनाभयो द्रुतमेत्य विलेपुः–हाऽनेन दुष्टेन महीनेन यष्ट्याऽऽहत्य सुप्तः कृष्णसर्पो जागरितः, यदमी महात्मानो मुनयोऽवगणिताः, स्वहस्तेन तदङ्गारवर्षणमकारि, यत्कदाचिदपि न भूतं द्विजप्रणमनं मुनिभ्यः, तस्माद्विगमुं नृपमकृत्यका-

रिणं, किं न्यूनमासीदेषामृषियन्दापनं विना, मुधैव द्विजमूर्द्धन्यनर्थवज्रपातः कृतः, तदवश्यं ब्रह्महत्यापातकलिप्तो नृपोऽजनि, अतः परं चासद्धत्ययाऽधिकतरमात्मानं पातकपङ्के निमज्जयिष्यति, राजापि तत्स्वरूपं विनिरूप्य खेदखिन्नो मुखं दर्शयितुमक्षमः पातालमूलं प्रविविक्षुरिव विपक्षभूभृत्पक्षच्छेदनमहेन्द्रस्य श्रीमहेन्द्रोपाध्यायस्य पादारविन्दमभिवन्द्यावादीत्—महात्मन्! अस्मादकृत्यान्मां निस्तारय, क्षमानिधे! क्षम्यतामयं ममापराधः, प्रसत्तिश्चाधीयतां, यतो मानधना एव हि भवन्ति महान्तः, यदुक्तं—अधना धनमिच्छन्ति, धनमानौ हि मध्यमाः। उत्तमा मानमिच्छन्ति, मानो हि महतां धनम् ॥ १ ॥ अतः परं किमुच्यते,—माताऽसि मे त्वं जनकस्त्वमेव, प्रभुर्गुरुस्त्वं मम बान्धवोऽपि। त्वं जीवदाता शरणं शरण्यः, प्रसीद मां तारय पातकाब्धेः ॥१॥ अतो द्विजन्मनां जीवितदानेन प्रसद्यतां हत्यापातकदोषकश्मलितं च मां निर्मलीकुरु। अत्रान्तरेऽम्बरे वाणीदृशी प्रोल्ललास—'यद्यमी विप्राः श्रीमदर्हद्दीक्षां कक्षीकुर्वन्ति, तदा प्राणन्ति नान्यथा' नरेन्द्रेणापि तद्वचस्यङ्गीकृते सर्वेऽपि ते विप्राः सजीवभूवुः, ततस्ते भावशून्या अपि जिजीविषया महेन्द्रोपाध्यायसविधे व्रतं प्रपन्नाः, राजापि परमश्रावकत्वमङ्गीकृत्य त्यक्तमिथ्यात्वाभिनिवेशः प्रविवेश श्रीजिनशासनप्रासादे, तं च तीर्थयात्राद्युत्सवधर्मकृत्यैः प्रदीपैरिव द्योतयामास। अथ श्रीमहेन्द्रोपाध्याया जिनशासनं प्रभावयित्वा द्विजमुनिभिः समं भृगुकच्छपुरमेत्य श्रीआर्यखपटाचार्यानवन्दत, तैरपि भृगुकच्छे श्रीमुनिसुव्रतस्वामिचैत्यमहातीर्थं स्थापयित्वा सर्वानुयोगयोग्यं श्रीमहेन्द्रं स्वीयपट्टे निवेश्य विविधप्रभावना-

भिर्तुर्वि माहात्म्यं प्रकाश्य प्रान्ते गृहीतानशनैः स्वः प्रभावयितुमिव प्रतस्थे ।–मुदार्यखपटप्रभोर्गणभृतो जगद्विश्रुतं, चरित्रमिति चित्रकृत् श्रुतिपथे निधायाञ्जवत् । जिनाधिपतिशासनोन्नतिकृते कृतज्ञोत्तमाः !, कलासु सकलास्वपि प्रतनुतादरं यत्नतः ॥ १ ॥ विद्यावद्विषये श्रीमदार्यखपटाचार्यकथा ॥ षष्ठं विद्यावत्प्रभावकलक्षणमुक्त्वा सप्तमं सिद्धप्रभावकस्वरूपं गाथापूर्वार्द्धेनाह—

संघाइकज्जसाहग–चुण्णंजणजोगसिद्धओ सिद्धो ।

व्याख्या—सङ्घस्य–साधुसाध्वीश्रावकश्राविकारूपस्य, आदिशब्दाज्जिनगृहजिनबिम्बजिनागमानां च यत्कार्यं–प्रयोजनं तस्य साधकानि–सम्पादकानि यानि चूर्णानि– सुवर्णसिद्ध्याद्युत्पत्तिजनकान्यौषधिवृन्दोद्भवानि अञ्जनानि–च निधिदर्शनादृश्यीकरणकारणानि नेत्राञ्जनानि योगाश्च–सौभाग्यदौर्भाग्यकराः पादलेपादिव्योमोत्पतनसाधकास्तैः सिद्ध एव सिद्धको–जगति प्राप्तप्रतिष्ठः सिद्धो भवतीति गाथापूर्वार्द्धार्थः ॥ भावार्थस्तु श्रीपादलिप्ताचार्यदृष्टान्तेन दृढीक्रियते तथाहि—

सिरिभारहवासम्मी, लच्छिअवंझा पुरी अउज्झत्ति । जिणजम्मगोरवेणं, जीइ समा नो सुरपुरीवि ॥ १ ॥ तीए फुल्लो सिट्ठी गुणेहिं लच्छीइ पुरिओवि दढं । पडिमानामेण पिया तस्स य सोहग्गअप्पडिमा ॥ २ ॥ सा वइरुट्टिं देविं आराहइ निच्चमेव पुत्तकए । चइऊणं सावज्जं कज्जं कयपोसहुववासा ॥ ३ ॥ एगमणा जा चिट्ठइ कुणमाणी

धम्मजागरियमेसा । ताव सहसत्ति तब्भत्तिरंजिया पयडिउं अप्पं ॥ ४ ॥ सिरिवइरुट्टा तुट्ठा तं जंपइ तुह सुया हविस्संति । सिरिनागहत्थिगुरुणो पयधोयणनीरपाणेणं ॥ ५ ॥ युगलं । विग्घविघायनिमित्तं तप्पयधोयणजलं तुमं अज्ज । पिज्जासुत्ति भणित्ता पत्ता अद्दंसणं देवी ॥ ६ ॥ पडिमाविय पाभाइयकिचाइँ करिय पउणपहरम्मि । पत्ता वसहिदुवारे गुरूणा जा चिट्ठए तत्थ ॥ ७ ॥ पुच्छेइ मुणिं गुरुपाय–धोयजललं खणत्थमायायं । किं नीरमिमं ? तेणं कहिए तं साविय मग्गित्ता ॥ ८ ॥ पाऊणं वसहीए मज्झम्मि गया दसासुयक्खंधं । परियट्टंते दट्ठुं दिट्ठा वंदेइ सूरिवरे ॥ ९ ॥ जुयलं । दाऊण धम्मलाहं तेहिंवि पुट्ठा य आगमणहेउं । सा सयलं नियकज्जं साहेइ जहट्ठियं गुरुणो ॥ १० ॥ दाउं सुओवओगं, भणिया सूरीहिँ तुज्झ होहिंति । पुत्ता पढमस्स पुणो, वुत्तंतं सुणु महासत्ति ! ॥ ११ ॥ उज्झिय जमुणातीरं जइ चिट्ठेही दसाण वरिसाणं । उवरि तो जीवेही इय पडिमा सुणिय भणइ गुरुं ॥ १२ ॥ तुम्हाणं दाहिस्सं, पढमं पुत्तं तओ गुरू आह । जइ एवं तो कुणिमो अम्हे चिरजीवियं एयं ॥ १३ ॥ तं पडिवज्जिय वयणं, पडिमा नियमंदिरम्मि सम्पत्ता । साहइ पियस्स गुरओ, तेणवि अंगीकयं एयं ॥ १४ ॥ तीए तीइ निसाए कोवि जिओ नागलोगओ चविउं । रयणमयनागदंसणपसूइओ गब्भि ओइन्नो ॥ १५ ॥ सत्तममासे गिरिकाणणेसु जइ देमि बहुविहं दाणं । इय दोहलओ तीए, दइएणं पूरिओ झत्ति ॥ १६ ॥ अह पुण्णेसु दिणेसु पुवव अउवतेयपरिकलियं । पडिमा पसवइ पुत्तं सहस्सकिरणस्स बिंबं व ॥ १७ ॥ जम्मणमहिमं काउं बारसमे वासरे

निए सयणे । सम्माणिउं भणेइ वरवसणविभूसणाईहिं ॥ १८ ॥ एयस्स य जणणीए जं दिट्ठो सुमुणियम्मि मणि-
नागो । तेण इमस्स य नामं नागिंदो होउ पुत्तस्स ॥ १९ ॥ तं पुत्तं सूरीणं नाऊणं जाव ते समप्पंति । ताव गुरूहिं
भणिया दट्ठूणं लक्खणे तस्स ॥ २० ॥ संघसिरोमणिभूओ भविस्सइ एस तुम्ह अंगरुहो । तो पोसिऊण सुइरं आ-
णिज्जसु अट्ठमे वरिसे ॥ २१ ॥ तेहिंवि गुरुविणएणं नीओ सगिहम्मि पंचधाईहिं । लालिज्जंतो कप्पदुमुव सो
वुड्ढिमणुपत्तो ॥ २२ ॥ अह अट्ठमम्मि वरिसे सुमुहुत्ते उच्छवं करंतेणं । पिउणा गुरूण दिन्नो तेहिँ वि सो दि-
क्खिओ झत्ति ॥ २३ ॥ तो पडिमाए कुच्छी—सरसीए रायहंससारिच्छा । संजाया अन्नेवि हु तणया रूवेण मयण-
समा ॥ २४ ॥ अह सो खुड्डगसाहू सोवीरं विहरिउं गिहिकुलाओ । जा चिट्ठइ गुरुपुरओ ता तेहिं पुच्छिओ एसो
॥ २५ ॥ जाणसि आलोएउं एयं ? तो सो कहेइ जाणेमि । तुम्ह पसाया तो भण इय गुरुणुत्तो कहइ एवं ॥२६॥
अंबं तंबच्छीए अपुप्फियं पुप्फदंतपंतीए । नवसालिकंजियं नववहूइ कुडएण मह दिन्नं ॥ २७ ॥ गुरुणो तदुत्ति-
जुत्तिं सुणित्तु साहंति निग्गह भो ! मुणिणो । सिंगारग्गिपलित्तं तो नाममिमस्स य पलित्तो ॥ २८ ॥ तत्तो सो
गुरुचरणे नमिउं विन्नवइ देह पसिऊणं । एगं मत्तं जेणं हवेमि पालित्तओ भयवं ! ॥ २९ ॥ तत्तो पसन्नवयणा
गुरुणो नामं तमेव पडिवन्ना । पुच्छंति किंपि जाणसि तुमंपि छंदाइयं ? वच्छ ! ॥ ३० ॥ जं किंपि पढंताणं मुणीण
सो सुत्तमाइयं सुणियं । पढियमिव भणइ गुरुणो पुरओ सयलंपि अक्खलियं ॥ ३१ ॥ अन्नं च—दिट्ठं सुअयं अहि-

यं जंकिंचिवि सत्थमाइयं तं च । पन्नावलेण सयलं निम्मियं पिव स वाहरइ ॥ ३२ ॥ सिरिनागहत्थिसूरी संघं सद्दा-विउं इमं भणइ । सम्मं गुणआलित्तो पालित्तो एस लहुओवि ॥ ३३ ॥ अज्जदिणाओऽवस्सं बहुमाणेणं सयावि दट्ठव्वो । इय गुरुवयणं लेपावि तग्गुणरत्तेण पडिवन्नं ॥ ३४ ॥ जुयलं । अह सो भावुवहाणिण ऊसाराकप्पयएणणु-न्नाओ । सव्वम्मिवि सुत्तत्थे कओवहाणुव्व जोगुत्ति ॥ ३५ ॥ सिरिसंघसम्मएणं नियपए सूरिणा तओ ठविओ । पालित्तयआयरिओ सो जाओ सयलजयपयडो ॥ ३६ ॥ सिरिनागहत्थिगुरुणा संघो वुत्तो अहं विहारस्स । असमत्थो तो एसो सूरी अन्नत्थ विहरेउ ॥ ३७ ॥ सासणउन्नयकारी एसो विहरेउ जउणनइपरओ । अन्नह महाअणत्थो इमस्स भावी न संदेहो ॥ ३८ ॥ तो संघो आएसं पसिऊणं देउ जेण महुराए । थूभं नमेइ एसो तो तेणवि सूरिणो भणिया ॥ ३९ ॥ जत्थ य जत्थ य एसो विहरिस्सइ देसमंडलाईसुं । तत्थ य तत्थ य नूणं संघस्स समुन्नई होही ॥ ४० ॥ जं बालोवि मयंको वंदिज्जइ इत्थ सयललोएणं । तन्निकलंकयाए माहप्पं निरुवमकलाए ॥ ४१॥ ता एसो लहुओविहु गुरुयाण पहं सया पयासिहिसि । उइओवि हु किं सूरो गिरीण सिरि धरइ नो पाए ? ॥ ४२ ॥ एस पभावगचूडा-रयणं जत्तेण रक्खियव्वो य । गुरुभणिओ उण अत्थो न होइ कइयाविहु असव्वो ॥ ४३ ॥ इय वीसं-सिय संघो रक्खट्ठा तस्स कुणइ पत्थाणं । महुराउवरिं तो नागहत्थिसूरी कहइ एवं ॥ ४४ ॥ वच्छ ! इमा वि-ज्जाओकहियाओ अम्ह पुव्वसूरीहिं । ताओ मए तुह दिन्ना पउंजियव्वा य संघत्थे ॥ ४५ ॥ जं पायलेवविज्जा तइया

सुगुरूहिँ तस्स उवइट्ठा । तो पायलित्तसूरी इय नामं तस्स संजायं ॥ ४६ ॥ तत्तो पणमिय सूरिं संघसमेओ करित्तु पत्थाणं । सिरिपायलित्तसूरी पाडलिपुत्ते पुरे पत्तो ॥ ४७ ॥ तं पालइ नरनाहो मुरुंडनामा महाबलो तस्स । केणावि छइलेणं समप्पिओ सुत्तगुट्टियओ ॥ ४८ ॥ मयणेण भावियस्स य न कोवि छेयं लहेइ तस्स पुणो । तो रायसहा सयला खंडियमाणा य संजाया ॥ ४९ ॥ पालित्तयसूरीणं पसिद्धिमायन्निऊण विज्जासुं । तो रण्णा आहविउं भणिया सुत्तस्स वुत्तंतं ॥ ५० ॥ तेहिवि उण्हजलेणं वियलियमयणस्स तस्स सुत्तस्स । आइमतंतुं लहिउं सव्वं उक्कीलियं अइरा ॥५१॥ अह समदंडो दिन्नो रण्णा सूरिस्स मूलमुणणत्थं । नहु केणवि विउसेणं परमत्थो तस्स लद्धुत्ति ॥५२॥ सो सूरीहिं खित्तो दंडो पवहंतनीरपूरम्मि । तत्थ य मूलं जायं धुरम्मि तो संसओ भग्गो ॥ ५३ ॥ अह गुविलसंधि-कलियं जउमडियसमुग्गयं पुणो दिन्नं । जस्स न संधी केणवि मुणिज्जए वरिससहस्सेवि ॥ ५४ ॥ उण्हजले तं खिविउं जउनासेणं पयासिउं संधिं । पालित्तएण नियमइमाहप्पं दंसियं एवं ॥ ५५ ॥ गुरुणा फोडियतुंबो रय-णेहिँ भरित्तु गूढसीवणिया । सीविय रण्णो दिन्नो सीविणिसंधिस्स मुणणत्थं ॥ ५६ ॥ चिंततेहिं बहुसो मइमं-तेहिं न जाणिया सा उ । एवं राया पालित्तएण सगुणेहि रंजविओ ॥ ५७ ॥ अन्नम्मि दिणे रण्णो जाया सिरवे-यणा महाघोरा । जीए ओसहवेसहमंताण मडप्फरो भग्गो ॥ ५८ ॥ तत्तो राया मंतिं भणेइ पालित्तयाउ सिरपीडं । उवसामावसु मज्झं, कीलंतिं सयलसीसम्मि ॥ ५९ ॥ तेणवि गुरुणो भणिया भयवं! तित्थस्स उन्नइनिमित्तं ।

फेडइ वियणं रण्णो तो मंती तेहिँ इय वुत्तो ॥ ६० ॥ गंतूण तए राओसंघस्स य सम्मुहो ठवेयव्वो । इय सो गहिउं सिक्खं गओ निवं कारइ तहेव ॥ ६१ ॥ ठाणट्ठिएहिं गुरुहिं जाणूवरि अंगुलिं भमंतेहिं । पीडा हरिया रण्णो पढिया केणावि तो गाहा ॥ ६२ ॥ जह जह पएसिणिं जाणुयम्मि पालित्तओ भमाडेइ । तह तह मुरुंड-रायस्स सीसवियणा परिप्फुसइ ॥ ६३ ॥ इय सूरीणं सत्तिं सुणिउं नरनायगो पसन्नमणो । पडिवज्जिय जिणधम्मं भत्तीइ पभावणं कुणइ ॥ ६४ ॥ तत्तो सूरी चलिओ पाडलिपुरसंघसंजुओ पुरओ । महुराइ देवनिम्मिय-थूभे देवे नमंसेइ ॥ ६५ ॥ कित्तियमित्तं संघं ठावित्ता तत्थ इयरपरियरिओ । सूरी चुंकारपुरे गुज्जरधरमंडणे पत्तो ॥ ६६ ॥ अह सूरी साहुसुं गएसु सव्वेसु विहरणाइकए । वसहिं सावयसाविय-विवज्जियं पिक्खिऊण तओ ॥ ६७ ॥ रममाणे पिक्खेउं डिंभे बालत्तचंचलत्तेणं । कांडदेसे गोवित्ता रयहरणं रमइ तेहिं सह ॥ ६८ ॥ जुयलं । तम्मि समयम्मि अप्पुव्व-सावया केवि ताण नमणत्थं । आगंतूणं तं चिय वसहिं पुच्छंति तेवि तओ ॥ ६९ ॥ तेसिं दूरं मग्गं दंसिय अन्नेण विसिय वसहीए । नियसिय सेयं पडयं सिंहासणगम्मि उवविट्ठा ॥ ७० ॥ जुयलं । भत्तिभरनिब्भरंगा पत्ता ते सावया नमिय सूरिं । उवविट्ठा अइहिट्ठा जाणिअचिट्ठावि य अदुट्ठा ॥ ७१ ॥ तब्भावं मुणिऊणं सूरी वाहरइ महुरवाणीए । बालत्ते रमणमई वलावि विउसंपिहु जिणेई ॥ ७२ ॥ तेवि सविम्हयहियया परुप्परं संलवंति कह भावो । नाओ गुरुहिं ? तह पज्जुवासिऊणं गया सगिहं ॥७३॥ कइया विजणे पुणरवि सगडे जंते निरिक्खिउं

सूरी । कीलाइ दिन्नचित्तो डिंभगणेहिं सह मिलेइ ॥ ७४ ॥ जा सगडपिंजएसुं चडेइ ओयरइ ताव आवेउं। केहिवि विउसनरेहिं डिंभा एवं समुल्लविया ॥ ७५ ॥ भो ! डिंभा कहह फुडं पालित्तयबाइणो कहिं वसही ? । सूरीहिवि ते नाया धुवं इमे वाइणो केऽवि ॥ ७६ ॥ तेसिं वंचिय दिट्ठिं वसहिं गंतूण ओढिऊण पडं । चलणे पसारिऊणं सुत्तो कवडेण मुणिराओ ॥ ७७ ॥ वसहीदारं पत्ता निविजणं लक्खिऊण ते विबुहा । कुक्कुडसरं कुणंता मज्झे पविसंति जा झत्ति ॥ ७८ ॥ ता तद्धरिसणहेउं सूरीहि कओ बिरालउग्गसरो । तं सुणिय भणंति बुहा अहुणाविजिया इमेणऽम्हे ॥ ७९ ॥ तिमिरेहिं व रविबिंबं अम्हेहिं एस दुज्जओ नूणं । तो नमिउं सूरिपए विउसा पभणंति इय गाहं ॥ ८० ॥ पालित्तय ! कहसु फुडं सयलं महिमंडलं भमंतेणं । दिट्ठो सुओ य कत्थवि चंदणरससीयलो अग्गी ॥ ८१ ॥ सिरिपालित्तयसूरी विबुहाणं ताण मग्गओ भणइ । दिट्ठं सुयमणुहूयं वण्णिज्जंतं मए सुणह ॥८२॥ अयसाभिओगसंदूमियस्स पुरिसस्स सुद्धहिययस्स । होइ वहंतस्स फुडं चंदणरससीयलो अग्गी ॥ ८३ ॥ उत्तरमेयं लहिउं तओ पसंसंति पंडिया बहुसो । तुह चेव जए कित्ती मुणिराय ! नडीव नच्चेइ ॥ ८४ ॥ जुग्गे नाउं गुरुणा तप्पुरओ धम्मदेसणा विहिया । तं सुणिय केवि दिक्खं पडिवन्ना केवि सम्मत्तं ॥ ८५ ॥ बहुविहपभावणुब्भवकित्तिभरेणं दिसाउ धवलंतो । सिरिसत्तुंजयरेवय–तित्थेसु कुणेइ जत्ताओ ॥ ८६ ॥ अह पत्तो खेडउरे तत्थ य सूरी लहेइ पुण्णवसा । जोणीनिमित्तविज्जा–सिद्धाभिहपाहुडे चउरो ॥ ८७ ॥ जोणीपाहुडनामे पढमे जीवाण तह

अजीवाणं । विविहोसहिजोएणं उप्पत्ती भणिया अत्थि ॥ ८८ ॥ बीए निमित्तपाहुड–नामे सिरिदिट्ठिवायसव्वस्सं । अट्ठंगंपि निमित्तं भणियं अरिहत्थ सुअकरं ॥ ८९ ॥ तइए विज्जापाहुडसन्ने विज्जाण तह य मंताणं । उप्पत्ति-साहणाविहि–फलसंपत्तीउ कहियाओ ॥ ९० ॥ सिद्धाभिहपाहुडए चउत्थए सयलसिद्धलद्धीओ । कहियाउ संति विम्हय–सायरससिउदयसरिसाओ ॥ ९१ ॥ एएसु चउविहेसुवि पाहुडएसुं लहित्तु कोसल्लं । सिरिपालित्तयसूरी देवाणवि दलइ माहप्पं ॥ ९२ ॥ तेसिं सूरिवराणं मुहकमलं जेण इक्कवारंपि । दिट्ठं नइ सो मणयंपि निव्वुइं तं विणा लहइ ॥ ९३ ॥ नरवरसचिवाईहिं सेविज्जंतस्स तस्स सयकालं । साहूणवि होइ खणो न वत्तमित्ताकहण-कज्जे ॥ ९४ ॥ तेसिं अणुग्गहट्ठा पालित्ती नामिया लिवी विहिया । तीइ गुरूणं पुरओ नियकज्जं विन्नवंति जया ॥ ९५ ॥ तइया दक्खिणदेसे ससिरीयं मन्नखेडयं नयरं । लाडम्मि उ भरुयच्छं वलही नयरी सुरट्ठाए ॥ ९६ ॥ तह गिरिनयरं सिरिसूरसेणविसयम्मि महुरनयरी य । एएसुं ठाणेसुं विज्जइ संघो गुणमहग्घो ॥ ९७ ॥ अह मन्नखेड-संघो न गुरुं अन्नत्थ देइ विहरेउं । जं तत्थ निवो उग्गो अन्ने न गणइ तिणेणावि ॥ ९८ ॥ इत्तो सोरट्ठाए ढं–काभिहपव्वयस्स सिहरम्मि । ढंकाभिहाणनयरे समत्थी नागज्जुणो जोगी ॥ ९९ ॥ संपत्तकणयलद्धी, दाणवसीकय-समग्गदेसजणो । सव्वं दंसणवंदं पभावहीणंति निंदेइ ॥ १०० ॥ इत्तो जत्ताईणं विग्घं धिज्जाइया कुणंति सया । भरुयच्छे महुराए जिणभवणेसुं महाणिट्ठा ॥ १०१ ॥ विन्नत्तो पालित्तो वुत्तं तमिमं खु तेसि संघेहिं । तेणवि ते आइट्ठा कायव्वा कोसुईजत्ता ॥ १०२ ॥ तव्वयणेणं कत्तिय–सियपक्खे पडिवयादिणपभाए । पारद्धा जिणजत्ता सं-

धेण महुस्सवसणाहा ॥ १०३ ॥ सूरीवि पउणपहरं काऊणं धम्मदेसणं संघं । आपुच्छिऊण पत्ता भरुयच्छे करिय पयलेवं ॥ १०४ ॥ अस्सावबोहचेइय–मज्झे सहसत्ति पिक्खिओ सूरी । संघेणं आणंदिय–चित्तेण नमंसिओ य तहा ॥ १०५ ॥ बहुनट्टगीयसंखाइ–सद्दसंपूरिए पुरे सयले । रायाईणं जाया सूरीणं आगमणसुद्धी ॥ १०६ ॥ तो झत्ति पोरलोएण संजुएणं धराहिराएणं । जंगमतित्थुत्ति भणंतएण नमिओ स गणहारी ॥ १०७ ॥ संघेणं भूसणा सूरी वत्थाइणा य सक्करिओ । तेणवि तं सयलंपिहु दिन्नं धिज्जाइयाईणं ॥ १०८ ॥ साहुक्कारे जाए सूरीणं विन्नवेइ तो राया । भयवं ! को मह दोसो जं नागच्छेह भरुयच्छे ? ॥ १०९ ॥ सूरीवि आह मं मन्नखेडसंघो न विहरिउं देइ । कहमवि एगं पहरं अज्ज मए तित्थजत्तकए ॥ ११० ॥ मन्नाविय पहरदुगे गंतुं तत्थेव देव ! भुत्तव्वं । तो राया विन्नवइ पसिउं मह वयणमिइ कुणसु ॥ १११ ॥ कलदिणाओ अट्ठ य–दिणाणि महिमं जिणाण काहमहं । तो आगमणपसाओ पइदियहं नाह ! कायव्वो ॥ ११२ ॥ सूरीहिंवि पडिवन्नं तुमं महाराय ! कुणसु जिणपूयं । आगंतूण महं तुह मणोरहं पूरइस्सामि ॥ ११३ ॥ तत्तो वलहिं संपत्तो पालित्तो पवयणुन्नइं काउं । वंदेउं सत्तुंजय–रेवयगिरिनयरतित्थाइं ॥ ११४ ॥ ढंकपुरम्मी जा जिण–हरम्मि सूरी करावए महिमं । ता नागज्जुणजोगी आगच्छइ तस्स पासम्मि ॥ ११५ ॥ विणएणं मन्नाविय सूरिं नेऊण निययमढियाए । तच्चलणे पक्खालइ सुद्धजलेणं ससीसुव ॥ ११६ ॥ विन्नवइ नाह ! कोमुइमहुस्सवं जाव इत्थ आवेउं । नियदंसणेण नयणे, मह सकयत्थे करि-

ज्जासु ॥ ११७ ॥ मं सहकाउं सामिय ! जिणभवणेसुं तुमेहिँ गंतव्वं । अंगीकयतव्वयणो महुरं पालित्तओ पत्तो ॥११८॥ तत्थ य सासणमहिमं काउं सिरिमन्नखेडनयरम्मि । पइरदुगे आवेउं सूरी भुंजेइ आहारं ॥ ११९ ॥ एवं कुणमाणाणं सूरीणं पइदिणं गमागमणं । नागज्जुणेण तो तं तेसिं चलणाण सोयजलं ॥ १२० ॥ उस्सुंघंतेण पियंतएण नाओ वियक्खणवरेण । सत्तुत्तरसयमूली—परमत्थो पायलेवस्स ॥ १२१ ॥ एगं तंदुलनीरं अमुणंतेणं करित्तु पयलेवं । उप्पइउं गयणयले पडियं सहसत्ति धरणीए ॥ १२२ ॥ गुरुउवएसेण विणा विज्जा सिज्झंति नेव इय स धुवं । जाणंतोवि पउंजइ अहो अहो मूढया तस्स ॥ १२३ ॥ ठाणे ठाणे वणसयजज्जरियंगो निएवि सूरीहिं । पुट्ठो सोवि जहट्ठियवुत्तंतं विन्नवेइ नियं ॥ १२४ ॥ गोवियसब्भावेणं उवहसिओ झत्ति पायलित्तेणं । नो इत्थ सेवडाणं दंसणजोगो परं मिलिओ ॥ १२५ ॥ नागज्जुणोवि चिंतइ विज्जाए लेमि विज्जयं एयं । अन्नो नत्थि उवाओ मह लेवोसहपरिन्नाणे ॥ १२६ ॥ भणियं च—विनयेन विद्या ग्राह्या, पुष्कलेन धनेन वा । अथवा विद्यया विद्या, नान्योपायश्चतुर्थकः ॥ १२७ ॥ तो सूरिं पइ जंपइ भयवं ! गिण्हेसु धाउसिद्धिं मे । तं सुणिय तस्स वयणं अवहित्थाए ठिओ सूरी ॥ १२८ ॥ सिरिमहुराए उवरिं चलियं दट्ठुं स चिंतए जोगी । आगमणचरमदिवसो अज्ज न एही पुणो सूरी ॥ १२९ ॥ अणुगमणत्थं चलियं तं सूरी पुरवहिं निरक्खेवि । पच्चंतमिट्टवायं तत्थ य चुण्णं खिविय भणइ ॥ १३० ॥ भो नागज्जुण ! एसो पिक्खेयव्वो पभायसमयम्मि । तं च नियत्तिय सूरी सहसा गयणम्मि उप्पइओ

॥ १३१ ॥ जाए पभायसमए पढमघरं तस्स इट्टवायस्स । सोवण्णमयं पिक्खिय सो जाओ विम्हिओ चित्ते ॥ १३२ ॥ अह पालित्तयसूरिं नमंसणत्थं कयावि रिसहस्स । गुंडरागिरिम्मि पत्तं वंदिय नागज्जुणो भणइ ॥१३३॥ भयवं ! करिय पसायं पयपंकयलेवविज्जसिद्धिं मे । देसु तओ सूरीविहु तग्गुणगणरंजिओ भणइ ॥ १३४ ॥ जइ महसि महिमनिलयं, पलयं पावाण वीयरायमयं । ता पत्ते सुवियत्ते तुमंमि विज्जं निवेसेमि ॥ १३५ ॥ अह सो सावयधम्मं सूरीणं लेइ पायमूलम्मि । पयलेवविज्जसिद्धिं, तेविहु तस्स य पयच्छंति ॥ १३६ ॥ सिरिसत्तुंजयतलहट्टियाइ नागज्जुणेण निम्मवियं । सूरीणं नामेणं सिरिपालित्तयपुरं तइया ॥ १३७ ॥ अह सालिवाहणनिवे परिसाए सासणम्मि आसीणे । केइवि चउरो रिसिणो चिरइयगंथा तहिं पत्ता ॥ १३८ ॥ पडिहारमुहेणं ते, तत्थ ठिया चेव पुच्छिया रण्णा । किं सत्थं किं माणं केण कयं ? तेवि जंपंति ॥ १३९ ॥ भेसज्जधम्मनिवनीइ–कामसत्थाणि लक्खमाणाणि । अत्तेयकविलवहफइपंचालेहिं कयाइंति ॥ १४० ॥ राया सुणिऊण इमं तेसिं परिक्खाकए पुणो भणइ । सो उ न खमो इत्तिय–मित्तं संखिवह तो गंथं ॥ १४१ ॥ काउं अद्धं अद्धं निवपासे तो गया तहेव पुणो । अद्धद्धयकरणेणं इगइगपायं करिय पत्ता ॥ १४२ ॥ चत्तारिवि तो रण्णा पवेसिया नियसहाइ पुट्ठा य । साहंति देव ! नियनियनामंकं पयमिणं सुणसु ॥ १४३ ॥ जीर्णे भोजनमात्रेयः, कपिलः प्राणिनां दया । बृहस्पतिरविश्वासः, पञ्चालः स्त्रीषु मार्दवम् ॥ १४४ ॥ तत्तो राया तुट्ठो तेसिं जा देइ पीइदाणाइं । तो अत्तेओ साहइ नरिंद ! लुक्खेण

किं इमिणा ? ॥ १४५ ॥ साहुकारेणं चिय तुस्सामो नेय कणयदाणेणं । राया तो उल्लवई विउसत्तमहो इमं तुम्ह ॥ १४६ ॥ पासट्ठियनिउहाणंनयणे वालित्तु विहसियं दट्ठुं । रायं कविलो भासइ करकिओ नायपरमत्थो ॥१४७॥ जइ नवि वण्णेसि तुमं ता परिवाराउ वण्णावेसु । तो राया भोगवईविलासिणीए मुहं नियइ ॥ १४८ ॥ सा उण परमा सड्ढी चिंतइ सासणपभावणासमओ । एसुच्चिय तो जंपइ उम्मूलंती कुदिट्ठितरुं ॥ १४९ ॥ ता गज्जयंतु वाईदगयघडा मयभरेण दुप्पिच्छा । जाव न पालित्तयपंचवयणनाओ परिप्फुरइ ॥ १५० ॥ को पालित्तयसूरी ? भद्दे ! जो वण्णिओ तए एवं । इय रण्णा वुत्ता सा पभणइ सव्वंपि तव्वुत्तं ॥ १५१ ॥ राया जंपइ संपइ, सकयत्थं कुणइ नियविहारेणं । सो कं देसं ?तो सा, भणेइ सिरिमन्नखेडपुरं ॥ १५२ ॥ उक्कंठिएण तत्तो, संकरनामा ससंधिविग्गहिओ । सूरीण आणणकए, आइट्ठो जाव भूवइणा ॥ १५३ ॥ ता मच्छरविच्छुरिओ, विहप्फई साहए महाराय ! । मह महपडिहसमुद्दे, पडिही सरिउव्व तस्स मई ॥ १५४ ॥ अह पंचालो जंपइ, कवित्तसत्तिं असिव्व फोरंतो । महमइरविलुत्तकरो, सूरी स ससिव्व अत्थमिही ॥ १५५ ॥ तव्वयणमसहमाणा, भोगवई गुणवई पयंपेइ ! अत्थमिओ य मयंको, पुण उइओ पावए पूयं ॥ १५६ ॥ तो नरवइणा वुत्तं जुत्तं जं जीवई य अत्थमिओ । पावेइ य सक्कारं अप्पुव्वं तस्स पंडिच्चं ॥ १५७ ॥ ता संकर ! गंतूणं कण्हडरायं पसाइउं कहवि । आणेह इत्थ सूरिं दूरीकयकुमयवित्थारं ॥ १५८ ॥ तत्तो सो गंतूणं कण्हडरायस्स भणइ नियरण्णो । आएसं सोवि लहुं सूरिं पेसेइ संघ-

जुयं ॥ १५९ ॥ कुणमाणो अइमित्तं जिणवरसासणपभावणुल्लासं । पइट्ठाणं पइट्ठाणं पुरमेस मुणीसरो पत्तो ॥१६०॥ नाउं राया सूरीण नियपुरासन्नरम्मउज्जाणे । संकरओ आगमणं जाओ रोमंचकंचुइओ ॥ १६१ ॥ काऊण नयरसोहं महूसवपुरस्सरं सपरिवारो । राया पंडियसहिओ सूरीणं सम्मुहं जाइ ॥ १६२ ॥ तम्मि समए विहप्फई गंतुं इय भूमिसामियं भणइ । पालित्ताणं संपइ चेव परिक्खं करिस्सामि ॥ १६३ ॥ रण्णा वुत्तं जुत्तं, झत्ति परिक्खेसु तस्स मइविहवं । तो सो भणइ तुमाणं थिरहत्थो अत्थि कोवि नरो ? ॥ १६४ ॥ तो आहविउं हीरयनामं नियसेवयं नरवरिंदो । दंसेइ विहप्फइणो सोवि तयं सायरं भणइ ॥ १६५ ॥ हीरय! भायणमेयं, घएण परिपुण्णयं सिरं जाव । गंतुं सूरीण पुरो दंसिवि एयं भणिज्जासु ॥ १६६ ॥ तुम्हाण मंगलत्थं विबुहेहिं पेसियं तओ सूरी। जं जं करेइ चिट्ठं सा सा अम्हाण भणियव्वा ॥ १६७ ॥ तेणवि तहेव विहिए मुणिऊणं मुणिवरोवि तब्भावं । घयभायणम्मि सूइं अइसुहुमं खिवइ लहु हत्थो ॥ १६८ ॥ भावत्थो पुण एसो—जह सूइयापवेसो जाओ घयभायणे तहा खिप्पं । पविसिय पुरम्मि तुम्हं मम्मविभेयं करिस्सामि ॥ १६९ ॥ सूरीहिं सो वुत्तो पंडियलोयस्सिमं पयंसेसुं । तेणवि नरिंदपुरओ ससूइयं भायणं धरियं ॥ १७० ॥ तं च विहप्फइ दट्ठुं कट्ठंव निच्चिट्ठओ दुहाहूओ । ता वित्थरेण सूरिं पवेसए नियपुरे राया ॥ १७१ ॥ संघसमेयं सम्माणिऊण पालित्तयं महाराओ । सूरिकयममयसरियं तरंगलोलं कहं सुणइ ॥ १७२ ॥ पालित्तयनिम्मवियं अप्पुव्वरसं कहं सुणंतेहिं । रायप्पमुहबुहेहिं न केहिं

परिघूणियंसीसं ॥ १७३ ॥ वरिसंते जह मेहे इक्को सुकइ जवासओ तरुसुं । तह पंचालो घिज्जाई, तग्गुणरसिएसु लोएसुं ॥ १७४ ॥ तो अवधारणचलिओ, पंचालो मच्छरेण विच्छुरिओ । रायं जंपइ मह चेव गंथाओ चोरिय-मिमेहिं ॥ १७५ ॥ रण्णा वुत्तं कह नज्जए इमं तो स दंसए झत्ति । नियविहियबरंगवइं, पालित्तयकयसुउत्तिजुयं ॥ १७६ ॥ संघं मणयं लज्जियमिव दट्ठुमणिट्ठवारणट्ठाए । निद्दिट्ठसयलकिचो, सूरी कवडेण य मओत्ति ॥ १७७ ॥ पविसिय कुकु(क्कु)हियाए पहम्मि निस्सारियम्मि सूरिम्मि । सयलोवि नयरलोओ, गुणगहणपरो रुयइ अहियं ॥१७८॥ सीसं कहवि न फुट्टं जमस्स पालित्तयं हरंतस्स । जस्स मुहनिज्झराओ, तरंगलोला नई वूढा ॥ १७९ ॥ पंचालवय-णमेयं सुणित्तु पालित्तओ तओ झत्ति । संघमहूसव सद्धिं, उट्ठइ एवं पयंपंतो ॥ १८० ॥ लोया पिच्छह चुज्जं इमिणा पंचालसच्चवयणेणं । मरिओवि जीविओऽहं पीऊसरसाउ अहिएणं ॥ १८१ ॥ एवं विजिए तम्मि उ संघो आणं-दिओ निवो कुविओ । पंचालं निविसयं कुणमाणो वारिओ तेहिं ॥ १८२ ॥ सूरीणं उवयारं नियावयारं च सुणिय पंचालो । कम्मविवराउ जाओ सुसावओ सूरिपयभत्तो ॥ १८३ ॥ इय सुइरं काऊणं जिणवरसासणपभावणं भु-वणे । नाणेणं नियआउय–समयं परिजाणिऊण तओ ॥ १८४ ॥ विहियाणसणो सुहभावपरिणओ चइय माणुसं खित्तं । सिरिपालित्तयसूरी, सुरवइसहभूसणं जाओ ॥ १८५ ॥ जुयलं । पालित्तयस्स गुरुणो गुरुसिद्धिरिद्धिमेयं पलोइय पिलोलियससुवग्गं । भवा ! जिणिंदवरसासणउन्नईए, वित्तं पउंजह जहा सुजसं लहेह ॥ १८६ ॥ सिद्ध-

प्रभावकविषये श्रीपादलिप्ताचार्यकथा । सप्तमं सिद्धप्रभावकलक्षणमुक्त्वाऽष्टमं कविस्वरूपं गाथोत्तरार्द्धेनाह—

भूयत्थसत्थगन्थी, जिणसासणजाणओ सुकई ॥ ३६ ॥

व्याख्या—भूता-यथार्थतया सिद्धान्ते प्रणीता धर्माधर्माकाशपुद्गलजीवस्वरूपा येऽर्थास्तन्मयं यच्छास्त्रं तद्ग्रथाति—गद्यपद्यरूपेण बध्नातीति भूतार्थशास्त्रग्रन्थी, तथा जिनशासनं—निश्चितसदसन्नित्यानित्याभिलाप्यानभिलाप्यावियुतसामान्यविशेषमयानन्तधर्म्मात्मकं कुनयविवर्जितं सकलनयमयं प्रत्यक्षपरोक्षप्रमाणोपपन्नं च जानातीति जिनशासनज्ञाता, अत एव सुष्ठु सत्यं चतुरनुयोगप्रतिबद्धं शास्त्रं कवयत इति सुकविः भवति, नृपादिचटुकारिणां नियतमसद्भूतगुणोद्भाविनां कुकवीनां नरकपात एवातः सुष्ठुशब्दोपादानं सार्थकमिति गाथोत्तरार्द्धार्थः ॥ भावार्थस्तु सिद्धसेनदिवाकरचरित्रेण प्रपञ्च्यते, तथाहि—

अत्थि समत्थपरमत्थपसत्थवल्लरीसच्छकच्छे सिरिविज्जाहरगच्छे श्रीपालित्तयसूरिसंताणनहंगणसूरिओ बहुविज्जाभरिओ सिरिखंदिलायरिओ, सो अन्नदिणे सीसपरंपरापरियरिओ बहुदेसेसु पवयणं पभावंतो निरुवमसिरीनिवेसं सिरिगउडदेसं संपत्तो । तत्थ सयलकिसीवलपूरियकामम्मि कोसलाभिहाणगामम्मि भुवणजणजणियाणंदो मुकुंदो नाम माहणो परिवसइ । स एगया गुणगणरयणरोहणगिरीणं खंदिलसूरीणं संगओ । तत्थ तेसिं मुहसरसीरुहाओ एरिसं धम्मोवएसं सुणेइ—भोगे रोगभयं सुखे क्षयभयं वित्तेऽग्निभूभृद्भयं, दास्ये स्वामिभयं गुणे खलभयं वंशे कुयो-

पिद्भयम् । स्नेहे वैरभयं नयेऽनयभयं काये कृतान्ताद्भयं, सर्वं नाम भयं भवे यदि परं वैराग्यमेवाभयम् ॥ १ ॥ एवं सुणिय मुणियसयलभावगुणदूसणो स बंभणो भवलयाच्छेयणखग्गं निम्मलपुण्णनिवासदुग्गं वेरग्गसंसग्गं पाविऊण गुरुचरणमूले निरवज्जं पवज्जमासज्ज तेहिं चेव सह विहरंतो भरुयच्छे गओ, अन्नदिणे मुकुंदो नाम मुणी दड्ढुरसरेण रयणीए पढंतो मुणिजणनिद्दाभंगं कुणंतो गुरुहिं वारिओ–वच्छ ! रायउक्कुस्सारे णवकारे चेव लहुसरेण गुणेसु, रयणीए उण दीहसरुच्चारणेण हिंसगजीवजागरणेण पयंडो दंडो होइ, जओ भणियं–जागरिया धम्मीणं, अहम्मीणं च सुत्तया सेया । वच्छाहिवभगिणीए, अकहिंसु जिणो जयंतीए ॥ १ ॥ तओ तं गुरूणमाएसं सेसं व सिरंमि धरिय सो दिवसम्मि अइदीहसरपाढेण सावयसावियाणं सज्झायं कुणंताणं अणवरयं सवणे जज्जरंतो केणावि साहुणा उवहसिओ–'नूणमेस महेसी संजायमच्चुद्दूसणो वुड्डत्तणे मुसलं फुल्लाविस्सइ'त्ति वयणमायन्निऊण अंकुरियामरिसकंदो स मुकुंदो विज्जानिमित्तं एगवीसमुववासे काऊण सारयादेविं पसाइउं पउत्तो, सरस्सईवि संतुट्ठा पयडीहोऊण वरं देइ–वच्छ ! सव्वविज्जापारगो भव । तओ स वाइरायत्तमासज्ज विज्जावलिओ गुरूणं सन्निहाणमागम्म संघसमक्खमुवहासकारिणं मुमुक्खुमक्खिवई–रे उवहासकुसल ! एहि रायसहं जहा ते फुल्लियमुसलं दंसेमि, तओ तेण थूलमुसलमाणावेऊण जणनिरंतरे चउहट्टब्भंतरे मंतसत्तीए फुल्लवियं, तं च खंधे आरोविऊण एवं पढंतो परिभमइ–पत्तमयलंबियं तह जो जंपइ फुल्लए न मुसलमिह । तमहं निराकरित्ता, फुल्लियमुसलं पमाणेमि ॥ १ ॥ एवं

च सपइन्नमणुन्नसामन्नं पाहरेइ—मद्गोः शृङ्गं शक्रयष्टिप्रमाणं, शीतो वह्निर्मारुतो निष्प्रकम्पः। यस्मै यद्धा रोचते तन्न किञ्चिद्वृद्धो वादी भाषते तन्न किञ्चित् ॥ १ ॥ सो महप्पा पडिवक्खपक्खकक्खदहणदहणोवमो निरुवमो वाइराओ जाओ, तओ वुड्ढवाइत्ति से नाम जए विक्खायं जायं। तओ सिरिखन्दिलायरिएहिं स वुड्ढवाई नियपए ठविओ, सयं चाणसणविमाणमारुहिऊण सुरपुरं पत्तो गुरू। इओ य सिरिवुड्ढवाइसूरी भरुयच्छं पइ गच्छंतो मग्गंतरे चिट्ठइ, अह तम्मि समए समुल्लसिरवेजयंतीए अवंतीए महापुरीए समरंगणहणियवीराहिवीरयेरिविकमो सिरिविकमो नाम राया, तस्स दाणपरक्कमरंजीओ जीहासहस्सेणावि न वण्णिउं पारिज्जंति, यथा—अष्टौ हाटककोटयस्त्रिनवतिर्मुक्ताफलानां तुलाः, पञ्चाशन्मधुगन्धलुब्धमधुपक्रोधोद्धुराः सिन्धुराः। लावण्योपचयप्रपञ्चितदृशां पण्याङ्गनानां शतं, दण्डे पाण्ड्यनृपेण ढौकितमिदं वैतालिकस्यार्पितम् ॥ १ ॥ वन्यो हस्ती स्फटिकघटिते भित्तिभागे स्वबिम्बं, दृष्ट्वा दूरात्प्रतिगज इति त्वद्द्विषां मन्दिरेषु। हत्वा कोपाद्गलितरदनस्तत्पुनर्वीक्ष्यमाणो, मन्दं मन्दं स्पृशति करिणीशङ्कया साहसाङ्कः ॥ २ ॥ इच्चाइणो तस्स पबंधा विउसेहिं थुणिज्जंति, तस्स य रण्णो रज्जे माणणिज्जो बम्भणकज्जेसु सज्जो कच्चायणसगुत्तो जयविक्खायगुत्तो देवरिसी नाम माहणो हुत्था, तस्स य लावण्णलद्धहंसाइयलच्छी कमलदलच्छी देवसिया नाम पिया, तेसिं विससियपरवाइसेणो सिद्धसेणो नाम नंदणो, सो अत्तणो पुरओ अउलेण विज्जाबलेण तिहुयणं तिणंव मन्नइ, जओ संसारे सव्वेसिंपि पयत्थाणं पारो पामिज्जइ न उण विज्जाए

अओ–मिता भूः पत्ताऽपां स च पतिरपां योजनशतं, सदा पान्थः पूषा गगनपरिमाणं कलयति । इति प्रायो भावाः स्फुरदवधिमुद्रामुकुलिताः, सतां प्रज्ञोन्मेषः पुनरयमसीमो विजयते ॥ १ ॥ तेणावि पइदिणमेवं पइन्ना पइण्डि-जइ–जो मं वाए जिणइ तस्साहं चरणसुस्सूसणपरायणो सीसो होमि । अन्नया तेण सिद्धसेणेण महामइणो वुड्ढ-वाइणो जयम्मि किर्त्तिं फुरंतिं सुणिय तस्संमुहं जाव सुहासणाधिरूढेण भरुयच्छं पइ चलियं, ताव तेण नयराउ निस्सरंतो वुड्ढवाई दिट्ठो, फुल्लियमुसलपलोयणेण उवलक्खिओ य, अन्नुन्नं मेलो संलावो अ संवुत्तो, तओ सिद्ध-सेणेण भणियं–मए सह वायं कुणह. तओ सूरीहिं भासियं–इत्थ चउरंगाए सहाए विणा कहं जयपराजए जा-णिज्जंति ?, तओ सिद्धसेणेण जंपियं–एए गोवाला चेव वायसक्खिणो हयंतु, गुरूहिंपि वुत्तं–जइ एवं ता कुणसु पुव्वपक्खं, तओ पारद्धं चेव सिद्धसेणमाहणेण सक्कयभासाए भासिउं, तओ तक्कवियक्कसंपक्ककक्कसं अणप्पजप्पदप्प-संकप्पणामणोहरं वायं काऊण ठिओ, तत्तो गोवालेहिं वुत्तं–एस किंपि न याणइ, पिसायगहिउव्व पुक्करइ, कक्कसत्तणेव अम्ह कण्णे वियारेइ, अओ वुड्ढवाइराय ! तुममवि वागरसु, तओ स वुड्ढावि समयन्नू आराहियसव्वन्नू कच्छबंधं का-उं थिंदिणिच्छंदरासेण उत्तालतालदाणपुव्वं रमिउं पउत्तो–"नवि मारियइ नवि चोरियइ परदारहगमण निवारि-यइ । थोवाथोवं दाइयइ, सग्गि दुगु दुगु जाइयइ ॥ १ ॥ पुणो पढंतो नच्चइ काळउ कंबलु अकरुनि चाढु छासिहिं भरियउ खालडु पाढु । एवडु पडियउ नीले झाडि अवरो सग्गह सिंगु निलाडि ॥ २ ॥ तओ गोवालेहिं आणंदिय-

माणसेहिं हत्थसुब्भविऊण भणियं–अहो वुड्ढवाइणो पहाणा वयणरयणा, इयरस्स उण अमणुन्ना। इय तेसिं वयण-मायन्निय सिद्धसेणो चलणेसु निवडिऊण सूरीणं सयासाउ पव्वज्जं मग्गेइ, संपइ तुम्ह सीसो जाओ, जेण तुम्हेहिं अहं वाए पराजओ, तओ वुड्ढवाई साहेइ– वच्चामो भरुयच्छे, तत्थ पत्थियसहाए अम्हाणं तुम्हाणं च वायलीला-इयं पिक्खउ वियक्खणजणो। तओ सिद्धसेणो सदूसणं सयं चेव उल्लवइ–भयवं! अहमकालन्नू, तुम्हे समयन्नुणो, तम्हा जो समयविऊ स सव्वविऊत्ति भणंतो सूरिणा दिक्खिओ। तओ तम्मि ठाणे विन्नायवुत्तंतेण भरुयच्छभूव-इणा तालरसो नाम गामो ठाविओ, तम्मज्झे य कारियं सिरिरिसहनाहचेइयं, तत्थ वुड्ढवाइणा रिसहपडिमाए पइट्ठा कया। सिद्धसेणस्स य पव्वज्जा समए कुमुयचंदुत्ति नामं दिन्नं, पुणोवि सूरिपयपइट्ठासमए सिद्धसेणदिवायरु-त्ति नामं कयं, पुव्वगयसुयपाढत्तणेणं दिवायरुत्ति पसिद्धिमागओ, भणियं च—वाई य खमासमणे, दिवायरे वाय-गित्ति एगट्ठा। सुत्ते पुव्वगयम्मी, एए सद्दा पयट्टंति ॥ १ ॥ तओ वुड्ढवाइसूरिणो अन्नत्थ विहरंति। इओ य सिद्ध-सेणदिवायरो दिवायरस्सेव भव्वकमलवणसंडे पडिबोहंतो उज्जेणीए पुरीए संमुहागयसंघकारियमहूसवपुरस्सरं स-व्वन्नुपुत्तइच्चाइबिरुदेहिं मागहजणेहिं थुव्वमाणो करिवरक्खंधारूढेण सिरिविक्कमरण्णा सम्मुहागएण दिट्ठो। तस्स य सव्वन्नुपुत्तपरिक्खाकए तत्थ ठिएण माणसिओ चेव नमुक्कारो कओ, न सिरोनमणवयणेहिं, तओ सूरी समीवागयं नरिंदं धम्मलाभेइ, तओ रण्णा सूरिणो पुट्ठा, अम्हाणं अनमंताणं केरिसो धम्मलाहो दिज्जइ?, अहवा एस समग्गो

चेव पाविज्जइ, गुरूहिं वुत्तं—महाराय ! रयणकोडिहिंपि दुल्लहओ एस, अन्नमंतेहिं सयहावि न लब्भइ, भयया उण माणसिओ नमुक्कारो विहिओ, जम्हा पहाणत्तणं सव्वत्थ मणस्सेव विप्फुरइ, जओ भणियं—वायाराणं गरुओ, मणवायारो जिणेहिं पन्नत्तो । जो नेइ सत्तमिं वा, अहवा मुक्खं पराणेइ ॥ १ ॥ तओ राया करिवरखंधाओ उत्तरिऊण संघसमक्खं वंदिऊण कणयकोडिमाणावेऊण य दिंतो वुत्तो—न वयं धणं गिण्हामो, रायावि भणइ— मज्झवि न कप्पइ एस, ता5णेण किं करेमि ?, सूरिणो भणंति—जिण्णुद्धारे चेइएसु निवेसेहि, राइणावि तहेव कए धम्माहिगरणेहिं रायवहियाए एवं लिहियं--धम्मलाभ इति प्रोक्ते, दूरादुच्छ्रितपाणये । सूरये सिद्धसेनाय, ददौ कोटिं धराधिपः ॥ १ ॥ तओ कमेण विहरंतो सूरी सिरिचित्तउडनयरं पत्तो, तत्थ सिद्धसेणो पुराणचेइयहरे एगं ओसहलिप्पमयं थंभं महप्पमाणं पासिऊण एगं पुरिसं पुच्छइ—किमेस थंभो इत्थ ठाविओ ?, तेणावि पच्चुत्तरं दिन्नं—पुव्वायरिएहिं परमरहस्सविज्जापुत्थया एयम्मि ओसहमयथंभे ठावियाइं संति, थंभो उण वज्जघडिउव्व जलानलेहिं न भिज्जइ, इय तव्वयणमायन्निऊण सिद्धसेणो थंभोसहिगंधमग्घेऊण पडिओसहेहिं तं सिंचइ, पभाए पक्कवालुंकियव्व विहसियं पासइ, तम्मज्झाओ एगं पुत्थयमुम्मोइऊण वाएइ, पढमपत्तम्मि चेव विज्जाजुयलं तेहिं सम्मं जाणियं, इत्थंतरे स थंभो पुत्थयगब्भो तहेव मिलिओ, आयासे एरिसी दिव्वा वाणी जाया—भो आयरिय ! अजुग्गो5सि तुमं एयारिसाणं विज्जाणं, मुंच चंचलभावं, अन्नहा जीवियसंदेहे पडिस्सिहिसि, तओ ठिया सूरिणो जं पुरा विज्जाजुगं पत्तं,

तमेव परिच्छिन्नं नाहियं—भणियं च—जो जत्तियस्स अत्थस्स, भायणं तस्स तत्तियं चेव। वुट्ठेवि दोणमेहे, न डुंगरे पाणियं ठाइ ॥ १ ॥ अह सिद्धसेणो चित्तकूडाओ पुव्वदिसावहूभालयलतिलयतुल्ले कुमारपुरे विहरिओ, तत्थ सिरिदेवमहीवालो उवएससएहिं पडिबोहिय जिणसासणाणुरत्तचित्तो विहिओ, तहा बहुविहविबुहेहिं सह गुट्ठिं कुणंतस्स तस्स सूरिस्स पभूओ समओ वइक्कंतो। अन्नया रण्णा विजणं काऊण अंसुजलाविललोयणेण सूरी विन्नत्तो—भयवं! अम्हे अभग्गसेहरा न तुम्हदं सणजुग्गा जेण महावईए निवडिया, तओ सूरी वाहरइ—महाराय! का सा आवई?, जीसे तुम्हाणं मणो एवं दूमिज्जइ, रायावि भणइ— भयवं! मज्झ वेरिणो सीमाभूवाला एगत्थ मिलिय मह रज्जाभिलासिणो सबलवाहणा समुवट्ठिया, तओ सूरी साहइ—महाराय! मा खेदमुव्वहसु, मइ परममित्ते साहीणे तुह रज्जं घित्तुं सक्कोऽवि न सक्कइ, धीरो भव, पिच्छ मह माहप्पं, तम्मि समयम्मि परसिन्नेण तं पुरं सहसा वेढियं, तओ सूरिणा वारिभरियकुंडे तीए विज्जाए अभिमंतिय सरिसवा पक्खित्ता, पइसरिसवं अस्सवारा पाउब्भूया, तेवि सयलं परबलं धावाइऊण सयमदिस्सीहूया, तओ रण्णा तेसिं सव्वेसिं सत्तूणं सव्वस्सं गहियं, वाइया विजयढक्का, तओ राया सूरीणं परमभत्तो संवुत्तो। कमेण रायकुलसंवासाओ सपरिवारा सूरिणो चरणकरणजोगेसु अईव सिढिला जाया, निरंतरं रायबहुमाणसाहंकारा मागहवण्णिज्जमाणविरुदपसंसाइणा अत्तणो पुरओ तिहुयणंपि तिणं व मन्नंता सायसीला सीयलविहारिणो संवुत्ता सीसाइपाढणे य निरायरा य, जओ—सुवइ गुरू निच्चिंतो, सीसावि

सुणंति तस्स अणुक्कमसो । ओसाइज्जइ मुक्खो, हुड्डाहुड्डं सुयंतेहिं ॥ १ ॥ तओ सावयसावियालोओ पोसहसालाए न पवेसमवि पावेइ, एए पुव्वरिसिभासिया भावा य जाया, "दगपाणं पुप्फफलं, अणेसणिज्जं गिहत्थकिच्चाइं । अजया पडिसेवंती, जइवेसविडंबगा नवरं ॥ १ ॥ अन्नं च—कुसीललिंगं इह धारइत्ता, इसिज्झयं जीविय वूहइत्ता । असंजए संजय लप्पमाणे विणिघायमावज्जइ से चिरंपि ॥ २ ॥ तओ तेसिं सूरीणं उम्मग्गपडिसेवणसंभूयमसमंजसं समंतओ फुरंतमायण्णिय तप्पडिबोहकए सिरिवुड्ढवाइणो गीयत्थाणं मुणिवसहाणं गच्छसिक्खं दाऊण एगागिणो तस्समीवं पत्ता । सोऽवि सिंहासणासीणो बहुविहवाइविंदवंदिज्जमाणकमकमलो पलोइओ सूरिहिं, तेणावि इड्ढी-गारवमहंधयारच्छाइयनयणेण स गुरूवि नोवलक्खिओ, जं एस कोवि खडक्खरुत्ति लक्खियइ, अहो लच्छीए वि-यारा, जं तारिसस्सावि अ वियारकारणं भवंति, भणियं च—निद्रा मुद्रां विनैव स्फुटमपरमचैतन्यबीजं जनानां, लक्ष्मीरक्ष्णोऽन्धभावः प्रकटमपटलः सन्निपातोऽत्रिदोषः । किञ्च क्षीराब्धिवासिन्यभजदियमपां सर्पणान्नीचगत्वं, कल्लोलेभ्यश्चलत्वं स्मृतिमतिहरणं कालकूटच्छटाभ्यः ॥ १ ॥ तओ तेहिं वयणेणावि असंभाविएहिं महामोहनिद्दा-विद्दावणत्थं करसंपुडं जोडिऊण सो भणिओ—अम्हं विज्जत्थीणं देसु एगं वक्खाणखणं, तओ सायन्नं सिद्धसेणेण भणियं—अम्हाणं राय कज्जेसु सया सज्जाणं सव्वहा नत्थि पाढखणो, परमेगो अवसरो अत्थि, जम्मि समए सुहास-णासीणो रायउलं वच्चेमि तम्मि खणे जइ तुमं किंपि पढसि ता पढसु, ता सो हरिसमिव नाडयंतो तहत्ति तव्वयणं

पडिवज्जइ । अह तस्स कए सुहासणं अणेगउब्भडसुहडपरिवेढियं तूराइपंचसद्दकलियं भूवइणा पेसियं, सिद्धसेणोऽवि त मारुहिऊण महया इड्ढीए रायउलं पइ पत्थिओ, तम्मिसमए अज्जो तेण वाहरिओ, भण खडक्खर ! जं किंपि कह-णिज्जं, तओ तेहिं भणियं—अणहुल्लिय फुल्लम तोडहु मा आरामरोवा मोडहु । मणकुसुमेहिं अच्चि निरंजणु हिंडहि काइं वणेणं(णाउ)वणु ॥ १ ॥ इय सुणिय तेण जंपियं– सुगमा एसा, जोऽवि सोऽवि तुम्ह पुरओ वक्खाणिस्सइ, तम्हा अइविसमत्थं सत्थं किंपि पुच्छह, जेण तुम्ह हिययगयं संसयमवणेमि, अज्जेहिं वुत्तं–अम्हारिसाण एसा चेव विसमा, अओ वक्खाणह अम्होवरोहेण, तओ अणहुल्लियाए पयडमवि अत्थमपयडंतो सूरीहिं वुत्तो–न पढम-पयस्सवि अत्थलेसो तुमए कहिज्जमाणो अम्हेहिं विन्नाओ, जओ एस अणसद्दो पभूयअत्थसत्थाण वायगो मणगंपि न विन्नाओ, पुरओ किं वक्खाणिस्सह ?, तओ सिद्धसेणेण चिंतियं– जं कोवि एस खडक्खरो अइसयसक्खरो मंपि अक्खिवइ, ता नूणं मह गुरुं वुड्ढवाइं मुत्तूण नन्नस्स एरिसा मइसायरतरंगा उल्लसंति, तओ विगलियमओ सो सुहा-सणासणाओ उत्तरिऊण तं नियगुरुं जाणिय तप्पयपउमे नमंसिऊण य खामेइ अप्पणोऽवराहं । तओ अणहुल्लियाए वक्खाणं पुच्छइ, तेवि वक्खाणंति, अणुहुल्लियत्ति पाययस्स बहुपयारत्तणओ अपत्तफलाणि फुल्लाणि मा तोडय, इत्थ को भावत्थो ?, एस जोगो कप्पतरू, कहं ? जत्थ मूलं जमनियमा, झाणं थुडसारित्थं समभावो खंधो, कवक-रणमहुरवाणी जणरंजणपयावजसवसीयरणाइछकम्मसत्तिरूवाणि फुल्लाणि, केवलनाणं फलं, ता अज्जवि जोगकप्प-

रुक्खस्स कुसुमाणि उप्पन्नाणि संति, ताणि य केवलेण फलेण उण पुरओ फलिस्संति, अओ असंजायफलाणि चेव केण हेउणा तोडसि ?, मा एयाणं उम्मूलणं कुरु, इय भावो । मा(राम)रोवा मोडहत्ति, इत्थ रोवा पंच महव्वयाणि, ताणि मा मोडय । मणकुसुमत्ति, सुवावारमयमणकुसुमेहिं निरंजणं रागदोसंजणरहियं अरहंतं 'अच्चि' पूजय । हिंड-हित्ति, हिंडहि भमसि 'काइ' केण हेउणा ? 'वणाओ वणं' रायसेवाइदुक्खाइं परमत्थओ चिरसाइं कहं कुणसित्ति पयत्थो । एवमणुसिट्ठो गुरूहिं सिद्धसेणो जायसंवेगो नियदुच्चरियमालोएइ । तओ सो नरवरं कहमवि आपुच्छिऊण वुड्ढवाइणा सद्धिं विहरइ । तओ पुव्वगयसुयं अवरावरसूरीहिंतो पढिय सुयहरो जाओ । एयम्मि समए वुड्ढवाइसूरी दिवं गओ । अन्नया सिद्धसेणसूरिणा पाइयपाढपढणलज्जिएण जणेसु नियउक्करिसं पयडंतेण संघो विन्नविओ जइ तुम्हे-आइसह ता सव्वमवि सिद्धंतं सक्कयभासारूवं करेमि, जहा लोओ न उवहसइ, तओ संघेण भणियं-संतं पावं, किं अरहंता भयवंतो सव्वक्खरसन्निवाइणो य गणहरदेवा वा सक्कयसिद्धंतकरणे असमत्था अभविंसु ?, परं बालवुड्ढइ-त्थीयाइअणुग्गहत्थं पाइयभासाए सिद्धंतं अकरिंसु, जओ—बालस्त्रीमन्दमूर्खाणां, नृणां चारित्रकाङ्क्षिणाम् । अनुग्र-हार्थं तत्त्वज्ञैः, सिद्धान्तः प्राकृतः कृतः ॥ १ ॥ परमेवं भणंताणं तुम्हाणं दसमो पारंचिओ नाम पायच्छित्तो संवुत्तो, एवं संघवयणमायण्णिऊण जायपच्छत्तावो जोडियपाणिसंपुडो सूरी संघं विन्नवेइ—जइ विहु संपयं दसमं पच्छित्तं सं-घयणधीबलाभावाओ वुच्छिन्नं, तहवि संघो मह पसिऊण दुवालससंवच्छरपरिमाणं पच्छित्तं देउ, अहमवि जहास-

त्तीए तम्मि अब्भासं करेमि, एयाए जुत्तीए अवलंबियलोओ संगोवियमुहपोत्तियारयहरणाइसमणलिंगो पयासियअ-
वत्तरूवो दुवालसवरिसे जाव पंडुसुव्व भमिस्सामि, जइ केणावि अंतराऽहं नाओ, तओ पुणवि तद्दिणाओ आरब्भ दुवालसवासाइं पुव्वुत्तजुत्तीए संजमजोएसु उवउत्तो विहरिस्सामि । तओ संघाणुन्नाए गच्छवासं चइय अव्वत्तलिंग-धरो सिद्धसेणो लोएहिं असुणिओ चेव अट्ठवरिसाणमंते उज्जेणीए अजाणियचयत्तवाइकिवो महाकालपासाए आगं-तूण ठिओ, पारंचियतवारिहं तवोकम्मं सेवमाणो लोएहिं पुच्छिज्जमाणोवि मोणावलंबी न किंचि भासइ, तओ लोएणं गंतूण भूवइणो निवेइयं—देव ! कोवि देसंतरिओ तुम्ह देवउले चिट्ठइ, परं परमेसरस्स पाएसु न पडइ, तओ उल्लसिरकोउहल्लेण रण्णावि आगंतूण सो पुच्छिओ—कोऽसि तुमं ? सोवि धम्मिउत्ति पडिभणइ, जइ एवं ता किं महादेवं देवं न नमेसि ?, ता सो जिणसासणपभावणा संपयं करणिज्जत्ति वीमंसिय रायं पइ जंपइ—देव ! एस देवो अम्ह थुइं सव्वहा न सहइ, तेण हेउणा न थुणिज्जइ, एवं सुणिय राया विचिंतइ, अहो एस असंबद्धपलावी उम्म-त्तुव्व किं पलवइ ?, तओ रण्णा वुत्तं—भो ! कहं मुणिज्जइ सच्चमसच्चं वा तुह वयणं ? तेणावि सावट्ठंभं भणियं—मा राय ! कयावि लिंगभेओ होउत्ति, राइणा भणियं—जइ एवं होइ ता होउ, परं परमेसरमीसरं तुमं थुणेसु । तओ तेणं बत्तीसियाओ जिणगुणगब्भाओ करिउं पारद्धाओ, ताणं च पढमबत्तीसियाए इमं पढमं वित्तं, "स्वयम्भुवं भूतसहस्र-नेत्रमनेकमेकाक्षरभावलिङ्गम् । अव्यक्तमव्याहतविश्वलोकमनादिमध्यान्तमपुण्यपापम् ॥ १ ॥ एयंम्मि चेव पढमकव्वे

पढिज्जमाणे कज्जलकोमला सिहिसिहा लिंगाओ पाउब्भूया, तओ ईसरभत्तलोएहिं सहत्थतालं कोलाहलो कओ–नूणं कालानलरुद्दो रुद्दो तइअनयणानलेण एयं भिक्खुं दहिस्सइ, तओ तम्मज्झाओ धरणिंदपभावेण तडत्तिफुट्टाओ लिंगाओ तेयजाला पुव्विं नीहरिया तयब्भंतरे सिरिपासनाहपडिमा अप्पडिमरूवा पाउब्भूया, तत्तो संलवंति लोया–को एस अउव्वो देवो दीसइ ?, तओ राया सूरिणा भणिओ–महाराय ! जस्स पसाया नरसुरसुहाइं अणुहविऊण मुक्खसुखं पाउणंति, जस्स य सुरासुरनरविज्जाहराहिरायाणो चरणपंकयं सेवंति, स एस धरणिंदकयफणाडंबरो पासनाहो तेवीसमो जिणवरो जो मम थवणं सहेइ, अओ एएण समं का समसीसी इयरसुराणं ?, इत्थं सिद्धसेणकयं पभावणं निरूविय बहवे पाणिणो पडिबुद्धा एवं भणंति—जयति(तात्)जिनशासनमिदं यस्मिन्नेतादृशा महापुरुषाः । निजकीर्त्तिसुधाधवलितभुवनाभोगा महातिशयाः ॥ १ ॥ तओ रायावि संजायकोऊहलो जिणमयाणुरत्तचित्तो अनुत्तिजुत्तीए सूरिमेवमुवसिलोएइ–अहयो बहवः सन्ति, भेकभक्षणदक्षिणाः । एक एव स शेषाहिर्धरित्रीधरणक्षमः ॥ १ ॥ अओ अउव्वा कावि कवित्तसत्ती सूरीणं, अन्नेवि कविणो किं कहिज्जंति ?, जेसिमेए भावा न हुंति जओ–न भणितिभरो भङ्गीमङ्गीकरोति नवां नवां, न च पदपरीपाकः साकं मधुक्षरतीक्षुभिः । अधरितसुधाधारासारा न चापि रसोर्मयस्तदपि कवयो हन्तेहन्ते प्रबन्धकवीयितुम् ॥१ ॥ एवं सूरिं वण्णिय च मक्कियचित्तो विक्कमनिवो सट्ठाणं पत्तो, तओ जयजयसद्दो धरणिंदेण उग्घुट्ठो, संघेण य सेसपारंचियचत्तारिव रिसाइं पसाईकाऊण सूरी उज्जेणीए समहूसवं पवे-

सिओ । अज्जवि ताओ बत्तीसं बत्तीसियाओ विउसेहिं पढिज्जंतीओ सुव्वंति । तओ सूरी सगणो महिमंडलं भत्तंडुव नियगोवित्थरेण पयासयंतो सिरिचुंकारपुरं पायपउमेहिं पवित्तेइ, तत्थ निवासिसावयजणेण विन्नत्ता सिद्धसेणायरिया–भयवं ! इमस्स पुरस्सासन्नगामे सुंदरनाम ओरायपुत्तो, तस्स दुन्नि भारियाओ परुप्परं समच्छराओ, तेसिमेगा धूयं पसूया, सा सुइरं अधिइं करेइ, तीसे सवत्तीवि आसन्नपसवा वट्टइ, मा एसा सुअं पसविय भत्तुणो वल्लहा होहित्ति, अओ एईए तहा करेमि जहा एसावि पुत्तिजणी होइ, तओ सा सुयरिया सुइयं दविणेण उवयरिऊण भणइ–जया एसा मह सवत्ती पसवसमए तुमं सूइयं करेइ, तया तुमं पुव्वसंगहियमयबालयं तीए पुत्तट्ठाणे ठाविय तप्पुत्तं दूरदेसे उज्झिय मज्झपुरो कहिज्जासु, विहिवसेण तं तहेव सव्वं संघडियं, अह स रायपुत्तो पुव्वकयपुण्णपभावाओ कुलदेवीए गावीरूवं काऊण दुद्धदाणेण पोसिज्जंतो अट्ठवारसिओ जाओ, तओ एयम्मि चेव पुरे सिवभवणाहिगारिणा भरडएण पलोइय स दारओ वाहरिओ–वच्छ ! मज्झ दिक्खं पवज्जसुत्ति, पडिबोहिय दिक्खिओ, एयम्मि समए जयंधो कन्नउज्जराया देसे विविहे जिणंतो तप्पुरपच्चासन्ने आवासिओ, तया लहुभरडयस्स एसो सिवाएसो संजाओ–तए कन्नउज्जराइणो मह सेसा दायव्वा, तीए लग्गमित्ताए विसयं नित्तजुयं हविस्सइ, सोवि इय वयणं लहुभरडयपुरो भणइ, सोऽवि सिवनिम्मल्लं गहिय तक्कडए गंतूण मंतिसामंताणं पुरओ उब्भियकरं वाहरेइ–भो भो ! अप्पणो सामियं मज्झ सम्मुहमाणेह, जहा तस्स वियसियनीलुप्पलाणुगारे सव्वपयत्थसत्थदंसणपउणे नयणे कुणेमि, तओ तेहिं पेरिओ

नरवरो तस्सम्मुहमागओ, भरडयदिन्ननिम्मलं बंधिय सव्वचक्खू संजाओ, तओ हरिसिओ राया गामसयं सासणे तस्स वियरइ, सरिसिओ इत्थेव तुंकारपुरे सिवपासायं काऊण ठिओ, अइराउलवाइओ सावयाणं पासायं काउं न देइ, अईव पबलमिच्छादिट्ठी, ता भयवं! तहा जत्तेह, जहा एयस्स माणं मुसुमूरिय अईव उत्तुंगचंगं जिणहरं कारावेह, अन्नस्स एयारिसं न बलमत्थि। सूरीवि इय तेसिं वयणं चित्ते निवेसिय अवंतीए गंतूण चत्तारि सिलोए करे करिय सिरिविक्कमाइच्चसीहदुवारे सयं ठाऊण पडिहारेण रायपुरओ सिलोगमिणं पाढेइ– यथा, दिदृक्षुर्भिक्षुरायातो, द्वारि तिष्ठति वारितः। हस्तन्यस्तचतुःश्लोकः, किमागच्छतु गच्छतु? ॥ १ ॥ एयं तस्स सिलोयमायण्णिय रण्णा पडिसिलोगो एस पेसिओ–दत्तानि दश लक्षाणि, शासनानि चतुर्दश। हस्तन्यस्तचतुःश्लोक, उतागच्छतु गच्छतु ॥१॥ कविराओऽवि तं सिलोगं वाइऊण दुवारपालेणं रायं भणावेइ–देव! तुम दंसणं चेव भिक्खू वंछइ न दव्वजायं, तओ नियपासमाणाविय उवलक्खिय सूरिणो पणमिय सीहासणे निवेसिय पुच्छिया–भयवं! चिरकालेण तुम्ह दंसणं केण हेउणा संजायं?, महाराय! धम्मकज्जवावडत्तणेण न संघडियं, तं सिलोयचउक्कमवधारेउ देवो, तहाहि–– अपूर्वेयं धनुर्विद्या, भवता शिक्षिता कुतः?। मार्गणौघः समभ्येति, गुणो याति दिगन्तरम् ॥ १ ॥ सरस्वती स्थिता वक्त्रे, लक्ष्मीः करसरोरुहे। कीर्त्तिः किं कुपिता? राजन्!, येन देशान्तरं गता ॥ २ ॥ कीर्त्तिस्ते जातजाड्येव, चतुरम्बुधिमज्जनात्। आतपाय धरानाथ!, गता मार्त्तण्डमण्डलम् ॥ ३ ॥ सर्वदा सर्वदोऽसीति, मिथ्या संस्तूयसे

बुधैः । नारयो लेभिरे पृष्ठं, न वक्षः परयोषितः ॥ ४ ॥ एयमउव्वसिलोयचउक्कवुत्तिजुत्तिमायण्णिय रंजिओ राया वरचीवरेहिं सुरहिवत्थुसमुदएहिं सुवण्णमाणएहिं हाराइआहरणेहिं जहक्कमं भरिए चत्तारिवि करिवरे आणाविऊण सूरिवराणं पुरओ भणइ—इमे चत्तारिवि करिवरे गिण्हह, तओ सूरीहिं जंपियं—अह्मेयाण अत्थाण कए न आगओ, तओ राया चत्तारिवि देसे महासन्निवेसे दाउमारद्धो, ते वि सूरी न गिण्हइ, राया साहेइ,—ताकिं इच्छह, ? सूरीहिं भणियं—महाराय ! सुणसु चुंकारपुरे चउदुवारं सिवपासाभिहिंदेवि उन्नयं जिणहरचेइयं कारवेह, सयं च सपरिवारो तत्थ गंतूण पइट्ठामहूसवं निम्मायेसु, रण्णावि तहेव तव्वयणं पुण्णत्थिणा पडिवन्नं, कारियं च तत्थ उत्तुंगतोरणं जिणभवणं, संघोवि रायकयपभावणाए मलियदुट्ठो अईव संतुट्ठो । एवं सूरी पए पए जिणसासणं पभावंतो वाइणो जयंतो य पइट्ठाणपुरं पत्तो, तत्थ नियआउणो पज्जंतं नाणेण नाऊण विहियाणसणो सुहज्झाणोवगओ सुरलोयलोयावलोयणकए वसुहं चइय सुरपुरं गओ । इओ य सिद्धसेणदिवायरवुत्तंतनियेयणत्थं संघेण एगो भट्टो वयणरयणापउणो चित्तउडे पेसिओ, सोऽवि तत्थ गंतूण सूरिसहाए एयं सिलोयद्धं वार वारं पढइ—'स्फुरंति वादिखद्योताः, सांप्रतं दक्षिणापथे' एयं सिलोयद्धमायण्णिय बालसरस्सइए सिरिसिद्धसेणदिवायरभगिणीए उत्तरद्धं भणियं—"नूनमस्तंगतो वादी सिद्धसेनदिवाकरः" ॥१॥ तओ भट्टेण वुत्तंतो सवित्थरं साहिओ, संघेण अईव विसन्नं, सोवि भट्टो सम्माणिय विसज्जिओ—एयं चित्तं चरित्तं तिहुयणजणयाणंदियासेसचित्तं, सूरीणं सिद्धसेणाणमिह वरमहाकव्वविज्जा-

निहीणं । भिंगत्तं पाविऊणं नियहियकमले सया इत्थ मत्थे, जत्तं रम्मा ! कुमेहासियगुणजणीणं जेण पावेह किंचि ॥ १ ॥ कविप्रभावकविषये श्रीसिद्धसेनदिवाकरकथा, प्रभावकाणां विशेषस्वरूपमुक्त्वा सामान्यलक्षणमाह—

**सव्वे पभावगा ए जिणसासणसंसकारिणो जे उ । भंगंतरेणवि जओ, एए भणिया जिणमयम्मि ॥३७॥**

व्याख्या—'सर्वे' समस्तास्ते 'प्रभावका' अर्हन्मतोल्लासकाः, ये तु 'जिनशासनशंसाकारिणो' जिनमतश्लाघाजनकाः आदौ प्रभावकाष्टकमुक्त्वा पुनरेवं कथमुच्यते ? इत्याह—'यतो' यस्मात्कारणात् 'जिनमते' सिद्धान्ते 'एते' प्रभावकाः 'भङ्ग्यन्तरेणापि' प्रकारान्तरेणापि 'भणिताः' कथिता इति गाथार्थः ॥ ३७ ॥ तानेव विशेषयन्नाह—

**अइसेसिइड्ढि धम्मकहि वाइ आयरिय खवग नेमित्ती । विज्जारायागणसम्मओ य तित्थं पभावंति ॥३८॥**

व्याख्या—अतिशेषिता— अपरेभ्यः परमोत्कर्षं नीता ऋद्धयो-जङ्घाचारणविद्याचारणाशीविषजल्लौषध्यवधिमनःपर्यायादिलब्धयो यस्य सोऽतिशेषितर्द्धिः, 'धर्म्मकथी' व्याख्यानलब्धिमान्, 'वादी' परवादिविजेता, 'आचार्यः' षण्णवत्यधिकद्वादशशतगुणालङ्कृतः, 'क्षपको' विकृष्टतपस्वी, नैमित्तिकः' त्रिकालज्ञानवेत्ता, 'विद्यावान्' सिद्धविद्यामन्त्रः, 'रायगणसम्मतो' नरेन्द्रप्रभृतिलोकाभीष्टः, एवं भङ्ग्यन्तरेणाष्टौ प्रभावकाः 'तीर्थं' जिनशासनं 'प्रभावयन्ति' उद्योतयन्ति, चः समुच्चयवाचीति गाथार्थः ॥ ३८ ॥ यदि कालादिवैषम्यादेताः सिद्धयो न स्युस्तदा कथं तीर्थप्रभावना भवतीत्याह—

इय संपत्तिअभावे, जत्तापूयाइ जणमणोरमणं। जिणजइविसयं सयलं, पभावणा सुद्धभावेणं ॥ ३९ ॥

व्याख्या—'इति' पूर्वोक्तप्रकारेण 'सम्पदभावे' लब्धिविरहे सति, न हि सर्वत्रैताः पूर्वोक्ता लब्धयः सम्भवन्ति, विशिष्य निरतिशये कालेऽस्मिन्, तदा किं कर्त्तव्यमित्याह—जत्तत्ति—यात्रा श्रीशत्रुञ्जयादिमहातीर्थेषु चतुर्विधसङ्घेन सह सोत्सवं गमनं, अथवा युगप्रधानादेर्वन्दनार्थं महर्द्ध्या सम्मुखयानं पूजा-कुसुमादिभिरर्हदर्चनं उत गुरूणां वन्दनक-शुश्रूषादिकरणं, आदिशब्दादभयदानसत्रागारपटहोद्घोषणादि एवंरूपे कृत्ये कृते किं स्यादित्याह—जणत्ति—जना लो-कास्तेषां मनः—श्चित्तं तस्य रमणं—प्रीत्युत्पादकं अन्यदप्युत्सर्पणादि, किंनिमित्तमित्याह—जिणत्ति—जिना अर्हन्तो यतयः—साधवस्तेषां विषयं-तन्निमित्तं सकलं-सर्वमनुष्ठानं 'प्रभावना' महिमा भवति, कथम्?—'शुद्धभावेन' त्रिकरण-विशुद्ध्या कृतमिति गाथार्थः, भावार्थस्तु सङ्घपतिश्रीरत्नश्रावकदृष्टान्तेन प्रतन्यते, स चायम्—

अस्त्युत्तरस्यामाशायां, कले काश्मीरमण्डले। पत्तनं मत्तनेत्राणां, क्रीडौको नवहु(फु)लकम् ॥१॥ विक्रमाक्रान्त-दिक्चक्रस्तत्र शत्रुक्षयङ्करः। स्ववंशसरसीहंसो, नवहंसोऽभवन्नृपः ॥ २ ॥ सुनिस्त्रिंशोऽपि निस्त्रिंशः, सुहृदां मोदका-यते। जातोल्लासश्च यस्यैषोऽसुहृदां मोदकायते ॥ ३ ॥ रम्भाविजयदेवीति, देवी रम्भाविजित्वरी। तस्यास्ति को-मलालापैः, कोकिलेव मनोहरा ॥ ४ ॥ पुरेऽत्रैष ह्यनन्यश्री सुभगं? भावुकस्थितिः। पूर्णचन्द्राभिधः श्रेष्ठी, कलाभिः पूर्णचन्द्रजित् ॥ ५ ॥ राजमान्याः सुतास्तस्य, रत्नत्रयवदद्भुताः। पुंर-त्नभूताः श्रीरत्नो, मदनः पूर्णसिंहकः ॥ ६ ॥

रत्नस्य पोमिणी नाम्नि, लोकंपृणगुणा प्रिया । सत्कुक्षिभूस्तुसूरिस्तु, दोषाणां कोमलोऽभवत् ॥ ७ ॥ श्रीमन्नेमिकुमारस्य, निर्वाणसमयादथ । वर्षाणामष्टसाहस्र्यां, गतायां मुनिपुङ्गवः ॥ ८ ॥ श्रीमान् पट्टमहादेवाभिधः साधुसमन्वितः । नवफुल्लपुरोद्याने, समागाद् ज्ञानभासुरः ॥ ९ ॥ युग्मम् । तत्र देवकृते स्वर्णकमले विमलाशयः । सिंहासनमधिष्ठाय, तस्थिवान् स यतिप्रभुः ॥ १० ॥ उद्यानपालै राजाऽथ, व्यज्ञप्यागमनं गुरोः । सोऽपि पौरपरीवार–वृतस्तं वन्दितुं ययौ ॥ ११ ॥ त्रयोऽपि बान्धवा रत्नप्रमुखाः सपरिच्छदाः । सादरं वन्दितुं जग्मुः, सूरिं दुरितपातकम् ॥ १२ ॥ सुरासुरनराधीशपूर्णायां पर्षदि प्रभुः । जगज्जीवहितामेवं, विदधे धर्मदेशनाम् ॥ १३ ॥ यास्यामीति जिनालयेऽत्र लभते ध्यायंश्चतुर्थं फलं, षष्ठं चोत्थितमुद्यतोऽष्टममथो गन्तुं प्रवृत्तोऽध्वनि । श्रद्धालुर्दशमं बहिर्जिनगृहात्प्राप्तस्ततो द्वादशं, मध्ये पाक्षिकमीक्षिते जिनपतौ मासोपवासं फलम् ॥ १४ ॥ सयंपमज्जणे पुण्णं, सहस्सं च विलेवणे । सयसाहस्सिया माला, अणंतं गीयवाइए ॥ १५ ॥ पूजाकोटिसमं स्तोत्रं, स्तोत्रकोटिसमो जपः । जपकोटीसमं ध्यानं, ध्यानकोटिसमो लयः ॥ १६ ॥ इदं सामान्यतस्तीर्थ–कृतां सेवोद्भवं फलम् । श्रीशत्रुञ्जयतीर्थे तु, तदेव सुतरां महत् ॥ १७ ॥ उक्तं च–धूवे पक्खोवासो मासक्खवणं कपूरधूवम्मि । कित्तियमासक्खवणं साहूपडिलाहिए लहइ ॥ १८ ॥ अहो तीर्थस्य माहात्म्यं, पुण्डरीकमहागिरेः । पशवोऽपि हि यत्रस्था, लभन्ते त्रैदशं पदम् ॥ १९ ॥ ततोऽपि रैवतगिरेः, कृता सेवा महाफला । विमलाचलदेशत्वात्तद्रूपोऽयं यतः स्मृतः ॥ २० ॥ विशेष-

स्त्वेष यन्नेमिः, पवित्रीकृतवान्निजैः। प्रव्रज्याज्ञाननिर्वाणकल्याणकमहामहैः ॥ २१ ॥ श्रीमदुज्जैयन्तमाहात्म्यं, ब्रुवाणा लौकिका अपि । श्रूयन्ते हि प्रभासाख्य–पुराणे वदतांवराः ॥ २२ ॥ पद्मासनसमासीन–श्याममूर्त्तिर्दिगम्बरः । नेमिनाथः शिवेत्याख्या नाम चक्रेऽस्य वामनः ॥ २३ ॥ कलिकालमहाघोरे, सर्वकल्मषनाशनः । दर्शनात्स्पर्शनादेव, कोटियज्ञफलप्रदः ॥ २४ ॥ तस्मादेव शिवाकाङ्क्षु–ध्यायन्ते नमस्कृतः । तेन श्रद्धावता नूनमुपयेमे शिवेन्दिरा ॥ २५ ॥ इमां श्रुत्वा गुरोर्व्याख्यां, रत्नश्रावकपुङ्गवः । समासमक्षमक्षामां, प्रतिज्ञां चकृवानिति ॥ २६ ॥ ससङ्घेनोज्जयन्ताद्रौ, द्रक्ष्यते यदुपो यदा । तदा मया ग्रहीतव्या, द्वितीया विकृतिर्ध्रुवम् ॥ २७ ॥ एकभक्तावनीशीति–ब्रह्मव्रतविधिक्रिया । मया तदैव मोक्तव्या–भविष्यत्स नतो यदा ॥ २८ ॥ ततो भूपादयः सर्वे, ययुः स्वस्वनिकेतनम् । आगृह्य रत्नः सूरीन्द्रान्, स्थापयामास तत्र च ॥ २९ ॥ रत्नो रत्नादिवस्तूनि, ढौकनीकृत्य भूपतिम् । व्यजिज्ञपन्नेमियात्रा–कृते देव ! विसर्जय ॥ ३० ॥ राज्ञोचे साधु साध्विच्छां, निजां पूरय धार्मिक ! । तस्यादेशमिति प्राप्य, हृष्टो रत्नोऽगमद्गृहम् ॥ ३१ ॥ सङ्घं सम्मील्य वेगात्स, नृपदत्तचमूवृतः । बिम्बं संस्थाप्य सद्मे, देवालयमचालयत् ॥ ३२ ॥ प्रथमाष्टाह्निकाकृत्यं, स्वयं क्षितिपतिर्व्यधात् । अमारिघोषणासङ्घपूजाद्युत्सवपूर्वकम् ॥ ३३ ॥ पोमिन्यथो बालसखीं, विजयां भूपवल्लभाम् । आप्रष्टुं जग्मुषी तस्याः, पपात पदपद्मयोः ॥ ३४ ॥ स्वामिनि ! त्वत्प्रसादेन, त्वद्वियोगाक्षमाऽप्यहम् । यात्रां श्रीनेमिनाथस्य, कुर्वे रैवतकाचले ॥ ३५ ॥ साऽप्याख्यत्सखि ! धन्यस्ते,

पारं यातु मनोरथः । परं मा कृपणत्वेन, लज्जयेमाँ कदाचन ॥ ३६ ॥ स्वर्णादिकं महद्दत्त्वा, धर्मव्ययकृतेऽनया । विसृष्टा चानुयानेन, पोमिणी सङ्घमाययौ ॥ ३७ ॥ श्रीमान् पट्टमहादेव–सूरीन्द्रो विहरन् सह । धर्मोपदेशदानेन, भावनामपुषन्नृणाम् ॥ ३८ ॥ कारभं वैसरं वार्षं, वीक्ष्य वित्तेन पूरितम् । प्रातस्तुषारवत्केषां, नागलत् कमलामदः ? ॥ ३९ ॥ गजाश्वरथपादातमुखाः पटकुटीरपि । दर्शं दर्शं जनाः के न, स्वान्ते विस्मयमादधुः ? ॥ ४० ॥ रत्नः पुरोगो मदन–पूर्णसिंहौ द्विपार्श्वगौ । पृष्ठगः कोमलः सङ्घं, रक्षन्तोऽग्रे प्रतस्थिरे ॥ ४१ ॥ स्थाने स्थाने चैत्यपूजावात्सल्यदानकर्मभिः । ससङ्घो रत्नसङ्घेन्द्रोऽतनोज्जिनमतोन्नतिम् ॥ ४२ ॥ सद्बन्धुप्रियापुत्रयुक्तो रत्नः पथि व्रजन् । रोलातोलौ महाशैलौ, प्राप्यास्थात्तन्मुखाग्रतः ॥ ४३ ॥ तत्र चैत्यार्चनागीतनृत्यभोज्यादिकर्म्मभिः । सङ्घोऽतिवाहयामास, दिनं रात्रिं च रङ्गतः ॥ ४४ ॥ प्रातः प्रस्थितिमान् सङ्घो, यावत्तच्छैलसङ्कमे । गन्तुं प्रवर्त्तते मार्गे, तावत्तेन पुरःस्थितः ॥ ४५ ॥ कश्चित्कज्जलसच्छाय–कायो व्यात्तमुखोदरः । नृसिंहरूपभृद् दंष्ट्रा–करालोऽट्टहासभृत् ॥४६॥ अङ्कुशप्रतिरूपाग्र–जाग्रन्नखरदारुणः । बुभुक्षितो भक्षयामि, ब्रुवन्निति विलोकितः ॥ ४७ ॥ त्रिभिर्विशेषकम् ॥ सङ्घाग्रप्रासुकैर्लोकैस्तस्माद्भीतैः पराङ्मुखैः । एत्य रक्षाकृतां राजपुत्राणां स न्यवेदयत ॥ ४८ ॥ निर्भयास्तेऽपि तं प्रोचुः, कस्त्वं किं त्वमुपाद्रवः ? । सङ्घं सुरोऽसुरो रक्षो वेति ब्रूह्यस्मदग्रतः ॥ ४९ ॥ स वेतालोऽब्रवीदग्रे, यदि यास्यथ तद् ध्रुवम् । तिलचर्वं चर्वयिष्ये, सर्वानपि जनानिमान् ॥ ५० ॥ तत्स्वरूपं सङ्घरक्षा–कारकैः सुभटैर्द्रुतम् । रत्नसङ्घ-

पत्तेरग्रे, न्यगद्यत यथास्थितम् ॥ ५१ ॥ रत्नस्तदा तदाकर्ण्य, कर्णक्रकचसन्निभम् । किं कर्त्तव्यं जडीभूय, चिन्तयांचक्रवानिति ॥ ५२ ॥ उपायः कोऽत्र कर्त्तव्यः ?, स्फोर्यो काऽप्यथवा मतिः । सङ्घस्य का गतिर्भाविन्यस्मिन् विघ्ने ह्युपस्थिते ? ॥ ५३ ॥ व्याघुट्य गम्यते पश्चात्केऽप्याहुः प्रियजीविताः । नूनं भक्षयिता रक्षस्तस्मादात्मा हि रक्ष्यते ॥ ५४ ॥ म्रियते जीव्यते वापि, गम्यते पुरतो ध्रुवम् । श्रीनेमिं शरणीकृत्य, केचित्साहसिका जगुः ॥ ५५ ॥ स्त्रीपुंसानां मिथो जल्पैर्भीतिस्फीत्यतिकातरैः । सङ्घे व्याकुलतां याते, रत्नो भट्टानभाषत ॥ ५६ ॥ भो मागधास्तत्र गत्वा, नृसिंहं परिपृच्छत । कथं प्रसीदसि त्वं ? तत्, कृत्वा यामः पुरो वयम् ॥ ५७ ॥ इत्यादेशेन रत्नस्य, तेऽपि गत्वा तमब्रुवन् । सोऽप्याख्यदस्याद्रेः स्वामी, सुदाढो राक्षसोऽस्म्यहम् ॥ ५८ ॥ यद्येकं सङ्घपुरुषं, मह्यं भक्षाय यच्छत । तत्पलप्रीणितोऽत्यन्तं, क्लेशये नापरान् परान् ॥ ५९ ॥ स्वप्रतिज्ञां न लुम्पामि, ततो यातु जनः सुखम् । निर्णीयेति वचस्तस्य, जगू रत्नाय मागधाः ॥ ६० ॥ सङ्घलोकं मीलयित्वा, ततो रत्नोऽब्रवीदिदम् । अद्य मे पुण्यसम्पत्ति–रुदियाय गरीयसी ॥ ६१ ॥ यदेष राक्षसो भुङ्क्ते, पुंस्येकस्मिन् समाहितः । अन्यांस्त्यजति-तद्यात, यूयं नेमिं नमस्यत ॥ ६२ ॥ प्रोच्येति रत्ने मौनस्थे, राजपुत्राः सहोदरौ । प्रिया च तनयो हृष्टाः, प्रत्येकं ते बभाषिरे ॥ ६३ ॥ सङ्घाधीश ! चिरं जीवास्मास्वेकस्य प्रदानतः । अनाथं त्वां विना सङ्घं, कोऽपरः पातुमीश्वरः ? ॥ ६४ ॥ प्रत्येकं सोऽपि तान् सर्वांस्तत्कर्मकृतसाहसान् । न्यवारयदनेकाभिः, स वाग्भिर्वाग्मिनां वरः ॥ ६५ ॥ सङ्घं प्रास्थापयद्रत्नो, मृत्यवे

कृतनिश्चयः । रक्षसापि पुरो गच्छन्नोपाद्रावि जनोऽखिलः ॥ ६६ ॥ सुधीः कृतार्थमात्मानं, मन्वानः सङ्करक्षणात् । श्रीनेमिं शरणीकृत्य, रत्नोऽस्थाद्द्रिवत्स्थिरः ॥ ६७ ॥ कायोत्सर्गं विधायाथ, पोमिण्यपि महासती । तद्दृशोः परतो भूत्वा, तस्थौ भर्तृप्रियङ्करी ॥ ६८ ॥ कोमलोऽपि पितुर्दुःखमसहिष्णुस्तदन्तिके । कायोत्सर्गं विधायास्थाद्धुर्यो धैर्यवतां नृणाम् ॥ ६९ ॥ स एवं रत्नयत्रिस्त्वा, क्वचिच्छैलगुहान्तरे । शिलां दत्त्वा च तद्द्वारि, स्वयं बहिरुपाविशत् ॥ ७० ॥ दुष्टः प्रस्फोटयन् पुच्छं सिंहनादं सृजंस्तथा । भापयामास तं सोऽपि, धर्मधीर्नाचलद्भयात् ॥ ७१ ॥ तस्मिन्नवसरे सम, रैवताचलमूर्द्धनि । अम्बिकास्वामिनीं नन्तुं, क्षेत्रपाला इमे ययुः ॥ ७२ ॥ मेघनादाह्वयः कालो, मेघो गिरिविदारणः । कपाटः सिंहनादश्च, खाटिको रैवताभिधः ॥ ७३ ॥ अम्बां विज्ञपयामासुस्ते नत्वैकत्र सङ्गताः । महादेवि ! कुतो हेतो-रयमाकम्पते गिरिः ? ॥ ७४ ॥ अस्माकं वसतामत्र, न जातमिति वैशसम् । यादृशं साम्प्रतं ह्यस्ति, तत्स्वामिनि ! विलोकय ॥ ७५ ॥ ज्ञाने प्रयुक्ते व्यज्ञायि, देव्या कोऽपि नरोत्तरः । दुष्टेन केनचिद्वादं, क्लिश्यमानो गुहान्तरे ॥ ७६ ॥ तस्याशु मुक्तये सम, क्षेत्रपालयुता गता । पोमनीकोमलौ तत्र, तथास्थौ सा न्यरूपयत् ॥ ७७ ॥ तथोस्ताद्वृग्महासत्त्वं, दृष्ट्वा हृष्टाऽम्बिकासुरी । सम्प्राप्य कन्दराद्वारं, नृसिंहं तमतर्जयत् ॥ ७८ ॥ अरे क्रूर ! करोषि त्वं, किमिदं दुष्टचेष्टितम् ? । यद्यस्ति काऽपि ते शक्तिस्तदा युद्धोद्यतो भव ॥ ७९ ॥ तच्छ्रुत्वा-घर्घराशब्दं, कृत्वा वीररसोद्धुरः । चकार स रणं घोरतरं तैः क्षेत्रपैः सह ॥ ८० ॥ अम्बया चरणे धृत्वा, भ्रम-

यित्वाऽभितः शिरः । सोऽयं शिलायामाहत्य, यावत्संचूर्णयिष्यते ॥ ८१ ॥ तावदम्बा दिव्यरूपं, नरमेकं पुरःस्थितम् । अद्राक्षीद्दयितापुत्र–युतं रत्नं च सुस्थितम् ॥ ८२ ॥ ततः स देवरूपी ना, तुष्टो रत्नं तथाऽम्बिकाम् । क्षेत्रपालांश्च स्तोचे, भो भोः ! शृणुत मद्वचः ॥ ८३ ॥ यदा व्याख्याक्षणे सूरिर्माहात्म्यं चित्रकृत्सताम् । श्रीरैवतमहाशैलतीर्थव्याख्यानमातनोत् ॥ ८४ ॥ तदा नूरत्नं रत्नोऽयं प्रतिज्ञां कृतवानिति । असूनामपि सन्देहे, नेमिर्वन्द्यो मया ध्रुवम् ॥ ८५ ॥ तदैव शङ्कराख्योऽहं, वैमानिकसुरो गुरोः । उपविष्टः पुरोऽभूवं, सोढवान्न च तद्वचः ॥ ८६ ॥ ततो मया परीक्षाऽस्य, चक्रे स्थैर्यं विलोक्य च । एतज्जायापुत्रयोश्च, स्वचेतसि विसिष्मिये ॥ ८७ ॥ कृतपुण्यानमून्मन्ये, स्वप्रतिज्ञाप्रपूरकान् । येषां रोमापि नो भिन्नमीदृक्कष्टेऽप्युपस्थिते ॥ ८८ ॥ सत्येन युद्धं चेत्कुर्वे, न जीये तद्भवादृशैः । सङ्घरक्षाकृतो यूयं, धन्या एव परं भुवि ॥ ८९ ॥ क्षमयित्वा समालिङ्ग्य, रत्नं पुत्रप्रियान्वितम् । कृतानन्दस्य सङ्घस्य, मध्ये मुक्त्वा स उद्ययौ ॥ ९० ॥ अम्बाद्या अपि सानन्दाः, स्वं स्वं स्थानमगुः सुराः । सङ्घोऽप्युल्लसदुत्साह, आरुक्षद्रैवताचलम् ॥ ९१ ॥ हर्षोत्फुल्लदृगम्भोजै, रोमाञ्चोदञ्चदङ्गकैः । सङ्घपत्यादिभिर्लोकैरालुलोके शिवाङ्गभूः ॥ ९२ ॥ नमस्कृत्य प्रभुं गत्वा, गजेन्द्रपदकुण्डके । स्नात्वा भृत्वा च सौवर्णकलशान् हारिवारिणा ॥९३॥ प्रसर्पद्भावनोल्लासा, रत्नाद्या नेमिनं जिनम् । लेप्यबिम्बस्नात्रयुक्तिमजानाना मनागपि ॥ ९४ ॥ गन्धोदकैस्तथाऽत्यन्तं, स्नपयामासुरादरात् । यथा विभिद्य सहसा,मूर्त्तिर्मृद्रूपतामगात् ॥९५॥ त्रिभिर्विशेषकम् ॥ विषसादाखिलः

सङ्घः, श्रीरत्नस्तु विशेषतः । हा धिग्मां तीर्थविध्वंस-पापकर्ममलिताङ्ककम् ॥ ९६ ॥ स च सन्धां व्यधादेवं, याव-त्तीर्थमिदं मया । नैवोद्धरिष्यते तावद्भोजनं न विधास्यते ॥ ९७ ॥ इत्युक्त्वा सोदरौ सङ्घ-रक्षायै विनियुज्य सः । अम्बिकां मनसा कृत्वा, प्रावर्त्तत तपोविधौ ॥ ९८ ॥ तदेकमानसो रत्नो, निष्प्रकम्पो गिरीन्द्रवत् । दूरे तत्याज निर्व्याजमतिरन्नस्पृहामपि ॥ ९९ ॥ मासद्वयोपवासान्ते, स्वान्ते निश्चलतां दधत् । सोऽभाष्यत महासत्त्वो, दिव्य-रूपभृताऽम्बया ॥ १०० ॥ वत्सोत्तिष्ठ समागच्छ, सत्त्वाब्धे ! मयका समम् । निर्मिते सुरराजेन, श्रीकाञ्चनबलानके ॥ १०१ ॥ एवं कृतानतिं नीत्वा, निशायां निजनेमिनः । द्वासप्ततिमिता मूर्त्तीर्दर्शयामास तत्र सा ॥ १०२ ॥ रत्न-हेमशिलारूप्य-मयान्यष्टादश क्रमात् । द्वासप्ततिमितान्येवं, बिम्बान्येक्ष्य जहर्ष सः ॥ १०३ ॥ बिम्बमेकं स्फुरद्रूपं, रत्नं रत्नः स्पृशन् जगौ । अम्बां मातरिदं देहि, चैत्येऽहं स्थापये यथा ॥ १०४ ॥ निषिद्धः सोऽम्बया वत्स !, क-लिकालः समेष्यति । लोकास्तत्र भविष्यन्ति, सुतरामर्थलोलुपाः ॥ १०५ ॥ पापे रता धर्मबाह्यास्तेभ्यो रत्नमयं त्वि-दम् । न छुट्टिष्यति तस्मात्ते, भविष्याशातना भृशम् ॥ १०६ ॥ युग्मम् । बिम्बं वज्रमयं वज्र-सारमेतद्गृहाण तत् । तेनापि तद्वचो मेने, शुभायतिविचारिणा ॥ १०७ ॥ ऊचे च तत्र हे मातरियद्बिम्बं कथं मया । नेतव्यं ? स तयाऽप्यूचे, सूत्रेणानेन वेष्टय ॥ १०८ ॥ मा भैषीश्चल वेगेन, पश्चात् त्वं मा विलोकयेः । व्यावृत्याऽऽस्यं यत्र बिम्बं, द्रष्टा स्थास्यति तत्र भोः ॥ १०९ ॥ इत्यम्बावचसा रत्नो, बिम्बमादाय सत्वरम् । निमेषवत् व्यतीयाय, कियतीमपि

भूमिकाम् ॥ ११० ॥ किं बिम्बमेति नो वेति, शङ्कयाऽऽकुलमानसः । यावत्पश्चान्मुखं कृत्वा, सोऽपश्यत् स्पष्टया दृशा ॥ १११ ॥ तावत्तत्रैव तद्बिम्बं, तस्थौ नेमेः सुनिश्चलम् । प्रासादद्वाररचना, तथैव च कृताऽमुना ॥ ११२ ॥ आशीर्मुखो जनोऽवोचत्, तीर्थोद्धारं वितन्वता । रत्न ! त्वयाऽऽत्मा सङ्घश्चोद्धृतः पातकसागरात् ॥ ११३॥ तदा सङ्घेन हृष्टेन, श्रीसङ्घपतिना समम् । स्नात्राद्युत्सवनिर्माणैरगण्यं पुण्यमार्ज्यत ॥ ११४ ॥ एवं प्रतिज्ञामापूर्य, रत्नः सङ्घसमन्वितः । उत्तीर्य रैवताचलके, सङ्घपूजादिकोत्सवम् ॥ ११५ ॥ ततः श्रीपुण्डरीकाद्रौ, पुण्डरीकद्वयान्वितम् । श्रीमन्नाभेयदेवं स, ससङ्घः प्राणमत्तमाम् ॥११६॥ अन्यान्यपि हि तीर्थानि, प्रणिपत्य स सत्वरम् । नवहु(कु)लपुरं प्राप, राज्ञा कृतमहोत्सवम् ॥ ११७ ॥ अमारिघोषणैश्चैत्य–परिपाटीमहामहैः । साधर्मिकादिवात्सल्यै, रत्नो व्यस्मापयज्जगत् ॥ ११८ ॥ एवं रत्नः प्रतिप्रातः, पुण्यैः कोशमपूरयत् । जगतीं हारनीहार–सोदरैश्च यशोभरैः ॥ ११९ ॥ इत्यादिभिर्धर्मकृत्यैः, श्रीरत्नः श्रावकोत्तमः । जिनशासनमुद्भाव्य, क्रमात्सुगतिभाग्भूत् ॥ १२० ॥ इत्थं श्रीरत्नसङ्घेश्वरवररचितं श्रोत्रपात्रेकपेयं, कृत्वा यात्रादिकृत्यैर्गुरुपदकमलासेवनैश्चातिमात्रम् । तादृग् लब्ध्याद्यभावादपि कुरुततरामुत्सवान् जैनधर्मे, येन स्याद्बोधिबीजोदयचयवशतस्तीर्थकृत्त्वादिलक्ष्मीः ॥ १२१ ॥ लब्ध्याद्यभावेऽपि जिनमतप्रभावकविषये रत्नश्रावककथा ।

इति श्रीरुद्रपल्लीयगच्छगगनमण्डनदिनकरश्रीगुणशेखरसूरिपट्टावतंसश्रीसङ्घतिलकसूरिविरचितायां सम्यक्त्वसप्ततिकावृत्तौ तत्त्वकौमुदीनाम्न्यां प्रभावकाष्टकादिस्वरूपनिरूपणो नाम षष्ठोऽधिकारः समाप्तः ॥

षष्ठं प्रभावकाधिकारमुक्त्वा सप्तमं सम्यक्त्वपञ्चभूषणद्वारमाह—

सम्मत्तभूसणाइं, कोसल्लं तित्थसेवणं भत्ती। थिरया पभावणाविय भावत्थं तेसिं वुच्छामि ॥ ४० ॥

व्याख्या—सम्मत्तत्ति–सम्यक्त्वस्यैतानि भूषणानि भवन्तीति सम्बन्धः, सम्यक्त्वं-कारकरोचकदीपकादिभेदभिन्नं, अथवा क्षायिकक्षायोपशमिकौपशमिकसास्वादनादिरूपं, तदेव सर्वस्य धर्मस्याङ्गभूतं भूष्यते–अलङ्क्रियते परमशोभाम-वाप्यते यैस्तानि भूषणानि, क्रमेण तन्नामान्याह–'कौशल्यं' सर्वदिनकृत्यक्रियासु नैपुण्यम् 'तीर्थसेवनं' तीर्थं नद्यादे-रिव संसारतारेण(रणे)–सुखावतारो मार्ग्गः, तच्च द्विधा द्रव्यतीर्थं भावतीर्थं चेति, तत्र द्रव्यतीर्थं जिनजन्मादिभूमय, उक्तं च—जम्मं दिक्खा नाणं, तित्थयराणं महाणुभावाणं। जत्थ य किर निव्वाणं, आगाढं दंसणं होइ ॥ १ ॥ भावतीर्थं तु चतुर्वर्णश्रीश्रमणसङ्घः, प्रथमगणधरो वा, तस्य सेवनं पर्युपास्तिकरणम् २ ॥ 'भक्ति' प्रवचने विनय-वैयावृत्त्यकरणरूपा प्रतिपत्तिः ३ ॥ 'स्थिरता' जिनधर्मं प्रति केनापि व्युद्ग्राहितचित्तस्य स्थिरताऽऽपादानं, स्वयं वा परतीर्थिकर्द्धिदर्शनेनापि जिनशासनं प्रति निष्प्रकम्पता ४ ॥ 'प्रभावना' तैस्तैर्धर्म्मकृत्यैरर्हन्मतोन्नतिकरणम् ५ ॥ अपिचेति समुच्चयार्थं, इति पञ्चभूषणानि एतेषां 'भावार्थं' स्वरूपव्याख्यानमग्रेतनगाथाभिर्वक्ष्यामीति गाथार्थः ॥ ४० ॥ एषां मध्ये प्रथममाद्यभूषणस्वरूपं गाथापूर्वार्द्धेनाह—

वन्दणसंवरणाई किरियानिउणत्तणं तु कोसल्लं।

व्याख्या—वन्दनं देवपूजाषडावश्यकादिकरणम्, संवरणं-पापव्यापारनिवारणनिरतीचारद्वादशव्रताङ्गीकरणं, आदिशब्दाद् दानशीलतपोभावनादीनां विधिवदासेवनं, वन्दनं च संवरणादि चेति द्वन्द्वः, तत्र याऽसौ क्रिया—कर्त्तव्यं तस्यां निपुणत्वं—विधिज्ञत्वं 'कौशल्यं' दक्षत्वं 'तुः' पादपूरणे इति गाथापूर्वार्द्धार्थः । भावार्थस्तूदायिनृपवृत्तादवसेयः, स चायम्—

अस्ति समस्ताश्चर्यपूरिते श्रीभरते बहलकमलाविलासराजमानधनिजनगृहं राजगृहं नाम नगरं,—यत्र प्रासादमौलिस्थैर्वातोद्धूतैर्ध्वजैः सितैः । नभस्तरङ्गिणीवीचीचयानां ह्रियते मदः ॥ १ ॥ तत्र वैरिवधूवदनारविन्दचन्द्रः श्रीकोणिकापरपर्यायनिस्तन्द्रः श्रीअशोकचन्द्र इति राजा राज्यं पालयति स्म । येन स्वपौरुषप्रोद्यदग्निना वैरिकाननम् । प्रदीप्य भरतार्द्धस्य, श्रियाः पाणिग्रहः कृतः ॥ १ ॥ तस्यागण्यलावण्यपण्यपूर्णापणा निःसीमशीलादिगुणवती पद्मावती—नाम प्रिया । यस्या दासीकृतस्त्रैणं, शङ्के रूपं निरूप्य सः । रतिप्रीत्योर्न सस्मार, स्मरः सञाततन्मनाः ॥ १ ॥ शचीसुरपत्योरिव तयोर्दम्पत्योर्नित्योल्लसद्भोगयोगयोः कोऽप्युत्तमो जीवो दिवश्च्युत्वा पद्मावत्याः कुक्षिशुक्तौ मुक्ताफलवदवातारीत् । स सम्पूर्णदोहदः पूर्णेषु मासेषु तथा सुतत्वेनासूयत, ततो वर्द्धापकदासचेट्यः कोटिदानेन कोणिकनृपेण सम्भावयांबभूविरे, स्वयं च हृदयानन्दनन्दनवदनावलोकनलोलविलोचनोऽन्तःपुरमभिससार, तं च करसरोरुहाभ्यामादाय स्नेहसागरसुधाकारं निरवद्यपद्यमिदमपाठीत्,—अङ्गादङ्गात्सम्भवसि, हृदयादभिजायसे । आत्मैव

पुत्रनामासि, तज्जीव शरदां शतम् ॥ १ ॥ एवं तं पुत्रं दर्शं दर्शं पौनःपुन्येन पठतो नृपस्य करपङ्कजात्कुमारभृत्याविचक्षणाभिर्वृद्धस्त्रीभिरुपादाय सोऽरिष्टवरिष्ठशय्यायां निवेशितः, तस्य च शिशोर्यथारुचि याचकद्विजादिभ्यो दानं ददानो महीनो जातकर्ममहोत्सवमतुच्छमकारयत्, तदेव दिवसं सुदिनतया मन्वानस्तस्याङ्गभुव उदायीति नाम विदधे । स बालः सितपक्षमृगाङ्क इव वपुरुपचयेन कलाकलापेन च समकालमेवाकलयांबुभूवे । राजापि स्नेहमोहितः कटितटनिविष्टेन सुतेन शालिभञ्जिकाविभ्राजमानस्तम्भनिर्दम्भशोभां बिभराम्बभूव, आसनशयनयानभोजनादिविधानेष्वपि स यतिपतिरिव रजोहरणं तं न दूरीचकार । एकदा वामोरुमूले उदायिनं निवेश्य भोजनायोपाविशद्विशामीशः, अर्द्धभुक्ते च स शिशुः सर्पिर्धारामिव मूत्रधारामसूत्रयद्भोजनान्तराले, राजापि सुतवात्सल्यच्छलितो न तं मनागपि चालयामास, मा भूदस्य मूत्रनिरोधेन गदसम्भवः । तन्मूत्रसंसक्तं भोजनं पाणिनोत्सार्य तथैव रसवतीमास्वादयामास, अहो मोहविलसितम् । अथ तत्स्नेहमोहितो महीपतिस्तस्मिन्नवसरे स्वमातरं चेल्लणादेवीमवादीत्–अम्ब ! यादृक् स्नेहोऽमुष्य शिशोर्विषये न तादृक्कस्याप्यभूद्भवति भविष्यति च, इति श्रुत्वा चेल्लणाऽप्याह स–वत्स ! कियांस्तव स्नेहोल्लासः ?, यादृक् त्वद्विषये पितुरासीत् स कोट्यंशेनापि तव न स्वतनये, मातः ! कथमिति कूणिकेनोक्ता सा प्रोचे–वत्स ! गर्भस्थे त्वयि मम त्वत्पितुरन्त्रास्वादनदोहदेऽभयकुमारेण पूरिते पितुरनर्थहेतुरयमङ्गज इति जातमात्रस्त्वं मया परिष्ठापयांचक्रे निजोद्यानवनिकायां,तत्र कुर्कुटेन तव कनिष्ठाङ्गुलिः पिच्छाग्रेण विद्धा, सा च कृमि-

पातेन पूयक्लिन्नाऽभूत्, तस्मिन् क्षणे सञ्जातपुत्रजन्मानन्दितस्वान्तस्त्वां चारित्रसम्बन्ध्यपश्यन् ज्ञातवृत्तस्त्वत्पिता मा निरभर्त्सयत्, त्वां च वनादानाय्य मुक्तापरराजकार्यः स्नेहविवशो रोदनात्कथमप्यतिष्ठन्तं विलोक्य त्वां त्वदङ्गुलीं मुखे निधाय तावत्तस्थिवान्, यावद्भवान् रोदनादवतस्थे, इत्थं रात्रिन्दिवं कुर्वाणो मया निवार्यमाणोऽपि नास्थात् तव तातः, इति श्रुत्वा सञ्जातपश्चात्तापः कूणिको जनकं पञ्जरादुन्मोचयितुं दण्डमादाय यावद्धावति स तावच्छ्रेणिकभूपस्तमूर्ध्वीकृतदण्डं कृतान्तमिवायान्तमालोक्यापमृत्युभीतभीतस्तालपुटविषमास्वाद्य विपेदे, ततः कोणिकः स्वदुष्टचेष्टितं निन्दन् पितुश्च स्नेहं संस्मरन् सुतरां विललाप, पितुश्च राज्यचिह्नानि दर्शं दर्शं महादुःखमनुभवन् मन्त्रिभिश्चम्पानगरीं राजधानीं कुर्वद्भिर्वीतशोकः कूणिकश्चक्रे। ततोऽहं त्रयोदशश्चक्रवर्त्ती भरते संवृत्त इति सञ्जातक्षयमतिर्वैताढ्यभूधरस्य तमिस्रायाः कन्दरायाः कपाटसम्पुटं दण्डेनाताडयत्, ततो गुहास्वामिना कृतमालदेवेन प्रादुर्भूतप्रभूतकोपाटोपेन प्रज्वलज्ज्वलनज्वालया ससैन्योऽप्यशोकचन्द्रो भस्मसाच्चक्रे । यदुक्तम्—कृतान्तपाशबद्धानां, दैवोपहतचेतसाम् । बुद्धयः कुब्जगामिन्यो, भवन्ति महतामपि ॥ १ ॥ अथ ज्ञाततद्वृत्तैर्मन्त्रिभिस्तत्पदे श्रीमदुदायी बालोऽप्यभ्यषिच्यत, सोऽप्युदायिराजा पितुस्तत्तत्स्नेहमनुस्मरन् क्षितितलं शोकाश्रुप्रवाहैः प्लावयामास, तच्छोकापनोदाय च सचिवैरन्यां राजधानीं चिकीर्षुभिर्निमित्तवेदिनः सूत्रधाराश्च क्षेत्रशुद्धये प्रजिघ्यिरे, तेऽप्युदयिनामवनीं गवेषयन्तो

गङ्गातटस्थाग्निकासुतकरोटिप्ररूढपाटलातरुं स्वयमागत्य पतत्पतङ्गास्वादनलालसवदनं कीरं निरीक्ष्य विमृष्टवन्तः—यथाऽमी शलभाः शुकानामाहारतां गच्छन्ति, तथैतत्पुरस्वामिनरेन्द्रस्य वैरिश्रियोऽनायासेन भोग्यतामुपयास्यन्तीति विमृश्य तत्रैव राजधान्याः सूत्रं दत्त्वा पाटलितरुनाम्ना पाटलीपुरमित्यभ्यधां व्यधुः । तत्र श्रीउदायिनरेन्द्रः स्वयमेत्य राज्यं पालयति स्म । अहो ! तस्य कोऽपि प्रतापतपनोदयः यत् स्थानस्थस्यापि वैरिणो भीतभीता घूका इव कन्दराविवरेष्वभिससर्पुः, स दिने दिने दानयुद्धधर्मवीरतां वितस्तार धरायाम् । अन्यच्च तस्यान्यतः सद्गुरुचरणमूलोपात्तद्वादशव्रतखण्डनाया ऋते कुतोऽपि न भीतिः प्रावर्त्तत, स दृढसम्यक्त्वश्चतुष्पर्व्यां चतुर्थकरणदेवगुरुवन्दनषड्विधावश्यकाचरणपौषधविधिनिर्माणादिकृत्यैरात्मानं पावयन्नन्तःपुरकारितपौषधागारे निशायां क्षणं विशश्राम श्रमण इव । इत्थं स जिनशासनक्रियास्वत्यर्थं कौशलशाल्यजनि । अथ रणाङ्गणव्यापादितस्यैकस्य गृहीतसर्वस्वस्य नृपस्याङ्गभूरेकाकी क्वापि स्थानमलभमानः पितृवैरनिर्यातनार्थमुदायिपार्थिवं जिघांसुरुज्जयिनीपुरमागत्य तत्रत्यनृपं सेवया सन्तोष्यैकदाऽवादीत्—स्वामिन् ! श्रीमतां यद्यादेशः स्यात्तदोदायिराजानं व्यापादयामि, यदि प्रसद्य यूयं मामकं पैतृकं राज्यं सहाय्यं विधाय मह्यं दापयत इति तद्वचः श्रावं श्रावं जहर्षोज्जयिनीपतिः, को ह्ययत्नेन सपत्नवधे जायमाने नानन्दमुद्वहति ?, ततः स नृपस्तद्वचः स्वीकृत्य तस्मै च शम्बलं दत्त्वा प्रेषितवान्, सोऽपि स्कन्धन्यस्तकम्बलः सर्वथा निर्बल एकाकी कङ्कपत्रकर्त्तिकाभृदभिमरकतरूपः क्रमेण पाटलीपुत्रपत्तने उदायिनृपजिघांसया प्राविक्षत्, सुचिरं

राजद्वारादिषु यातायातानि वितन्वानः क्वापि कथमपि वज्रभित्तौ टङ्किकेव प्रवेशमलभमानः स्वं मनोरथमाकाशकुशेशयसदृशं मन्वानः चिन्तयामास स नृपाङ्गः(?)—कथं मयैनं महीनं व्यापाद्य प्रतिज्ञा पूरयिष्यते ?, स कोऽप्युपायो नास्ति येनेदं साध्यं साध्यते, अथवा दैवमेव प्रमाणम्, यतः—अघटितघटितानि घटयति, सुघटितघटितानि जर्जरीकुरुते । विधिरेव तानि घटयति, यानि पुमान्नैव चिन्तयति ॥ १ ॥ अतो ज्ञातोऽस्त्येक उपायस्तदपायाय, यदेनं मेदिनीनं श्वेताम्बरर्षिपरमभक्तं प्रत्यहं तत्समीपे यातायातानि तन्वन्तं केनाप्युपायेन व्यापादयिष्यामि कपटयतित्वमप्युपादाय, इति विमृश्य स बन्दी गुरून् वन्दित्वा विज्ञपयामास भगवन् ! मामनुगृह्णीत संसारविरागिणं निजदीक्षाप्रदानेन, तेऽपि महात्मानस्तदभिप्रायमजानानास्तं दीक्षितवन्तः, सोऽपि तदा कङ्कपत्रासिपुत्रिकां क्वापि सङ्गोप्य तपोधनमनोविनोदनाय कपटनाटकसूत्रधारः पठनपाठनतपश्चरणक्रियाकलापादिनाट्येन नर्त्त । गीतार्थेषु परमसीमानं कलयन् षोडश वर्षाणि व्रतपर्यायं पालयामास । तस्य चानन्यमनसस्तादृग् व्रतं पालयतोऽपि कृपारसेन रोममात्रमपि न भिन्नं शुद्धशैलस्येव । एकदा सूरयः पाटलीपुरमैयरुः, तदनूदायिनृपः प्रोल्लसद्भक्तिभरनिर्भराङ्गः समेत्य गुरूनवन्दत, व्याख्यानं च शुश्राव । अन्यदा पर्वदिने राजा प्रातरुत्थाय विधिनाऽऽवश्यकपूर्वकमष्टप्रकारपूजया वर्द्धमानजिनप्रतिमामभ्यर्च्य गुरूणां पुरो द्वानवत्यधिकशतस्थानकोपशोभितद्वादशावर्तवन्दनकं दत्त्वाऽतीचारानालोच्य क्षामणकं च कृत्वा चतुर्थप्रत्याख्यानमासूत्र्य श्रुतव्याख्यानो यथावद्विहितचैत्यपरिपाट्या सकलसङ्घेन सह पू-

जितजिनराजः सायन्तनसमये स्वान्तःपुरस्थपौषधशालायां पोषधं जिघृक्षुः सर्वक्रियाकौशलत्वशालीति जैनं वचः संस्मरंश्च गुरूनाकारयति स्म—पञ्चविहायारयिसुद्धिहेउमिह साहु सावगो वावि । पडिकमणं सह गुरुणा गुरुविरहे कुणइ इक्कोऽवि ॥ १ ॥ जं किंचि अणुट्ठाणं आवस्सयमाइयं चरणहेऊ । तक्करणं गुरुमूले गुरुविरहे ठावणापुरओ ॥ २ ॥ तेऽपि सूरयः क्रियासमभिहारेण क्रियां कारयितुं त्रिधिवशाद्गीतार्थतपोधनदवीयस्त्वेन तं राजवैरिणं राजपुत्रर्षिं गीतार्थमिव मन्वाना अनुगमनाय समादिक्षन् । सोऽपि लब्धावसरो गीतार्थतां नाटयन् स्वात्मानं बकमिव परमधार्मिकं दर्शयन् परमाधार्मिकः सहगृहीतकङ्कपत्रासिपुत्रिको गुरुभिः समं राजकुलं ययौ । राजापि चिन्तामणिमिव दुर्लभं धर्म्मं समाराद्धुकामः कामं गुरूनभिवन्द्य सूत्रोक्तयुक्त्या पौषधमादित । तैः समं च प्रतिक्रमणं विधाय विहितापापानध्यायाद्भुतस्वाध्यायः संवेगतरङ्गिणीतरङ्गस्नानपूताङ्गः कृतप्रथमप्रहरप्रतिलेखनः संस्तारकमास्तीर्य सामायिकसूत्रचतुश्शरणप्रतिपत्तिपरमेष्ठिमहामन्त्रादिस्मरणपूर्वकं धर्मजागरिकां कियन्तमपि कालमाकलय्य कुक्कुटवत्पादौ प्रसार्य चास्वाप्सीत् । गुरवोऽपि कृतस्वाध्यायास्तत्सन्निधौ शेरते स्म । अत्रान्तरे स दुष्टात्मा कपटनिद्रया क्षणं सुप्त्वाऽयमेव मे पितुर्वैरनिर्यातनावसर इति विचार्यानार्यशिरोमणिरुदायिनृपगलकन्दलं कङ्कपत्रकर्त्तिकया छित्त्वा स्वयं च नृपरक्षादक्षैरप्यारक्षैरनिवारितो निरगान्नगरादपि भव्येतरः । ततो राज्ञः कण्ठपीठाद्रक्तप्रवाहो वहन् गुरूणां संस्तारकमापदापदां पदमिव साक्षात्, तत्संस्पर्शाद्गुरवोऽपि जजागरुः । ततस्तथाभूतं भूपतिं विलोक्य सञ्जाताकम्पास्ते च

कुशिष्यमपश्यन्त इत्यचिन्तयन्– अहो जिनमतमालिन्यमायुगान्तापकीर्त्तिजनकं तेन दुरात्मना विनिर्मितं। तस्माद-स्माकमपि प्राणप्रहाणेनैव दुर्यशःप्रणाशो नेतरथेति निश्चित्य कृतानशनाः पञ्चपरमेष्ठिस्मरणपराः सूरयो गलकन्दले तामेव कृपाणिकां नियोज्य स्वर्ययुः। ततो जाते प्रभाते राजलोका विज्ञातनृपगुरुमृत्यवस्तमेव पापीयांसं निनिन्दुः। स च गवेष्यमाणोऽपि तैः क्वापि नाऽऽपि। तदनु स दुष्टो नंष्ट्वोज्जयिनीं गत्वाऽवन्तीशाग्रे राजनिग्रहस्वरूपं यथा-वज्जगाद। तेनाप्यद्रष्टव्यमुखोऽयं पापी धर्मविप्लवकारको निर्वासितः स्वपुरात्, नहि क्वापि पापिनां समीहितसिद्धि-र्भवति। उदायिनृपतिस्तु तादृक्क्रियाकौशल्यासेवनात् सुरपुराभरणीबभूव।–इत्थं श्रीमदुदायिनो वसुमतीवज्रायुधस्या-खिलं, चित्रं चारुचरित्रमत्र सुतरां कर्णे निधायाऽञ्जवत्। श्रीमज्जैनविधौ बुधाः! कुशलतामासृत्य सम्भूष्यता, सम्यक्त्वं भवतां यथेप्सितरमा साऽऽनन्दमालिङ्गति॥ १॥ कुशलताविषये श्रीउदायिनृपकथा। कौशल्यं नामादिमं भूषणमुक्त्वा द्वितीयं तीर्थसेवाख्यं भूषणं गाथोत्तरार्द्धेनाह—

तित्थनिसेवा य सयं संविग्गजणेण संसग्गी॥ ४१॥

व्याख्या—तीर्यते संसारसागरोऽनेन तीर्थं–श्रीयुगादिदेवप्रभृतिजिनगृहविभूषितश्रीमच्छत्रुञ्जयाष्टापदाद्रिप्रमुखस्था-नवृन्दं तस्य नितरां सेवा–अश्रान्तयात्राकरणं, तद्यात्रा हि क्रियमाणा महते गुणाय कल्पते। उक्तं च—ते धन्या-धनिनस्त एव च वशीभूतत्रिलोकश्रियस्तेषामेव सदैव हन्त फलितं पुण्यैः पुरोपार्जितैः। तेषां जन्म च जीवितं च

सफलं तैरर्जिताः कीर्त्तयः, स्वर्निर्वाणसुखप्रदो जिनपतेर्यात्राविधिर्यैः कृतः ॥ १ ॥ चः समुच्चये, न केवलं तीर्थयात्राकरणं किन्तु 'संविग्गजणत्ति' संविग्नश्चासौ जनश्च संविग्नजनः संवेग १ निर्वेद २ धर्म्मश्रद्धा ३ गुरुसाधर्मिकशुश्रूषा ४ आलोचना ५ निन्दा ६ गर्हा ७ सामायिक ८ चतुर्विंशतिस्तव ९ वन्दन १० प्रतिक्रमण ११ कायोत्सर्ग १२ प्रत्याख्यान १३ स्तवस्तुतिमङ्गल १४ कालप्रत्युपेक्षणा १५ प्रायश्चित्तकरण १६ क्षामणा १७ स्वाध्याय १८ वाचना १९ परिप्रच्छना २० परावर्त्तना २१ ऽनुप्रेक्षा २२ धर्मकथा २३ श्रुताराधना २४ एकाग्रमनःसंनिवेशना २५ संयम २६ तपः २७ व्यवदानं २८ सुखाशय २९ अप्रतिबन्धता ३० विविक्तशयनासनसेवना ३१ विनिवर्त्तना ३२ सम्भोगप्रत्याख्यान ३३ उपधिप्रत्याख्यान ३९ भक्तप्रत्याख्यान ४० सद्भावप्रत्याख्यान ४१ प्रतिरूपता ४२ वैयावृत्त्य ४३ सर्वगुणसम्पूर्णता ४४ वीतरागता ४५ क्षान्ति ४६ मुक्ति ४७ मार्दव ४८ आर्जव ४९ भावसत्य ५० करणसत्य ५१ योगसत्य ५२ मनोगुप्तता ५३ वाग्गुप्तता ५४ कायगुप्तता ५५ मनःसमाधारणा ५६ वाक्समाधारणा ५७ कायसमाधारणा ५८ ज्ञानसम्पन्नता ५९ दर्शनसम्पन्नता ६० चारित्रसम्पन्नता ६१ श्रोत्रनिग्रह ६२ चक्षुर्निग्रह ६३ घ्राणनिग्रह ६४ जिह्वानिग्रह ६५ स्पर्शननिग्रह ६६ क्रोधविजय ६७ मानविजय ६८ मायाविजय ६९ लोभविजय ७० प्रेमद्वेषमिथ्यादर्शनविजय ७१ शैलेश्यकर्मता ७२ इति द्वासप्ततिस्थानसेवकः साधु-

लोकस्तेन सह स्वयं सदा वा संसर्गः– परिचयो यस्य संसर्गीति गाथोक्ताक्षरार्थः ॥ ४१ ॥ भावार्थस्तु नागदत्तदृष्टान्तादवसेयः, स चायम्—

सुरवरनयरायारे, कुसुमपुरे सिरिभरेण परिहूणे । आसि सिरिनागचंदो, सिट्ठी सुविसिद्धगुणइट्ठो ॥ १ ॥ रूवपराजियगोरी, नागसिरी नामिया पिया तस्स । ताणसुवाइयपत्तो, पुत्तो सिरिनागदत्तुत्ति ॥ २ ॥ सुदसो सिणेहभरिओ, सुपत्तसंसत्तिपत्तदित्तिल्लो । पयडियनियभवणमहो जो रेहइ दीवउव्व सया ॥ ३ ॥ सो सोमुव्व कलड्ढो, जुव्वणपत्तोऽवि धम्मकम्मरुई । साहुजणसेवणाए आरोहइ हिइ विवेयतरुं ॥ ४ ॥ संमत्तपवित्ताइं, सावयधम्मस्स दीवयसमाइं । बारस वयाइँ संमं गिण्हइ सुगुरूण पासम्मि ॥ ५ ॥ गुरुभत्तिदेवभत्ती, नवतत्तविहत्तिदाणसत्तीओ । विलसंति माणसंमी हंसी इव तस्स निस्संकं ॥ ६॥ सो अन्नया कयाइ चियपरिवाडिं कुणंतओ नयरे । एगम्मि चेइयम्मि पविसइ जिणरायपूयत्थं ॥ ७ ॥ पिच्छेइ तत्थ पूयं सिवपुरलच्छीइ संघडणदूइं । पुण्णपडिपुण्णसुरघरसुंदरउव्वायसिज्जंव ॥ ८ ॥ अविरलपरिमलमिलियालिमालझंकारसुंदररवेहिं । फुल्लियफुल्लचएहिं गायंती इव जिणाण गुणे ॥ ९ ॥ आमलपमाणनिम्मलमुत्ताहलभरियथालछउमेणं । नं तत्थ जिणमुहससिं निवेसिउं तारया पत्ता ॥ १० ॥ पूयमचब्भुयरूवं रयणसुवन्नाण रयणयारुइरं । दट्ठूण नागदत्तो वक्खित्तचित्तो गिहं पत्तो ॥ ११ ॥ पिउणो पुरओ साहइ जं ताय! महिब्भउसहदत्तस्स । जिणदत्तेण सुएणं समागएणं पवहणाओ ॥ १२ ॥ अइअच्छेरयभूया पूया

काराविया जिणाययणे । गंतूणं ता पिक्खह सोऽवि गओ तस्स वयणेणं ॥ १३ ॥ जुयलं । तो नागचंदसिट्ठी, पिक्खवि पूयं महब्भुयं नियमं । जि[illegible]रयं सयंथं, धइ ओपिउमेवमाढत्तो ॥ १४ ॥ तुम्हाणं वयणेणं पूया दिट्ठा जिणाण वच्छ ! मए । ता सव्वं बहुभवसंचियाइ नट्ठाइँ पावाइं ॥ १५ ॥ तायं जाणिय जिणमयवासियहिययं पसन्नदिट्ठिजुयं । पणमिय वियसियवयणो स नागदत्तो भणइ एवं ॥ १६ ॥ ताय ! ममावि हु इच्छा, जिणपूयकरावणे समुप्पन्ना । नियभुयउवज्जिएणं बहुएणं दविणजाएणं ॥ १७ ॥ तं भणइ नागचंदो, पुवज्जियनियधणेण विउलेणं । कारिय जिणवरपूयं, मणोरहं वच्छ ! पूरेसु ॥ १८ ॥ अह भणइ नागदत्तो, मं पेससु जाणवत्तजत्ताए । जह समुवज्जिय दव्वं, सव्वं पूरेमि मणइट्ठं ॥ १९ ॥ जणएण अणुन्नाओ, आणंदाओ पुरम्मि सयलम्मि । उग्घोसावइ पडहं, जयम्मि सजसं व पयडंतो ॥२०॥ भो ! नागदत्तवणिओ, वच्चंतो अत्थि जलहिजत्ताए । जो एहि तस्ससो, साहिज्जं सव्वमवि काही ॥ २१ ॥ उग्घोसणसवणाओ, संवहियजणेण नागदत्तोवि । पंचसयपोयकलिओ, समुद्दजत्ताइ लहु चलिओ ॥ २२ ॥ जोयणसहस्समाणं, जलहिं लंघंति पवहणा झत्ति । अक्खलियपयारेणं सरासणुम्मुक्कबाणुव ॥२३॥ जत्थ य न पुरं न वणं, न पव्वओ न य भूमिया कावि । नवरं तरंगतरलं, समंतओ दीसए सलिलं ॥ २४ ॥ रयणिंयरदिणयराविहु, नक्खत्ता गहगणा य दीसंति । नीरम्मि उ कुणमाणा उदयं चारं तहऽत्थमणं ॥२५॥ अन्नम्मि वासरम्मि, गयणम्मि समुन्नयम्मि मेहम्मि । गंभीरोऽवि हु जलही, तुच्छुव्व गओ महाखोहं ॥ २६ ॥ उद्धुरसमीरलहरी–

पणुल्लिया वाहणा समग्गावि । उम्मग्गेणं पडिया, जह दुज्जणसंगओ सुयणा ॥ २७ ॥ ते गच्छंता निज्जामएहिं उज्ज-
भपरेहिंवि कहंपि । नो मग्गेणं ठविया, मत्तेभुव्वभपालेहिं ॥ २८ ॥ ते दुकम्मवसेण दुलंघं सेलकुंडलं पडिया ।
मिच्छत्तपेरणाहिं, जहा अभवा जणा कुगइं ॥२९॥ तत्थ य बोहित्थजणा, भग्गे बोहित्थए तहा लोए । पाणरहिए
तरंते, पिक्खिवि भयकायरा जाया ॥ ३० ॥ पिक्खिंतताणं सुन्ने पोए तत्थेव कंठगयपाणो । एगो पुरिसो नयणाण
गोयरं ताण संजाओ ॥३१॥ पंचपरमिट्ठिमंतं, सुमरंतं सावगुत्ति मुणिऊणं । पभणइ सिट्ठिसुओ तं, साहम्मिय ! मज्झ
तुज्झ नमो ॥ ३२ ॥ तव्वयणेणं तुट्ठो, स पावहणिओ नरोऽवि मग्गेइ । करसन्नाए नीरं, वयणं पभणेउमसमत्थो
॥३३॥ सिट्ठिसुओऽविहु सलिलं, आणावेऊण तस्स पाएइ । गलनालरंधरोहा, न भोयणं सकए काउं ॥३४॥ सत्थी-
हूयं पुच्छइ, कत्तो तुम्हे इहागया ? भाय ! । सोऽविहु मंदसरेणं, जंपइ सिरिनागदत्तग्गे ॥३५॥ कोसंबीइ पुरीए, धण-
नामा सिट्ठिनंदणो अहयं । पवहणसएण सहिओ, चलिओ जलरासिजत्ताए ॥ ३६ ॥ पावोदएण संजत्तियाण
पवणेण पिल्लिया पोया । गिरिकुंडलंमि पडिया, अंधुव्वागाहकूवम्मि ॥ ३७ ॥ पव्वयकुंडलवसओ, वायपवेसो न
इत्थ संघडइ । तदभावेणं पोया गयपाणा इव चिट्ठंति ॥३८॥ भोयणजलम्मि खीणे, सव्वेऽविहु पोयसंठिया वणिणो ।
भुक्खतिसत्ता पत्ता, कमेण कीणासअइहित्तं ॥३९॥ अज्जवि जीवेमि अहं एगो, तम्मज्झओ महापावो । ता एरिसं
तुमाणवि, संभाविज्जइ दुहं नूणं ॥४०॥ राहावेहसमाणं, बन्धव ! आराहणं करावेसु । धन्नाणं चिय परलोय–संबलो

मिलइ नऽन्नाणं ॥४१॥ जओ वुत्तं—विहवो जिणवरधम्मो, रोगाभावो पियाण संजोगो । अंते समाहिमरणं, पावि-
ज्जइ परमपुण्णेहिं ॥ ४२ ॥ तत्तो स नागदत्तो, जिणमयतत्तज्जभायणसमाणो । तं अमियसरिच्छाए, वायाए वाहरेइ
इमं ॥ ४३ ॥ भो ! देवं गयरायं, निग्गंथं गुरुयणं नव य तत्ते । पडिवज्जसु सम्मत्तं, चिंतारयणं व अइदुलहं ॥४४॥
अरहंतसिद्धसाहू; धम्मं सरणं मणम्मि धारेसु । तिविहं तिविहेण पुणो, तं मिच्छादुक्कडं देसु ॥ ४५ ॥ अणुमोयसु
कयसुकयं, मित्तीभावं कुणेसु जीवेसुं । दोसं मुंचसु मोहं, मलेसु सुमरेसु नवकारं ॥४६॥ वोसिरसु पावठाणे, निरयारं
अणसणं पवज्जेसु । इय नागदत्तवयणं, सम्मं अंगीकयं तेणं ॥ ४७ ॥ सुहझाणरओ मरिउं, स देवलोए सुरो समु-
प्पन्नो । न हि सुद्धभावणाए, किंपि असज्झं जए अत्थि ॥ ४८ ॥ तत्तो स पोयलोओ, जाणिय तव्वइयरं भउव्विग्गो ।
अक्कोसाइं दाउं, पयट्टिओ नागदत्तस्स ॥ ४९ ॥ जओ—स्थानमस्त्युपकारस्य, मेरोरपि गरीयसः । तुच्छस्यायतजस्या-
पि, न जनेऽपकृतस्य तु ॥५०॥ उग्घोसणाछलेणं, अम्हे छलिऊण आवयाकूवे । एएण कवडपडुणा, निवाडिया परमवे-
रिव ॥ ५१ ॥ इय तदरुंतुदवाया—बाणेहिं विंधियस्सवि न तस्स । रोसो मणम्मि जाओ, अहक्खायचरित्तधारिव
॥ ५२ ॥ तेणं ते कुणमाणा, निरत्थयं कम्मबंधणं लोया । करुणाए अणुसिट्ठा, वाहरमाणेण महुरगिरं ॥ ५३ ॥ स-
व्वोऽवि कोऽवि नियकम्मनिम्मियं दुक्खमहव सुक्खं च । अणुहविऊणं छुट्टइ, जइविहु तुल्लो सुरिंदेणं ॥५४॥ दुरियं
हरेइ धम्मो, इय चिंतिय नागदत्तवरवणिओ । उववासपरो सुमरइ, पंचनमुक्कारइगलक्खं ॥ ५५ ॥ अह सिंहलदीव-

पहु, सिरिमं जीवाहयारई नाम । आवयगयं अणुद्धिय, न जिमइ सुणिउं छुहत्तोऽवि ॥ ५६ ॥ थलमग्गंमि उ पुरिसे, स पेसए दुहियलोयताणकए । बहुदेसभासचउरं, जलमग्गे कीर पंचसयं ॥ ५७ ॥ पव्वयकुंडलपडिए, ते पोए पिक्खिऊण रायसुओ । आगंतूणं सिंहल–पहुणो रण्णो निवेयंति ॥ ५८ ॥ सोऽवि सचिवेहि सद्धिं, गिरिकुंडलयाउ जममुहाउव्व । उद्धरणम्मि उवायं, चिंतेई ताण पोयाणं ॥ ५९ ॥ न य भुंजइ तो राया, ताणुद्धरणम्मि विगलिओवाओ । न य नियमेरं गरुया, लंघंति कयावि जलहिव्व ॥६०॥ तो बीयदिणे पडहं, वायावइ भूवई निए नयरे । जो पोए आणेई, तस्स पयच्छामि धणलक्खं ॥६१॥ तं सुणिय कण्णधारो, एगो बुड्ढो मणम्मि चिंतेइ । जाणंतोऽहमुवायं, किं न धणं लेमि नरवइणो ? ॥६२॥ नित्थारयामि तणए, दुक्खसमुद्दाओ पवहणजणंपि । अथिरेहिं पाणेहिं, तो पडहं छिवइ गंतूणं ॥ ६३ ॥ रायपसाया लद्धं, सव्वं दव्वं सुयाण दाऊणं । लहुपवहणेण चलिओ, स नागदत्तंतियं पत्तो ॥६४॥ तेसिं पंचसयाणं, पोयाणं अहिवइं वियाणित्ता । तं नागदत्तवणियं, भणेइ नियसामिणो चरियं ॥६५॥ तस्स य पुरओ साहइ, निग्गमणोवायमेस पोयाणं । मग्गविऊ वुड्ढनरो, सुगुरू भवसायराउव्व ॥६६॥ सव्वोऽवि पोअलोओ, दहरिअसवणो सुणेइ तव्वयणं । सोऽवि हु तस्स य पुरओ, निग्गमणोवायमाइसइ ॥६७॥ सेलस्स अस्स सिहरे, महई देवस्स मंदिरे ढक्का । तीए सद्दं सोउं, गुहामुहे सयगुणीहूयं ॥ ६८ ॥ अइसंभंता भारंडपक्खिणो नहयलंमि उड्डंति । वलयाउ निस्सरंती, तप्पक्खपणुल्लिया पोया ॥ ६९ ॥ जुयलं । एगो पुण सो मरिही जो, ढक्कं वाइउं नरो

चडिही । तण्हाछुहाविनडिओ, फलजलरहियम्मि सेलम्मि ॥७०॥ ता तुम्हाणं मज्झे, एगो करिऊण साहसं पुरिसो । नित्थारिय सयलजणं, वित्थारउ नियजसं लोए ॥ ७१ ॥ कम्पन्तसयलगत्तं, मच्चुभएणेव एगयं वुड्ढं । तत्तो स नागदत्तो, जम्पइ महुराइ वाणीए ॥ ७२ ॥ सागरपडियाण तुम्हं जीवियव्वं समुद्धरंतेण । अज्जिज्जउ सुरलच्छी, भवया सेसाउणा सुथिरा ॥७३॥ वुड्ढो साहइ रे बाल !, अम्ह एरिसममंगलं भणसि । जइ जाणेसि मणुन्नं, ता किं न कुणसि ? इमं कम्मं ॥ ७४ ॥ बाला तरुणा वुड्ढा, अधणा सधणा सरोय नीरोया । पुट्ठा सव्वेऽवि जणा, तव्वयणं नेव मन्नंति ॥ ७५ ॥ तत्तो स नागदत्तो, चिंतइ नूणं जयम्मि सव्वस्स । सुहिअस्स य दुहियस्स य, मरणाउ भयं समं चेव ॥७६॥ भणियं च—सव्वेऽवि सुक्खकंखी, सव्वेऽविहु दुक्खभीरुणो जीवा । सव्वेऽवि जीवियपिया, सव्वे मरणाउ बीहंति ॥ ७७ ॥ साहारणम्मि मरणे, सहावओ इत्थ जायमाणम्मि । जो उवयारं किंचिवि, करेइ सो जीवइ जयम्मि ॥ ७८ ॥ पारेवयस्स य कए, तुलाइ चडिऊण तोलयंतेणं । वज्जाउहेण रण्णा, जसेण संजीविओ अप्पा ॥ ७९ ॥ एयाणं पाणीणं, जइ दाउं जीवियं मरिस्समहं । तो मे किंपिवि नहु सोयणिज्जमत्थित्थ भुवणम्मि ॥८०॥ सज्जीकाउं पोए, तुब्भेहिं सावहाणचित्तेहिं । ठायव्वमिय भणित्ता, स नागदत्तो गिरिं पत्तो ॥ ८१ ॥ तत्ताडियढक्कारवसंखुद्धनियंतयाण पक्खीणं । पक्खपवणेण पोया, पणुल्लिया निग्गया तत्तो ॥८२॥ सिंहलदीवम्मि गए, रण्णाओमुक्कसुक्कए पोए । पडिभंडेणं भरिउं, पत्ता वणिणो सनयरम्मि ॥ ८३ ॥ सुणिउं ताणागमणं, नंदणदंसणसमूसिओ

झत्ति । सिरिनागचंदसिट्ठी, समागओ सुणइ तच्चरियं ॥८४॥ मुच्छानिमीलियच्छो, सिट्ठी धरणीयले तओ पडिओ । उवयारेहिं तह सीयलेहिं पुण चेयणं पत्तो ॥ ८५ ॥ तत्तो दुरंतनंदण-सोयसमुद्दो करेइ सो सिट्ठी । रयणजुए इव उम्मी, तग्गुणसहिए बहुविलावे॥ ८६ ॥ अह रोयइ तणएणं, तेण विणा किमिह जीविएणं? मे । उल्लसिररयण-रहिएणेव निहाणस्स भंडेणं ॥ ८७ ॥ तम्हाऽणसणं काउं, साहेमि गइं सुएण पडिवन्नं । न य तस्स विरहअग्गीदाहं सक्केमि इह सहिउं ॥ ८८ ॥ संकुचियवयणकमला, चंदस्सव दंसणेण सिट्ठिस्स । लज्जाए पायालं, पविसिउकामुव्व ते सवे ॥ ८९ ॥ जंपंति तओ वणिणो, ताय! स ते नंदणो धुवं जियइ । जस्स जसमहातरुणो, अहे अंकुरसारिच्छा ॥ ९० ॥ जेण य निययं जीयं असारभूयं मणे मुणंतेणं । चइऊण वज्जसारं, सत्तं अवलंबियं झत्ति ॥ ९१ ॥ अह इंतं गयणपहे, ते वणिणो उद्धयं मुहं काउं । पिक्खंति वरविमाणं, गीयज्झुणितुररवप्पवरं ॥ ९२ ॥ ते विप्फारियनयणा, सविम्हया जाव तत्थ चिट्ठंति । ता समिरलसिरकेउं, विमाणयं तत्थ संपत्तं ॥ ९३ ॥ ओयरिय विमाणाओ, कलत्त-कलिओ स नागदत्तवणी । पिउणो चलणे वंदइ, उप्पायंतो जणे चुज्जं ॥९४॥ आणंदियस्स विम्हय-परस्स तायस्स पुच्छमाणस्स । नमिउं स नागदत्तो, नियवुत्तं कहिउमाढत्तो ॥ ९५ ॥ तम्मि अचलस्स सिहरे, आसायणजुग्गमूलफ लयियले । पइदियहं, काहमहं उववासं छिन्नदुहवासं ॥९६॥ सिरिविज्जाहरनिम्मियजिणभवणविभूसणं रयणपडिमं । रिसहेसरस्स सयलं, दिणंपि भत्तीइ पूयंतो ॥९७॥ हियए जिणमयतत्तं, झायन्तो जीविएऽवि मरणेऽवि । अक्खलिय-

चित्तो समसत्तुमित्तओ जाव चिट्ठामि ॥९८॥ जुयलं ता दित्तदित्तिजुत्तं, रयणाहरणेहिं मंडियसरीरं। सुररायसमं पुरिसं, पुरओ पिक्खामि एगमहं ॥ ९९ ॥ तत्तो उट्ठिय जोडिअ हत्थे सो सायरं मए पुट्ठो । जह दंसणेण तुट्ठो, तह निय-चरियस्स कहणेऽवि ॥ १०० ॥ तो सो जंपइ वेयड्ढपव्वए विज्जुपहभिहो खयरो । नंदीसरम्मि दीवे, चलिओ देवाण नमणत्थं ॥ १०१ ॥ इत्थ तुमं पासित्ता, विम्हियहियओऽवलोयणिं देविं । पुच्छिय तुह चरियमहं, नाऊण य संपइ समेओ ॥ १०२ ॥ ताऽहं तुह सत्तेणं, जिणसेवाए तवेण तह तुट्ठो । दाहामि गयणगामिणिविज्जासहियं नियं पुत्तिं ॥ १०३ ॥ विज्जाबलेण तेणवि, समाणिया झत्तितत्थ नियधूया । तह महुराहारं पिहु भोयावइ मं स खयरवरो ॥ १०४ ॥ तो परिणाविय कन्नं, विज्जं आगासगामिणिं देइ । गुरुयाण पसन्नाणं, किमित्थ भुवणे अदेयंपि ? ॥१०५॥ पोयवणियाण वयणेण मा ताओ अद्धिइं मणे कुणउ । इय वेगेणं चडिउं, विमाणमेयं इहं पत्तो ॥ १०६ ॥ तस्स य रिद्धिं दट्ठुं, पच्छुत्तावं कुणंति ते वणिणो । किं तइया तं सेलं, अम्हे न गया अकयपुण्णा ? ॥ १०७ ॥ सिद्धितण-यस्स जाया, सत्तसिरीणं महापसिद्धीओ । जह करुणाभिहतरुणो, कुसुमेहिं समं फलुप्पत्ती ॥ १०८ ॥ जिणसेवाव-ल्लीए, एसो कुसुमुग्गमो जमिद्धीओ । हुंति तहा पुणऽवस्सं, सग्गपवग्गे फलसिरीओ ॥१०९॥ अत्थियणं पीणंतो, दाणेणं सो पुरम्मि पविसंतो । वणिजणंतो धम्मिय–जणेण सगिहम्मि संपत्तो ॥११०॥ तत्तो स नागदत्तो, चित्ते चिं-तेइ पच्छिमनिसाए । कारिज्जइ जिणपूया, जीइ कए ऽहं गओ जलहिं ॥ १११ ॥ कणयमणिवसणचंदण–कुसुमेहिं

जिणवराण भवणेसुं । सो कारइ पइदिवसं, पूयं नियपुण्णपुंजुव ॥११२॥ जओ—धन्नाण पुण्णविसए, मणोरहा उल्लसंति वल्लीव । धन्नयराणं ते पुण, फलंति विउलेहि य फलेहिं ॥ ११३ ॥ जिणदत्तविहियपूयासुत्तोवरि तेण तह विणिम्मविओ । जिणसेवापासाओ, देवाणवि कुणइ जह चुज्जं ॥ ११४ ॥ एवं जिणवरसासणसेवं पइवासरं स कुणमाणो । धवलेणं सजसेणं, भूसइ सचराचरं विस्सं ॥ ११५ ॥ संविग्गाण मुणीणं, सययं असणाइवत्थदाणेणं । सुस्सूसाकरणेण य, अप्पाणं कुणइ स कयत्थं ॥११६॥ अन्नदिणे सो सुत्थिय–सूरीणं अंतिए सवेरग्गो । दिक्खं गहिउं परिपालिउं च देवगणे रमइ ॥ ११७ ॥ तित्थाण सेवा जह नागचंदपुत्तेण सम्मं विहिया तहेव । काऊण भवा ! भववारिरासिं, तरित्तु निव्वाणसिरिं लहेह ॥११८॥ तीर्थसेवायां नागदत्तदृष्टान्तः । तीर्थसेवाख्यं द्वितीयं भूषणमुक्त्वा तृतीयं भक्तिसंज्ञकं भूषणं गाथापूर्वार्द्धेनाह—

भत्ती आयरकरणं जहुच्चियं जिणवरिंदसाहूणं ।

व्याख्या–जिनवरेन्द्रसाधूनां यथोचितमादरकरणं भक्तिरिति सम्बन्धः । तत्र जिनाः–सामान्यकेवलिनस्तेषु ये वरा–उत्कृष्टा गणधराद्यास्तेषामपीन्द्राः स्वामिनोऽष्टमहाप्रातिहार्यचतुस्त्रिंशदतिशयपञ्चत्रिंशद्वाग्गुणाद्युपयुक्तास्तीर्थकृतः तेषामानन्दाश्रुमिश्रविलोचनेन मुखकोशादियुक्तियुक्तेन नैषेधिक्यादिदशत्रिकयथोचितकरणेनेत्यागमोपदिष्टविधिना । तिन्नि निसीही १ तिन्नि यपयाहिणा २ ॥ तिन्नि चेव य पणामा ३ तिविहा पूया य ४ तहा, अवत्थतिगभावणं चेव

॥ १ ॥ तिदिसिनिरिक्खणविरई ६ तिविहं भूमीपमज्जणं चेव ७ । वण्णाइतियं ८ मुद्दातियं च तिविहं च पणि-हाणं ॥ २ ॥ इय दहतियसंजुत्तं, वंदणयं जो जिणाण तिकालं । कुणइ नरो उवउत्तो, सो पावइ सासयं ठाणं ॥३॥ इत्याद्यर्हतामादरकरणं विवेकिना क्रियते सा भक्तिः । तथा–साधयन्ति मोक्षपथमिति साधवो ज्ञानादिगुणसम्पन्ना महात्मानस्तेषां दर्शनादेवाभ्युत्थानाभिधानशिरोऽञ्जलिबन्धस्वयमासनढौकनवन्दनपर्युपासनानुगमनदशविधवैयावृत्त्य-करणान्नपानवस्त्रपात्रप्रतिश्रयपीठफलकसंस्तारकादिधर्म्मसाधनोपकरणदानशुश्रूषाभेषजक्रियाकान्तारविषमदुर्गोपस-र्गनिस्तारणरूपमादरकरणं भक्तिः कथ्यत इति गाथापूर्वार्द्धार्थः । भावार्थस्तु बाह्याभ्यन्तररूपकामिनीदृष्टान्तेन स्पष्टयते । तथाहि—समत्थि सुत्थियलोयसुहविलासकीलागिहं (कीलागिहं) नाम नयरं–जत्थ सिरीओ वाऊद्धुयाण धयवडकराण सन्नाए । लेडंति जणं इह सुहुदहिम्मि हरिलीलमुवहइ ॥ १ ॥ तत्थ य अत्थमावियवेरिवीरतेओ अमियतेओ नाम-राया, तत्थ कोविएगो परिव्वायगो विज्जामंतोसहलद्धपरमत्थसामत्थो परिवसइ, सो य विज्जाबलेणं नयरब्भंतरे भमंतो रयणविलयाइयमवहरइ । तओ पोरलोएण तं दुस्सहदुहमसहंतेण सयं च परमत्थमलहंतेण रण्णो पुरओ पुक्करियं । जहा–जं जं अइसयरुइरं, जणमणहरणं पयत्थवित्थारं । वत्थाहरणाईयं तं तं तं कुऽवि चोरए चोरो ॥ १ ॥ अवि य—जं जं पासइ जुवमणतेणिं, अलिउलसामलकुंतलवेणिं । भालत्थलअद्धमिससिकरणिं, मयणंदोलयतोलियस-वणिं ॥ १ ॥ नीलुप्पलदलसुविउलनयणिं, तिलसुमसमतानासियसरणिं । सारयससहरसुंदरवयणिं, पीणुन्नयकलसोवम-

सिहिणिं ॥ २ ॥ खामोयरिमइथूलयरमणिं, करिकरसोयरऊरुप्फुरणिं । कोमलकिसलयसमकरचरणिं, नयणकडक्खविमोहियअवणिं ॥ ३ ॥ रूवविणिज्जियनिज्जररमणिं, रइरससायरतारणतरणिं । तणुपहदासीकयनवतरुणिं, तं तं सामिय ! स हरइ तरुणिं ॥ ४ ॥ सो य पावो इमेव चिट्ठइ, ता कुणसु पसायं तस्स गवेसणकए । तओ रण्णा सुणियतवयणेण लज्जाअहोमुहेणय यज्जरियं—भो भो गच्छह तुब्भे विसत्था चिट्ठह नियनियभवणेसु, जइ पंचदिणमज्झे तं दुट्ठचोरं गवेसयंतो न पाविस्सं ता सुहुअहुयासणे अवस्सं झंपिस्सं, एवं रण्णो पइन्नमायण्णिय पोरलोओ रायं पणमिय नियनियट्ठाणे संपत्तो । तओ भूवइणा सव्वत्थ सविसेसं तस्स गवेसणत्थमाइट्ठा आरक्खा, सयं पुण इक्कलमल्लो खग्गखेडयहत्थो अविहत्थो चोरगवेसणं कुणमाणो सव्वेसुवि चोरट्ठाणेसु परिब्भमइ, परं तस्स पउत्तिमित्तंपि न पावेइ, एवं वइक्कंताणि चत्तारि दिणाणि, संपत्ते उण पंचमे दिणे अहियथरं राया गवेसयंतो भोयणगंधतंबोलमल्लाइयं गिण्हंतमेगं परिव्वायगं पेक्खिय चिंतेइ—एस संपइ रयणीमुहे गंधाई एरिसजणपरिभोगजुग्गे पडिगाहंतो सुंदरो न पडिभासेइ, तम्हा एयस्स चिट्ठियमणुरट्ठिओ चेव पिच्छामि । तओ राया तप्पिट्ठिलग्गो नयरुज्जाणमंडणविडविकोटरविवरसंठिए तस्स घरम्मि पविसेइ, तत्थेगत्थ रयणुकराइं अन्नत्थ कणयकूडाइं अन्नत्थ वत्थाहरणाइं अन्नत्थ सुगंधवत्थुवित्थाराइं अन्नत्थ सुरंगणासरिसाइं इत्थियरयणाइं च पिक्खिय संजायनिच्छओ तं चोरं हक्केइ—अरे दुट्ठचिट्ठिय ! गहेसु सत्थं, कुणेसु मए समं समरंगणं, सुमरेसु इट्ठदेवयं, एस ते कंठकंदलमिलातलम्मि लोढेमि । तओ सो परिव्वा-

यगचोरो संखुद्धो अमरिसवसेण नियपोरिसमजाणंतो खग्गमुग्गिरिऊण आगओ निवं तज्जइ–रे रे मह घरे चोरुव कहं पविट्ठोऽसि ?, अज्ज ते धुवं कयंतो कुविओ, इय भणंतो जाव पहारं दाउमब्भुज्जओ, ताव रण्णा नियखग्गेण तस्ससीसं छिन्नं । तओ तत्थेव रयणिं वसिय पभायसमए सयलं पोरलोयमाहविचु राया भणेइ–भो भो लोया ! निय-नियवत्थुजायं पियाजणसमेयसुवलक्खिय गिण्हह । तओ ते कमणवणंव वियसिया सयं सयं वत्थुजायं गिण्हिय घरेसु पत्ता । रायावि तरियनियपइन्नणावो चाउव्वण्णजणेण थुणिज्जंतो पत्तो सभवणं । इओ य एगा कावि कामिणी का-सुम्मायपरवसा परिवायगकयकम्मणवसेण तम्मि अत्थिमज्जाणुरायरत्ता वल्लहंपि नियवल्लहं दुस्सउणंव सव्वहा न पासइ, सुइरं महुरपिम्मभरनिब्भराहिं गिराहिं पसाइज्जमाणावि न पसीयइ । तओ नाणविन्नाणवियक्खणेहिं तीइ भत्तुणो पुरो निवेइयं, नूणमेसा तेण परिवायगेण कम्मणपओगेण अत्थिमज्जाणुराइणी अत्तणो वसए विहिया, जाव तस्स अग्गिदड्ढाणि अत्थीणि दुद्धेण पक्खालिय एसा न पाइज्जइ ताव तस्सोवरि एईए तिव्वाणुराओ न उहट्टइ । तओ तीए पिययमपसुहसयणेहिं तहेव विहिए जाया सा सज्जा । गओ नेहो परिवायगे, नियपइणोवरि जाओ अ-णुराओ । इत्थ अंतरंगो उवणओ, जहा– सा कामिणी तेण कम्मणजोगेणाचंताणुराइणी निम्मिया, अन्नं सव्वहा न अहिलसइ, तहा सुसावयजणोऽवि निरंतरजिणवरसुसाहुगुणपवयणसद्धाणुरूवसम्मत्तपरमोसहभावियमई केणावि न सासणाओ चालिउं सक्कइ, कहमवि मिच्छत्तपसत्तदेवगुरूसु न भत्तिरायं करेइ । ता एरिसो भत्तिराओ सम्मत्तगत्तं

मंडेइ—"जहा कओ तीइ वरंगणाए, महाणुराओ परिव्वायगम्मि । तहेव धम्मे जिणभासियम्मि, धरेह रायं सिवदत्त-चित्ता ! ॥ १ ॥ भक्तिरागे बाह्याभ्यन्तररूपकामिनीकथा । तृतीयं भक्तिरूपं भूषणमुक्त्वा चतुर्थं स्थैर्याख्यं भूषणं गाथातृतीयपादेनाह—

"थिरया दढसम्मत्तं" ।

व्याख्या—दृढसम्यक्त्वं स्थिरता भवतीति सम्बन्धः, श्रीमदर्हद्धर्म्मे प्रत्यदढचित्तानां दार्ढ्योत्पादनेन सम्यक्त्वपरिभावनं दढसम्यक्त्वं, तथा कथनापि शाक्यादिदर्शनमाहात्म्यलवं बाह्यदशा दृष्ट्वा धर्म्माच्चलेत् तस्य यत् दृढत्वापादानं तत् स्थैर्यं, यतो दृढधर्म्मैव प्रशस्यते, यदुक्तं स्थानाङ्गे—चत्तारि पुरिसजाया पन्नत्ता, तंजहा—पियधम्मे नामं एगे नो दढधम्मे १, दढधम्मे नामं एगे नो पियधम्मे २ एगे पियधम्मेवि दढधम्मेवि ३, एगे नो पियधम्मे नो दढधम्मेवि ४, । इतिगाथातृतीयपादार्थः । भावार्थस्तु सुलसादृष्टान्ताद् ज्ञेयः । स चायम्—

इहैव जम्बूद्वीपाख्ये, द्वीपे शशिकलोपमम् । अस्ति श्रीभारतं नाम, वर्षं हर्षनिबन्धनम् ॥ १ ॥ तत्रास्ति मगधो देशो, लेशो यत्र न पाप्मनाम् । तत्र सर्वश्रियां क्रीडा-गृहं राजगृहं पुरम् ॥ २ ॥ यत्रोत्तुङ्गजिनाधीशचैत्यानामुपरि स्थितम् । मध्याह्ने भास्वतो बिम्बं, द्वितीयकलशायते ॥ ३ ॥ तत्र प्रसेनजिद्भूमी-पतेः सर्वकलाकुलः । सारथिर्नाग इत्यासीद्वासवस्येव मातलिः ॥ ४ ॥ तस्य प्रियतमा धर्मा-नालसा सुलसाऽभवत् । यस्यां पतिव्रतामुख्या, अवाप्तुः

सकला गुणाः ॥ ५ ॥ नागोऽन्यदा सुताभाव–दुःखाभिलुप्तमानसः । कपोलपालिविन्यस्त–हस्तश्चिन्तयति स्म सः ॥६॥ लालयिष्याम्यहं पुत्रान्, स्वे कराब्जे मरालवत् । अरण्यमालतीपुष्प–कल्पेच्छेत्यभवन्मनः ॥ ७ ॥ इति चिन्तार्णवे मग्नं, विलोक्य सुलसा प्रियम् । सुधारसमुचा वाचाऽवोचदेवं विचक्षणा ॥ ८ ॥ नाथ, किं शौर्यतेजो वह्निस्तैषा ग्रसते निशा । ततः सोऽप्यवदद्देवि !, पुत्राभावोऽत्र कारणम् ॥ ९ ॥ सुलसाऽप्यूचुषी कान्तं, कन्यकास्त्वमनेकशः । विवाह्योत्पादय क्षिप्रं, तासु पुत्रान् मनीषितान् ॥ १० ॥ नागो जगाद जीवेशे !, जन्मन्यस्मिंस्त्वमेव मे । कल्पवल्लीव कल्पद्रोः, प्रियाऽन्याभिरलं ह्यतः ॥ ११ ॥ त्वत्कुक्षिशुक्तिमाणिक्यमिच्छामि दयिते ? सुतम् । अस्मत्स्नेहमहाम्भोधि–संवर्द्धनसुधाकरम् ॥ १२ ॥ यतः प्रतिशरीरं मे, जीवितव्यमिवासि च । सुरोपयाचितैस्तस्मात्समुत्पादय नन्दनम् ॥ १३ ॥ साऽप्यूचे जीवितान्तेऽपि, नान्यद्देवकदम्बकम् । मनसा वचसाऽङ्गेना–राधयामीप्सितासये ॥१४॥ परमाराधनं कान्त !, करिष्ये स्वेष्टसिद्धये । अर्हतामर्हणीयानामचिन्त्यमहिमौकसाम् ॥ १५ ॥ तपोभिराचामाम्लाद्यैः, पावयन्ती निजं वपुः । विशिष्य धर्मकृत्यानि, विधास्ये ब्रह्मसेविनी ॥ १६ ॥ कौसुम्भे वाससी साऽथ, वसाना स्वल्पभूषणा । त्रिसन्ध्यं त्रिजगन्नाथं, पुष्पादिभिरपूपुजत् ॥ १७ ॥ कियत्यपि गते काले, त्रिदशेश्वरसंसदि । सुलसायाः प्रशंसाऽभूत्, स्थिरत्वे धर्मकर्मणः ॥ १८ ॥ तत्रैकस्त्रिदशस्तस्याः, कौतुकोत्तानमानसः । दक्षः परीक्षामाधातुमवातारीद्वसुन्धराम् ॥ १९ ॥ उन्मुद्रसाधुमुद्रोऽसौ, दरिद्रोऽपि यतिव्रतैः । कृतनैषेधिकीकल्पः, प्राविशत्सुलसाऽऽलयम्

॥ २० ॥ अर्हत्पूजाप्रसक्ताऽपि, सहसाऽऽलोक्य तं मुनिम् । सहसोत्थाय तत्पाद–वन्दनं भक्तितो व्यधात् ॥ २१ ॥ अप्राक्षीद्दक्षमुख्या तं, गृहागमनकारणम् । सोऽप्याख्यदागां तैलार्थं, ग्लानसाधुरुजच्छिदे ॥ २२ ॥ श्रुत्वेति सा ज-हर्षोच्चैश्चिन्तयन्ती महाशया । लक्षपाकमहातैल–निर्माणस्य कृतार्थताम् ॥ २३ ॥ अन्तः प्रविश्य सा तैल–कुम्भं यावदुपाहरत् । तावद्दिव्यप्रभावेण, सोऽभज्यत दिवौकसा ॥ २४ ॥ न मनागपि तच्चित्तं, दैन्यमाप ततः पुनः । सुरः पूर्वघटात्सप्त–कलशीमभनक्तराम् ॥२५॥ घटभेदेऽपि नाभेदि, विषादैर्वैश्रवन्मनः । तस्याः केवलमल्पत्वं, जजल्प स्वपुण्यस्य सा ॥ २६ ॥ अहो मे मन्दभाग्यायाः, यद् ग्लानस्य महात्मनः । नोपकाराय तत्तैलं, जातं स्वं च निनिन्द सा ॥२७॥ तस्या अभङ्गुरं भावं, दृष्ट्वा देवः सविस्मयः । आविर्भूय जगादैतां, भद्रे ! ते साधु जीवितम् ॥ २८ ॥ यद्द्यैवाऽऽद्य-कल्पेन्द्रस्त्वामस्तावीत्सुराग्रतः । सम्यक्त्वस्थैर्यमस्याथ, परीक्षार्थमिहागमम् ॥ २९ ॥ तद्वर्णनादप्यधिकं, तत् स्थिरत्वं निरीक्ष्य ते । अभून्मे विस्मयोऽत्यन्तं, शिरोघूर्णनकारणम् ॥ ३० ॥ अतो मत्तः कमप्यर्थं, प्रार्थयस्व महाशये ! । सु-लसाऽपि बभाषे तं, सुधामधुकिरा गिरा ॥ ३१ ॥ यदि तुष्टोऽसि मे देव !, तदा देहि तनूद्भवान् । सोऽपि द्वात्रिं-शतं तस्यै, गुटिकाः प्रददौ मुदा ॥ ३२ ॥ अब्रवीच्च क्रमादेता, भक्षिताः स्युः सुतप्रदाः । जाते कार्ये पुनः स्मार्य, इत्युक्त्वा त्रिदशोऽगमत् ॥ ३३ ॥ ततः सा सुलसा दध्यौ, गुटिकानां क्रमादनात् । इयतां दारकाणां को, जातानां मर्दिता शुचिम् ? ॥ ३४ ॥ तस्मादेकत्र सम्मील्य, गुटिका अद्मि चाखिलाः । द्वात्रिंशल्लक्षणोपेतो, येनैको हि भवे-

स्तुतः ॥ ३५ ॥ विमृश्येति तथैवाश्नात्सुलसा दैवयोगतः । द्वात्रिंशत्प्रमिता गर्भाः, प्रादुर्भावं ततोऽभजन् ॥ ३६ ॥ महाभारं हि गर्भाणामसहिष्णुः कृशाङ्गिका । सस्मार सुलसाऽमरं, कायोत्सर्गं विधाय सा ॥ ३७ ॥ स्मृतमात्रः सुरः सोऽत्रागत्य तामब्रवीदिदम् । मामस्मार्षीः कुतो हेतोः ?, स्वरूपं चापि साऽवदत् ॥ ३८ ॥ त्रिदशोऽप्यवद-द्भद्रे !; न हारि विहितं त्वया । अमोघशक्तयः पुत्रा, भाविनस्ते विनिश्चितम् ॥ ३९ ॥ किन्तु द्वात्रिंशदप्येते, समा-नायुष्कतावशात् । समकालं विपत्स्यन्ते, दुर्लङ्घ्या भवितव्यता ॥ ४० ॥ विषादं मा कृथा गर्भ-व्यथां हर्त्ताऽस्मि ते स्फुटम् । तथैव कृत्वा स सुरस्त्रिदशाश्रयमाश्रयत् ॥ ४१ ॥ स्वस्थदेहा त्वभारैषा, गर्भानुर्वीवदङ्कुरान् । अहो ! पुण्यस्य माहात्म्यं, यत्सुरा अपि किङ्कराः ॥ ४२ ॥ प्रासूत सुलसा काले, पूर्णे द्वात्रिंशतं सुतान् । द्वात्रिंशल्लक्षणोपेतान्, मूर्त्तान् वीररसानिव ॥ ४३ ॥ नागो नागरिकं लोकमाकार्य निजवेश्मनि । तेषां जन्मोत्सवं चक्रे, शक्रस्यापि सुदुर्ल-भम् ॥ ४४ ॥ पञ्चधात्रीलाल्यमाना, वृद्धिमासादयंश्च ते । पित्रोर्मनोरथरथा-श्चानन्दैः पर्यपूपुरन् ॥ ४५ ॥ सञ्जात-यौवनश्रीकाः, श्रीश्रेणिकमहीभुजः । जीवितव्यमिवाभूवंस्तेऽनिशं पार्श्ववर्त्तिनः ॥ ४६ ॥ एकदा श्रेणिको भूपश्चम्पां जिगमिषुः पुरीम् । चेटकक्ष्माभृतः पुत्रीं, सुज्येष्ठामभिलाषुकः ॥ ४७ ॥ तया प्रदत्तसङ्केतः, श्रीनागरथिनः सुतान् । महारथान् रथारूढान्, रथिप्रथितपौरुषान् ॥ ४८ ॥ लक्षणानीव सध्रीचः, कृत्वा द्वात्रिंशतं सुतान् । प्रस्थाय प्राप्य चम्पां च, सुरङ्गावर्त्मनाऽविशत् ॥४९॥ त्रिभिर्विशेषकम् । मगधाधिपतिं तत्र (ज्ञात्वा), चित्रदृष्टानुमानतः । सुज्येष्ठा

स्पष्टयामास, रोमाश्चं ज्ञातपूर्विणी ॥ ५० ॥ प्रतिश्रुतैकसंवासां, सुज्येष्ठा भगिनीं लघुम् । चेल्लणासुक्तवृत्तान्तामप्राक्षी-द्गन्तुमिच्छया ॥ ५१ ॥ साऽप्याह स्म पुरा त्वं मामारोपय रथोत्तमे । त्वद्वियोगं सहे नाहमारोप्यत ततस्तया ॥५२॥ स्वयं गन्ता तु साऽऽनेतुं, रत्नाभृतिकरण्डिकाम् । यावत्तावत्सौलसेयाः, स्वामिनं स्वमदोऽवदन् ॥ ५३ ॥ अत्र शत्रुगृहे देव !, न स्थातुं युज्यते चिरम् । इति तत्प्रेरितो लात्वा, चेल्लणां व्याघुटन्नृपः ॥ ५४ ॥ आगादादाय सुज्येष्ठा, या-वद्भूषाकरण्डिकाम् । नैक्षिष्ट श्रेणिकं तावद्, घटान्तर्गतदीपवत् ॥ ५५ ॥ जाम्या वियोगदुःखार्त्ताऽपूर्णकामा विषा-दिनी । सुज्येष्ठा पूत्चकारोच्चैर्ह्रियते चिल्लणेति हा ॥ ५६ ॥ तच्छ्रुत्वा चेटको राजा, संनद्ध(द्धः) क्रोधतः स्वयम् । वैरङ्गिकभटेनासौ, निषिद्धो युद्धवेधसा ॥ ५७ ॥ कोऽयं मयि सति स्वामिन्नाक्षेपोऽत्र नराधमे !! । इति ब्रुवन् स क-न्यायाः, प्रत्यासत्तिकृतेऽचलत् ॥ ५८ ॥ निर्गच्छतः सुरङ्गायाः, सुलसायास्ततः सुतान् । वैरङ्गिकोऽवधीदेकपत्रिणा तादृशानपि ॥ ५९ ॥ सुरङ्गासङ्कटत्वेन, यावत् द्वात्रिंशतं रथान् । आकर्षयद्रथी तावद्दूरेऽगाच्छ्रेणिको नृपः ॥ ६० ॥ ततो वैरङ्गिको योद्धः, पूर्णापूर्णमनोरथः । चेटकाय नरेन्द्राय, तं वृत्तान्तं न्यवेदयत् ॥ ६१ ॥ श्रेणिकोऽपि रयाद्रा-जगृहं सम्प्राप्य चेल्लणाम् । गान्धर्वेण विवाहेनोपायंस्त प्रेमनिर्भरः ॥ ६२ ॥ अथ शुश्रुवतुर्नाग–सुलसे वसुधेशितुः । मुखादमङ्गलं तादृक्, सर्वेषां तनुजन्मनाम् ॥ ६३ ॥ रोदयन्तौ परान्मुक्त–कण्ठं रुरुदतुश्चिरम् । भूपीठे च व्यलुठता-मुपालम्भयतामिति ॥ ६४ ॥ समं कृतान्त ! निस्त्रिंश !, ग्रसमानस्य नौ सुतान् । तवैकस्याप्यभून्नैव, जठरस्य विदी-

र्णता ॥ ६५ ॥ क्रमेण प्राणिनां मृत्युं, मृत्यो ! त्वं वितनोषि हि । एषाऽपि स्वस्थितिः किं ते, विस्मृताऽस्मदमा-
ग्यतः ॥ ६६ ॥ एवं तौ शोकपाथोधि-मग्नौ श्रीश्रेणिको नृपः । युक्तोऽभयकुमारेण, समागत्येत्यबोधयत् ॥ ६७ ॥
मा शोचतममी भावा, भुवि सर्वे विनश्वराः । सर्वसाधारणे मृत्यौ, तत्कः शोकं समुद्वहेत् ? ॥ ६८ ॥ मृत्युस्तु सर्व-
जन्तूनां, प्रकृतिर्जगति ध्रुवम् । जीवितव्यं धिगस्तु, तस्माच्छोकं विमुञ्चताम् ॥ ६९ ॥ इति वैराग्यसाराभिर्वा-
ग्भिरेतौ विवेकिनौ । सम्बोध्याभययुग् राजा, निजप्रासादमासदत् ॥ ७० ॥ तत्पूर्वजन्मनो मत्वा, विपाकं दुष्टकर्म्म-
णाम् । विशोकौ दम्पती तौ स्म, यतेते धर्मकर्मणे ॥ ७१ ॥ अन्यदा समवासार्षीच्चम्पायां चरमो जिनः । सुरासुर-
नराधीशसेविताङ्घ्रिसरोरुहः ॥ ७२ ॥ अथ दण्डधरश्छत्री, श्रीवीरश्रावकोत्तमः । परिव्राडम्बडाभिख्योऽनंसीदेत्य
जगद्गुरुम् ॥ ७३ ॥ निषद्य च यथायोग्ये, स्थाने श्रद्धाविशुद्धधीः । शुश्राव श्रवणाध्यक्षाद्देशनां सोऽघमर्षिणीम् ॥७४॥
भक्त्या नत्वा जिनाधीशं, यावद्राजगृहं प्रति । प्रतस्थे सोऽम्बडस्तावत्स्वामिना स्वयमौच्यत ॥ ७५ ॥ तत्र प्रासो
नागरथि-वल्लभां सुलसाभिधाम् । आनन्दयेस्त्वमस्माकं, धर्मलाभाशिषा ध्रुवम् ॥ ७६ ॥ तथेति प्रतिपद्यासौ, व्योम्ना
गत्वाऽथ तत्पुरम् । सुलसा सद्मनो द्वारे, क्षणं स्थित्येत्यचिन्तयत् ॥ ७७ ॥ अहो त्रिजगतां भर्तुः, पक्षपातो महा-
द्भुतः । सुलसायामतोऽमुष्याः करिष्येऽद्य परीक्षणम् ॥ ७८ ॥ वैक्रियाख्यमहालब्ध्या, कृत्वा रूपान्तरं रयात् । वेश्म
प्रविश्यायाचिष्ट, भिक्षां स सुलसां सुधीः ॥ ७९ ॥ भिक्षामपास्य सत्पात्रं, नान्यस्मै प्रददाम्यहम् । इत्याददौ प्रतिज्ञां

स्वां, सुलसा व्यस्मरन्न हि ॥ ८० ॥ तस्मै सा याचमानाय, भिक्षामक्षीणवैभवा । नादान्निजं प्रतिज्ञातं, सन्तो लुम्पन्ति न कचित् ॥ ८१ ॥ ततो निःसृत्य तद्देहात्, पुरगोपुरसन्निधौ । पूर्वस्यां विचकारासौ, चतुर्वक्त्रविभूषितम् ॥ ८२ ॥ चतुर्भुजं ब्रह्मसूत्र–जटाजूटकमण्डितम् । अक्षमालाङ्कितं ब्रह्मरूपं सहंसवाहनम् ॥ ८३ ॥ युग्मम् । सावित्रीसहितः पद्मासनासीनोऽरुणाङ्गरुक् । धर्मं दिदेश लोकेभ्यः, साक्षाद्ब्रह्मेव सोऽम्बडः ॥ ८४ ॥ तन्नमस्याकृते लोकः, पौरः सर्वोऽपि चागतः । विहाय सुलसामेकां, सम्यक्त्वे निश्चलाशयाम् ॥ ८५ ॥ दक्षिणस्यां द्वितीयेऽह्न्यम्बडो गरुडवाहनः । शङ्खचक्रगदाशार्ङ्गकरोऽस्थाद्विष्णुरूपभृत् ॥ ८६ ॥ अथाच्युतप्रघोषेण, विश्वविभ्रमकारिणा । सुलसा नागमत्तत्र, मिथ्यादृक्सङ्गभीरुका ॥ ८७ ॥ अथाम्बडस्तृतीयाह्ने, पश्चिमस्यां मृगाङ्कयुक् । कृत्तिवासास्त्रिनयनः, शूलपाणिः कपालभृत् ॥ ८८ ॥ रुण्डमाली च खट्वाङ्गी, भस्मोद्धूलितविग्रहः । पार्वतीमण्डिताद्धाङ्ग–प्रथितः प्रमथान्वितः ॥ ८९ ॥ एवं स ईश्वरीभूयाख्यद्धर्मं नागराग्रतः । अश्वाऽपि वीक्षितः शुद्धश्राद्ध्या सुलसया नहि ॥ ९० ॥ त्रिभिर्वि० । चतुर्थे दिवसेऽथासावुत्तरस्यां महाद्भुतम् । चक्रे समवसरणं, सतोरणचतुर्मुखम् ॥ ९१ ॥ जिनीभूय स्थितस्तत्र, जनैर्गत्वा स वन्दितः । धर्मोपदेशदानेनान्वग्रहात् सोऽपि नागरान् ॥ ९२ ॥ तत्रापि तामनायातां, सुलसामवबुध्य सः । प्रैषीदेकं नरं तस्याः, क्षोभार्थं सोऽपि तां जगौ ॥ ९३ ॥ सुलसे ! समवासार्षीदर्हंस्त्वदतिवल्लभः । विज्ञे ! तत् तन्निनंसायै, किमर्थमलसायसे ? ॥ ९४ ॥ साप्युवाच महाभागः, नायं स्वामी जिनेश्वरः । विहाय श्रीमहावीरमपरोऽर्हन्नास्ति

भूतले ॥ ९५ ॥ सोऽपि प्रत्यब्रवीदेतां, पञ्चविंशो जिनोऽधुना । उत्पेदेऽतः स्वयं गत्वा, मुग्धे ! किं त्वं न वन्दसे ? ॥ ९६ ॥ साऽप्यूचे भद्र ! नैवैतत्, कदापि हि परं भवेत् । कोऽप्येष कपटाटोपैर्मुग्धान् वञ्चयते नरान् ॥९७॥ मायामृगः स आचर्यौ, यद्येवं शासनोन्नतिः । जायते तर्हि को भद्रे !, दोषपोषः प्रसर्पति ? ॥ ९८ ॥ साऽप्यूचे त्वं प्रमुग्धोऽसि, काऽलीकेन प्रभावना ? । किन्त्वप्रभाजना लोकोपहासात्किल जायते ॥ ९९ ॥ ततो गत्वाऽम्बडाग्रे स, तत्स्वरूपं न्यवीवदत् । तच्छ्रुत्वा विस्मितः सोऽपि, मनस्येवं व्यभावयत् ॥ १०० ॥ युक्तं सभायां श्रीवीरस्तां स्वयं समभावयत् । सम्यक्त्वाढ्या मया माया–कारिणाऽपि न चालिता ॥ १०१ ॥ संहृत्याथ प्रपञ्चं तमम्बडः सहजं दधत् । रूपं नैषेधिकीं जल्पंश्चाविशत्सुलसालयम् ॥ १०२ ॥ सहसोत्थाय सा स्माह, स्वागतं विद्यतेऽनघ ! । वीरस्य त्रिजगद्भर्तुः, परमोपासकस्य ते ? ॥ १०३ ॥ मातेवातुल्यवात्सल्याच्छौचं कृत्वाऽथ तत्पदोः । वन्दयामास वन्दारुं, तं चैत्यानि स्ववेश्मनः ॥ १०४ ॥ अम्बडोऽप्यादृतस्तस्याः, शाश्वताशाश्वतार्हताम् । बिम्बान्यवन्दयद्भक्त्या, वन्दितानि स्वयं मुदा ॥ १०५ ॥ उवाच च त्वमेवैका, पुण्यवत्यसि निश्चितम् । वार्त्तां यस्याः स्वयं वीरो, मदास्येनाद्य पृच्छति ॥ १०६ ॥ तदाकर्ण्य सकर्णा सा, प्रणम्य चरमं जिनम् । अस्तौत् प्रशस्तया वाचा, चञ्चद्रोमाञ्चकञ्चुका ॥ १०७ ॥ तदाशयपरिज्ञान–कृते स पुनरूचिवान् । मयाऽत्रायातमात्रेण, वार्त्ताऽश्रावीति लोकतः ॥ १०८ ॥ यदत्र ब्रह्ममुख्याः श्रागवतेरुः सुराः पुरे । शुश्रूषवो जना जग्मुस्तत्पार्श्वं भवती न किम् ? ॥ १०९ ॥ दुर्गन्धादिव तद्वाक्यात्सा नासां

कुणयन्त्यथ । ऊचे विदन्नपि कथंकारं भ्रान्तोऽसि ? बान्धव ! ॥ ११० ॥ स्त्रीसेवानिरताः शत्रुवधबन्धनलालसाः । तेऽमी ब्रह्मादयः कीदृग्, धर्मं वक्ष्यन्त्यधर्मिणः ॥ १११ ॥ भ्रातः ! श्रीमन्महावीराद्धर्मं प्राप्य कथं मनः ? । अनिष्टानिव तान् द्रष्टुमुत्सहेत ममाऽधुना ॥ ११२ ॥ सुलसामम्बडोऽत्यन्तं, व्यावर्ण्य स्वमगाद्गृहम् । साऽपि स्वकीयहृत्पद्मे, बभार परमेश्वरम् ॥ ११३ ॥ मत्वैवं सुलसाचरित्रमनघं श्रीवर्द्धमानप्रभौ, स्थैर्यौदार्यमहार्घतापरिगतं विश्वत्रयाश्चर्यदम् । भव्या ! यूयमपि प्रथां नयत तद्धर्मे स्थिरत्वं यथा, सम्यक्त्वेन विभूषिताः शिवरमाश्लेषात्सुखं विन्दत ॥ ११४ ॥ सम्यक्त्वस्थैर्ये सुलसाकथा ॥ चतुर्थं स्थैर्याख्यं सम्यक्त्वभूषणमुक्त्वा पञ्चमं प्रभावनाख्यं सम्यक्त्वभूषणं गाथाचतुर्थपादेनाह—

"पभावणुस्सप्पणाकरणं ॥ ४२ ॥

व्याख्या—जिनशासनस्य नानाप्रकारमहोत्सवकरणेन विख्याततानयनमुत्सर्पणा तस्याः करणं–निर्मापणं प्रभावना भवतीति गाथार्थः ॥ ४२ ॥ भावार्थस्तु सिंहदृष्टान्तात् ज्ञेयः । स चायं—

समस्ति समस्तप्रशस्तवस्तुविस्तारापणं दुरितारोषकृपणं लक्ष्मीसरस्वतीकुलगृहं राजगृहं नाम नगरं । यत्र सुधापरिधवलितविततप्रासाददम्भसंरम्भात् । पौरनरा निजकीर्त्ति–स्तम्भानारोपयामासुः ॥ १ ॥ तत्र समराजिरप्रसमरतरातिवीरवारनिवारणप्रचण्डदोर्दण्डिमोड्डीयः श्रीसुग्रीवः प्रशास्ति स्म राज्यम्—अनल्पकल्पान्तकृशानुकल्पो,

यस्य प्रतापो युगपच्चकार। चित्रं जगत्सु प्रसरन्नजस्रं, दाहं च शैत्यं द्विषतां सतां च ॥ १ ॥ तस्य च निरन्तरराजकार्यैकरणप्रवीणतया जनमान्यः समासीत्परमभृत्योऽरिसिंहसंज्ञः, तस्य शौर्यचर्यानिर्जितसिंहः सिंहनामा तनूभवोऽभवत्, सोऽन्यदाऽनवरतनरेश्वरसेवादुःखपरम्परां पितुरालोकयन्निति चिन्तयति स्म– धिग् मूढैर्धनलवतरलितस्वान्तैरात्मा राजसेवासमुद्रे विमुद्रे पातयित्वा ही महत्त्वं हार्यते। यदुक्तम्—"सेवा श्ववृत्तिर्यैरुक्ता, न तैः सम्यगुदाहृतम्। श्वानः कुर्वन्ति पुच्छेन, चाटु मूर्ध्ना तु सेवकाः ॥१॥" धिग्जीवितं च धनलवलुब्धानां नृपसेवकानाम्। यतः–"हसति हसति स्वामिन्युच्चै रुदत्यतिरोदिति, कृतपरिकरं स्वेदोद्गारि प्रधावति धावति। गुणसमुदितं दोषापेतं प्रणिन्दति निन्दति, धनलवपरिक्रीतो जन्तुः प्रनृत्यति नृत्यति ॥ १ ॥ किमसेव्यमानः कदाप्यन्यः फलेदीहितमङ्गिनाम्। अवकेशीव राजा तु, न कदाचित्फलेग्रहिः ॥ १ ॥ तथापि कदाऽऽशया न तत्सेवां त्यजन्ति। यतः—आराध्य भूपतिमवाप्य ततो धनानि, भोक्ष्यामहे किल वयं सततं सुखानि। इत्याशया बत विमोहितमानसानां, कालः प्रयाति मरणावधिरेव पुंसाम् ॥ २ ॥ इति विमृश्य पितुः स्वाभिप्रायं ज्ञापयित्वा सिंहः सिंह इव राजसेवादरीतो निर्गत्य तत्रैव पुरे सुबन्धुनाम्नो धनिनो गृहारामे प्रविवेश। श्रेष्ठिनाऽपि ज्ञाततत्सत्यसत्त्वप्रकर्षहर्षितेन चित्रं सिंहोऽपि गोकुलरक्षार्थं प्रायुज्यत। तस्यापि गोपाललीलामविकलां कलयतः प्रावर्त्तिष्ट वर्षासमये धारासारैरभिवर्षितुं जलधरः। अत्रान्तरे गोमहिषीवृन्दं चारयित्वा स यावन्निजनगरं प्रति प्रत्यावर्त्तितुमिच्छति स्म तावदन्तराले समुल्लसल्लोककल्लोलां वेगवत्तया

तटपातनलम्पटसलिला सलिलां निभालयामास। अन्यायिनृपाज्ञाया इवानुलङ्घनीयायास्तस्याः परकूलमूले गोकुलकलितः सोऽवात्सीत्, प्रातस्तामन्यायार्जितश्रियमिव मन्दायमाननीरपूरां निरीक्ष्यमाणस्तत्पातिततटान्तरे मणिमय्याः श्रीऋषभदेवप्रतिमाया मुखकमलं स्वस्यागामिपुण्योदयाङ्कुरमिव दृशा दृष्ट्वाऽऽत्मानं भवोदधेर्भगवन्तं वसुन्धरातलादुद्धार। तं च सरिज्जलक्षालनेन स्वं च भगवद्दर्शनेन निष्पङ्कमकरोत्। ततः स्वमत्यनुसारेणार्हन्तं स्तुत्वाऽभिनत्य च तृणमयकुटीरकान्तरनिर्मितवेदिकायामवस्थाप्य प्रत्यहं भक्तिभाक् पूजास्नपनादिकं व्यरचयत्। नगरादागच्छन् गच्छंश्चानुदिनं जिनपदवन्दनसावधानोऽन्यदैवमवादीत् स्वामिन्नहं न जाने शास्त्रादिपरमार्थं भवद्गुणांश्च, परं त्वामनमस्कृत्य नाहं भोक्ष्ये, एवं तस्य स्वप्रतिज्ञां प्रतिपालयतः प्रादुरासीद्विरहिणीजनप्रलयकालः प्रावृट्कालः, तस्मिन्नवसरे स सिंहो यावच्चतुष्पदवृन्दमुपादाय गोचारं प्रत्यचालीत्तावत्साऽन्तराले कूलिनी कूलमूलपातनप्रसरद्वारिपूरा दुर्जनराज्यस्थितिरिव दुरुत्तरा समभूत्, तदा सिंहोऽर्वाचीन एव तटे गाश्चारयित्वा सायं व्यावृत्य ता गृहं नीत्वा पीत्वा च पानीयं श्रीमन्नाभेयदेवनत्यभावादपूर्णप्रतिज्ञो निजबन्धुप्रमुख गृहजनैरुपरुध्यमानोऽपि न भोजनं चकार, एवं दिनत्रयमत्यवाहयत्, ततश्चतुर्थेऽह्नि कृशीभूते सरित्पूरे प्रोल्लसद्भावनो गत्वा जिनमनंसीदसीमानन्दाश्रुमिश्रदृगम्बुजः प्रमोदप्रोद्यद्बुच्चरोमाञ्चकञ्चुकः श्रीमद्युगादिदेवस्य चरणमूले लगित्वा चेत्यवादीत्–'स्वामिन्? भवन्मुखाम्भोजदर्शनाभावतो ध्रुवम्। वासराणां त्रयी व्यर्था, ममाभूदिक्षुपुष्पवत् ॥ १ ॥ मा भूत्स दिवसः

क्वापि, भगवन्? भवतः स्फुटम्। यत्र मे दर्शनं जातं, न भवार्णवतारणम् ॥ २ ॥' इत्यादि, तद्भक्तिव्यक्तिरञ्जित-मनसाऽर्हद्बिम्बाधिष्ठायकयक्षेण स वर्णयितुमारब्धः, हे सिंह? सत्त्वशालिषु सिंह? भवद्भक्त्या सन्तुष्टोऽहं तद्याचस्व स्वाभीष्टं सोऽप्युवाच—देवराज? यदि सत्यं सन्तुष्टोऽसि तदा मे राज्यदो भव। यक्षोऽप्याख्यत्, एवमस्तु परं प्रतीक्षस्व षण्मासीं, सिंहोऽपि तथेति तद्वचोऽङ्गीकृत्य स्वसदनमेत्य भोजनं कृत्वा प्रत्यहं भगवन्तं नमस्यन् षण्मासी-मतिचक्रामैकदिनवत्। अथ तस्मिन् पुरे पुत्रादिरहितो राजा सहसा मूढविसूचिकया परभवभाजनमभूत्, प्रातः समये च पुरोहितसचिवादिभिः पट्टगजपट्टहयच्छत्रचामरयुगलमन्त्रपूर्णकलशरूपाणि पञ्चदिव्यान्यभिषिक्तानि, तानि च राजमन्दिरात्प्रतिपदं शौर्यादिगुणोल्बणं राजपुत्रादिलोकं दुर्भगमिवपरिहृत्य पुराद्बहिर्निःसृत्य च क्रमात्तरुत-लसुप्तं जीर्णशीर्णचीवरधारिणं सिंहं दृष्ट्वा स्वस्वव्यापारकरणपराण्यभ्यषिञ्चन्। ततो मन्त्रिसामन्तैराभरणवस्त्रादिकं परिधाप्य गजेन्द्रस्कन्धमारोप्य छत्रचामरादिश्रियाऽलङ्कृतो महद्धर्या स सिंहराजः पुरे प्रवेश्य सिंहासनमुपवेशितः। अत्रान्तरे समरप्राप्तजयपत्रा राजपुत्राः परस्परमालोचयाञ्चक्रुः कथं गोपालभूपालोऽस्मत्प्रणतिमर्हतीति न तं प्रणेमुः, राजसभामेत्य च राज्ञः समानासनेषूपविशन्ति स्म। एवं तान् कृतावज्ञान् विलोक्य स राजा राज्यर्द्धिं-प्राप्याऽपि परमदरिद्र इव दुःखमनुभवन्नमर्षं वहंश्च सभ्रूभङ्गमेवमादिशत्—अस्ति भोः? कोऽपि भटो यो दुष्टानेतान् बध्नातीति तद्वचःश्रवणनिर्मितोपहासांस्तान् सुभटानास्थानद्वारस्थितदारुमयप्रतीहारास्तत्पुण्यप्रचयप्रेरिता उत्थाया-

वधाकारिणो निबध्नन्ति स्म, तेऽपि भीतभीता भूपमेवं ब्रुवते स्म--श्रीसिंहनरेश्वर? रक्ष रक्षास्मानेतेभ्यो दुष्टदारुद्वारपालेभ्यः, प्रसीद, यतं भवच्चरणौ शरणं प्रपन्नाः स्मः। ततो राज्ञा ते मानिताज्ञा दारुद्वारपालेभ्यो मोचयाञ्चक्रिरे। ततः सर्वेऽपि सामन्तमन्त्रिणस्तथापमानिताः पुनरेवं मन्त्रयामासुः, यदस्माभिरेतत्सभायां नागन्तव्यं को वणिग् दासपार्श्वं नमस्यतीत्यभिमाननटितैः। ततो राजा राजसभायां सिंहासने एकाक्येव तिष्ठन्नेकं स्वसेवकं सुबन्धुश्रेष्ठिसमाकारणाय प्रेषितवान्, तेन च ससादरमाहूतोऽपि पुरुहूतमिवात्मानं मन्वानो मनस्येवं विममर्श अहो? एष दासो मदोन्मत्तो मत्तोऽप्यर्हणामभिलषति, तस्मात्तत्किमपि करोमि येन सर्वोऽपि पौरो विस्मयते। ततस्तद्द्रोण्यावर्त्तेनयष्टिं कम्बलोपानद्युगलकलितां सिंहद्वारे ध्वजीकृत्यानात्मज्ञः स स्वमन्दिरमाससाद। अथ स पुमांस्तद्दुष्टचेष्टितं स्वामिने निवेदयामास। सोऽप्युत्थाय प्रासादे शय्यामारुह्य दुःखव्याकुलितचेता अचिन्तयत्—धिगस्तु राज्यमप्येतद्यत्रेदृगपमानता। गोपभावोऽपि मे रम्य आसीत्स्वैरविहारिणः॥ १॥ एवं चिन्ताचान्तः कथमपि दिनमतिवाह्य निशि तं जिनबिम्बाधिष्ठातारं सुरं संस्मृत्यास्वाप्सीत्। सोऽपि यक्षो यामिनीयामयामले प्रकटीभूय तमभाषत—वत्स! मा विषीद मयि पक्षपातिनि कस्त्वमभिभवितुं क्षमायां क्षमते?, किन्तु त्वया प्रातरिदं मदुक्तं विधेयं, यत्कुलालकुलमाकार्य तेभ्यो (तत्कृतो) मृन्मयः सुपीनकुम्भस्थलः ससाङ्गप्रतिष्ठितो निर्व्याजस्वान्तेन सिन्दूरादिवर्णक-

१ अपेक्षितक्रियत्वापेक्षयाऽपादानता, यथा कुशूलात्पचतीलन्नादायेतिक्रियापेक्षया तथाकारयित्वेतिक्रियायाः, यद्वा गम्ययपः कर्माधारे इति सूत्रेण पञ्चमी तथा च निर्माय्येति प्रकार्येति वा गम्यं ज्ञेयं।

कदम्बकैर्मण्डिताङ्गोपाङ्गो गजराज आरोढव्यः, ततः स सप्तस्थानक्षरन्मदधारासारसिक्तधरातलः सकलानपि दुष्टसामन्तामात्यान्निहन्ता । एवं स सुरो नरेश्वरमनुशिष्य तिरोऽभवत् । तदनु जाते प्रातःसमये कुम्भकारानाकार्य नृपवर्यो मृन्मयं सर्वजनोपहासकारिणं करिणं कारयित्वा पटहेनैवमुद्घोषयामास—यदद्य सिंहमहाराजो राजपाटिकां मृन्मयकरिवरमारुह्य करिष्यति, सर्वैरप्यागत्य नतिर्विधेयेत्याघोषणामाकर्ण्य सपणौ मन्त्रिसामन्ताद्याः सहस्ततालं जहसुः, [illegible] मृन्मयेभि[illegible] [illegible]पालो महीतलं पालयिता, तस्मादस्माभिः स्वैरी स्ववैरी सिन्धुराधिरूढो विरूढ इवोन्मूलनीय इति निश्चित्य सर्वेऽपि ते सपौरा यावदेकत्र सम्भूय तिष्ठन्ति स्म तावद्गन्धसिन्धुरवन्मृन्मयसिन्धुरस्कन्धमध्यास्य स सिंहनृपोऽङ्कुशेन यक्षप्रभावेण सजीवमिवोत्तेजयन्नगरान्तरे चालयाञ्चकार । तस्य गन्धमसहमाना दन्तिनो वाजिनोऽपि पलायाञ्चक्रुः । तच्छुण्डादण्डखण्डिता भूरुहा इव केचिदचलातलमलंचक्रुः । अपरे च मरणभयभीता राजानं व्यजिज्ञपन्—श्रीसिंहराज ! त्रायस्वास्मानात्मदासान्, अतः परं त्वच्चरणशरणसरणानुसारिणो भवितार इति वशीकृतसामन्तादिः स मेदिनीपतिस्तैरेव सह सरिदुपकण्ठे स्वस्थापितमृषभदेवं भक्त्याऽभिनत्यार्थिभ्यो दानं ददानः कृतहट्टशोभे स्वपुरे महामहपुरस्सरं प्रविश्य ततः कुञ्जरादवरुह्य सिंहासनमलङ्कृत्य स्वाज्ञैश्वर्यं प्रकाश्य सुबन्धुश्रेष्ठिनमाकार्य सकलराजलोकसमक्षमाक्षिपत्—भोः ! श्रेष्ठिन् मृन्मयकरिराजमेनमारुह्य पुरे भ्रामय चेदस्ति काचिच्छक्तिः, अन्यथा वंशोपरिनिबद्धकम्बलोपानदादि स्वपाणिनोन्मोचय, नो चेदत्यहितं करिष्यामि । सोऽपि भयभ्रान्तः

स्वचेष्टितेन विलक्षमुखस्तद्धस्त्वपसार्य नृपवर्यपादमूलमेत्य भूतलमिलद्भालस्थलः प्रसीद स्वामिन्निति पुनः पुनर्ब्रुवाणो भृत्य इव राजानमाननाम। तदनु कृतज्ञेन राज्ञा पूर्वोपकारं स्मरता श्रीकरणपदे सुबन्धुश्रेष्ठी न्यवेश्यत, उक्तं च–पूर्वोपकारकर्तुः, प्रत्युपकर्त्ता कुतो भवत्यनृणः?। एको निरुपाधिकरः परस्तु सोपाधि विदधाति ॥१॥ एवं स्थिरतरं स्वाराज्यमिव स्वराज्यं परिपालयन्नरीणामपि राज्यानि राजा क्रमेण स्वीचक्रे। अथ श्रीऋषभदेवस्योत्तुङ्गं प्रासादं कारयित्वा तामेव प्रतिमां तत्र स्थापयित्वा प्रतिदिनत्रिकालपूजाकरणेनात्मानं पावयन् जिनशासनं प्रभावनाढ्यंतमकरोत्। ततः क्रमेण सद्गुरूपासनप्रासचारित्रो मृत्वा स्वर्गसौख्यान्यनुभूय भूयो मानुष्यकं जन्मासाद्य निष्ठिताष्टकर्मा शिवशर्मावाप्स्यति। "एवं निःसीमभूमीपरिवृढविहिताराधनस्यावनीन्दोः, श्रीमत्सिंहाह्वयस्य श्रवणयुगपुटैः सच्चरित्रं निपीय। श्रीमज्जैनेन्द्रमार्गे प्रपदपरिगतां भावनामातनुध्वं, येन श्रेयः श्रियो वः प्रथितरतिसुखाः सेवनं कुर्वते प्राक् ॥ १ ॥ प्रभावनायां सिंहराजकथा। इतिश्रीरुद्रपल्लीयगच्छगगनमण्डनदिनकरश्रीगुणशेखरसूरिपट्टावतंसश्रीसङ्घतिलकसूरिविरचितायां सम्यक्त्वसप्ततिकावृत्तौ तत्त्वकौमुदीनाम्न्यां सम्यक्त्वभूषणस्वरूपनिरूपणो नाम सप्तमोऽधिकारः समाप्तः ॥ सप्तमं सम्यक्त्वभूषणाधिकारमुक्त्वाऽष्टमं सम्यक्त्वलक्षणपञ्चकाधिकारस्वरूपमाह—

लक्खिज्जइ सम्मत्तं, हियगयं जेहि ताइं पंचेव। उवसम संवेगो तह निव्वेयणुकंपे अत्थिक्कं ॥ ४२ ॥

व्याख्या—यैर्हृदयगतं सम्यक्त्वं लक्ष्यते–अनुमानेन ज्ञायते तानि लक्षणानि पञ्चैव न न्यूनाधिकानि, कथमि-

स्याह–उपशमः क्षमा १ 'संवेगो' भववैराग्यं २ 'निर्वेदो' मोक्षाकाङ्क्षा ३ 'अनुकम्पा' जीवेषु कारुण्यम् ४ 'आस्तिक्यम्' अर्हदुक्तेषु जीवादितत्त्वेष्वस्तिताबुद्धि ५ रिति गाथार्थः ॥ ४३ ॥ एतेषु प्रथममुपशमस्वरूपं गाथापूर्वार्द्धेनाह—

अवराहेऽवि महंते कोहाणुदओ वियाहिओत्तसमो ।

व्याख्या—'महत्यपि' गरीयस्यपि 'अपराधे' दूषणेऽर्थात्समुत्पन्ने 'विबाधितस्य' ताडनादिना जीवान्तदशां नीतस्य क्रोधानुदय उपशमः स्यात्, स च प्रकृत्या वा कषायपरिणतेः कटुकफलावलोकनाद्वा भवति । यदुक्तम्—पयईए कम्माणं, नाऊणं वा विवागमसुहंति । अवरद्धेवि न कुप्पइ, उवसमओ सव्वकालंपि ॥ १ ॥ अन्ये तु क्रोधकण्डू-विषयतृष्णाशमसुपशममाहुः, ननु प्राप्तसम्यक्त्वो हि साधुपास्तिपरो यदि क्रोधकण्डूविषयतृष्णाभ्यां(न)तरलीक्रियते तदा कृष्णश्रेणिकादीनां सापराधे निरपराधेऽपि परे क्रोधवतां विषयतृष्णापरवशानां कथमुपशमः ?, तदभावे स-म्यक्त्वं न लक्ष्येत, अतो नैतत्सङ्गतिमङ्गति, (सत्यं)सम्यग्दर्शने लिङ्गिनि सति नियतं लिङ्गसम्भव इति नैष निश्चयः, धूमवर्जितोऽपि वह्निरयस्कारशालायामालोक्यते भस्मच्छन्नस्य धूमध्वजस्य(च) न धूमलवोऽपीति, अयं तु नियमः–सुप-रीक्षिते लिङ्गे सति लिङ्गी स्यादेव, यदुक्तम्—लिङ्गे लिङ्गी भवत्येव, लिङ्गिन्येवेतरत्पुनः । नियमस्य विपर्यासे, सम्बन्धो लिङ्गलिङ्गिनोः ॥ १ ॥ अतः सञ्ज्वलन(इतर)कषायोदयाच्छ्रेणिकादीनां क्रोधकण्डूयविषयतृष्णे, सञ्ज्वलना अपि केचन

कषायपुद्गलास्तीव्रत्वेनानन्तानुबन्धिकषायकल्पविपाकवन्त इति गाथापूर्वार्द्धार्थः । भावार्थस्तु मेतार्यचरित्रेणा-
सूच्यते तथाहि—

साकेयम्मि पुरम्मि अलयासिरिविजयकरणचउरम्मि । अइविमलकलाचन्दो चन्दवडंसो निवो हुत्था ॥ १ ॥
तस्स य दो भज्जाओ रइपीई इव सिरीइ तणयस्स । पढमा सुदंसणक्खा बीया पियदंसणा नाम ॥ २ ॥ ताणं पढमा
नंदणजुयं पसूया मणोहरं ताणं । एगो सागरचन्दो बीओ मुणिचंदनामो य ॥ ३ ॥ पिअदंसणावि पिअदंसणिज्जरूवं
जणेइ सुअजुअलं । सिरिबालचंदगुणचंदनामयं चंदरविसरिसं ॥ ४ ॥ सुअजुअलजुयलएणं जंबुद्दीवम्मि रेहए राया ।
सुरवरगिरिव्व दिणयरससहरजुयलेण अणवरयं ॥ ५ ॥ तत्तो जुवरायपयं सागरचंदस्स अप्पए राया । मुणिचंदस्स
य वियरइ उज्जेणिपुरीइ सामित्तं ॥ ६ ॥ अह हेमंते पत्ते संझाए परियणं विसज्जेउं । चंदवडंसो राया नियवास-
हरम्मि संपत्तो ॥ ७ ॥ पासइ दीवयमेगं उज्जोयंतं समंतओ भवणं । जावेसो पज्जलिरो ताव न पारेमि पडिममहं
॥ ८ ॥ इय चिंतिय धम्मरुई राया पावस्स निग्गहनिमित्तं । समभावभावियप्पा काउस्सग्गे ठिओ धीरो ॥ ९ ॥
पढमे पहरम्मि गए उट्ठेउं सिज्जवालिया तिल्लं । दीवे खिवेइ मा मह सामिं तिमिरं अइक्कमउ ॥ १० ॥
जह जह दीवस्स सिहा उज्जोयइ तस्स बाहिरंगाणि । तह तह अंतरतिमिरं नासइ समभावजुण्हाए ॥ ११ ॥ एवं
तिसु सेसेसुं पहरेसुं सिज्जवालिया तिल्लं । दीवम्मि(उ) पक्खिवई अमुणंती नियपहुपइन्नं ॥ १२ ॥ नेहेण विणा नूणं

दीविज्जइ एसऽहं तु तेणेव । इय सो बज्झो दीवो नट्ठो तज्झाणदीवाओ ॥ १३ ॥ राया पूरियसंधो काउस्सग्गं स
पारए जाव । ताव य काउस्सग्गाभिमुहो जाओ य तस्सप्पा ॥ १४ ॥ लोहियभरिओ सुकुमारविग्गहो न य पया
पयं दाउं । सक्को राया तत्थेव छिन्नरुक्खुव्व सो पडिओ ॥ १५ ॥ पंचपरमिट्ठिमंतं झायंतो सत्तुमित्तसमचित्तो । सो
पंचजणाहिवइ पंचत्तं झत्ति संपत्तो ॥ १६ ॥ गुरुवत्थू जाइ अहो लहुओ उवरिम्मि होइ निब्भंतं । इय महिवीढे
मुत्तुं तणुं जिओ तस्स उवरि गओ ॥ १७ ॥ काऊण तस्स किरियं सायरचंदोऽवि मायरं भणइ । रज्जं तुह ठविय सुए
पव्वज्जं साहयामि अहं ॥ १८ ॥ सा भणइ वच्छ ! पुत्ते तुमम्मि मह नत्थि कोऽविहु विसेसो । किं वामदक्खिणाणं
अंतरं होइ नयणाणं ? ॥ १९ ॥ तो तं कुणेसु रज्जं मह पुत्तो तुम्ह सेवओ होही । जिट्ठम्मि भाउयम्मी भत्ती काउं
जओ जुग्गा ॥ २० ॥ अह मतिसुहजणेणं सायरचंदो सुहे मुहुत्तम्मि । रज्जपए अहिसित्तो नाएण पयाओ पालेइ
॥ २१ ॥ तं पिच्छिऊण निवसिरि–वरियं पियदंसणा निए हियए । दूमेइ पोमिणी इव रयणीयरमंडलं सयलं ॥२२॥
झायइ मणे न गहियं दिज्जंतंपिहु सुयस्स मह रज्जं । संपइ तेण विमुक्कं तं पिक्खंती दुहे पडिया ॥ २३ ॥ ता एयं
नरनाहं मारिय ठावेमि नियसुयं रज्जे । एयम्मि य जीवन्ते न लहइ मह नंदणो लच्छि ॥ २४ ॥ अन्नदिणे उज्जाणे
घेमाउयभायजुयजुयम्मि निवे । चेडीमोयगमेगं करे करित्ता घरा चलिया ॥ २५ ॥ पियदंसणाइ भणिया कत्थ तुमं
जासि ? साविहु भणेइ । उववासपारणत्थं नएमि रण्णो कए एयं ॥ २६ ॥ लद्धावसरा पावा विसलित्तकरा कराउ

दासीए । गहिऊण मोयगं तं परिलोलइ जायचुज्जं व ॥ २७ ॥ विसभावियं करेउं पुणरवि दिन्नं करम्मि चेडीए । माणवि वणे गंतूणं तं अप्पइ महिमहिंदस्स ॥ २८ ॥ वीमंसइ सोवि मणे लहुयाणं बंधवाण अद्दाउं । नहु मह जिमिउं जुज्जइ विसेसओ पारणदिणम्मि ॥ २९ ॥ तो गुणमणिसिंधूणं बंधूण समीवगाण सो देइ । अद्धद्धं काऊणं, मोयगं तं खु तेऽवि तओ ॥ ३० ॥ भुंजंति जाव सहसा ताव य विसलहरिमुच्छिया पडिया । तो राया जीवावइ ते मंतोसहिउवाएहिं ॥ ३१ ॥ जुयलं । दासीमुहाओ राया विमायकरफंसियं तयं सुणिउं । मइनाणेणं जाणइ विसमविसविमिस्सणं तत्थ ॥ ३२ ॥ चिंतइ मणम्मि राया तइया दिज्जंतयंपि रज्जमिणं । चइऊणं हा संपइ साऽहिलसइ पावकम्मेणं ॥ ३३ ॥ जइ कहविहु दिव्ववसा खद्धो हुंतो य मोयगो एसो । ता अवसाणपरोऽहं मरिउं नरएगओ हुंतो ॥ ३४ ॥ तम्हा पज्जत्तं मे, रज्जेणमणत्थसत्थमूलेणं । जस्स विवागो एसो मए सयं चेव परिणाओ ॥ ३५ ॥ वेमाउयम्मि भाए ठविऊणं रज्जसंपयं सयं । निव्वेयरसाइण्णो राया दिक्खं पवज्जेइ ॥ ३६ ॥ गीयत्थो विहरंतो कमेण उज्जेणियं पुरिं पत्तो । सो तत्थ ठियं संघं तवम्मि पुच्छइ अविग्घं भो(तो) ॥३७॥ विग्घस्स कारणं सो भणेइ रण्णो पुरोहियस्स सुए । विहरंतो रायरिसी, पुरोहियघरम्मि संपत्तो ॥ ३८ ॥ अइउच्चसरेणं सो दिंतो धम्मासिहं मुणी तत्थ । घरदासेहिं निसिद्धो पुणो पुणो भणइ तं चेव ॥ ३९ ॥ तत्थागएण रण्णो सुएण सुणिऊण दियसुयजुएणं । आगंतूण बलेणं नीओ स मुणी घरस्सुवरिं ॥ ४० ॥ भणिओ य मुंड ! संपइ नट्टं नट्टेसु अम्ह पुरओ तं ।

तो रायरिसी जंपइ तालं वाएह दोवि तुमे ॥ ४१ ॥ हत्थेहिं चेव तालं वायंताणं पणच्चिय खणं सो । तज्जइ रे रे
मूढा ! भंगं तालस्स किं कुणह ? ॥ ४२ ॥ जणणिजणएहिं एयं तुम्हे रे कुलकलंकसंकासा । सिक्खविया नो तालं,
भज्जेह इमम्मि नट्टे जं ॥ ४३ ॥ तो कुविया ते पावा भंजेमो मुंडमस्स मुंडस्स । इय जंपंता तत्ताडणाय समुवट्ठिया
दुट्ठा ॥ ४४ ॥ तत्तो निजुद्धकुसलो संधीओ ताणअंगुवंगाणं । उप्पाडिय पाडिअ महियलम्मि स मुणी वणं पत्तो
॥ ४५ ॥ राया तं वुत्तंतं मुणिउं तत्थागओ निरिक्खेइ । अक्खमदेहे दुन्निऽवि नवरं संचालियक्खिपुडे ॥ ४६ ॥
राया चिंतइ मुत्तुं सायरचंदं सहोयरं मज्झ । सम्मं निउद्धकुसलो अवरो भुवणम्मि नो अत्थि ॥ ४७ ॥ तो राया
गंतूणं सूरीणमुवस्सयम्मि ते नमिउं । पुच्छेइ कुणह सज्जे एए पावेऽवि पसिऊणं ॥ ४८ ॥ सूरीवि भणइ नरवर !
अम्हाणं एरिसो न इत्थत्थि । दक्खो निउद्धविसए जइ पुण सो पाहुणो हुज्जा ॥ ४९ ॥ सुद्धिं तस्स वियाणिय
सयं वणे जाइ नरवरो तत्तो । सागरचंदं पिक्खिय लज्जाइ अहोमुहो जाओ ॥ ५० ॥ पणइपरं तं स मुणी उवा-
लहइ साहु साहु नरनाह ! । चंडवडिंसयवंसो तुमए उज्जोइओ अज्ज ॥ ५१ ॥ संजमजुयाण चरणज्जुयाण साहूण
विग्घकरणपरं । नियतयणंपि न वारसि अहो अहो तुज्झ ही रज्जं ॥ ५२ ॥ राया भणेइ– भयवं ! अवराहं खमसु
मज्झ पसिऊणं । सज्जीकुणेसु एए विग्घं न पुणो करिस्संति ॥ ५३ ॥ तो रायरिसी रायं साहइ जइ जिणवरिंद्प-
वज्जं । पडिवज्जंति तओऽहं सज्जसरीरे करेमि इमे ॥ ५४ ॥ रायदियनंदणेहिं पडिवन्नं तस्स वयणमिय तत्तो । सज्जी-

काउं दिक्खिय अन्नत्थ मुणी स विहरेइ ॥ ५५ ॥ साहु अहं पुण दिक्खिऊण भवसायराउ उद्धरिओ । मुणिचंदरायपुत्तो इय चिंतिय तवइ तिव्वतवं ॥ ५६ ॥ माहणतणओ दूमइ मणंमि जं दिक्खिओ छलेणाहं । जिणधम्मम्मि दुगुंछं कुणमाणो तवइ उग्गतवं ॥ ५७ ॥ ते दोऽवि तवं चरिउं समाहिणा पाविऊण तह मरणं । अभुन्नं नेहपरा, सुरलोए सुरवरा जाया ॥ ५८ ॥ तत्थ पइन्ना एसा परुप्परं तेहिं नेहओ विहिया । जो पढमं चवइ इओ बोहेयव्वो य सो तेणं ॥ ५९ ॥ अह भरहवासकमलातिलयं रायगिहनामयं नयरं । तं पालइ निवसेणीपणओ सिरिसेणिओ राया ॥ ६० ॥ तत्थेव पुरोहियसुयजीवो चविऊण देवलोगाओ । उयरम्मि मेइणीए दुगुंछकम्माउ ओइन्नो ॥ ६१ ॥ तम्मि य पुरम्मि निंदू आसी धणसत्थवाहपाणपिया । मेयस्स भारियाए तीए जाया समं पीई ॥ ६२ ॥ सा निंदू पइदियहं परितप्पंती सुयाण दुक्खेणं । कइयावि मेइणीए समागयाए गिहं पुट्ठा ॥ ६३ ॥ सहि ! किं दूमियचित्ता मिलाणवयणा य दीससे निच्चं ? । सावि हु भणेइ हंजे सुयाण मरणस्स दुक्खेणं ॥ ६४ ॥ तो मेइणीइ सुणिउं तव्वयणं साहियं पुरो तीए । जइ मह होही पुत्तो ता तुज्झ समप्पइस्सामि ॥ ६५ ॥ विहिणो वसेण दुण्हवि गब्भो समकालमेव संजाओ । समयम्मि मेइणीए हुत्था बालो अबालगुणो ॥ ६६ ॥ निंदूवि जायमित्तं मयकन्नं मेइणीइ दाऊणं । नियहियजणेण तीए आणावइ गोविऊण सुयं ॥ ६७ ॥ गेहम्मि आगयाए तं बालं पाडिऊण पयपुरओ । सेईए इब्भपिया सपिम्मगब्भं इमं भणइ ॥ ६८ ॥ तुह बहिणि एस पुत्तो नहु मह तणओ य एस जीवेउ । उलवइ

तस्स नामं मे अज्जो इअ जणसमक्खं ॥ ६९ ॥ मायंद इच्चुज्जाणे वड्ढंतो सत्थवाहगेहम्मि । अम्मापिऊण परमं जणेइ पिम्मं स मेअज्जो ॥ ७० ॥ उवज्झायसुहाउ कलाओउसं पिअइ सो जहिच्छाए । उज्जाणाइसु कीलइ समवयनियमित्तपरियरिओ ॥ ७१ ॥ संपत्तो य कमेणं तरुणीयणनयणकोइलरसालं । मयणसरपसरलीलाउज्जाणं जुव्वणं एस ॥७२॥ पिउणा तस्स करग्गहहेउं तत्थेव अट्ठ कन्नाओ । इब्भाणं गहियाओ रइपीइसमाणरूवाओ ॥ ७३ ॥ अह पुव्वमित्तदेवो आभोएऊण ओहिणाणेणं । तं नियमित्तं बोहइ परं न बुज्झेइ कम्मवसा ॥ ७४ ॥ तो सो तियसो चिंतइ जा दुक्खेसु न ठावइस्सामि । ताव न धम्मे सम्मं करिस्सइ उज्जमं एसो ॥ ७५ ॥ तो तियसो मेयस्स य तप्पिउणो आविसेइ देहम्मि । इत्थंतरंमि सोऽविहु मेयज्जो वरहयारूढो ॥ ७६ ॥ परियणकलिओ अइफारसारसिंगारभासुरसरीरो । पाणिग्गहणनिमित्तं चलिओ अट्ठिब्भकन्नाणं ॥ ७७ ॥ जुयलं । वज्जिरतूररवेहिं पूरंतो अंबरं अविहवाणं । तह धवलमंगलेहिं सो पत्तो जाव रायपहं ॥ ७८ ॥ ता तत्थ दुहावि सुराविट्ठो मेओ स तं महारूवं । पिक्खिवि अक्कंदंतो भणई पासट्ठियं भज्जं ॥ ७९ ॥ जइ सा न मुया हुंति मह दुहिया पिययमेऽहुणा तीए । एवं मयावि करगहमहुस्सवो निम्मिओ हुंतो ॥ ८० ॥ इत्थीसहावचवलत्तणेण साऽणुलिया पियं भणइ । मा रोवसु एसोऽविहु तुह तणओ पिय ! न संदेहो ॥ ८१ ॥ मेओ विन्नायतत्तो धाविय रोसेण तं पए गहिउं । पाडेइ तुरंगाओ मयमत्तमयंगओव दुमं ॥८२॥ तं पुण एवं तज्जइ धिद्धि रे पाव ! मेयजाओऽवि । मलिणीकुणेसि किं अइनिम्मलकुलसंभवे लोए

॥ ८३ ॥ तो गहियबाहुणातं बलेण वुणयस्स वइखड्डाए । मेयज्जं सो खिवई नरए बहुपावकारिं व ॥ ८४ ॥ लज्जाइ दीणवयणं तं भासइ सो धरित्तु दिवतणुं । अज्जवि नह बुज्झिहिसी एवमवत्थं गओवि तुमं ॥८५ ॥ मेयज्जो तं भासइ पढमं मह हरसु जाइमालिन्नं । पच्छा तुम्हुवइट्ठे धम्मे परमायरं काहं ॥ ८६ ॥ ता पडिभणेइ देवो अव-णेमि कहं कलंकपंकं ते । साहइ सोऽविहु सेणियरण्णो कन्नं विवाहेउं ॥८७ ॥ तत्तो छागो एगो पुरीसमज्झम्मि रय-णसंघायं । मुंचंतो पइदिवसं देवेण समप्पिओ तस्स ॥ ८८ ॥ अह तेण य मेएणं थालं भरिऊण पवररयणेहिं । सेणियपुरओ धरिउं पुत्तकए पत्थिया कन्ना ॥ ८९ ॥ रण्णा निभच्छिओऽविहु पइदिवसं रयणढोयणं काउं । वारि-ज्जंतोऽवि जणेण मग्गए रायकन्नं सो ॥९०॥ एयस्स कओ रयणाण आगमो दुज्जणस्स व गुणाणं । इय चिंतिय अभ-एणं पुट्ठो सो एगया मेओ ॥ ९१ ॥ भो ! कारुअ तुज्झ कओ रयणाणं आगमो ? स तं भणइ । अम्ह छगलस्स एअं रयणाणि पुरीसयं देव ! ॥ ९२ ॥ अभएणावि स भणिओ– एयं छागं निवस्स अप्पेसु । जह सो पूरइ वंछं तेणावि तहेव पडिवन्नं ॥ ९३ ॥ सो छगलो निवगेहे बद्धो मलमेव मुंचइ न अन्नं । पुनरवि तग्गिहमेओ रयणाणि तहेव मुंचेइ ॥ ९४ ॥ अभएण तओ नाओ नूणं देवस्स एस माहप्पो । नहु कोऽवि जए अत्थो अगोयरो बुद्धिमंताणं ॥ ९५ ॥ तं वाहरेइ अभओ, वेभारगिरिम्मि पवररहमग्गं । कुणसु सुहेणं जेणं गंतूण नमिज्जए वीरो ॥ ९६ ॥ तम्मि उ तहेव विहिए सुरेण पुणरवि पुरस्स बहिभाए । कारावइ सोवण्णं पायारं पवरकविसीसं ॥ ९७ ॥ पुणरवि

भणेइ मेयं– आणावसु पुरबहिं पओरासिं। नितयणयण्हाणहेउं तेणावि तहेव तं विहियं ॥ ९८ ॥ नियछत्ततले जलनिहिजलंमि ण्हाविअ निवोऽवि मेयज्जं। नियकन्नं परिणावइ गुरुआ लुंपंति नहु वायं ॥ ९९ ॥ तह अठाणवि ताणं इब्भाणं कन्नगाओ परिणेउं। नवनेहनिब्भररमणं, रमेइ सो पणइणीनवगं ॥ १०० ॥ बारसवरिसे तेणं तह्-इयाहिंपि जाइओ स सुरो। देइ तओ चउवीसं वरिसे भुंजेइ सो भोए ॥ १०१ ॥ भोगेहिं रोगेहि वनिविण्णो परिहरित्तु गिहवासं। नवभज्जाहि समेओ, मेयज्जो लेइ पव्वज्जं ॥ १०२ ॥ गुरुणो नवपुव्वाणि य स चक्कवट्टीव नव-निहाणाइं। पाविय मोहनरिंदं निक्कंदइ सयलबलकलियं ॥ १०३ ॥ अह रायगिहे नयरे विहरंतो अन्नया स मुणि-सिंहो। इरियासमिइसमेओ पत्तो सुण्णारगेहम्मि ॥ १०४ ॥ सेणियनिवआइट्ठो अट्ठसयं पइदिणं सुवण्णजवे। स कुणइ तेहिं राया जिणपुरओ सत्थियं देइ ॥ १०५ ॥ तम्मि समए सुवण्णे घडिऊण जवे सुवण्णयारो सो। केणवि कज्जेण गओ घरस्स अब्भंतरे सहसा ॥ १०६ ॥ कुंचो पक्खी भक्खब्भमेण तस्संगणम्मि कीलंतो। गिलइ जवे सोवण्णे पिक्खंतस्स य मुणिंदस्स ॥१०७॥ तो ते य अपासंतो सुवण्णयारो भणेइ मेयज्जं। केणंगणाओ हरिया सोवण्ण-जवा स नियभीओ ? ॥१०८॥ देवच्चणस्स समओ अइकमइ दुद्धरस्स रायस्स। ता पसिऊणं साहसु दयापरा हुंति मुणिपसहा ॥ १०९ ॥ कुंचविहगस्स एसो उयरं फोडिस्सइ फुडं पावो। इय वीमंसिय स मुणी मोणवयं चेव सेवेइ ॥ ११० ॥ जाणंतो सुण्णारो चोरं तं चेव मुणिवरं मूढो। मोणावलंबणाओ इय चिंतइ नियचित्तम्मि

॥ १११ ॥ जाव न ताडिस्समिमं ताव न सबं कहिस्सए एस । चोराण लक्खणमिणं जं ते मोणं च्चिय कुणंति ॥ ११२ ॥ इय चिंतिय अल्लेणं वद्धेणं बंधिउं मुणिंदसिरं । कीलयभामणजोगा अइगाढयरं कुणइ चम्मं ॥ ११३ ॥ पावनिरयस्स एयस्स कह मुहं पिक्खिमो दुरप्पस्स । इय नयणा तस्स तया नीहरिय अहोमुहा जाया ॥ ११४ ॥ स मुणी जाणइ बद्धं संजमरज्जस्स पट्टबंधुवमं । भवतावहरे य तहा कसायहारे सुहासारे ॥ ११५ ॥ झायइ मुणी मणम्मी किं न मए अज्ज अज्जियं सुकयं? । जाजावरपाणेहिं मइ जीवइ जइ इमो पक्खी ॥११६॥ उक्तंच—स्वस्थावस्थासु को नैव, कृपां कुर्वीत जन्तुषु ? । यस्तु प्राणप्रहाणेऽपि, कृपालुः स कृपापरः ॥ ११७ ॥ उवयारं के धणिणो धणेण न कुणंति इत्थ नहु चुज्जं । पाणपयाणेणं पुण जे सत्तुवयारिणो ते य ॥ ११८ ॥ रे जीव ! जायणाओ काउ न सहियाउ दुगइपत्तेणं ? । एसा पुण सकयत्था जा जाया जीवरक्खकए ॥ ११९ ॥ इय उवसमरसभावियमणस्स उप्पन्नकेवलसिरिस्स । मेयज्जस्स य रिसिणो सिद्धिसिरी झत्ति अणुरत्ता ॥ १२० ॥ अह तग्गिहम्मि फालिज्जमाणइंधणयदारुणो खण्डं । उप्पइऊणं लग्गं गलमूले तस्स कुंचस्स ॥ १२१ ॥ तग्घायपीडियाओ कुंचगलाओ य ते जवे दट्ठुं । पडिए सुवण्णयारो मणम्मि घणमणुसयं वहइ ॥ १२२ ॥ रण्णो भएण दिक्खं गहिऊण सुवण्णयारओ तत्तो । अहिणंदइ महिनाहं, उच्चसरं धम्मलाभेणं ॥ १२३ ॥ भयगहियाविह दिक्खा पालेयबा पयत्तओ तुमए । इय सिक्खविउं राया ! पेसइ तं सुण्णयाररिसिं ॥ १२४ ॥ एयं चारु चरित्तयं तिजगईलोयस्स विम्हावयं, मेयज्जस्स महेसिणो

सहियए धारिसु तत्तंपिव । काथवाऽणुवमा खमा अणुदिणं सम्मत्तसंसूइया, तुम्हेहिं जह पाउणेह परमं निवाणल-च्छीसुहं ॥ १२५ ॥ उपशमे मेतार्यकथा—आद्यमुपशमाख्यं सम्यक्त्वलक्षणमुक्त्वा द्वितीयं च संवेगाख्यं सम्यक्त्वल-क्षणं गाथोत्तरार्द्धेनाह—

संवेगो मुक्खं पइ अहिलासो भवविरागो उ ॥ ४४ ॥

व्याख्या—'मोक्षं प्रत्यभिलाषः' शिवगतिं प्रत्याकाङ्क्षा संवेगः, तुशब्दाद्भवविराग इति । सम्यग्दृष्टिर्हि नरामराणां वैषयिकं सुखं दुःखानुषङ्गितया दुःखत्वेन मन्वानः सिद्धिसौख्यमेव सुखत्वेन मन्यते । उक्तं च—नरविबुहेसरसुक्खं, दुःखं चिय भावओ अ मन्नंतो । संवेगओ न मुक्खं मुत्तूणं किंपि पत्थेइ ॥ १ ॥ इति गाथोत्तरार्द्धार्थः ॥ ४४ ॥ भा-वार्थस्तु दवदन्तोदन्तात् ज्ञेयः, स चायम्—

अत्थि निजुहपुरंपिव विबुहजणसमाइन्नं उववणं व पुन्नागपडिपुन्नं पायारोवरिदीप्पंतरयणकविसीसं हत्थिसीसं नाम नयरं–जत्थ धुवं वणियाणं ववहारपराण धणसमिद्धाणं । धणियारयाण लीलं धणओवि न पावए कहवि ॥ १ ॥ तत्थ समरचउरवेरिवारपेरियदंतिभग्गदंतो दवदंतो नाम राया—कित्ती रणहयरिउचयसम्भूया जस्स चन्दकरसरिसा । भुज्जं करेइ दुज्जणमणवणदहणं हुयासुव्व ॥ १ ॥ अन्नया सो दवदंतराया तिखंडभरहेसरं दुद्धरवेरिरायपराजयसमुद्धर-कंधराबंधं सिरिजरासंधं पडिवासुदेवं सेविउं रायगिहं नगरं गओ । तम्मि समए हत्थिणाउराउ नीहरिऊण सपरिय-

णेहिं पंडवेहिं तस्स देसो छलं लहिय लसिओ । इमं सरूवं दवदंतेण रायगिहाउ वलिएण सुणिय परमं पओसमु- घहंतेण नासियदिन्नेणं नियसिन्नेणं सह हत्थिणाउरं समन्तओ जंबूदीवंपिव लवणसायरेणावेढियं । तओ सो दूयमुहेण पंडवे भणावेइ—अम्ह देसो तुम्हेहिं धीरजणगरहणिज्जेण छलेण उवहुओ न बलेण, जओ—छलमुचियं कीवाणं, कीवाण व धणियविरहिए ठाणे । बलवंताण नराणं न एस मग्गो सुयंसाणं ॥ १ ॥ ता जइ तुम्हाण पयंडं भुयदंडच- लमत्थि तो पुराओ निग्गंतूण मम परकमपईवसिहाए सलभलीलमुव्वहह । तओ एवं दूयवयणतज्जियावि पंडवा भयभीया सियाला इव बिलाओ न नीहरिया सनयराओ जुज्झिउं । तओ बहुदिणरोहेण निव्विण्णो दवदंतो हत्थि- सीसपुरं गओ, एवं चिंतिऊण—खत्तियकुलुब्भवाणं सम्मुहपत्ताण सिंहपोयव । जुज्झं काउं उचियं अन्नह अजसो फुरइ लोए ॥ १ ॥ इओ य नाणेणं रज्जं पालयंतो दवदंतो कइवयदिणेहिं वइक्कंतेहिं सिरिनेमिनाहसीससिरिधम्मघोससूरि- वयणमहद्दहसंभूयपभूयसंवेगरसरंगततरंगतरंगिणीए धम्मदेसणाए ण्हाऊण विगयपावसंतावो रज्जमकज्जं भंडारं कारागारं पेयसीओ रक्खसीओ विसए विसे चउरंगसाहणं दुग्गइसाहणं व मन्नंतो संवेगवेगओ संसारसुहमुज्झिय वज्जिय सव्व- सावज्जकज्जमणवज्जं पव्वज्जं पडिवज्जइ । तओ रायरिसी कमेण गीयत्थो होउं विहरंतो पंडवपालिए हत्थिणाउरे गोउर- दुवारे मेरुव्व निप्पकंपो पडिमं ठिओ । तम्मि समए रायवाडियाए निग्गच्छंतेहिं पंचहिं पंडवेहिं पलोइय वाहणेहिं उत्तरिय नमंसिओ भावसारं मुणिसरो—अहो ! दुक्करकारओ एस रायरिसी । इय अभिनंदिय पुरओ पत्थिएसु तेसु

तत्थ आगओ सपरियणो पयईए दुज्जणो दुज्जोहणो । तं मुणिंदं पिक्खिय अणेण अम्हाणं पुव्वपुरिसागयं कित्तिसव्वस्समवहरियमिय पुव्ववइरमणुसरंतो माउलिंगेण ताडेइ । तब्भावं मुणंतेण तप्परियणेण य पाहाणखंडेहिं आहणिऊण लिट्ठुरासीकओ ।तओ रायवाडीए वलिएण जुहिट्ठि(र)रण्णा तत्थ तं मुणिमपिच्छंतेण तट्ठाणे लिट्ठुरासिं पलोयंतेण नियपरियणो पुट्ठो–कहिं विहरिओ ? स महप्पा धम्मकप्पदुकप्पो ? तेणावि दुज्जोहणवुत्तंतो तप्पुरओ वुत्तो । तं सुणिय अईव अधिइं कुणंतो पायकेहिं लिट्ठुरासिं दूरे कारायिय अंगसंवाहगहिंतो अंगं सज्जं निम्मायिय सयं तं मुणिवरं खामिय पत्तो पासायं जुहिट्ठिरनरवरो, दवदंतोऽवि संवेगावेगेण एवं भावेइ–एस मे सासओ अप्पा, नाणदंसणसंजुओ । सेसा मे बाहिरा भावा, सव्वे संजोगलक्खणा ॥ १ ॥ तओ स कोरवेसु अवकारकारिसु पंडवेसु य उवयारपरेसु समचित्तवित्तिं धरेइ । अह जुहिट्ठिरराओ सेवावसरागयं दुज्जोहणं एवं निब्भच्छइ,–अरे कुलकुठार ! ! अंगीकयमायंगायार ! ! इहभवपरभवदुगुंछणिज्जं मुणिवरावमाणणं किं तए कयं, ? तइया किं तुमं कत्थवि गओ आसि, ? किंवा तस्स परक्कमं गीयमाणं न तए सुयं ? जइया तेण वेढियं इत्था हत्थिणाउरं, अणेण य रायरिसिणा पुव्विं पच्छावि वयं जिया, संपइ पुण पंचावि इंदिया, धरिओ य दुद्धरो पंचमहव्वयभारो, अओ को तं निज्जिणिउं सक्कइ ? । तओ सोऽवि रायरिसी तं दुस्सहं परीसहपीडं सहंतो संवेगावेसेण झाणंतरियं पडिवज्जिय गुणसेणिं समारुहिय संपत्तकेवलनाणो सिवपुरं गओ–वुत्तंतमेयं दवदंतसाहुणो, चित्ते निसित्ता सममित्तसत्तुणो । संवेगरंगंगणनट्टसी-

ठरा, इयेह सिद्धिं गमिषेह कीरसा ॥ १ ॥ संवेगविषये दवदन्तकथा, द्वितीयं संवेगाख्यं सम्यक्त्वलक्षणमुक्त्वा तृतीयं निर्वेदाह्वं सम्यक्त्वलक्षणं गाथापूर्वार्द्धेनाह—

निव्वेओ चागिच्छा तुरियं संसारचारयगिहस्स ।

व्याख्या—'त्वरितं' शीघ्रं 'संसारचारकगृहस्य' भवकारागारस्य त्यागेच्छा निर्वेद इति । सम्यग्दर्शनी हि दुःख-दौर्गत्यगहने भवकारासदने कर्मदण्डपाशिकैस्तथा तथा कदर्थ्यमानः प्रतिकर्त्तुमक्षमो ममतारहितश्च दुःखेन निर्विण्णो भवति, उक्तं च—नारयतिरियनरामरभवेसु निव्वेयओ वसइ दुक्खं । अकयपरलोयमग्गो ममत्तविसवेगरहिओ य ॥ १ ॥ अन्ये तु संवेगस्यार्थविपर्ययमाहुः—संवेगो भवविरागः, इति गाथापूर्वार्द्धार्थः, भावार्थस्तु हरिवाहनकथया कथ्यते तथाहि—

भोगिभिर्विहितावासाऽनन्तभोगविभासिता । भोगावतीव सश्रीका, भाति भोगावती पुरी ॥ १ ॥ गवाक्षलक्षनिर्गच्छद्धूपधूमोर्मिसन्ततिम् । वीक्ष्य व्योम्यम्बुभ्रान्त्या, यत्र नृत्यन्ति केकिनः ॥ २ ॥ दुर्दान्तारातिभोगीन्द्रपक्षीन्द्रोपमविक्रमः । सुरेन्द्रजित्वरैश्वर्यस्तत्रासीदिन्द्रदत्तराट् ॥ ३ ॥ मणिप्रभाभिधा तस्य, पत्नी सच्छीलशालिनी । हरिवाहनविख्यातः, पुत्रोऽस्या हरिवाहनः ॥ ४ ॥ तत्रैव हि पुरे सूत्रधारो मन्दरनामकः । तस्यापि तनयो विज्ञो, नरवाहनसंज्ञकः ॥ ५ ॥ श्रेष्ठिनो वसुसारस्य, तनुभूश्च धनञ्जयः । त्रयोऽपि राजपुत्राद्यास्ते मित्रत्वं मिथोऽभजन् ॥ ६ ॥

परित्यक्तान्यकार्यास्ते, धनार्जनपराङ्मुखाः । स्वस्वपन्तृप्रसादेन, प्रविलेसुर्यथासुखम् ॥ ७ ॥ अथ राज्ञा निजः सूनु-
र्गिराऽतर्ज्यत रूक्षया । षट्त्रिंशद्दण्डशस्त्राणामभ्यासं किं निघृणसि ? ॥ ८ ॥ यदि त्वं मन्यसे मित्रैस्सदा स्वैमी मिलः
क्वचित् । देशं ममान्यथा मङ्क्षु, परित्यज्य पयः पिबेः ॥ ९ ॥ एवं सूत्रकृता श्रेष्ठिवरेणापि स्वनन्दनौ । उक्तावे-
कत्र संगत्य, वने तेऽमन्त्रयन्निति ॥ १० ॥ प्रमाणीक्रियते पित्राज्ञा चेत्तद्विरहो मिथः । अन्यथा परिहारस्तु, कर्त्तव्यो
निजनीवृतः ॥ ११ ॥ वरं पित्रोरपि त्यागो, वरं मृत्युधनक्षयौ । वरं गतिर्विदेशे च, न मित्राणां वियोगता ॥ १२ ॥
इत्यालोच्य परित्यज्य, पित्रादिस्नेहमाशु ते । प्रस्थिताः पतिताः क्वाप्यरण्येऽतिदृढसौहृदाः ॥ १३ ॥ तेऽरण्यभूमि-
माक्रम्य, यावद्व्यालादिसङ्कुलाम् । तावदग्रे समायान्तमपश्यन्मत्तदन्तिनम् ॥ १४ ॥ करमुत्पाट्य वन्येभोऽधावद्या-
वदिमान् प्रति । तावत्तत्क्षवणिक्पुत्रौ, काकनाशं प्रणेशतुः ॥१५॥ सिंहनादं वितन्वानो, हरिवद्धरिवाहनः । गजशिक्षा-
विधौ दक्षोऽगच्छत् कुञ्जरसम्मुखम् ॥ १६ ॥ क्रमेण मुष्टिघातैश्च, तं विचेष्टं विधाय सः । गवेषणकृतेऽचालीत्पुरतः
सुहृदोस्तयोः ॥ १७ ॥ प्रतिवृक्षं प्रतिनदि, प्रतिशैलं गवेषयन् । न क्वापि लेभे तत्शुद्धिं, दरिद्र इव सेवधिम् ॥ १८ ॥
स क्रमेण भ्रमंल्लोलकल्लोलकुलसङ्कुलम् । पुरः सरो निरैक्षिष्ट, शिष्टस्वान्त इवामलम् ॥ १९ ॥ सुहृद्वियोगदुःखार्त्तः,
स सुधीरपिबत्पयः । पालिद्रुमात्समुद्भूतैः, फलैश्चाहारमातनोत् ॥ २० ॥ तत्रोपविश्य स स्वान्ते, चिन्तयत्किमु
हाऽजनि ? । यत्कृते सकलं त्यक्तं, ते मित्रे अपि मे गते ॥ २१ ॥ सुखं वा यदि वा दुःखं, जायते कर्मतोऽङ्गिनाम् ।

तथापि धीरता धीरैने त्याज्या व्यसनेऽपि हि ॥ २२ ॥ आत्मानमिति सम्बोध्य, स सुधीः सरसस्ततः । दिग्सुदीच्यां महारामे, प्रविवेश नृपात्मजः ॥ २३ ॥ तदन्तरे पुष्करिणीपृष्ठद्वारस्यादूरात् । क्षेमङ्कराख्ययक्षस्याद्राक्षीदभ्रङ्कषं गृहम् ॥ २४ ॥ सायं सोऽयमपायस्य, रक्षार्थं वसतेः कृते । प्रविश्य तस्य च द्वारे, कपाटघटनां व्यधात् ॥२५॥ तस्मिन् सुप्ते रजन्यर्द्धे, प्ररणन्मणिनूपुराः । प्रापुरप्सरसो दिव्यनेपथ्याः तत्र मन्दिरे ॥ २६ ॥ तत्र ताभी रणद्वेणु-वीणानादपुरस्सरम् । नृत्यमासूत्रयाञ्चक्रे, करणैश्चित्तहारिभिः ॥ २७ ॥ ततो वासांसि ता मुक्त्वा, परिधायापराणि च । नृत्यश्रमापनोदाय, ययुः पुष्करिणीं प्रति ॥ २८ ॥ स्वैरमप्सरसस्तत्र, यावत्स्नानं व्यतन्वत । तावदुद्घाट्य स द्वारं, तासां वासांस्युपाददे ॥ २९ ॥ प्रविश्य यक्षवेश्मान्तः, पिधाय द्वारमञ्जसा । कुमारो निर्भयस्तस्थौ, किमसाध्यं महौजसाम् ? ॥ ३० ॥ विधाय जलकेलिं ता, व्यावृत्ता मन्दिरान्तरे । स्ववासांस्यपश्यन्त्यः, शोधयाञ्चक्रिरेतराम् ॥ ३१ ॥ मन्दिरं पिहितद्वारं, दृष्ट्वा ता अवदन्मिथः । नूनं केनापि धूर्त्तेण, वस्त्राण्यपहृतानि नः ॥ ३२ ॥ साटोपं ता अभाषन्तामर्षेणोद्धुरया गिरा । उद्घाटय नर! द्वारं, चेत्तवास्ति जिजीविषा ॥ ३३ ॥ अस्मद्वासांसि चेन्न त्वमर्प्पयिष्यसि तद्ध्रुवम् । क्षेप्स्यामोऽम्बुनिधौ कोपाद्भवनं भवता समम् ॥ ३४ ॥ तच्छ्रुत्वा श्रितमौनस्य, तस्यैका यक्षिणी जगौ । नैष दण्डेन संसाध्यः, कोऽप्ययस्त्येष नराग्रणीः ॥ ३५ ॥ ततः सर्वाभिसारेण, सामवाग्भिः प्रलोभ्य तम् । जगुर्वेद गृहीतं नो, वास्त्रं केनाथवाऽर्पय ॥ ३६ ॥ सोऽप्यब्रवीद्रयाद्यायुरादाय वसनानि वः । भविताऽस्मे

गलस्तस्माद्यात यात तदन्तिकम् ॥ ३७ ॥ साहसेन पचोभिश्च, तस्य ता रञ्जिताशयाः । जजल्पुर्वत्स ! सन्तुष्टाः, स्मो वयं तद्वरं वृणु ॥ ३८ ॥ सोऽप्यपालस्य नह् [illegible]नि वः । प्रसद्योपाददीध्वं मे, क्षमध्वं चापराधिताम् ॥ ३९ ॥ ता उपादाय वस्त्राणि, परिधाय च तं जगुः । वत्स ! त्वं राजपुत्रोऽसि, चरित्रेणामुना ध्रुवम् ॥ ४० ॥ खड्गरत्नं गृहाणेदं, जगद्विजयदीक्षितम् । दिव्यकञ्चुकमेतच्च, स्वप्ने पत्न्यै समर्पयेः ॥ ४१ ॥ अस्माकं वचसा मङ्क्षु, राज्यमाप्ताऽसि पुत्रक ! । दत्त्वा तद्द्वितयं देव्यः, स्वस्थानमगमन् रयात् ॥ ४२ ॥ प्रातः खड्गसहायोऽसौ, गच्छन् साहसिकाग्रणीः । पुरमेकं पुरोऽपश्यदलकासोदरं श्रिया ॥ ४३ ॥ प्रविशंस्तत्र हट्टानां, सौधानां च परम्पराम् । ददर्श वस्तुसम्पूर्णां, परं मनुजवर्जिताम् ॥ ४४ ॥ साश्चर्योऽयान्नृपागार–सप्तमीं स भुवं गतः । तत्राद्राक्षीत्कनीमेकामिन्दीवरविलोचनाम् ॥ ४५ ॥ किमेषा प्रथमा सृष्टि–र्विधात्रा रक्षिता ध्रुवम् ? । एतां दृष्ट्वा यथा नारीरन्यान्याश्च सृजाम्यहम् ॥ ४६ ॥ इति ध्यायंस्तयाऽदर्शि, हस्तन्यस्तकपोलया । कुमारो रूपलावण्यकिङ्करीकृतमन्मथः ॥ ४७ ॥ उत्थाय सादरं साऽपि, साध्वसोल्लासिविग्रहा । तमुपावेशयत्सिंहासने सिंहपराक्रमम् ॥ ४८ ॥ कुमारस्तामभाषिष्ट, किं सशोकेव लक्ष्यसे ? । साऽप्यूचे शृणु सौभाग्य–भाग्योदयवतां वर ! ॥ ४९ ॥ श्रावस्त्यां विजयाख्यस्य, पृथिवीशस्य नन्दिनी । अनङ्गलेखासंज्ञाऽहं, संश्रिता यौवनश्रियम् ॥ ५० ॥ निजवेश्मगवाक्षस्था, हृष्ट्वा विद्याभृताऽन्यदा । जयन्तनाम्ना हृत्वाऽत्र, पुरं कृत्वा निवेशिता ॥ ५१ ॥ मां स्माह खेचराधीशस्त्वां विवाह्यात्र पत्तने । राज्यं च पा-

लयन् भोगान्, सेविष्येऽहं यथासुखम् ॥ ५२ ॥ प्रयातोऽस्ति विवाहस्य, सामग्रीकरणाय सः । अद्य श्वो वा समागत्य, परिणेष्यति मां बलात् ॥ ५३ ॥ ज्ञानिना मुनिनाऽभाणि, ममाग्रे तु तव प्रियः । भावीन्द्रदत्तराजेन्द्र तनयो हरिवाहनः ॥ ५४ ॥ तन्मुनेर्वाग्विसंवादान्मम खेदोऽधिकोऽजनि । लभ्यते नहि निर्भाग्यैश्चिन्तारत्नं कचिद्भुवि ॥ ५५ ॥ ततः स्मितेन धौतोष्ठस्तां स्माह हरिवाहनः । सुभ्रु ! प्रसीद तद्विद्या–धरं वृणु मनोहरम् ॥ ५६ ॥ खेटस्य च कुमारस्य, भानुखद्योतयोरिव । अन्तरं सुभ्रु ! जानीहि, मा मुह्यो मुनिवाक्यतः ॥ ५७ ॥ कुरूपे दुर्भगेऽङ्गारश्यामे निर्गुणशेखरे । जीवितेश्वरबुद्धिं मा, कुरुष्व हरिवाहने ॥ ५८ ॥ तन्मूर्त्ति सापि पश्यन्ती, किं स एष मम प्रियः । नहि सन्तः प्रकुर्वन्ति, निन्दामन्यस्य देहिनः ॥ ५९ ॥ सज्जनानां नवः पन्थाः, कोऽपि यन्निजगर्हणाम् । कुर्वन्ति प्रथयन्तोऽन्यगुणानां परिकीर्त्तनम् ॥ ६० ॥ विमृश्येति तमाह स्म, नूनं त्वां हरिवाहनम् । मन्ये स्वमानसोल्लासैः, सुभग ! त्वद्विलोकनात् ॥ ६१ ॥ तदा हरित्करिश्रोत्रोत्तम्भनप्रवणोऽधिकम् । उल्ललास स्फुरद्वर्यतूर्यनादः समन्ततः ॥६२॥ तं श्रुत्वा कातराक्षी सा, कुमारमवदद्भिया । इतो व्रज समायाति, स जयन्तो महाबलः ॥ ६३ ॥ तदैव सोऽपि सम्प्राप्तः, कोपादूचे नृपात्मजम् । को रे त्वं कुत आयातो, मदीयान्तःपुरान्तरे ? ॥ ६४ ॥ कुमारोऽप्यवदत्खेद, ! श्रीन्द्रदत्तनृपाङ्गभूः । हरिवाहननामाग्रागां रणायोद्यतो भव ॥ ६५ ॥ इति श्रुत्वा रुषा खड्गं, करे कृत्य सुदारुणम् । कुमारेण समं योद्धुमारेभे खेचरेश्वरः ॥ ६६ ॥ तयोः प्रववृते युद्धं, रामरावणयोरिव । भग्नासिश्च कुमारेण, स बद्ध्वा

पातितो भुवि ॥ ६७ ॥ निर्जितः खेचरोऽथोच्चचरित्रैर्वीर ! मे त्वया । जह्रे रूपेण चानङ्ग–लेखाया अपि मानसम् ॥ ६८ ॥ तस्मादमूं विवाह्य त्वं, राज्यं पुर्यत्र पालय । सप्रश्रयमिति प्रोच्य, वैताढ्यं खेचरो ययौ ॥ ६९ ॥ दत्त्वा तस्यै नवोढायै, तद्दिव्यं कञ्चुकं मुदा । साम्राज्यं पालयामास, तत्र श्रीहरिवाहनः ॥ ७० ॥ तथा तत्र पुरे वासो, जातः सौराजयोगतः । यथा नहि तिलस्यापि, प्रपातो भुवि जायते ॥ ७१ ॥ सरिदारामकीलाद्रिशिखरेषु नरेश्वरः । अनङ्गलेखया साकं, विललास विलासभृत् ॥ ७२ ॥ गाम्भीर्येण सुसत्त्वेन, श्रिया च विजितोऽस्म्यहम् । इतीव नर्मदाव्याजात्सिषेवे यं सरित्पतिः ॥ ७३ ॥ रेवायामन्यदा राजा, ग्रीष्मर्तौ प्रियया सह । चकार सलिलक्रीडां, शृङ्गकोत्क्षिप्तवारिभिः ॥ ७४ ॥ रेवायां निर्भरस्नेहाऽनङ्गलेखापि सत्वरम् । सिञ्चति स्म प्रियं शृङ्गजलैः प्रेमरसैरिव ॥ ७५ ॥ जलकेलिं विधायैषा, सवयस्या सरित्तटे । विमुच्यार्द्राणि वस्त्राणि, पर्यधादपराणि तु ॥ ७६ ॥ इतस्तं कञ्चुकं दिव्यं, पद्मरागप्रभोन्चितम् । दुकूलं कूलिनीकूलान्मांसभ्रान्त्याऽगिलत् झषः ॥ ७७ ॥ कुन्ततोमरभृद्धस्तास्त्रणप्रवरा नराः । विचिक्युः सरितं यावत्तावन्मीनस्तिरोदधे ॥ ७८ ॥ तेषां प्रपश्यतां मीनोऽहार्षीद्यत्कञ्चुकं मम । अमङ्गलमिदं नूनं, राज्ञीत्यन्तः शुचं दधौ ॥ ७९ ॥ अतीव चिन्तयाचान्ता, कान्ता सा वसुधापतेः । विबोध्य वचनैर्मन्त्रैः, निन्ये वेश्म कथंचन ॥ ८० ॥ जिनेन्द्रानर्चयामास, दापयामास सा भृशम् । दानं पात्रेष्वभीतिं चोद्घोषयामास शान्तये ॥ ८१ ॥ परमेष्ठिमहामन्त्रं, गुणयामास निस्तशः । सिद्धान्तं शृण्वती कालं, गमयामास कञ्चन ॥८२॥

इतश्च दूरदेशेऽस्ति, वेन्नातटमहापुरम् । राजाऽभूत्तत्र शत्रुद्रुकुञ्जरो नरकुञ्जरः ॥ ८३ ॥ भेरिभम्भामहाढक्कानिनादैः पूरयन् दिशः । राजपाट्यां चचालैष, बहुसेनान्वितोऽन्यदा ॥ ८४ ॥ जनैः सामन्तमन्त्र्याद्यैर्विशदे सरिदम्भसि । जलकेलिं विधायैष, क्रीडाद्रौ समुपाविशत् ॥ ८५ ॥ अथ तारककैवर्त्तः, समारुह्यादिशृङ्गके । नृपं विज्ञपयामास, भूतलन्यस्तमस्तकः ॥ ८६ ॥ मयाऽद्य नर्मदानीगदेको मीन उपाददे । विदारितं च शस्त्रेण, तस्योदरमिलापते ! ॥८७॥ तस्माद्रत्नसमाकीर्णं, कञ्चुकं देव ! निर्ययौ । जलकेल्यै समेताया, राज्ञ्याः कस्या अपि ध्रुवम् ॥ ८८ ॥ इत्युदीर्य स कैवर्त्तः, कञ्चुकं रविबिम्बवत् । देदीप्यमानमुत्सङ्गे, न्यवेशयदिलेशितुः ॥ ८९ ॥ शृङ्गाररसभृङ्गारस्तनाच्छादनवाससा । युक्तं रागवता तेनारज्यत्तेलापतेर्मनः ॥ ९० ॥ राजा व्यचिन्तयत्काऽसौ, कामिनी विश्वमोहिनी ? । यस्या अयं कञ्चुकोऽपि, मनो हरति मामकम् ॥ ९१ ॥ केनापायेन सा ज्ञेया ?, कथं ग्राह्या मयेति सः ? । शूरोऽपि पञ्चबाणेषुजर्जरोऽगात्स्वमन्दिरम् ॥ ९२ ॥ हारोऽहिगरलाकारः, शृङ्गारोऽङ्गारसोदरः । परिवारोऽरिवाराभः, क्षारवद्वाससाम्भरः ॥ ९३ ॥ चन्दनं दहनप्रायं, भवनं प्रेतकाननम् । अन्तःपुरं त्वरतिकृदासंस्तस्य विरागिणः ॥ ९४ ॥ युग्मम् । सोऽथ स्वसचिवं प्रोचे, चेज्जीवेन प्रयोजनम् । तद्दिव्यकञ्चुकाधीशां, वशां विज्ञातुमर्हसि ॥ ९५ ॥ ततो मन्त्री मन्त्रवादिज्योतिश्शास्त्रविशारदान् । पृच्छन्नपि न सम्प्राप, शुद्धिं तस्या वरस्त्रियः ॥ ९६ ॥ मन्त्री ततः सप्तदिनीं, कृताशनपरिच्युतिः । राज्येश्वरीं सुरीं लक्ष्मीमाराधयदनेकधा ॥ ९७ ॥ पद्मानना पद्मपाणिः, पद्मासीना लसच्छविः ।

लक्ष्मीः प्राक् प्रकटीभूय, स्माहाऽमात्य ! वरं वृणु ॥ ९८ ॥ सोऽप्यूचे राज्याधिष्ठात्रि, ! कम्बुकस्वामिनीं स्त्रियम् ।
आनीय मे महीनाथं, प्रयच्छ स्याद्यथा सुखी ॥ ९९ ॥ साऽपि तं स्माह तत्कार्यं, क्रियते यत्फलेग्रहिः । निष्फला-
रम्भसंरम्भोऽनर्थाय हरिवद्भवेत् ॥ १०० ॥ उदेति यदि वारुण्यां, भानुश्चाङ्गारमुक् शशी । तथापि सा सती शीलं,
प्राणान्तेऽपि न लुम्पति ॥ १०१ ॥ कुप्यहं तु भवत्स्वामी, न मुञ्चति तथापि हि । तामानीय प्रयच्छामि, न स्थायीऽहं
पुनस्त्वया ॥ १०२ ॥ इत्युक्त्वा सहसा गत्वा, विद्याधरपुरं रमा । अनङ्गलेखामद्राक्षीदर्हदर्चाकृतोद्यमाम् ॥ १०३ ॥
अपहृत्य क्षणादेनां, नरकुञ्जरवेश्मनि । मुक्त्वा लक्ष्मीरथापृच्छ्य, सचिवं सा तिरोदधे ॥ १०४ ॥ तामागतां परि-
ज्ञाय, राजा राजसभागतः । स्माह स्वामिनि ! मां पश्य, प्रेममन्थरया दृशा ॥ १०५ ॥ वेन्नातटपुरस्वामी, नरकुञ्जर-
भूधनः । कम्बुकालोकनाज्जातरागस्त्वामहमानयम् ॥ १०६ ॥ साऽपि दध्यौ ध्रुवमेतदमङ्गलमुपस्थितम् । यद्वा शील-
भृतां स्त्रीणां, क्वापि नामङ्गलं भवेत् ॥ १०७ ॥ चिन्तयित्वेति साऽवोचन्नृप ! मुञ्च परस्त्रियाम् । सम्बन्धं कर्मब-
न्धस्य, हेतुं कीर्त्तिविलोपकम् ॥ १०८ ॥ रसातलं यदि स्वर्गं, स्वर्गं वापि रसातलम् । ध्रुवं याति तदापि स्वं, न
शीलं खण्डयाम्यहम् ॥ १०९ ॥ नृपः स्वार्थप्रियश्चेति, तन्निशम्य व्यचिन्तयत् । नूनं परिचयाभावादियं वक्तीदृशं
वचः ॥ ११० ॥ यतः—आसन्नमेव भजते नृपतिर्मनुष्यं, विद्याविहीनमकुलीनमसंस्तुतं वा । प्रायेण भूमिपतयः प्र-
मदा लताश्च, यत्पार्श्वतो भवति तत्परिवेष्टयन्ति ॥ १११॥ भर्त्तुर्वियोगतः साऽश्रुवार्भिर्भूमिं पयोदवत् । सिञ्चन्ती चि-

न्नतां भर्तुर्मूर्त्तिमेव न्यभालयत् ॥ ११२ ॥ इतश्च तौ तक्षसार्थवाहपुत्रौ सुहत्तमौ । हरिवाहनराजस्य, संत्रस्तौ गजतः पुरा ॥११३॥ कान्ताराान्तर्भ्रमन्तौ श्राग्, विन्ध्याचलनगोत्तमम् । प्राप्तौ मित्रवियोगार्त्ता–वद्राष्टां नरमेककम् ॥११४॥ वेणोः कुडङ्गमध्यस्थमूर्ध्वपादमधोमुखम् । धूमपं दधतं हस्तेऽक्षमालां मन्त्रसाधकम् ॥ ११५ ॥ त्रिभिर्विशेषकं ॥ सोऽपि नृक्रमसञ्चारं, मत्वा द्राग् जसिपूर्त्तिमान् । निर्गत्य वंशजालीतस्तौ स्माह मधुरस्वरम् ॥११६॥ कुतो युवां च किं कार्यं, ? येन प्राप्तौ महीधरे । किं गोत्रं नाम किं को हि, पिता ? ब्रूतां मदग्रतः ॥११७॥ तावूचतुः कुलाद्यैर्नौ, किं ते वीर ! प्रयोजनम् ?। आयातौ दैवतस्तेऽत्राऽऽरब्धसत्कृत्यपूर्त्तये ॥ ११८ ॥ सोऽपि सप्रश्रयं स्माह, साधुयोगो बभूव वाम् । सिध्यन्त्या ननु विद्याया, मन्ये पुष्पोद्गमोऽभवत् ॥ ११९ ॥ मया त्रिलोकीविद्यायाः, पूर्वसेवा व्यधीयत । भवत्साहाय्यतोऽद्यैवोत्तरसेवा विधास्यते ॥ १२० ॥ इत्युक्त्वा सहसोद्युक्तौ, तौ कृत्वोत्तरसाधकौ । साधकः साधयामास, विद्यां होमपुरस्सरम् ॥ १२१ ॥ सिद्धायां स हि विद्यायां, तौ बभाषे मनस्विनौ । युवयोरुपकारस्य, किं करोम्यधमर्णकः(म्) ? ॥ १२२ ॥ तयोरनिच्छतोः सोऽपि, रूपस्य परिवर्त्तिनीम् । अदृश्यताञ्जनं सम्यग्रिपुसैन्यविमोहिनीम् ॥ १२३ ॥ विमानकारिणीं चेति, दत्त्वा विद्याचतुष्टयम् । आत्मानं कृतकृत्यं च, मेने प्रत्युपकारतः ॥ १२४ ॥ युग्मम् । तावापृच्छ्य स विद्याभृद्गत्वा गगनवल्लभम् । निर्जित्य वैरिणः प्राज्यं, राज्यं स्वं पर्यपालयत् ॥ १२५ ॥ भ्रमन्तौ कौतुकात्पृथ्वीं, सखायौ तौ नरेशितुः । रञ्जयन्तौ गुणैर्लोकान्, वेन्नातटमवापतुः ॥ १२६ ॥ तौ श्रुत्वा जनतो

धात्र्यौ, कञ्चुकस्वामिनीहृते । तद्दिदृक्षोत्सुकौ कृत्वाऽनमन्तःपुरं गतौ ॥ १२७ ॥ तत्राश्रुमिश्रनेत्रान्तां, शीलालङ्कार-धारिणीम् । अपश्यतां नरं कञ्चिद्ध्यायन्तीं तां पुरः स्थिताम् ॥ १२८ ॥ हरिवाहननामाङ्कं, चित्रितं प्रेक्ष्य तौ पटम् । साम्यं च निजमित्रस्य, ज्ञात्वा तमपजह्रतुः ॥ १२९ ॥ तस्मिन्नपहृते ताभ्यां, साऽश्रुमिश्रविलोचना । उपालम्भयितुं लग्ना, हताशमिति वेधसम् ॥ १३० ॥ अपराधं मया किं ते ?, यच्चित्रितमपि प्रियम् । अहार्षीर्मम हत्याया, अपि त्वं न बिभेषि किम् ? ॥ १३१ ॥ हहा हस्तगृहीतोऽपि, चित्रतोऽपि गतोऽसि चेत् ? । दाक्ष्यं तेऽहं सदा ज्ञास्ये, चेद्दत्ताऽसि हृदः प्रिय ! ॥ १३२ ॥ तां तथा दुःखितां दृष्ट्वा, पटं तस्यै वितीर्य च । प्रकटीभूय वृत्तान्तं, तत्पार्श्वात्तावपृच्छताम् ॥ १३३ ॥ कस्याङ्गभूस्तव प्राण-प्रियः कर्हि विवाहिता ? । तेन त्वं ब्रूहि निश्शङ्कं, यथा त्वामुपकुर्वहे ॥ १३४ ॥ मा रोदीर्भीरु ! कान्तेन, संयोगं ते स्वशक्तितः । कुर्वहे यदि सत्यं नौ, पुरो वक्ष्यसि दक्षिणे ! ॥ १३५ ॥ साऽपि स्माह पुरी भोगावतीन्द्रेन्द्रस्य जन्मना । जयन्तखेटजयिना, हरिवाहनकेन तु ॥ १३६ ॥ विद्याधरपुरेशेन, परिणीतेतिजल्पिनीम् । तौ सुहृत्प्रेयसीं ज्ञात्वा, नेमतुः पुलकाङ्कितौ ॥ १३७ ॥ ब्रुवाते च सतीरत्न !, त्वमस्मद्भ्रातृवल्लभा । यौ तेन सह निष्क्रान्तौ, सुहृदौ विद्धि नौ हि तौ ॥ १३८ ॥ मा विषादं कुरुष्व त्वं, स्वं जानीहि प्रियान्तिके । क्षणमेकं प्रतीक्षस्व, स्वकृत्यं साध्यते यथा ॥ १३९ ॥ सा ज्ञात्वा सुहृदौ भर्त्तु-र्भृशमानन्दिताशया । अवादीद्देवरौ कार्यं, कुर्वाथां स्वेप्सितं युवाम् ॥ १४० ॥ ता नत्वा विगतक्षोभौ, सम्प्राप्तौ भूपपर्षदि । अदृष्टपूर्विणौ क्ष्मापेनापि ताविति

भाषितौ ॥ १४१ ॥ कस्माद्देशान्तरादत्र, भवन्तौ समुपागतौ ? । जानीतां ज्ञानविज्ञानादिकं किञ्चन चाद्भुतम् ॥ १४२ ॥ तावपि प्रोचतुर्देव !, रविमद्धपथेऽम्बरे । स्तश्चैवः कुर्वहे दासं, वासवं शम्भुमप्यहो ॥ १४३ ॥ वश्याकर्षणविद्वेषमोहनोच्चाटनादिकम् । अन्यदप्यखिलं यद्यद्विद्व एव तकत्तकत् ॥ १४४ ॥ राजा तौ स्माह हे प्राज्ञौ, ! कश्चुकस्वामिनीस्त्रियम् । कुर्वा विधत्तं मे रम्यगाजन्म वशवर्तिनीम् ॥ १४५ ॥ उक्तः स ताभ्यां भूपाल–श्चिन्ता कार्या नहि त्वया । प्रवर्त्तिष्यावहे क्षिप्रमावामस्मिन् प्रयोजने ॥ १४६ ॥ तूर्णं चूर्णं गृहाणैतदनेन तिलकं कुरु । यथोररीकरोत्येषा, भवन्तं तत्प्रभावतः ॥ १४७ ॥ सोत्सुकस्तिलकं कृत्वा, तेन चूर्णेन भूधनः । ययावनङ्गलेखायाः, सविधेऽधमसत्तमः ॥ १४८ ॥ एताभ्यां कृतसङ्केता, सा दृशाभ्यां विशारदा । राजानमभियानादि–कर्तव्यैरभ्यनन्दयत् ॥ १४९ ॥ कृतकृत्यमिवात्मानं, मन्वानं सा जगौ नृपम् । अष्टापदगिरौ देवान्नत्वा भोक्ष्ये न चान्यथा ॥ १५० ॥ तच्छ्रुत्वाऽऽनन्दखेदाभ्यां, पूर्णो भूपो व्यचिन्तयत् । चूर्णयोगादसौ वश्याप्यदोऽवादीत्सुदुष्करम् ॥ १५१ ॥ स सचिन्तः समाकार्य, कार्यं तत्पुरतोऽवदत् । ताभ्यामूचे च मा खेदं, कुर्वावां ते हितोद्यतौ ॥ १५२ ॥ अद्य श्वो वा यदा वक्ता, भवानष्टापदाचलम् । नेष्यावस्तां तदोचेऽसावद्यैवैषाऽऽशु नीयताम् ॥ १५३ ॥ कामान्धितेन तेनेति, प्रार्थितौ पार्थिवेन तौ । विमानं चक्रतुः क्षिप्रं, किङ्किणीध्वजराजितम् ॥ १५४ ॥ ऊचतुस्तं त्वमारुह्य, विमानं प्रियया समम् । गत्वा चाष्टापदे स्वैरमारामेषु रमस्व ताम् ॥ १५५ ॥ राजा सादरमाह स्म, प्रसद्यारुह्य भामिनि ! । वि-

मानं तीर्थमानत्यभिग्रहं पूरकात्मनः ॥ १५६ ॥ हरिवाहनमित्राभ्यां, पूर्वं तस्मिन्नधिष्ठिते । विमाने सा समारूढा, सहसा सहसा हृदि ॥ १५७ ॥ ताभ्यां तं तरसा नीत्वा, व्योम्नि राज्ञोऽमतस्त्विति । प्रोचे शेषा सतीरत्नं, हरिवाहनगेहिनी ॥ १५८ ॥ तन्मित्राभ्यामियं शक्त्या, नीयते योऽत्र कश्चन । समस्ति सुभटंमन्य, एत्य युद्धं करोतु सः ॥ १५९ ॥ ततो भूपः स्फुरत्कोपाटोपादूचे भटान्निजान् । रेरे गृह्णीत गृह्णीतैतौ चकाविव दाम्भिकौ ॥ १६० ॥ तयोर्नृपभटानां च, सिंहनादातिदारुणम् । शराशर्यभवद्युद्धं, त्रिदशासुरयोरिव ॥ १६१ ॥ विद्याबलाद्राजबलं, ताभ्यां विद्राव्य सर्वतः । तदन्तःपुरतः कन्या–युगमादाय निर्गतौ ॥ १६२ ॥ अथ मित्रपुरोद्याने, विमानादवतीर्य तौ । सशोकं सकलं लोक–मद्राष्टां कष्टनिर्भरम् ॥ १६३ ॥ दुःखस्य कारणं पृष्टः, कोऽपि ताभ्यां नरो जगौ । अनङ्गलेखाप्रेयस्या, विरहार्त्तोऽस्ति भूपतिः ॥ १६४ ॥ तद्दुःखेनाकुलो लोकः, खेदमेदुरितान्तरः । अश्रेयसो निवृत्त्यर्थं, सेवते कुलदैवतम् ॥ १६५ ॥ तच्छ्रुत्वा श्रेष्ठिसूः सिद्धपुत्ररूपं विधाय सः । गत्वा च नृपतेः पार्श्वमाशीर्वादमदान्मुदा ॥ १६६ ॥ राज्ञा दत्तासनोऽवोचद्देव ! मोद्वेगमुद्वह । सम्पादयामि तत्सर्वं, यत्ते कार्यं दुरुत्तरम् ॥ १६७ ॥ सोल्लासोऽभाषत क्ष्मापः, शक्तिः काप्यस्ति चेत्तव । देवीमनङ्गलेखां तत्साम्प्रतं समुपाहर ॥ १६८ ॥ दर्शयन्निव माहात्म्यं, पटं प्रावृत्य सर्वतः । हुङ्कारानमुचत् प्रोच्चैः, सद्ध्यानं नाटयन्निव ॥ १६९ ॥ तदैव कृतसङ्केता, विमानस्था समाययौ । अनङ्गलेखा वेगेन, नरदेवस्य संसदि ॥ १७० ॥ तदा प्राणप्रियालोकामृतस्नानीभवन्निव । नृपः कण्टकितो

जज्ञे, कूष्माण्डीफलवृन्तवत् ॥ १७१ ॥ वियोगिनोः पुनर्योगे, यदभूदनयोः सुखम् । तावेव यदि जानीतः, केवली वा न चापरः ॥ १७२ ॥ सिद्धपुत्रः पुनः स्माह, किं तेऽभीष्टं करोमि ? भोः ! । राजा तमूचे मित्रे मे, समानय मुदः कृते ॥ १७३ ॥ राज्ञो निरुपमं प्रेम, निरूप्य नटवत्स्वयम् । प्रपेदातेतरां रूपं, स्वाभाविकमुभावपि ॥ १७४ ॥ तौ वीक्ष्य नृप आत्मानं, सत्कृतार्थमबुध्यत । अनुकूले विधौ यस्मात्सर्वं भवति वाञ्छितम् ॥ १७५ ॥ राज्ञः पुरस्ताद्वृत्तान्तं, देवी मित्रे अपि स्वकम् । सकलं कथयामासुराश्चर्यजनकं नृणाम् ॥ १७६ ॥ राजा प्रमुदितस्तत्र, कनीयुग्मं स्वमित्रयोः । व्यवाहयद्यतो योग्यः, संयोगो हेमरत्नयोः ॥ १७७ ॥ ततो विजित्य मित्राभ्यां, देशान् भूरितरान् ददौ । स्वयं च तत्र साम्राज्यं, पालयामास भूपतिः ॥ १७८ ॥ अथ पित्रेन्द्रदत्तेनाहूय श्रीहरिवाहनः । स्थापितः पैतृके राज्ये, राज्यश्रीभरभासुरे ॥ १७९ ॥ स्वयमार्यसमुद्रस्य, सद्गुरोः सविधे नृपः । प्रव्रज्यां समुपादाय, शिवश्रीकामुकोऽजनि ॥ १८० ॥ हरिवाहनभूजानिर्जानिमित्रसमन्वितः । सम्यक्त्वसारमादत्त, श्राद्धधर्म्मं गुरोस्ततः ॥ १८१ ॥ रथयात्रातीर्थयात्राष्टाह्निकामारिघोषणाः । बिम्बचैत्यप्रतिष्ठाश्च, कारयाञ्चकृवान्नृपः ॥ १८२ ॥ अथ वर्षसहस्रेषु, गतेषु समवासरत् । उद्याने केवलज्ञानी, सुरसेव्यः पुरन्दरः ॥ १८३ ॥ तदागमश्रवोत्पन्नहर्षः श्रीहरिवाहनः । परिवारयुगभ्येत्य, प्रणनाम यतीश्वरम् ॥ १८४ ॥ तदा तु केवलज्ञानी, धर्म्मसर्वस्वभास्वराम् । चक्रे वैराग्यजननीं, देशनामिति तद्गुरुः ॥ १८५ ॥ सत्यं रम्या भोगा भोगाः, कान्ताः कान्ताः प्राज्यं राज्यम् । किं कुर्वन्ति प्राज्ञा यस्मादायुर्विद्यु-

न्मालालोलम् ॥ १८६ ॥ विषयामिषसंलुब्धा, मन्यन्ते शाश्वतं जगत् । आयुर्जलधिकल्लोललोलमालोकयन्ति न ॥ १८७ ॥ देशनान्ते समुत्थायाप्राक्षीद्राजा मुनिप्रभुम् । आयुर्मे कियदस्तीति ?, केवल्यपि जगावथ ॥ १८८ ॥ नवप्रहरमानं ते, समस्त्यायुर्नरेश्वर ! । श्रुत्वेति कम्पमानाङ्गो, मरणात्प्रबिभाय सः ॥ १८९ ॥ भूयांसो हि मया वर्षा, लङ्घिता उन्मदिष्णुना । शरणं कं प्रपद्येऽहमधुना मृत्युसाङ्कवन् ? ॥ १९० ॥ एवं चिन्तयतस्तस्य, राज्ञो भवविरागिणः । अस्तेर्भूरिव सञ्जज्ञे, निर्वेदः स्थानके रतेः ॥ १९१ ॥ भवभीकम्पमानाङ्गं, केवली स्माह तं नृपम् । मा खेदमुद्वहाद्यापि, न गतं किञ्चनापि ते ॥ १९२ ॥ बिभेषि यदि मृत्योस्त्वं, शाश्वतं शर्म चेहसे । प्रतिपद्यस्व तद्दीक्षां, स्वयं जिननिषेविताम् ॥ १९३ ॥ उक्तं च—"अंतोमुहुत्तमित्तं, विहिणा विहिया करेइ पवज्जा । दुक्खाणं पज्जंतं, चिरकालकयाइ किं भणिमो ? ॥ १९४ ॥ जिणभवणबिंबकारणरहजत्तापमुहसबधम्माओ । पवज्जा खलु गरुया वज्जियसावज्जवावारा ॥ १९५ ॥ कंचणमणिसोवाणं, थंभसहस्सूसियं सुवण्णतलं । जो कारिज्ज जिणहरं, तओवि तवसंजमो अहिओ ॥ १९६ ॥ चेइयकुलगणसंघे, आयरियाणं च पवयणसुए य । सवेसुवि तेण कयं, तवसंजममुज्जमंतेण ॥ १९७ ॥ इति ज्ञानिवचः श्रुत्वा, निर्विण्णो नृपतिर्भवात् । राज्ये निवेशयामास, सुतं विमलवाहनम् ॥ १९८ ॥ मिश्रध्यानशुभलेश्यासहितो हरिवाहनः । भवनिर्वेदतो दीक्षामादत्त गुरुसन्निधौ ॥ १९९ ॥ दध्यौ च यदहं धन्यो, यस्य मे भोगकर्दमे । मग्नस्योद्धरणायैवागमत् ज्ञानी पुरन्दरः ॥ २०० ॥ विमृश्येति द्वादशापि, भावना भावयन्नयम् । च-

रितान्यर्हतां धीरपुंसां सस्मार मानसे ॥ २०१ ॥ उत्पेदेऽस्य ततो घोरा, राजर्षेः शीर्षवेदना । तस्याश्चिकित्सां नाकार्षीचेतस्येवं विचिन्तयन् ॥२०२॥ राज्यं पालयता जीव !, यत् त्वयांऽहः कृतं पुरा । तत्सहस्राधुना दुःखरूपेण समुपस्थितम् ॥ २०३ ॥ उक्तं च—पुनरपि सहनीयो दुःखपातस्तथायं, नहि भवति विनाशः कर्मणां सञ्चितानाम् । इति सहगणयित्वा यद्यदायाति सम्यक्, सदसदिति विवेकोऽन्यत्र भूयः कुतस्ते ? ॥ २०४ ॥ एवं विभावयन् सूरिवचांसि च स संस्मरन् । मृत्वा सर्वार्थसिद्धाख्ये, विमाने समभूत्सुरः ॥ २०५ ॥ ततश्च्युत्वा विदेहेषु, श्रयिष्यति स निर्वृतिम् । तन्मित्रानङ्गलेखाश्च, गन्तारः स्वः शिवं क्रमात् ॥ २०६ ॥ एवं श्रीहरिवाहनस्य चरितं पुण्यात्मसंशीलितं । चिन्तारत्नमिवाशु मानसमहाकोशे निवेश्याद्भुतम् । निर्वेदं भयभीरवोऽत्र भविनः ! सद्दर्शनोद्दीपकं, सेवध्वं करपङ्कजान्तरगताः सिद्धिश्रियः स्युर्यथा ॥ २०७ ॥ निर्वेदे हरिवाहनकथा । तृतीयं निर्वेदाख्यं सम्यक्त्वलक्षणमुक्त्वा चतुर्थमनुकंपाख्यं सम्यक्त्वलक्षणं गाथातृतीयपदेनाह—

दुहिए दयाणुकम्पा ।

व्याख्या—दुःखिते प्राणिन्यपक्षपातेन दुःखनिवारणरूपा दयाऽनुकम्पा स्यात्, पक्षपातेन तु करुणा निजाङ्गजादौ हिंस्रव्याघ्रादीनामपि सम्भवति, सा चानुकम्पा द्विधा—द्रव्यतो भावतश्च, द्रव्यतः शक्तौ सत्यां दुःखप्रतिकारेण भावतस्त्वार्द्रहृदयत्वेन, यदागमः—दट्ठूण पाणिनिवहं भीमे भवसायरम्मि दुक्खत्तं । अविसेसओऽणुकंपं, दुहावि साम-

त्यओ कुणइ ॥ १ ॥ इति गाथातृतीयपादार्थः ॥ भावार्थस्तु जयराजदृष्टान्तात् ज्ञेयः, स चायम्—

समस्ति क्षितितलललनाभालस्थलतिलकायमानं श्रीमदर्हत्कल्याणकसम्भवोत्कर्षतिरस्कृतामरपुराभिमानं श्रीहस्तिनापुरं नाम नगरं । यत्र—धात्रीशमन्त्रिवरवेश्मविचित्रचित्रशाणाश्मवेश्मचयरश्मिविरश्मिभावम् । सम्प्रापिते भृशमजस्रतमिस्रजाले, क्रीडन्ति चक्रमिथुनानि गताभिशङ्कम् ॥ १ ॥ तत्र शात्रवजयसमुद्धूतयशःप्रसरकर्पूरपूरसुरभितदिक्चयः श्रीजयः क्षितिपतिः । यस्मिन्महीं शासति सूर एव, शूरोऽस्ति राजा पुनरिन्दुरेव । वाचामधीशो गुरुरेक एव, धनुर्द्धरः केवलमेव कामः ॥ १ ॥ स एकदा प्रातः सभासीनो यावद्विद्वज्जनैः सह गोष्ठीसुखमनुभवंस्तिष्ठति स्म तावच्चन्दनव्यजनादिव्यापृतकरं चित्रशालाभिमुखं त्वरितत्वरितं धावन्तं लोकमालोक्य किमेतदितिजिज्ञासुर्वेत्रिणमप्राक्षीत्, सोऽपि तद्वृत्तं साक्षात्कृत्य स्वामिनं विज्ञपयति स्म—देव ! भवज्जन्मनः प्रथमं युष्मत्तातपादैररुणोदयसमये कोऽपि स्वप्नो ददृशे, तेन चादिष्टमिदं—यन्मम मूर्त्तिर्भित्तौ चित्रयित्वा पटाच्छादितैवानुदिनं पूजनीया, सा तथैवाद्य यावत्क्रियमाणाधुना स्वैरविहारिभिः कौतुकोत्तालैः शतानन्दगोविन्दधरणिधरप्रभृतिकुमारैराच्छादनपटमपनीय यदैवालुलोके तदैव ते वज्राहता इव विगतचैतन्या भुवि निपेतुः, ततस्तेषामुपचारायाचिरमेव सञ्चरति परिकरः । राजाऽपि तन्निशम्य सशोको वैद्यमन्त्रवादिदैवज्ञादिसहितस्तस्यां चित्रशालायां तत्प्रतीकारनिमित्तं गत्वा तं चित्रमवलोकयन् सहसा मुमूर्च्छ । सविषादपरिच्छदविधीयमानशिशिरोपचारव्यापारेण तैः समं मूर्च्छामुज्झांचकार नरसारः ।

ततः क्षितिपतिरलङ्कृतसिंहासनो जनैरपृच्छ्यत–देव ! किमेतदाश्चर्यम् एतच्छ्रवणायोत्के अस्मच्छ्रवणे तत्प्रसद्य समादिश्यतां, ततो नृपोऽवोचत्–हंहो श्रूयतां सावधानमानसाः—अस्ति श्रीवल्लिसमुल्लासनघनाघनं विजयवर्द्धनं नाम नगरं, तत्र शत्रुद्विपवित्रासनशार्दूलः शार्दूलो नाम नृपः, तस्य सर्वजनजनितानन्दा आनन्दा नाम पट्टमहादेवी, तयोर्जगज्जनमनस्तापोपशमनहरिचन्दनश्चन्दनो नाम नन्दनः, तस्य च पुरोहितसुतविष्णुना मन्त्रितनयेन सुधिया श्रेष्ठितनूजेन शङ्खेन च सह सौहार्दमाशैशवमसङ्ख्यसौख्यजनकमजनि । सोऽन्यदा राजकुमारो गुणैरिव तैर्मित्रैरनुगतो वाह्यालिकेलिश्रान्तो विश्रान्तो रसालशालतले, तत्र चैकं कापालिकं विलोक्य ननाम, सोऽप्याशीर्वादमदात्–निचाङ्गचङ्गलावण्यविडम्बितमनोभव ! । नागलोकाङ्गनानाथो, भव भूमीन्द्रनन्दन ! ॥१॥ तदाशीर्वचः श्रुत्वा कुमारस्तं व्याजहार–महर्षे ! मम मनुष्यलोकवासिनः कुतो भवदाशीर्वादसत्यता सम्भविता ?, त्रिदण्ड्यप्यवादीत्–कुमार ! मैवं वादीः, ममाशीर्वादः सत्यैव, तव मित्रसहायस्य साधकधुरन्धरस्य अथवा मयि निर्विकल्पे कल्पद्रौ च किं नाम दुःसाधं ?, (कार्यं परं देशान्तरविलोकनं भवता ) ते तु कापुरुषा एव ये नाम नानाश्चर्यधरां धरां नालोकयन्ति यतः–गोष्ठाश्वैः किमु तैर्गेहनर्दिभिः कूपदर्दुरैः । ये निश्शेषां न वीक्षन्ते, नानाश्चर्यमयीं महीम् ॥ १ ॥ ततः कापालिकवचनरचनाप्रपञ्चचन्द्रोदयेन समुल्ललास भूवासवसुतमानसे रागसागरः । चन्दनस्तं सत्कृत्य विसृज्य च स्वागारमगात् । अथ सुहृत्सहायः कुमारो रजन्यां गत्वा नागाङ्गनासङ्गमोपायं कापालिकं पप्रच्छ । सोऽप्यूचे–कुमार ! शृणु, इह महीमहेलास्तनोपमानमातन्वानो वि-

न्ध्यनामा सानुमानस्ति, स्फुरत्पुन्नागनागपुञ्जे तन्निकुञ्जे सुवेलाख्ययक्षमन्दिरवामभित्तिभागप्रवरविवरान्तराले स्मरापस्मारापहारिण्यस्तरुणजनमनोहारिण्यः पातालतरुण्यः साहसिकशिरोमणेर्भवादृशस्योपभोग्यतां यास्यन्तीति । तद्गिरं कन्दर्पदर्पप्रसर्पिकां श्रुतिविषयीकृत्य नृपभूर्विपर्ययवियशः सुहृत्त्रययुतः पितुरनाख्याय कपालिना सह प्रतिष्ठमानो मित्रैरभाष्यत–कुमार! वसुन्धराधार! नीतिविचारचतुराश्चिन्नपरिचिते त्रिदण्डिनि विश्वासः कर्तुं न युज्यते, यतः—न नारीषु न मूर्खेषु, न विरूढेषु शत्रुषु । न चाविज्ञातशीलेषु, विश्वसन्ति विपश्चितः ॥ १ ॥ इत्थं सुहृद्वचनशकुननिषिद्धोऽपि धराधिपसुतस्तेन सह गच्छन् यक्षसविधमनीयत । अथ द्रव्येणोपादाय छागचतुष्कमेकैकं तेभ्यश्चतुर्भ्यो वितीर्यानार्यचरितस्तानुवाच–भो भो उत्तरसाधका! युष्माभिः साध्यसिद्धये पूर्वं पूजितस्यास्य यक्षस्य पुरश्चन्दनचर्चितानजान् व्यापाद्य बलीकृत्य चक्षुषी निमील्य च पादयोर्लगनीयं, नचान्यथेदं वचः करणीयमिति । राजपुत्राद्यैस्त्रिभिरविवेकिभिस्तथैव तद्वचो न्यरचि रचिताञ्जलिभिः । शङ्खायदाताशयेन शङ्खेन तु विमृष्टं, हहा मूढाः पातकनिवासया जीवहिंसया कथमेते सिद्धिमिच्छन्ति ?, सिद्धयस्तु धर्मादेव जायन्ते नेतरया(था) । अहह पापात्मानः कथं क्षणसुखार्थं प्राणिवधमाचरन्ति ? । यदुक्तम्—खणमित्तसुक्खकज्जे, जीये निहणंति जे महामूढा । हरिचंदणवणसंडं, दहंति ते छारकज्जम्मि ॥ १ ॥ इति विचार्य शङ्खः कपालिना प्रेरितोऽपि न यक्षार्चामकरोत्, ज्ञाततत्त्वाः कथमपि नोन्मार्गे पदं ददते । अथ तेषां निमीलिताक्षाणां यक्षपदवन्दारुणां त्रयाणामपि राजपुत्रादीनां पाखण्डिपाशः कराल-

करवालेन छगलानामिव गलकन्दलान्यच्छिनत्, ततः स पापी शङ्खशीर्षच्छेदायोद्यच्छति तदा यक्षेणाऽभ्यक्षीभूयाभिदधे, आः पापतापसापसदाम्भिकशिरःशेखर ! द्रोहं विनैनं व्यापादयन्न भविष्यसि, ततस्तस्मिन् कुपितं यक्षं सन्तोषयितुं गते शङ्खश्छगलमन्यत्र नीत्वाऽमुचद् अचिन्तयच्च—हा मन्मित्रैरनात्मज्ञैः कथमात्मा निर्गमितः ?, वञ्चनाचञ्चव एव पाखण्डिनः, निर्दयेषु खलेषु सख्यं कुर्वाणानामस्माकमेव फलम्, ममापि मित्रघातावलोकिनः कृतं जीवितव्येन, कथं च स्वजनानामाननं दर्शयामि ?, तस्मान्मया तत्र गन्तव्यं यत्र स्वज्ञातीयः कोऽपि न स्यादिति विमृश्य स यस्तसु देशेष्वाययौ । अथ पथि गच्छन्नेकदा शङ्खः सख्यमुपागतेन सुबुद्धिनाम्ना श्रावकेण दुःखकारणं पृष्टः, तत्पुरः सर्वं स्वरूपमचीकथत् । तेनापि ज्ञाततत्त्वेन सोऽभिनन्दितः, धन्योऽसि येन त्वया छागान् रक्षता स्वात्मा धर्मश्च परिपालितौ । उक्तं च—अर्थकामार्थिभिर्ध्वस्तो, धर्मस्तज्जनकोऽपि यैः । मत्सरादिव तौ तेषां, मूलच्छेदं वितेनतुः ॥ १ ॥ तस्माद् दृष्टफलो धर्मस्तव कामार्थदायी भविष्यति, तदनु शङ्खाय धर्मबन्धवे दृष्टिवादसारं पञ्चपरमेष्ठिनमस्कारं दत्त्वाऽऽचख्यौ—भ्रातस्त्रिसन्ध्यमवन्ध्यफलश्चिन्तामण्यादेरप्यधिकवाञ्छितप्रदो विघटितक्षुद्रोपद्रवो ध्यातव्यो मन्त्रराजः शश्वन्निधेया हृदि जीवदया, यतः—यथा मेरुर्नगेन्द्राणां, मरुतां वासवो यथा । तथैव सर्वधर्म्माणां, प्रधानं जीवरक्षणम् ॥ १ ॥ हेमधेनुधरादीनां, दातारः सुलभा भुवि । दुर्लभः स पुमाँल्लोके, यः प्राणिष्वभयप्रदः ॥ २ ॥ महतामपि दानानां, कालेन क्षीयते फलम् । भीताभयप्रदानस्य, क्षय एव न विद्यते ॥ ३ ॥ इति सुबुद्ध्युपदिष्टं ध-

मेरहस्यं हृदये निवेश्य शङ्खः सार्थेन सह पुरोऽचालीत् । तस्मिंश्च कियन्तमपि पन्थानमतीते निशीथे भीमपल्लीपतेर्धाटी निपत्य कांश्चित्पुंसो गतासून् कांश्चिद्विवसनान् कांश्चिदुत्रासितान् कांश्चित्प्रहारजर्जरितान् कांश्चिद्बन्दिनश्च-कार । शबरा अप्यकृत्यकृत आत्मना दशमं शङ्खं बन्दीकृत्य भीमपल्लीपतेर्दर्शयाञ्चक्रुः । सोऽपि तानादिदेश–भो एतान् दशापि देव्या वलये तावत्स्थापयत, यावदेकादशः पुमान् नावाप्यते, तथैव तैर्विहिते विवेकनिस्तुषः शङ्ख एकाग्र-मनाः पञ्चपरमेष्ठिनमस्कारमहामन्त्रं स्मरन्नानन्दमय एवातिष्ठत् । प्राप्ते त्वेकादशे पुंस्यष्टमीदिने भीमस्तां चण्डिकायतने समानाय्य तामभ्यर्च्य तदग्रे तानूर्ध्वीकृत्यासिलतां निसृत्य स्माह–अरे मया भूताभिभूतस्य सुतस्य जीवितव्यनिमित्तं चामुण्डाया एकादशभिर्नृमुण्डैर्बलिं दास्यामीत्यभिग्रहो गृहीतोऽभूत्, सोऽद्य भवन्मुण्डैरखण्डीभविष्यति, अतोऽधुना स्मरतेष्टदैवतम्, मुञ्चत जीवितव्याभिलाषं, एष निष्कृपः कृपाणो भवद्गलकन्दलच्छेदनाय प्रवर्तमानोऽस्तीति यावद-वादीत्, तावत्पल्लीलोकस्त्वरितमागत्योच्चैः पूच्चकार, भोभो धावत धावत क्षिप्रं कुमारो भूतेन मरणदशामापादित इति श्रुत्वा भीमो विहस्तस्तांस्तथैव मुक्त्वा सुतसविधमियाय । ततः शङ्खो मन्त्रराजप्रभावं जानानो भिल्लमेकमाह स्म–भो भिल्ल ! पल्लीपतिसुतं सज्जीकरोमि मन्त्रप्रभावेण यदि तदादेशः स्यात्, तेनापि पल्लीशाय निवेदितम्, सोऽपि तमा-कार्य स बहुमानमभ्यर्थयामास,–देहि मे पुत्रभिक्षां । ततः स विधिवन्मण्डलमापूर्य पल्लीपतिसुतं स्वपुरो निवेश्य विहितपद्मासनस्तन्मस्तके हस्तं निधाय पूरितनिर्दम्भकुम्भकाशुगो हृत्कमलकर्णिकायामर्हतो न्यस्य पत्रेषु सिद्धादींश्च

तत्तेजसा तरसा तच्छरीरान्निस्सारयामास भूतमयं तिमिरम्, सोऽप्यवाप्तचैतन्यः किमेतदिति ससम्भ्रमं जल्पन् पित्रा समालिङ्गितः। ततः स शङ्खमेवमाह स्म, सन्तुष्टोऽहं तव किङ्करः कथय किं करोमि?, तेनाप्यभाणि–पल्लीपते! मुञ्चैतान् बन्दीकृतान्मनुजान्, तेनापि भोजयित्वा सत्कृत्य च ते मुक्ताः तद्वचसा च निरापराधजीववधनिवृत्तिमाघोषयन् शङ्खमुपश्लोकयाञ्चक्रे–अहो अस्य मन्त्रप्रभावः, अहो सर्वेष्वतुल्यवात्सल्योल्लासः अहो परोपकारव्यापारः अहो निरीहता। ततः शङ्खं तत्र स्थापयित्वा गुरुमिवाराधयामास। अन्यदा पितृदर्शनोत्कण्ठितं शङ्खं बहुविधार्थसार्थसमेतं जनकसविधं प्रापय्य पल्लीशः कृतार्थो बभूव। तत्र शङ्खोऽपि मित्रत्रयस्य स्वस्य च स्वरूपं निरूपयन् बन्धूनां दुःखं विस्मयं चाकरोत्। ततश्चिरं द्रविणव्ययेन जिनशासनोन्नतिं कुर्वन्निरुपमकारुण्यरसं पोषयंस्तपःशीलभावनाभिः पुण्यमर्जयित्वा सुरश्रियमासाद्यान्यदायुःशेषे वर्तमाने गुरूनपृच्छत्–भगवन्मनुष्यभवे कथं मे बोधिबीजावाप्तिर्भवित्री?, गुरवो जगदुःश्रीहस्तिनापुरे सूरनरराजसूनुर्जयो नाम त्वं भविष्यसि, तत्र चित्रावलोकनान्मित्रैः सह मेलेन प्रबोधो भविष्यति, तच्छ्रुत्वा स देवः स्वप्ने सूरसेननृपमादिश्य भित्तौ पूर्वभववृत्तान्तं लेखितवान्, सोऽहं शङ्खजीवः एते च त्रयोऽपि मे सुहृदः, अतश्चित्रदर्शनान्मोहः प्रबोधश्चास्माकमजनि। एवं समित्रस्य जयस्य राज्ञश्चरित्रमाकर्णयतामनेकलोकानां चित्तेषु करुणामृतसागर उज्जजागार। ते चावगतधर्मतत्त्वाश्चैत्याद्युद्धरणं पञ्चपरमेष्ठिमहामन्त्रस्मरणममारिघोषणं च कारयन्तः सुरवरलीलया सुखान्यनुभवन्तः परस्परं प्रीतिभाजः तिष्ठन्ति स्म। अथ जयनृपः सद्गु-

रुचरणाराधनेन चारित्रचिन्तारत्नमुपलभ्याराधयंस्तदनुभावादनन्तसुखश्रीभाजनं सुहृद्भिः सममभवत् ।—एवं जयस्थायनिवासवस्य, तत्त्वं कृपायाश्चरिताञ्निशम्य । तस्मिंश्च सम्यक्त्वरहस्यचिह्ने, यत्नं कुरुध्वं शिवसङ्गमाय ॥ १ ॥ अनुकम्पायां जयराजकथा ॥ चतुर्थमनुकम्पाख्यं सम्यक्त्वलक्षणमुक्त्वा पञ्चममास्तिक्याख्यं सम्यक्त्वलक्षणं गाथाचतुर्थपादेनाह—

अत्थिक्कं पञ्चओ वयणे ॥ ४५ ॥

व्याख्या—अस्तीति मतिरित्यास्तिकं तस्य भावः कर्म वाऽऽस्तिक्यं तत्त्वान्तरश्रवणेऽपि 'वचने' जिनपतिभाषिते प्रत्ययो—निराकाङ्क्षप्रतिपत्तिः, आस्तिक्येन हि जीवधर्मत्वेनाप्रत्यक्षं सम्यक्त्वं लक्ष्यते तद्वानास्तिक इत्युच्यते, यदागमः—"मन्नइ तमेव सच्चं, नीसंकं जं जिणेहिं पन्नत्तं सुहपरिणामो सम्मं, कंखाइविसुत्तियारहिओ ॥ १ ॥" इतिगाथाचतुर्थपादार्थः ॥ ४५ ॥ भावार्थस्तु पद्मशेखरकथया कथ्यते, तथाहि—

पुरिसुत्तमकयवासं सुरयणमहियंपि खारगुणवज्जं । सायरनीरसरिच्छं, पुहविपुरं अत्थि वरनयरं ॥ १ ॥ रामाभिरामपासो, ससिरीओ चक्कविजियभुवणयलो । सिरिपउमसेहरनिवो, पुरिसुत्तमसत्तमो तत्थ ॥२॥ विणयंधरसूरीणं पासे जीवाइतत्तपरमत्थं । सम्मं जाणिय हियए सो धारइ वज्जलेउव्व ॥३॥ जो न हु मन्नइ जीवे, न य बहुमाणं करेइ जिणधम्मे । तं दमिय मग्गमाणइ वसहं वरसारहिव्व निवो ॥४॥ अपमाओ (ओ) जीवदयं, परूवए जिणइ नत्थिए पउरे । ताए

वाएसरियापसायवसओ गयकसाओ ॥ ५ ॥ सवेसुं सत्तेसुं, करुणाकरणुज्जयावि सयकालं। दुद्धरपमायसिंधुरसुमूरणहरिवरसरिच्छा ॥ ६ ॥ नासियमयणवियारावि सिद्धिरमणीइ विहियपरियारा। परिहरियसयलदविणावि गहियचारित्तवररयणा ॥ ७ ॥ निरुवमउवसमरसभरपूरियहियया सया दयानिरया। रागद्दोसविमुक्का, हवंति गुरुणो भवविरत्ता ॥ ८ ॥ इत्ताइ बहुपयारं भयलजणाणं पुरो नराहिवई। वण्णइ गुरूण गुरुयरगुणनिवहं भत्तिराएणं ॥ ९ ॥ दुलहा एसा, सामग्गी सवपाणिणं ॥ १० ॥ एरिसकलात्रयम्। माणुसत्तं वरो धम्मो, गुरू चारित्तबंधुरो। जयम्मि दुलहा एसा, सामग्गी सवपाणिणं ॥ १० ॥ एरिसगुणगणकलिए गुरुणो सेवंति जे जए धन्ना। धन्नयरा उण तेसिं पिबंति जे वयणअमियाइं ॥ ११ ॥ एरिसवयणरसेणं वहूण चित्ताउ पावकम्ममलं। पक्खालिय जिणधम्मे, संठावइ भूवई लोए ॥ १२ ॥ एगो पुण सिद्धिसुओ, विजओ नामेण भणइ नरनाहं। जं तं वण्णसि मुणिणो तं सवं पिहु पलालसमं ॥१३॥ समिरपहिल्लिरधयवडतरलं कह धारयंति ते चित्तं?। नियविसयपसत्ताइं करणाइ कहं निरुंधन्ति? ॥ १४ ॥ उचियं दुहियजणाणं, हयणं जं ते विणासिया संता। नियकम्मं वेइत्ता, सुगइं पावंति महिनाह! ॥ १५ ॥ अपमाएणं लब्भइ मुक्खसुहं एरिसंपि तवयणं। जरहरतक्खयचूडामणिउवएसस्स सारिच्छं ॥ १६ ॥ एवं मुद्धजणं पिहु वायालो भज्जइ सुमग्गाओ। तप्पडिबोहनिमित्तं राया जक्खाभिहं पुरिसं ॥ १७ ॥ आइसई विजएणं मित्तिं काउं ममाहरणमेयं। तस्स य रयणाकरंडे खिवेहि वीसासिउं कहवि ॥ १८ ॥ रायाएसं तेणवि तहेव काऊण सामिणो भणियं। रायावि पडहघोसणपुरस्सरं इय कहावेइ

॥ १९ ॥ जो रण्योऽलंकारं लद्धं अप्पेइ तस्स नहु दोसो । जो नप्पिसइ पत्तं भविस्सइ तस्स उण दंडो ॥ २० ॥ अह पोरजुया रण्या पुरिसा घरसोहणट्ठमाइट्ठा । तं पासिवि विजयघरे किमेयमिइ तेहि सो पुट्ठो ॥ २१ ॥ स भणइ न सुणामि अहं कहं न जाणासि? तेहि इय भणिओ । धरिऊण य सो रण्णा दिन्नो तेणावि वहगाणं ॥ २२ ॥ पच्च-क्खं चिय चोरं नाउं तं कोवि नहु मुयावेइ । जीवनिरासो विजओ तत्तो जक्खं भणइ दीणो ॥ २३ ॥ मन्नावसु मित्त! निवं कहंपि दंडेण चंडएणावि । मह जीवियं दवाव सु तो जक्खो विन्नवेइ निवं ॥२४॥ सामिय ! मुंचसु मित्तं दंडं काऊण तो निवो भणइ ? । जइ सुणइं नाम तओ एसो तो किं न अइरुइरं ? ॥२५॥ सोऽवि भणइ सुणइइवि पुण्णं जीवंतओ नरो भद्दं । पावइ ता देसु जियं कुविउव्व तओ भणइ राया ॥ २६ ॥ जइ मह घराओ तिल्लेण भरियं पत्तं गहेवि अचयंतो । बिंदुंपि भमिय सयले पयरे ठावेइ मह पुरओ ॥ २७ ॥ ता रक्खामी एयं इय निववयणं भणइ सो तस्स । विजएणवि पडिवन्नं तं सव्वं जीवियव्वकए ॥ २८ ॥ अह पउमसेहरनिवो सयलस्स पुरस्स आइसइ लोए । वीणावेणुमयंगा पइठाणं वायह अवस्सं ॥ २९ ॥ रंभातिलुत्तमउमासुचंगअंगं पणंगणाण गणं । नच्चावह सविंदि-यसव्वस्सहरं पइहरंपि ॥ ३० ॥ विजओ अइरसिओऽविहु मरणभएणं जिइंदियवियारो । तिल्लपडिपुण्णपत्तं भामेइ पुरे निरुद्धमणो ॥ ३१ ॥ तिल्लस्स भायणं तं तत्तो जत्तेण मुत्तु निवपुरओ । विजओ नमिरो रण्णा किंचिवि हसिऊण इय भणिओ ॥ ३२ ॥ तडितरलाइं मणइं—दियाइ रुद्धाइं कहं तए? विजय! । एरिसपिच्छणयाइसुं अइमित्तं वट्टमाणेसुं

॥३३॥ सो भणइ नमिय सामिय ! मरण भएणं हयाणि करणाणि। सव्वेसु मणुस्सेसुं जीवियमिक्कं जयम्मि पियं ॥३४॥ तं वज्जरेइ राया जइ एगभवस्स मरणभीएणं । एवं हओ पमाओ विजय ? तए विसयतिसिएणं ॥३५॥ ता तं किं मुणिवसहा अणंतभवभमणभीरुणो धणियं । सेवंति नायतत्ता अणत्थरिंछोलिकेलिहरं ? ॥ ३६॥ इय सुणिय रायवयणं अवगयमोहोदओ स विजओऽवि । जाणियजिणमयतत्तो सावयधम्मं पवज्जेइ ॥ ३७ ॥ एवं धम्मे ठाउं बहुं जणं पउमसेहरो राया । आराहियअत्थिक्को पत्तो सुररायलोयम्मि ॥ ३८ ॥ एयं चरित्तं पउमस्स रण्णो, सुणित्तु अत्थिकमइं कुणेह । जीवाइपएसु जहा न कुब्भे सम्माइगुणक्कं हि सुद्धं लहेह ॥ ३९ ॥ आस्तिक्ये पद्मशेखरकथा ॥ इति रुद्रपल्लीयगच्छगगनमण्डनदिनकरश्रीगुणशेखरसूरिपट्टावतंसश्रीसङ्घतिलकसूरिविरचितायां सम्यक्त्वसप्ततिकावृत्तौ तत्त्वकौमुदीनाम्न्यां सम्यक्त्वलक्षणस्वरूपनिरूपणो नामाष्टमोऽधिकारः समाप्तः ॥

अष्टमं सम्यक्त्वलक्षणस्वरूपाधिकारमुक्त्वा नवमं षड्विधयतनाद्वाराधिकारमाह—

परतित्थियाण तद्देवयाण तग्गहिय चेइयाणं च। जं छव्विहवावारं न कुणइ सा छव्विहा जयणा ॥ ४६॥

व्याख्या—'परतीर्थिकानां' शाक्योलूक्याक्षपादकापिलकादीनां मिथ्यादृग्दर्शनिनां तथा 'तद्देवतानां' सुगतहरिहरब्रह्मादीनां तथा 'तद्गृहीतचैत्यानां' सौगताद्यङ्गीकृतार्हत्प्रतिमानां चशब्दः समुच्चये यत् षड्विधं वन्दनादि

व्यापारम्–अग्रेतना गाथाभिर्वक्ष्यमाणं 'न करोति'न विधत्ते सा षड्विधा यतनोच्यते समयज्ञैरिति इतिगाथार्थः ॥ ४६ ॥ तानेव यतनायाः षट्प्रकारानाह—

वंदणनमंसणं वा दाणाणुपयाणमेसि वज्जेई । आलावं संलावं पुव्वमणालत्तगो न करे ॥ ४७ ॥

व्याख्या—वाऽत्र समुच्चये वन्दनं नमस्करणं दानं अनुप्रदानं 'एतैः' पूर्वोक्तैर्मिथ्यादृग्भिः सह'वर्जयेत्'निवारयेत्, एतैः पूर्वमनालपितः—अभाषितः आलापं संलापं न कुर्यादिति द्वारगाथार्थः ॥ ४७ ॥ एतत्स्वरूपव्याख्यानसम्प्रतेनगाथाभिराह एतेषां षण्णां यतनाप्रकाराणां मध्ये प्रथममाद्यं यतनाद्वयमाह—

वंदणयं करजोडणसिरनामण पूयणं च इह नेयं।वायाइ नमुक्कारो नमंसणं मणपसाओ अ॥ ४८॥

व्याख्या–'वन्दणयन्ति' वन्दनं 'करयोजनं ' पाणिसम्पुटमीलनं शिरोनामनं मूर्धप्रह्वीकरणं 'पूजनं च' पुष्पादिभिरभ्यर्चनं 'इह' जिनसमये वन्दनकं 'ज्ञेयं' ज्ञातव्यं, एतच्च परतीर्थिकानां न कर्त्तव्यम् । यदुक्तम्–''परतित्थियाण पणमण उब्भावण थुणण भत्तिरागं च ।सक्कारं सम्माणं दाणं विणयं च वज्जेइ ॥१॥'' इति प्रथमा यतना, 'वायाइत्ति' वाचा वचनेन तत्तादृग्गुणगणसङ्कीर्त्तनप्रवणैर्गद्यपद्यप्रबन्धैः सूर्यादिसुरवृन्दस्य स्तवनरूपैर्वर्णनाकरणं वाक् 'नमस्कारो' नमस्या न केवलं नमस्कारो'मनःप्रसादश्च'मिथ्यादृक्सुराणां तद्दीक्षितानां च विलोकनेन परमप्रीतिसम्भ्रम इति द्वितीया यतनेति गाथार्थः ॥ ४८ ॥ एतदर्थे सङ्ग्रामसूरदृष्टान्तः स्पष्टीक्रियते, तथाहि—

"अत्थि इहेव जंबूद्दीवे दीवे भरहखित्तमंडणं सुरपुरसिरिमडप्फरकडप्पखंडणं समंतओ पप्फुल्लियफलियवणसंडं पउमिणीसंडं नाम नगरं, जत्थ य—मणिमयभवणपहाहिं निसाविभागम्मि सव्वओ गिलिए, कोसियपक्खिगणाणं पयप्पयारो कयावि न हि ॥ १ ॥ तत्थ अइसयसूरसेणो सूरसेणो नाम राया—जस्स जयविजयजाओ, उत्तुंगपयावपायवो गुरुओ। तारयमिसेण अज्जवि पप्फुल्लिओ दीसए गयणे ॥२॥ तस्स निरुवमरूवविजियजयंतकुमारो दुहावि संगामसूरो । संगामसूरो नाम कुमारो। सो य आबालकालाओ आहेडयवसणदुल्ललिओ कूरेसु सूरेसु पढमरेहं पत्तो कालं बोलेइ । अन्नया स पुरिससारमेओ सारमेयपरंपरं परदेसेहिंतो मिगयावसणपोसणकए आणावेइ। कयावि पिउणा स एवं भणिओ—वच्छ ! मा वच्चसु मिगयाए, निरवराहजीववहणे को पोरिसप्पगरिसो ?, ता चयसु नरयकारणं पुव्वपुरिसजसपासायधूमं सयकरणिं पारद्धिवसणं, अन्नह मह पुराओ बहिं निस्सरिऊण मायंगुव्व चिट्ठसु जहा तुहं मुहमवि न पिच्छामि । तओ पिउणा एवं भत्थिओ सो पुराओ बहिं सन्निवेसं काउण ठिओ, पइपभायं सिज्जाए उट्ठिऊण कूरसूरपुरिसेहिं परियरिओ भसणगणमग्गओ काऊण अरण्णे असरण्णे मिगाइजीवे हणिऊण पाणवित्तिं कुणमाणो दुट्ठप्पा चिट्ठइ । एगया तं साणसेणिंगिहे मुत्तूण केणावि पओयणेण गामंतरं गओ। तम्मि समए तम्मंदिरसमीवठियउवस्सए सुयकेवलिणो अवहिनाणिणो सिरिसीलंधरायरिया समोसरिया । तेसिं भसणाणं पडिबोहणत्थं महुरज्झुणिणा सूरिणो एयं

१ ते सयणममंगलभूयं न पिच्छामि, तं असग्गहं अमुंचंतो तज्जिऊण पुराओ निस्सारिओ पिउणा बाहिं संनिवेसं प्र.

सिद्धंतरहस्सं पढंति पाढयंति य,—खणमित्तसुक्खकज्जे, जीवे निहणंति जे महापावा । हरिचन्दणवणसंडं, दहंति ते छारकज्जंमि ॥ १ ॥ जो जीवदयारहिओ, मूढो अन्नं करेइ इह धम्मं । आरुहइ छिन्नकण्णं सो खरमिभमुत्तमं मुत्तुं ॥ २ ॥ जो जलहिबिंदुमाणं, जाणइ गयणम्मि रिक्खपरिमाणं । सो अभयदाणपुण्णं, संपुण्णं वण्णए कहवि ॥ ३ ॥ इच्चाइवयणाइं संकलसंदामिया अवि कोलेया एगग्गमणा सुणंता संजायचेयणा इय चिंतयंति—अहह अम्हेहिं मूढेहिं असुणियपुण्णपावविवागेहिं परकज्जकरणसज्जेहिं अणज्जेहिं अप्पा नयरंधकूवे कहं पाडिओ?, अओ वरं सामिआइट्ठेहिंपि अम्हेहिं नरयगइपहो जीववहो जावज्जीवं न कायव्वो । इओ य संगामसूरेण गामाओ आगएण तं मंडलमंडलं संकलकलियं पुरओ नेऊण अरण्णहरिणजूहं निरूविऊणं बंधणाओ मोइऊण य हुस्सुकारियंपि न पयाउ पयं देइ, चित्तलिहियं व चिट्ठइ। स तओ तेसिमहिगारिणो पुच्छेइ, तेवि करे जोडिऊण भणंति—देव विसेसकारणं किंपि न याणिमो परमेसि बंधणठाणपासे मुणिणो वसंति, ते य दयानिरूवगं सत्थं पइक्खणं पढंति, तेसिं वयणाइं सुणंता जइ जीवदयापरिणामपरा संजाया इय लक्खीयइ । कुमरोवि एवं सुणिय संजायचेयन्नो चिंतिउं लग्गो—अहो अहो माहप्पं महेसीणं—जं पसुणोवि एए एवं पडिबुद्धा, नवरमहं चेव नरेसु पसू जं निरवराहे जीवे मारेमित्ति वियारिय बंधणेहिंतो सारमेए मोइय कुमारो वागरइ, हंहो साणा ! जइ तुम्भे संबुद्धा ता सूरीणं समीपमल्लियह, ता ते विसरासणुम्मुक्कसरा इव सूरिचरणंतियं गंतूण पणमिऊण य करे जोडिऊण उवविट्ठा । कुमरोवि कोउगुत्ताणमाणसो

तेसिं पिट्ठिलग्गो चेव आहेडगाउ उब्भडसुहडसमेओ तत्थागंतूण सूरिणो पणमिय धम्मंमि य जायसद्धो विन्नवेइ—भयवं! मज्झविधम्मरहस्समाइसह, गुरुणोवि तप्पुरओ एवं धम्मं परूवंति—देवो जिणोऽट्ठारसदोसवज्जिओ, गुरू सुसाहू समलिट्ठुकंचणो। धम्मो पुणो जीवदयाइ सुंदरो, सेवेह एयं रयणत्तयं सया॥ १ ॥ जे अईया जे य पडुप्पन्ना जे अ आगमिस्सा अरिहंता भगवंतो ते सव्वे एवमाइक्खंति एवं भासंति एवं परूवंति सव्वे पाणा सव्वे भूया सव्वे जीवा सव्वे सत्ता न हिंसेयव्वा न परिघेत्तव्वा न अज्जावेयव्वा एस खलु निइए सासए समिच्च लोयं खेयन्नेहिं पवेइयं। अवि य"किं ताए पढियाए, पयकोडीए पलालभूयाए?। जत्थित्तियं न नायं परस्स पीडा न कायव्वा॥ १ ॥ एवमुवए-सरहस्सं चिंतारयणं व सुगहियं काऊण संसारचो(चा)रभीओ निरइयारसम्मत्तजुत्तं निरवराहजीववहविरइवयमंगीका-ऊण कयकिच्चमप्पाणं मन्नंतो धम्मगुरुं नमंसिय सयं कुमारो नियगिहं पत्तो। कोलेयकुलमवि पहीणबंधणं तिरिउचियं धम्ममायरमाणं सुहेण चिट्ठइ। इओ य सूरसेणराया संगामसूरकुमारं कयमिगयापरिहारं सम्माणिऊण जुवरायपये ठा-वेइ, सोऽवि नीईए नियपयं पालेइ। अह कुमारमित्तो मित्तसायरनामा जाणवत्तजत्ताए समुवज्जियधणधणो आगंतूण विहियरायदंसणो नियमित्तस्स संगामसूरस्संतियमागओ पणामपरो, आलिंगिय आसणे निवेसिय कुसलपण्हपुरस्सरं कुमारेण पुट्ठो—वयंस। देसंतरं परिब्भमंतेण किंपि चुज्जं दिट्ठं सुयं वा?। तओ सो कुमारपुरओ वागरेइ निवनंदण सुणु सावहाणमाणसो, तहाहि—गयणयलमिलंतलोलकल्लोलमालासंकुले पवालकन्दलुल्लासरेहिरसलिले मच्छकच्छवपाढीण-

पीढपरंपराभीसणे मयरायरे सियवडुलसिररएसु पवहेणसु ययंतेसु तयंतरे अब्भंलिहसिहरिसिहरे साहासहस्सपुरियदिगंतरस्स कप्पतरुणो साहाए दोलायमाणसयणिज्जआरूढं पंकयकेसरगोरसरीरं सयलसीमंतिणीतिलयभूयं चउद्दसतिलयाहरणविभूसियं अहिणवतारुण्णपुण्णगत्तं कमलदलनिल्लनित्तं वीणारवरंगणं कंठब्भंतरघोलिरमहुरगीयसरपराजियकिंनरिं एगं दिव्वतरुणिं पिक्खिय जाव नियपवहणं तीए अंतिए आणीयं ताव कप्पदुमेण समं जलहिमज्झे सा निमग्गा अम्ह मणोरहेहिं सह । तओऽहमवहरियसव्वस्सुव्व गयजीविउव्व जाव चिट्ठामि ताव सेवगेहिं पडिबोहिओ जं सामिय ! एसा इत्थेव निवासिणी कावि दिव्वंगणा माणुसे पलोइऊण जलहिम्मि मज्जइ । एयं कोउहलमालोइय अहमिह संपत्तो । एरिसं तस्स वयणं सुणिय संगामसूरोऽवि कुसुमसरपसरजज्जरियसरीरो चिंतिउं लग्गो—कहं मए सा दट्ठव्वा ? तओ दढेण पिउणा वारिज्जमाणोवि तीइ दंसणनिमित्तं तेण मित्तेण समं पवहणं पूरिऊण कुमरो जलहिम्मि वच्चंतो कमेण तत्थ संपत्तो जत्थ सा दिव्वरमणी कीलंती अच्छइ, सावि कुमारं सयलसंसारसारं फारसिंगारं कुसुमसराणुगारं पिक्खिय वक्खित्तचित्ता तस्स मणमागरिसन्ती पुव्वं व सायरे निमग्गा । तओ कुमरो तीइ हरियसव्वस्सो इव सायरं वण्णेइ,—जय सायर ! सुररमणीनिहाण भुवणस्स दलियदालिद्द ! सुट्ठियदेवाहिट्ठिय ? मह्दइयं देसु पसिऊणं ॥ १ ॥ एवं पयंपंतो कुमरो मित्ताइपरियणेण वारिज्जंतोऽवि करवालसहाओ जंतमुक्कगोलुव्व तप्पिट्ठीए चेव जलहिजले झंपं देइ, तत्थ वारिनिहिवारिअब्भिंतरठियजलकंतमणिनिम्मियसत्तभूमिपासायउवरिमतले पडिओ संतो

चिंतेइ—अहो एस पासाओ कहं सलिलेण अभग्गो चिट्ठइ ? । तया तस्स जलकंतमणिमाहप्पं सुमरणपहमागयं, तओ निब्भयचित्तो उवरिमस्थतलाणाओ उयरिऊण हिट्ठिमभूमियाए संपत्तो, तं चेव कप्पदुमसाहापलंबमाणपलंकसुत्तं पडेणावरियतणुं दिवरमणिं पासइ । तीए दंसणविलोललोयण जुयलोपडमुस्सारिऊण मुहकमलं पलोएइ । सावि तस्स करफंससुहरससुहविय सरज्झसा पुलयसगोक्कूलाविमुक्ककडक्खविच्छोहा उट्ठिऊण भणइ–साहसियसिरोवयंस! सागयं ते ?, तओ आसणेनि वेसिय तग्गयचित्ता नामट्ठाणाइयं तं पुच्छइ । निवनंदणोऽवि उल्लसियाणंदो तं तरुणिं भणइ–कमलमुहि! अहं सूरसेणस्स रण्णो नंदणो संगामसूरो तुम्ह दंसणसमूसुओ इत्थागओ, तम्हा तुमंपि नियचरियकहणेण मह कन्नूसवं कुणेसु, सावि हरिसुल्लसिरसरीरा वागरिउं पउत्ता—अज्जउत्त! इहेव भारहे वासे रययमए वेयड्ढे पव्वए दक्खिणसेढीए दसजोयणपिहुलाए समुद्दपेरंतपंताए रहनेउरचक्कवालनयरसामिणो विज्जुप्पहविज्जाहरचक्कवट्टिणो अहं मणिमंजरी नाम दुहिया । एगया मज्झ पिउणा वरचिंताउरेण नेमित्तिओ पुट्ठो—अहो अट्ठंगनिमित्तपारय! मज्झ पुत्तीए को पवरो वरो हविस्सइ ?, तेणावि भणियं–देव ! एसा तुम्ह धूया सायरमज्झकयनिवासा सिहरिसिहरे कप्पदुमसाहापलंबिरपलंकट्ठिया वीणं वायंती चिट्ठउ, तत्थ एईए अणुरूवो रूवसिरीहसियरइरमणो जलहिंमि दिन्नझंपो मंदरगिरिव्व निप्पकंपो संगामसूरकुमारो पाणिग्गहणं करिस्सइ । इओ तव्वयणेण इत्थ जलकंतमणिभवणे बहूणि दिवसाणि वीणं वायंतीए अइवाहियाणि, अओ परं कुमरु च्चिय पमाणं । एवमन्नुन्नपिम्मभरनिब्भरमणाणं जाव वय-

णालावो पयट्टइ ताव जं जायं तमायण्णह–उग्गखग्गवग्गकरो तालतमालदलसामलंगो विगरालभालच्छलो जीवंतपोहयकोलउंदुरमालामालियउरत्थलो एगो रक्खसो पयडीहोऊण कुमारमक्खिवइ अरे रायउत्त! सत्तदिणछुहियस्स मज्झ भक्खमेयं कन्नगं कहं परिणेउमिच्छसि?, एयम्मि अत्थे साहसमवलंबमाणो अवस्सं विणस्सहिसित्ति भणिय रक्खसो तं भयवेविरंगिं बालं पायतलाओ गिलिउं पयट्टो, कुमरेणवि जाव, खग्गेण आहओ ताव तस्स भग्गो खग्गो, तओ निउद्धकुसलो तेण सह बाहुजुज्झेण जुज्झंतो पाडिऊण बाहाउ चालेउं कुमरो बद्धो, ईसिहासवियासियदन्तपंती कुमरं पइ जंपइ–भो निवनंदण! नूण पणइणिं मुंचेमि जइ अवरं थूलोयरिं इत्थियं मह भक्खकए वियरेसि, अन्नं चतुम्ह नयरे पउराओ दासीओ घोरथणीओ उवचियनियंबबिंबाओ सन्ति तासिं मज्झाओ एगं दासिं मह छुहग्गिविज्झवणत्थमप्पेसु, जइ एवमत्थं काउं न खमो ता एए सन्निहिचारिणो चरगपरिवायगा मह धम्मगुरुणो वट्टंति, तेसिं पयपउमे भसललीलमुव्वह, अहवा इहेव मह विहियपासायविभूसणाणं हरिहरविरंचीणं तिहुयणसिद्धिसंहारपालणकरणचउराणं मज्झे एगमुत्तिं भत्तिजुत्तचित्तो नमंसेह, अहवा मह पडिमं करिय भावसारं निच्चमच्चेह, एवं तुह वल्लहं मुंचेमि, अन्नहा समंतओ गिलेमि। तओ कुमारो तं पइ जंपइ–भो रक्खस! जीवियंतेवि इक्कं जिणवरं सुसाहुणो गुरुणो साहम्मिए य चइय अन्नं देवयाइयं न नमंसेमि, तहा नरयगईमूलं जीववहं सव्वहावि न करेमि, जओ—

दंसणविराहणाए, जीवाण वहेण सयलसत्ताणं। नरयगईए पडणं, अणंतसो जायए नियमं" ॥ १ ॥ तम्हा रक्ख-

सिंद! तुज्झवि सुवियारस्स एवं काउं न जुज्जए, रक्खसेणावि भणियं—जइ एवं ता इत्थेव जिणाययणे वीयरायपडिमं पूयेसु। तओ हरसिओ कुमारो जाव तत्थ दिट्ठिं पक्खिवइ ताव तप्पुरओ भिक्खुणो सुगयमयचियक्खणा दुवालसाय-यणपरूवणपउणा जिणपूयं कुणंता दिट्ठा, एयम्मि वि जिणबिंबे मिच्छादिट्ठिपरिग्गहिए वंदणनमंसणेण सम्मत्तहाणी होहिति वियारिऊण रक्खं संपइ जंपइ—सिरच्छेएणावि एयं न नमंसामि, किं बहुणाभणिएण? जं तुह पडिहाइ तं कुणेसु, इत्थंतरे सा बाला रक्खसाहिट्ठिया अइकरुणं सरंपलविउंलग्गा–हे नाहएएणरक्खसेण मारिज्जंतिं नियपणइणिं किं न रक्खसि?, जहाऽहं तए पुव्विं दुस्सहविरहाउ रक्खिया तहा एयाओ निसायरवयणाओऽ-वि रक्खसु, इच्चाइविलवंतिं गलकंदलं जाव गिलिऊण सो निवसुयं पइ जंपइ, रे मूढ, इत्तियमित्ते गतेऽवि तुह पुरओ रहस्सं कहेमि, जइ दासिं न देसि ता एगं छगलियंपि देसु, जइ पुण मज्झ वागरियं न करेसि ता एयं तुह भज्जं गिलिय तुमंपि गिलिस्सं, मा पच्छा भणिहिसि—जं न मज्झ पुरओ रक्खसेण भणियं। तओ संगामसूरो तं वागरेइ—इमं तुम्ह वयणं पलयकालेऽवि न मन्नेमि, जं भे पडिहाइ तं कुणसु। तत्तो सो रक्खसो चलंतकुंडलमंडियगंडत्थलो दिव्वरूवो देवो होऊण वण्णिउं लग्गो—साहु साहु सुपुरिससेहर! धन्नोऽसि तुमं—नियनियमपरिच्चायं, पाणच्चाएवि जे न कुव्वंति। साहसियसेहराणं ताण नमो धीरपुरिसाणं॥ १॥ नयरं सयणा रज्जं, चत्तं जीयंपि जीइ कज्जंमि। कज्जे य नीइ तुमए, न हु नियमो खंडिओ कुमर!॥ २॥ अवरेऽवि दिंति झंपं सूरा सीमंतिणीण कज्जंमि। धम्मम्मि निच्चला

पुण, तुह सरिसा कुमर! इह विरला ॥ २ ॥ जुत्तं चेव सुहम्माहिवई सुहम्माए सहाए सकंसि सीहासणंसि ठिओ सव्वसुरसमक्खं तुह धम्मनिच्चलत्तं पभणेइ । तव्वयणमसद्दहंतो अहमित्थ उइन्नो, तुमं च पवहणट्ठियं दट्ठूण चिंतिउं पउत्तो—जया एस निवसुओ पाणकयकीयं पिययमं पासिय कामपिसायाभिभूओ भविस्सइ तया एयस्स परिक्खं करिस्सं, जओ रायसायरनिमग्गो पुरिसो भामिणीजणकए कज्जमकज्जं च न वियारेइ, एएण कारणेण तुह विवाहसमए रक्खसरूवं काऊण अहमित्थ पत्तो, तव परिक्खा य मए सम्मं कया । ता तुट्ठोऽहं, वरेसु वरं । संगामसूरो सव्वहा निरीहो तं भणेइ—संपइ सुरुत्तम ! न मे किंपि कज्जमत्थि, तेण तेसिं गंधव्वविवाहं निम्मविय कुमरमापुच्छिऊण य नियदेवलोयं पइ गयं । रायसुओऽवि मणिमंजरीए सह विविहभोए भुंजंतो जलकंतरयणभवणट्ठिओ जाव चिट्ठइ ताव पन्नत्तीए देवीए गंतूण मणिमंजरीए पिउणो पुरओ विवाहवइयरो निवेइओ । तेणावि बहुपरियणजुत्तेणागंतूण महया विच्छड्डेणं पउमिणिसंडपुरेसु सुखं खयरसामिणा पवेसिओ सदारो कुमारो । सूरसेणरायावि संसारभउव्विग्गचित्तो तं रज्जे ठविय सयं दिक्खं गहिय सकज्जसाहगो जाओ, संगामसूररायावि निरवज्जं रज्जं पालंतो अमारिघोसणं जिणभवणाइं च बहुसो कारंतो सम्मं समत्तजुत्तं सावयधम्मं पालिअ पंचमदेवलोए देवत्तणं पामिअ तत्तो चविऊण सिद्धिं गमिही । संगामसूरस्स निवस्स वुत्तं, एवं सुणेऊण चएह निच्चं । नमंसणाई परतित्थियाणं, समीहियत्थं जइ पाउणेह॥१॥ आद्ये यतनाद्वयविषये सङ्ग्रामसूरकथा ॥ आद्ययतनायुगलस्वरूपमुक्त्वा तृतीयचतुर्थयतनयोः स्वरूपमाह

गउरवपिसुणं वियरणमिट्ठासणपाणखज्जसिज्जाणं । तं चिय दाणं बहुसो, अणुप्पयाणं मुणी बिंति ॥४९॥

व्याख्या—इष्टं अभीष्टं मनोहर्षकारि अशनं—ओदनादि पानं—द्राक्षेक्षुरसादि नीरं खाद्यम्—आर्द्रशुष्कफलादिकं शय्या—निवासस्थानं तेषां वितरणं-दानं 'गौरवपिशुनं' महत्त्वख्यापकं स्यात् । ईदृग्युक्त्या मिथ्यादृशां दानं न देयमिति तृतीया यतना । चतुर्थयतनामाह—'तं चियत्ति' तदेव प्रागुक्तं दानं 'बहुशः' अनेकवारं दीयमानमनुप्रदानं 'मुनयो' महर्षयो ब्रुवत इति गाथार्थः ॥ ४९ ॥ पञ्चम्याः षष्ठ्याश्च यतनायाः स्वरूपमाह—

सप्पणयं संभासणकुसलं वो साग यं व आलावो । संलावो पुणुरुत्तं सुहदुहगुणदोसपुच्छाओ ॥५०॥

व्याख्या—'सप्रणयं' सस्नेहं 'सम्भाषणम्' आलापनं, प्राकृतत्वाद्वन्द्वभावो न दोषाय, तच्च कथं स्यादित्याह—'कुशलं वो' मङ्गलं युष्माकं 'वा' अथवा 'स्वागतं' शोभनमागमनमित्यालापः, एष मिथ्यादृग्भिः सह न विधेयः, एतत्संबन्धवशादमन्दपिचुमन्दकटुविपाकादिव सम्यग्दर्शनस्य सहकारस्येव तिक्तत्वप्रसङ्गः, यदागमः—"अंबस्स य निंबस्स य दुण्हंपि समागयाइं मूलाइं । संसग्गीइ विणट्ठो अंबो निंबत्तणं पत्तो ॥ १ ॥" इति पञ्चमी यतना । षष्ठीं यतनामाह—'संलावुत्ति' सुखदुःखगुणपृच्छातः संलापः पुनरुक्तं जायेत, कथम्?—यूयं सप्तविधसुखशालिनो निरुपद्रवाः स्थ? इत्यादि सुखपृच्छा, केन हेतुनाऽधुना भवन्तो विमनस्कारा राजदस्युदायादादिपीडिता इव वीक्ष्यध्वे? इत्यादि दुःखपृच्छा, केषु केषु शास्त्रेषु सङ्गतिपरिचयं कुरुध्वं? किं दानं दध्वे? औदार्यधैर्यविनयनयदाक्ष्यदाक्षिण्यादिषु यत-

ध्वे नवेत्यादि गुणपृच्छा, केन ज्वरभगन्दरशोफशोषार्शोवातपित्तकफातीसारादिरोगेणाथवा भूतप्रेतपिशाचपन्नगग्रहावेशबाधया शरीरकष्टमनुभवतेत्यादि दोषपृच्छा, एवं मिथ्यादृग्भिः सह संलापकरणं दुर्गदुर्गतिपाताय, अत एव भगवता निषिद्धं, 'नो मे कप्पइ अज्जप्पभिई अन्नउत्थिए वा अन्नउत्थियदेवयाणि वा अन्नउत्थियपरिग्गहियाणि अरिहंतचेइयाणि वा वंदित्तए वा नमंसित्तए वा पुव्विं अणालत्तेणं आलवित्तए वा संवित्तए वा, तेसिं असणं वा पाणं वा खाइमं वा दाउं वा अणुप्पयाउं वा' इति गाथार्थः ॥ ५० ॥ अत्रार्थे मन्त्रितिलककथा, सा चेयम्—

धरणीरमणीभालस्थलीतिलकसन्निभम् । विजयाढ्यं पुरं भोगावतीजित्वरवैभवम् ॥ १ ॥ तत्र दुर्वारवीर्यारिवनबाधानलोपमः । नलो नाम महीपालः, धरिसलधरते स्म गाम् ॥ २ ॥ तस्याभूत्पट्टमहिषी, सर्वान्तःपुरमण्डनम् । सौभाग्यमञ्जरीचूतभूता सौभाग्यमञ्जरी ॥ ३ ॥ तस्य सर्वंसहा भर्त्तुर्बुद्धिपङ्कजिनीरविः । मन्त्रिणां तिलको मन्त्रितिलको नाम मन्त्र्यभूत् ॥ ४ ॥ श्रीनलः क्ष्मातलस्वामी, विरञ्चिरिव वासुकौ । निवेश्य वसुधाभारं, तस्मिन् सुखमयोऽजनि ॥ ५ ॥ अन्यदा नलभूपालश्चचाल मृगयां प्रति वाजिराजं समारुह्य, ससैन्यो मन्त्रिणा समम् ॥ ६ ॥ अरण्ये प्रासरत्सैन्यं, दैन्यकृदन्यदेहिनाम् । यावत्तावद्ददर्शैकं, मन्त्रियुक् भूधनो मृगम् ॥ ७ ॥ आरोप्य यावत्कोदण्डं, काण्डं मोक्ष्यति तं प्रति । तावत्तेन धराधीशो, बभाषे नरभाषया ॥ ८ ॥ मृगयाव्यसनासक्तो, यत्त्वं हंसि मृगानमून् । तत्तव क्षत्रियोत्तंसाक्षत्रं कर्त्तुं न युज्यते ॥ ९ ॥ तृणाशिनोऽशरण्यांश्च, वनजान् प्राणिनः कथम् । निरापराधांस्त्वं राजन्!,

प्रहरन्नैव लज्जसे? ॥ १० ॥ द्रोहिणस्ते शरीरे किं, किं वा कोशस्य मोषणात्। अन्तःपुरप्रवेशाद्वा?, यत्तान् हंसि निरागसः ॥ ११ ॥ अकृतापरसन्तापा, वनभ्रमणलालसाः। मृगास्तेषु कथं प्राणी, प्रवर्त्तेते वधाय हि? ॥ १२ ॥ इति श्रुत्वा नलो राजा, विस्मितो मन्त्रिणं प्रति। प्रोचे कथं कुरङ्गोऽयं, वक्ति मानुषभाषया ॥ १३ ॥ तं स्माह मन्त्रितिलको, मन्त्री देवैष नो मृगः। देवो वा दानवो वाप्यत्रागात्केनापि हेतुना ॥ १४ ॥ अस्यैव पृष्ठतस्तस्माद्गम्यते वेगतो विभो!। किं किं विचेष्टते तत्तदस्य देव! विलोक्यते ॥ १५ ॥ झम्पां गुरुतरां तन्वन्मृगोऽगाद्विपिनान्तरम्। तत्पृष्ठगौ नृपामात्यावपि भृत्याविव प्रभुम् ॥ १६ ॥ ततस्तौ काञ्चनच्छायं, नासान्यस्तविलोचनम्। प्रलम्बितकरद्वन्द्व-मद्वन्द्वशमशालिनम् ॥१७॥ मूर्त्तिमन्तमिवागण्यपुण्यराशिमिवाग्रतः। ध्यायन्तं परमब्रह्म, मुनिमेकमपश्यताम् ॥१८॥ युग्मम्। स मृगस्तत्रभाषिष्ट, वन्देथां मुनिपुङ्गवम्। उत्तीर्य तुरगादेनं, पुण्यप्राप्यसमागमम् ॥ १९ ॥ तथैव तौ ववन्दाते, सानन्दौ मुनिसत्तमम्। तेनापि तौ धर्मलाभाशीर्वादेनाभिनन्दितौ ॥ २० ॥ सहर्षौ पृथिवीपीठे, पादपीठपुरो गुरोः। उपविष्टौ नृपामात्यौ, चक्रे तेनापि देशना ॥ २१ ॥ हिंसा त्याज्या नरकपदवी नानृता गीश्च वाच्या, वर्ज्यं चौर्यं त्रिभुवनवनच्छेदनं संविधेयम् हेयः सङ्गो जिनपतिपदासेवनं सूत्रणीयं, सम्यक्त्वे भोः परिचयवती भक्तिरक्तिः प्रकाश्या ॥ २२ ॥ इत्याकर्ण्य नलक्ष्मापो, देशनां मुनिपुङ्गवात्। धर्मकल्पद्रुमप्रोद्यत्—फलप्राप्त्युन्मुखोऽभवत् ॥ २३ ॥ ततः पद्मोर्ध्वरेखादिशुभलक्षणलक्षितम्। रूपश्रीजितकन्दर्प्पं, मुनिं दृष्ट्वा नृपोऽब्रवीत् ॥ २४ ॥

विराजद्राज्यचिह्नौघ–चिह्निताङ्गस्य किं तव । वैराग्यकारणं जज्ञे?, नाथ तद्वद मत्पुरः ॥ २५ ॥ मुनिः स्माह मही-
पाल,!, सर्वा सांसारिकी स्थितिः । विचार्यमाणा वैराग्यकारणाय भृशं भवेत् ॥ २६ ॥ श्रूयतां च यथाऽस्पष्टं, ममाभू-
दिह संसृतौ । विरक्तिर्व्यक्तिरत्यक्तमुक्तिशक्तिस्तथाऽधुना ॥ २७ ॥ अस्ति प्रशस्तलक्ष्मीकं, नाम्ना सिद्धपुरं पुरम् ।
राजा भुवनसाराख्यस्तत्र शत्रुक्षयङ्करः ॥ २८ ॥ [illegible], कनकश्रीः प्रियाऽभवत् । तस्य मन्त्री च धीरत्व-
सागरो मतिसागरः ॥ २९ ॥ दक्षिणस्या दिशोऽन्येद्युर्गन्धर्वनटपेटकम् । राट्सदस्यागमच्छक्र–गन्धर्वानीकसन्निभम्
॥ ३० ॥ तत्र तेन समारब्धं, नाटकं पटुपाटकम् । मृदङ्गवेणुवीणादिस्वरानुगतगीतकम् ॥ ३१ ॥ अन्तःपुरीभिर्वि-
ज्ञप्तो, राजा कञ्चुकिभिस्तदा । तेनापि ता अनुज्ञाताः, सभामण्डपमैयरुः ॥ ३२ ॥ परिच्छदायाश्छिद्रेषु, पश्यन्त्यो
नाटकं मुदा । कलयन्ति स्म ता लेप्यमयपञ्चालिकाकलाम् ॥ ३३ ॥ रतिजित्वररूपाभिर्भूषिताभिर्विभूषणैः । पुष्पमाला
मालिताभि—रप्सरोभिरिवाथ सः ॥ ३४ ॥ एकाभिर्वारनारीभिर्वीज्यमानोरुचामरः । अन्याभिः क्रियमाणांह्रिपद्म-
संवाहनक्रियः ॥ ३५ ॥ सिंहासनमलङ्कृत्य, सामन्तामात्यपौरयुक् । प्रेक्षणीयं प्रेक्षते स्म, यावद्राजैकमानसः ॥ ३६ ॥
त्रिभिर्विशेषकम् । तावदेत्य प्रतीहारः, सहसा विहितानतिः । मुकुलीकृतपाण्यब्जः, प्रजापालं व्यजिज्ञपत् ॥ ३७॥
सिंहद्वारे महाराज!, श्वेतवस्त्रविभूषणः । चक्राष्टाङ्गनिमित्तज्ञो, विलसद्धस्तपुस्तकः ॥ ३८ ॥ समेतोऽस्ति द्विजः स्वा-
मिन्!, प्रवेशोऽस्य प्रदीयते । आस्थाने यदि वा नेति, कोऽत्रादेशो ममाऽधुना? ॥ ३९ ॥ युग्मम् । राज्ञा सेर्ष्येण स

प्रोक्तो, व्रज किं तेन सम्प्रति । प्रेक्षणीयक्षणेऽमुष्मिन्, सुराणामपि दुर्लभे ? ॥ ४० ॥ विज्ञप्तोऽथ स भूनाथो, मतिसागरमन्त्रिणा । स्वामिन्! प्रसादमासूत्र्यानाय्यतां स हि वाडवः ॥ ४१ ॥ प्रायो न दृश्यतेऽष्टाङ्गनिमित्तज्ञः पुमान् भुवि । नूत्नं तु दृश्यते नित्यं, तव देव! प्रसादतः ॥ ४२ ॥ नृपादिष्टप्रतीहारमुक्तोऽसौ सिद्धपुत्रकः । आशिषं चाक्षतान्याशु, दत्त्वा राज्ञ उपाविशत् ॥ ४३ ॥ पृष्टोऽथ वाडवो राज्ञा, सम्पूर्णे प्रेक्षणीयके । कुशलं तेऽस्ति ? सोऽप्यूचे, नैव मे देव! विद्यते ॥ ४४ ॥ न श्रेयस्तव राजेन्द्र!, नापरेषामपि क्षणात् । परतोऽहं प्रपश्यामि, ज्ञानेन नरपुङ्गवः! ॥ ४५ ॥ सेर्ष्यस्तमब्रवीद्राजा, ग्रहचक्रसमन्वितम् । किं निपत्य नभश्चूर्णीकरिष्यति पुरं ह्यदः ? ॥ ४६ ॥ अथवा कोपतः कोऽपि, सुरः क्षेप्ता महीधरम् । यद्वा कल्पान्तकल्पोऽग्निः, समुद्भूयाशु धक्ष्यति ? ॥ ४७ ॥ हहा पश्यत जिह्वायाश्चापल्यं वाडवस्य भोः । न्यक्कुर्वन्निति तं भूपो, मन्त्रिणाऽभाणि सादरम् ॥ ४८ ॥ स्वामिन्नश्रेयसो हेतुरेष एव हि पृच्छ्यताम् । किमेतैर्वचनोल्लासैरमर्षस्पर्शपांशुलैः ॥ ४९ ॥ ततोऽब्रवीन्नृपो विप्र!, वदाक्षेमस्य कारणम् । सोऽप्यूचिवान्मनः शान्तं, कृत्वाऽऽकर्णय वर्णप! ॥ ५० ॥ यद्भावि न तत्कर्त्तुं, शक्रेणापि हि शक्यते । यच्च भाव्यन्यथा तन्नैवेति सर्वस्य सम्मतम् ॥ ५१ ॥ तन्मा रोषं कुरु क्ष्माप!, मयि सत्यं प्रजल्पति । इत्युदित्वा स दैवज्ञः, पुनर्वक्तुं प्रचक्रमे ॥ ५२ ॥ धाराधरः स्फुरद्धारासारैर्वर्षन् विशाम्पते! । एकार्णवं परं सर्वं, क्षणादेव करिष्यति ॥५३॥ एवं वदत एवास्य, कौबेर्यां दिशि वार्दलम् । कचोलकमुखप्रायमद्राक्षीदुन्मुखो जनः ॥५४॥ स स्राद्दैव घनो व्योमा

क्रम्याक्रम्य क्रमेण भोः! । महीमेकार्णवां कर्त्ताऽभैषीच्छ्रुत्वेति पूर्जनः ॥ ५५॥ भोऽम्बुवाहो महावेगात्, समाच्छाद्य नभोऽङ्गणम्। गर्जन्नघोषैर्वधिरीचक्रे ब्रह्माण्डमण्डलम् ॥५६॥ प्रचण्डतडिदाटोपैर्भेदयन् रोदसीमसौ। मुशलाकारधाराभिर्ववर्षति स्म स्मयादिव ॥ ५७ ॥ पश्यतामेव लोकानां, निमज्ज्य सकलं पुरम्। आस्थानमण्डपं प्राप, भूपस्य जलमुग्जलम् ॥ ५८ ॥ तत उत्थाय भूनेताऽमात्यनैमित्तिकान्वितः। भयव्याकुलितः सौधस्यारोहत्ससमं क्षणम् ॥ ५९ ॥ मन्दरक्षुब्धपाथोधिध्वानसन्निभनिस्वनैः। आक्रन्दतो जनांस्तत्र, स्थितो भूरमणोऽशृणोत् ॥ ६० ॥ हा वत्स वत्स! हा तात!, हा मातर्हन्त बान्धव!। अस्मादुपद्रवाद्रौद्रात्, कथंकारं छुटिष्यते ॥ ६१ ॥ इति प्रलापांल्लोकानां, यावच्छृण्वन् स्थितो नृपः। तावत्प्रापाम्बु सौधस्य, सलिलं सप्तमं क्षणम् ॥६२ ॥ तद्विलोक्याल्पद्भूपो, मन्त्रिणं मतिसागरम्। हहा अकृतपुण्यानामस्माकं मृत्युरीयिवान् ॥६३॥ मया श्रावकवंश्येनाप्यहो भोगैकगृध्नुना। मुधाऽयं गमितः कालस्तत्सम्प्रति करोमि किम्? ॥ ६४ ॥ चिन्तारत्ननिभं नृत्वं, वृथा गमयता मया। राज्यभोगप्रसक्तेनाग्राहि कोट्या हि काकिनी ॥ ६५ ॥ किं कुर्मः कं स्मरामो वा, पूत्कुर्मः कस्य चाग्रतः? । पतिता आपदम्भोधावगाधेऽनवधौ वयम् ॥ ६६ ॥ एवं वदत एव क्ष्माभृत्प्रभस्तत्र रंहसा। सलिलं लोलकल्लोलमालं पादान्तमापतत् ॥ ६७ ॥ भीतः पञ्चनमस्कारं, यावत्सस्मार भूधवः। तावदेकं महापोतमभ्यायान्तमुदैक्षत ॥ ६८ ॥ वलभ्यां तस्य सौधस्य, तं प्राप्तं वीक्ष्य मन्त्रिराट्। स्वामिनं स्माह देवामुं, पोतमारुह वेगतः ॥ ६९ ॥ अवैमि कोऽपि देवो वोऽगण्यपुण्यवशंवदः।

आपद्यापनिरासाय, पोतमेनमढौकयत् ॥ ७० ॥ इति श्रुत्वा महीजानिर्यावत्तमारोढुमिच्छति । यानपात्रं समुत्पाद्य, दक्षिणं चरणं न्यधात् ॥७१॥ तावन्न वारिधिं नैव, वारिपूरं न पोतकम् । ददर्श किन्तु पूर्वोक्तं, स्वस्थावस्थं व्यलोकयत् ॥७२॥ क्वापि गीतध्वनिं क्वापि, नाट्यं क्रीडज्जनं क्वचित् । भूपालः प्रविलोक्योद्यत्कुतुको विप्रमभ्यधात् ॥ ७३ ॥ सिद्धपुत्र! किमेतत्सोऽप्याख्यद्भूपेन्द्रजालिकः । युष्मद्विस्मापनार्थैतत्, दर्शितं संहृतं तथा ॥ ७४ ॥ प्रीतः कोटिद्वयं तस्मै, सुवर्णस्येन्द्रजालिने । दत्त्वैकान्ते महीकान्तः, कान्तादिजनमभ्यधात् ॥७५॥ युष्माभिरिन्द्रजालस्य, प्रपञ्चोऽयं विलोकितः । तेऽप्यूचुरद्भुतोऽत्यन्तं, प्रसादाद्वो निरीक्षितः ॥ ७६ ॥ ततोऽवोचन्नृपो यादृगिन्द्रजालं विलोकितम् । तादृगेवात्र संसारस्वरूपं त्रिस्थ चेतसि ॥ ७७ ॥ रूपं प्रेम बलं सम्पदायुर्यौवनमङ्गनाः । वातोद्धूतध्वजाचेलाञ्चललोलानि निश्चितम् ॥ ७८ ॥ निरन्तरस्फुरद्दुःखप्रेक्षणीयाङ्गणोपमे । संसारे सुखलिप्सैषा, सर्वा सत्वरगत्वरी ॥ ७९ ॥ इयत्कालं मया व्यर्था, सामग्री नृभवादिका । गमिताऽतः परं धर्त्ता, पारिव्राज्यं च मुक्तये ॥ ८०॥ श्रीविक्रमसुतं राज्ये, न्यस्य दानं वितीर्य च । येनाऽऽदायि परिव्रज्या, सोऽहं नलनराधिप ! ॥ ८१ ॥ अर्थोऽयं स्वानुभूतोऽपि, कथ्यमानो लघुत्वकृत् । भवेद्यद्यपि युष्मासु, तथापि गुणहेतवे ॥ ८२ ॥ तच्चरित्रसहस्रांशावुदिते नलचेतसि । युक्तं दूरतरं नष्टमज्ञानतमसाऽञ्जसा ॥ ८३ ॥ ततो नलनृपः स्माह, मुनिराज ! भवादृशाम् । धीराणामेव त्रुट्यन्ति, राज्यबन्धनरज्जवः ॥ ८४ ॥ मन्ये मया पुरा पुण्यं, किमप्यासीत् कृतं विभो ! । येन त्वत्पादपद्मस्य, दर्शनं समजायत ॥ ८५ ॥ यतः—

महद्भिः पापात्मा विरलमपि सङ्गं न लभते, वियोगं प्राप्नोति क्षणमपि न तैः पुण्यसहितः । अतः किञ्चित्पापं सुकृतमपि शङ्के त्वद्विषये, सद्भिः संसर्गः कथमस्य कथं चैष विरहः? ॥ ८६ ॥ प्रसीद भगवन्नद्य, विचार्य मम यो-ग्यताम् । देहि सद्धर्म्मकृत्यस्यादेशं पापार्तिनाशनम् ॥ ८७ ॥ मुनिः स्माह जिनं देवं, गुरुं निर्ममतादृतम् । जीवादि-तत्त्वश्रद्धानमाद्रियस्व क्षमापते! ॥ ८८ ॥ सत्काराशनदानादिकृत्यं मिथ्यादृशां पुनः । सम्यक्त्वरत्नमालिन्यजनकं वर्जयेः सदा ॥ ८९ ॥ सम्यक्त्वं गुरुपादान्ते, राजा सचिवसंयुतः । जग्राह चेतोऽभिमतार्थदानस्वर्द्रुसोदरम् ॥९०॥ ततो गुरुं नृपोऽप्राक्षीत्कोऽयं कल्याणभाजनम् । मृगः, सोऽध्याख्यदेषोऽभूद्विप्रो मित्रं पुरा भवे ॥ ९१ ॥ अज्ञानतपसा मृत्वा, यक्षोऽभूदेष भूपते! । त्वद्दर्शनेनास्येदानीं, सञ्जज्ञे प्रीतिरद्भुता ॥ ९२ ॥ मद्दर्शनादमुष्यापि, भद्रकत्वोदयोऽभ-वत् । मृगरूपं विकुर्व्यैष, व्यवसायममुं व्यधात् ॥ ९३ ॥ प्रकटीभूय यक्षोऽपि, मुनिं नत्वाऽब्रवीदद: । सम्यक्त्वं तव पादान्ते, ममाप्यस्तु यतिप्रभो! ॥ ९४ ॥ यक्षोऽवादीदिलापाल!, समये मामनुस्मरेः । येन त्वत्पुण्यकृत्यस्य, संवि-भागी भवाम्यहम् ॥ ९५ ॥ ते धर्मशिक्षामक्षूणां, प्राप्याज्ञामपि सद्गुरोः । सानन्दास्तं नमस्कृत्य, जग्मुः स्थानं निजं निजम् ॥ ९६ ॥ राजा रत्नमयं बिम्बं, कारयित्वा जगद्गुरोः । त्रिकालं पूजयामास, शासनोन्नतिपूर्वकम् ॥ ९७ ॥ सच्चकार सदा साधूंश्चकोरानिव चन्द्रमाः । साधर्मिकादिवात्सल्यमकल्पयदनल्पधीः ॥ ९८ ॥ अर्हदुक्तं सदा धर्म्मं, तन्वन्मन्त्रीश्वरोऽपि सः । सत्कृत्यकारी भूपस्य, गमयामास वासरान् ॥ ९९ ॥ एकदा मन्त्रितिलको, मन्त्री तीव्ररुगा-

तुरः । प्रत्याख्यातोऽखिलैर्वैद्यैर्वैद्यविद्यापरैरपि ॥ १०० ॥ परिव्राजकवेषेण, वैद्येनैकेन धीसखः । नीरुजश्चक्रे ततोऽमुष्य, पक्षपातं बभार सः ॥ १०१ ॥ इष्टासनान्नपानानि, प्रथमालापपूर्वकम् । तस्मै सहस्रशो दत्ते, तं वचो पर्यदीधिपत् ॥ १०२ ॥ सोऽपि धूर्त्ततया धर्म्ममनिन्दन् परमार्हतम् । कोमलैर्वचनालापै, रञ्जयामास धीसखम् ॥ १०३ ॥ तत्प्रीतिप्राणितो मन्त्री, धात्रीपालस्य संसदि । सभं नीत्वा गुणानस्य, वारं वारमवर्णयत् ॥ १०४ ॥ किमेतदिति भूपेन, पृष्टोऽभाषिष्ट धीसखः । किमुच्यते गुणोत्कर्षो, ह्यर्षादस्य विभो ! भुवि ॥ १०५ ॥ नृपोऽर्हद्धर्मदाचस्य, स्फुरद्ज्ञारत्नदृष्टिभम् । शृण्वंस्तद्वचनं धुन्वन्, शिरश्चैवं जगाद तम् ॥ १०६ ॥ पाखण्डिनोऽस्यासद्भूतान्, गुणान् व्यावर्णयन् जड ! । सम्यक्त्वचिन्तारत्नं किं, कर्दमान्तः क्षिपस्यहो ? ॥१०७॥ एवमुक्तोऽपि राज्ञा सोऽमुञ्चंस्तत्पक्षपातताम् । जगौ सत्कीर्त्तनात्काण्यं, किं सम्यक्त्वे भवेद्विभो ! ॥ १०८ ॥ एकदा पृथिवीस्थानात्, नृपतेश्चरपूरुषैः । प्रेषितः स्वाधिपतये, लेखस्तत्र मियीवान् ॥ १०९ ॥ स्वामिन्नीलनरेन्द्रेण, परिव्राजकवेषभृत् । पञ्चत्रिंशत्सारेहस्यस्तमालश्यामलच्छविः ॥ ११० ॥ वाचालो वैद्यविद्याविदेकः प्रैष्यत पूरुषः । युष्मद्वधाताय कर्त्तव्यः, प्रयत्नस्तस्य निग्रहे ॥१११॥ युग्मम् । एकान्ते वाचयित्वा तं, लेखं कृत्वा च खण्डशः । गूढमन्त्रः समादिक्षत्तद्ग्रहाय भटान्नृपः ॥ ११२ ॥ एनमायान्तमास्थाने, मल्ला आलोक्य तत्क्षणात् । बध्वा यावद्वसिवेश्माभिमुखं प्रागचालयन् ॥ ११३ ॥ कङ्कलोहमयी तावच्छुरिका तत्कटीतटात् । पपात सा नरेन्द्राय, दत्ता तैः पश्यतां नृणाम् ॥ ११४ ॥ राजोचे तं किमेतत्को !,

सोऽवादीद्वेत्ति यद्विभुः । तत्तथैव ततो भूपो, महामात्यमतर्जयत् ॥ ११५ ॥ एवं पापं सभार्यां मे, त्वमानयसि नि-
त्यशः । श्लाघसे च समत्वेन, निर्ममैर्जैनसाधुभिः ॥ ११६ ॥ भक्तपानप्रशंसादि, कुर्वताऽमुष्य पाप्मनः । स्वं सम्यक्त्वं
मम प्राणांश्चासन्निर्गमितानि भोः ! ॥ ११७ ॥ निर्भर्त्स्यैवं पदाक्रुष्टं, भूधवस्तं व्यधात्क्रुधा । शिक्षाकृते च तत्स्थाने,
परं मन्त्रिवरं न्यधात् ॥ ११८ ॥ नियमभ्रंशतो जातपश्चात्तापः स धीसखः । प्रायश्चित्तमुपादाय, पुनः सम्यक्त्वमाश्र-
यत् ॥ ११९ ॥ असिचङ्क्रमणप्रायं, पालयन् धर्ममार्हतम् । ज्ञात्वा राज्ञा क्षमयित्वाऽस्थापि स स्वपदे पुनः ॥ १२० ॥
घातकोऽपि मृतेर्भीतोऽवादीद्भूपं मया व्रतम् । जगृहे भावतो जैनमुचितं यत्कुरुष्व तत् ॥१२१ ॥ ततो राजाऽऽदिश-
न्मल्लान्मुञ्चतैनं तपस्विनम् । यद्रोचतेऽसै तत्कुर्यात्कर्त्तव्यं सुष्ठुमुष्ठुना ॥ १२२ ॥ किन्तु नीलमहीपालो, निग्राह्योऽयं
मया कुधीः । युद्धे कृते त्वङ्गीघात, इति चिन्तयति स्म राट् ॥ १२३ ॥ तदा मृगवरं यक्षमुद्दिश्य विहिताष्टमः । राजा
पौषधशालायां, तस्थिवान् सुस्थिराशयः ॥ १२४ ॥ ज्ञात्वा यक्षोऽपि तद्भावं, बध्वा नीलमिलापतिम् । नलभूपालपा-
दाग्रे, लोठयामास लेष्टुवत् ॥ १२५ ॥ नलस्तं स्माह रे नील !, किं करोमि तवाधुना । सोऽप्यूचे यच्छरण्यानां क्रियते
तत्कुरुष्व भोः !, ॥१२६ ॥ उन्मोच्य बन्धनादाज्ञां,मानयित्वा नलो नृपः । नीलं सत्कृत्य च प्रैषीद्यक्षेणैव निजं पुरम्
॥ १२७ ॥ स्वं राज्यं जिनधर्मं च, निस्सपत्नं स पालयन् । सुखेन गमयामास, वासरान् सुरराजवत् ॥ १२८ ॥
स्वराज्ये प्रतितिष्ठासुमङ्गजं संयमोन्मुखम् । नृपं विज्ञपयामासुरागत्योद्यानपालकाः ॥ १२९ ॥ देवाद्य नन्दनोद्याने,

गुणरत्नाकरो मुनिः । सम्प्रीणयन् जनान् धर्म्मोपदेशैः समवासरत् ॥ १३० ॥ प्रीतिदानं प्रदायैभ्यो, राजा राजजनान्वितः । वन्दित्वा विधिना सूरिमुपाविक्षत्तदन्तिकम् ॥ १३१ ॥ किं स एष महात्माऽसौ, स्वसन्धाम्भोधिपारगः । चिन्तयन्तमिति स्माह, सूरिस्तं वेत्सि भूप ! माम् ? ॥१३२॥ ततो राजा गतारेको, योजिताञ्जलिकुड्मलः । अस्तवीत्त्वे विभो ! धन्या, जननी त्वामसूत या ॥ १३३ ॥ ततः सूरिः स्ववृत्तान्तं, जनानां पुरतो जगौ । एतस्या धर्मसम्पत्तेरेष मे कारणं नृपः ॥ १३४ ॥ इत्यद्भुतं गुरोः श्रुत्वा, जनः संवेगवेगतः । शुश्राव देशनामेनां, भवार्णवतरीनिभाम् ॥१३५॥ भो भव्या भवभीमसागरगतैर्मानुष्यदेशादिका । सामग्री न सुखेन लभ्यत इति प्रायः प्रतीतं सताम् । तद्युष्माभिरिमा पुरातनशुभैरासाद्य सद्योऽनघा, सर्वज्ञप्रतिपादिते व्रतविधौ यत्नं कुरुध्वंतराम् ॥ १३६ ॥ तच्छ्रुत्वा जातसंवेगो, राज्ये न्यस्य सुतं नलः । अमारिघोषणां कृत्वा, दीनादिभ्यो ददौ धनम् ॥ १३७ ॥ यो मया सह चारित्रमादत्ते भवभीलुकः । कुर्वेऽहं तत्कुटुम्बस्य, चिन्तामित्युदघोषयत् ॥ १३८ ॥ लोकैरन्तःपुरेणापि, सदादाय व्रतं गुरोः । संवेगपल्वोल्लासैः, स नलोऽपोषयद्वपम् ॥ १३९ ॥ राजर्षिर्ज्ञानचारित्रदर्शनानां निषेवणम् । कृत्वाऽनशनयोगेन, सर्वार्थमगमद्दिवम् ॥१४०॥ स मन्त्री तिलको दीक्षामदाय सह भूभुजा । सौधर्म्मे प्राप्य देवत्वं, भवे सेत्स्यति पञ्चमे ॥१४१॥ वस्त्रान्नमाल्यगुणसंस्तवनैः परिव्राट्सन्तोषपोषजनकैर्वरदर्शनं हि । मन्त्रीशमन्त्रितिलकेन यथा विराद्ध, नान्यैस्तथा शिवरमारसिकैर्विधेयम् ॥ १४२ ॥ प्रान्त्ययतनाचतुष्टयविषये मन्त्रितिलककथा । इतिश्रीरुद्रपल्लीयगच्छगगनमण्डन-

दिनकरश्रीगुणशेखरसूरिपट्टावतंसश्रीसङ्घतिलकसूरिविरचितायां सम्यक्त्वसप्ततिकावृत्तौ तत्त्वकौमुदीनाम्न्यां षड्विधयतनास्वरूपनिरूपणो नाम नवमोऽधिकारः समाप्तः। नवमं षड्विधयतनाख्यमधिकारमुक्त्वा दशममाकारषट्काधिकारमाह—

आगारा अववाया छ च्चिय कीरंति भंगरक्खट्ठा । रायगणबलसुरक्कमगुरुनिग्गहवित्तिकंतारं ॥ ५१ ॥

व्याख्या—अत्र सम्यग्दर्शने 'आकारा' उत्सर्गमार्गस्खलनानि अत एवापवादाः यतो जिनशासने उत्सर्गापवादपक्षायुक्तौ "उस्सग्गसुयं किंची, किंची अववाययं भवे सुत्तं। तदुभयसुत्तं किंची, सुत्तस्स गमा मुणेयव्वा ॥१॥" अतो गुणागुणविभागमवलोक्योभयपक्षसेवा कार्या, यदुक्तम्—"तम्हा सव्वाणुन्ना सव्वनिसेहो य पवयणे नत्थि। आयं वयं तुलिज्जा लाहाकंखिव्व वाणियओ ॥१॥" उत्सर्गपक्षस्तु यथाख्यातज्ञानदर्शनचारित्राणां निरतीचारो मार्गः, स तावदधुना तादृक्कालसङ्घ(संह)ननधृतिबलविकलैः सम्यक् सेवितुं न शक्यते, तदकरणे चात्मविघातः, तद्विघाते चाङ्गीकृतनियमध्वंसः, ततो दुर्गदुर्गतिपरिभ्रमणं, अतोऽपवादसेवनमपि कृत्वा पुनरालोचनादिनाऽऽत्मा शोधनीयः, यदागमः—"सव्वत्थ संजमं संजमाउ अप्पाणमेव रक्खिज्जा। मुच्चइ अइवायाओ, पुणोऽवि सोही न याविरई॥१॥" अत एव ते 'क्रियन्ते' सेव्यन्ते, किमर्थम्?—'भङ्गरक्षार्थं' गृहीतव्रतपालनार्थं, यतः—"वयभंगे गुरु दोसो थेवस्स य पालणा गुणकरी य। भग्गं गरुयंपि वयं, सगडं व न होइ फलहेऊ ॥१॥" ते च कतिसङ्ख्या भवन्ति?—'षडेव' षट्सङ्ख्या एव, ताने-

वाह—राजगणबलसुरक्रमगुरुनिग्रहवृत्तिकान्तारा इति गाथार्थः ॥ ५२ ॥ तेषां षण्णां मध्ये प्रथमं राजाद्यभियोग-चतुष्टयमाह—

राया पुराइसामी, जणसमुदाओ गणो बलं बलिणो। कारंति वंदणाई कस्सवि एए तह सुरावि ॥५२॥

व्याख्या—'राजा' नृपः, किंविशिष्टः ?—'पुरादिस्वामी' पुरं-नगरं आदिशब्दाद्ग्राममण्डल(मडम्ब)कर्बटखेटदेशप्र-भृतयस्तेषां स्वामी-प्रभुः जनानामिष्टस्वजनसम्बन्धिबान्धवमुख्यानां समुदायो गणः, 'बलिनः' पराक्रमैश्वर्यादिवतो 'बलं' हठः। तथा 'सुरा' जिनमतप्रतिकूला मिथ्यात्ववासनावासितस्वान्ताः क्षुद्रदेवाः, एते कस्यापि सम्यग्दृष्टेर्वन्दनं-नमस्करणं आदिशब्दात्पूजनं शीलखण्डनं वा कारयन्तीति गाथार्थः ॥ ५२ ॥ प्रान्त्याभियोगद्वयमाह—

गुरुणो कुदिट्ठिभत्ता, जणगाई मिच्छदिट्ठिणो जे उ। कंतारो ओमाई, सीयणमिह वित्तिकंतारं ॥५३॥

व्याख्या—'गुरवो' मातृपितृभर्तृकलाचार्यधर्माचार्यादयः यदुक्तम्—"पिता माता कलाचार्य,एतेषां ज्ञातयस्तथा। वृद्धा धर्म्मोपदेष्टारो, गुरुवर्गः सतां मतः ॥१॥" एषां मध्ये ये तु 'कुदृष्टिभक्ताः' शाक्यादिषु भक्तिपराः 'जनकादयः' पितृमातृभ्रातृस्वामिप्रमुखाः 'मिथ्यादृष्टयो' मिथ्यात्वपथपथिका अर्थापत्त्या कमपि बलाद्वन्दापयन्ति नियमभङ्गं वा कारयन्तीति गुरुनिग्रहः, तदादिष्टकरणमित्यर्थः, 'कंतारत्ति' कान्तारो जलफलाद्यशनविकलोऽरण्यप्रदेशस्तत्र कुसार्थेन पतितस्यान्नपानाद्यभावादोमादि 'सीदनं' क्षुधादिसहनं तत्र वृत्तिकान्तार इह केनाप्युपायेनाजीविका, कोऽभिप्रायः ?—

कश्चिद्विपश्चिदुत्सर्गापवादवेदी सम्यग्दृष्टिर्दुर्गतिपातभीरुः संविग्नोऽपि कान्तारे पतितः स्वनिर्वाहमजानानो जीवितव्यरक्षार्थं वृत्तिं कर्त्तुकामो विषमिवान्यदैवतवृन्दं तद्भक्तदीक्षितजनं च मन्वानो जिनमतमेव परमरहस्यं चेतसि चिन्तयन् केनापि मिथ्यादृशा भोजनादिदानदाक्षिण्येन हठान्नियमभङ्गं कार्यत इति वृत्तिकान्तार इति गाथार्थः ॥ ५३ ॥ एभिराकारैः कृतैः कथं न नियमभङ्ग इत्याह—

न चलन्ति महासत्ता, सुभिज्जमाणावि सुद्धधम्माओ । इयरेसि चलणभावे, पइन्नभङ्गो न एएहिं ५४

व्याख्या—'न चलन्ति' न भ्रश्यन्ति, कस्मात्?–'शुद्धधर्मात्' सर्वोपाधिविशुद्धसिद्धिवधूदूतादर्हन्मार्गात्, के?–'महासत्वा' मेरुवन्निष्प्रकम्पाः, किंभूताः?–'सुभिद्यमाना अपि' सुतराम्–अत्यर्थं दुष्टदानवमानवादिभिररुन्तुदयष्टिमुष्टिलेष्टुयन्त्रादिभिः कदर्थ्यमाना अपि, अजातोपसर्गा हि सर्वेऽपि स्वात्मानं सत्त्ववन्तं मन्यन्ते, परं त एव सात्त्विका ये संवृतेऽपि दुर्ग्गोपसर्गे जीवितनिरपेक्षतया निर्वाहितस्वाभिग्रहाः स्युरिति। 'इयरेसिंत्ति' इतरेषां महासत्त्ववदपेक्षया मन्दसत्त्वानां 'चलनभावे' मुख्यादुत्सर्गमार्ग्गाच्च्यवने सति 'एभिः' षडाकारैः प्रागुक्तै राजाभियोगादिभिः 'न प्रतिज्ञाभङ्गो' न स्वीकृतनियमलोपो मनोभावापरावर्त्तादिति गाथार्थः ॥ ५४ ॥ भावार्थस्तु षडाकाराणामपि मृगाङ्कलेखादृष्टान्तेन स्पष्टीक्रियते, तथाहि—

अस्ति स्वस्तिनिवेशे मालवदेशे स्वसम्पद्यापालकाजयिनी उज्जयिनी नाम महानगरी, यत्र—सितमणिमयार्हच्चैत्याम्शुताहततेजसं, सरसिजसुहृन्मूर्त्ति व्योमान्तरालमुपेयुषीम् । प्रदहदगुरुद्रुच्छद्मांङ्कितामवलोकयंस्तुहिनकिरणभ्रान्तिं धत्ते जनो दिनयौवने ॥ १ ॥' तत्र शत्रुचक्रागञ्जितसेनः श्रीमदवन्तिसेनः क्ष्मापतिः। तस्य सुविज्ञातजिनवचनसारो धनसारो नाम सार्थवाहः, तस्य च लावण्योपहसितरम्भा नियुञ्जितार्थिजनदानसंरम्भा पापव्यापारनिरारम्भा रम्भा नाम गृहिणी, तयोः सौभाग्यपार्वतीगर्वसर्वंकषा प्रज्ञावज्ञातभाषा निर्मलशीलकलापहस्तितमृगाङ्कलेखा मृगाङ्कलेखा नाम तनया, सा बालकालादपि जिनधर्मकर्मकर्मठा कदाचिदुद्यानमध्यवर्त्तिनि स्वपितृकारिते रत्नमयजिनभवनेऽष्टप्रकारपूजोपकरणकलिता श्रीवीतरागदेवमभिवन्दितुं जगाम । अत्रान्तरे सागरदत्तश्रेष्ठिनन्दनः सागरचन्द्रनामा तारुण्यमुद्रामुद्रिताङ्गः समित्रस्तत्रागौकिष्ट । मृगाङ्कलेखाऽपि पुष्पादिभिर्जिनार्चामभ्यर्च्य भावपूजां सिसाधयिषुः कायोत्सर्गेणावास्थित । तथास्था सा सर्वाङ्गाभरणभूषिता शशिसूरायमाणचलत्कुण्डलयुगलालङ्कृतकर्णमूला काऽपीयं देवताप्रतिमेति विमृश्य पद्योर्निपत्य सागरचन्द्रेण प्रणता । तदा हस्ततालपूर्वं सुहृद्भिः सागरचन्द्र उपहसितस्तानेवाह स—भो भोः ! सर्वा अपि देवता नमस्करणीयाः तत्कोऽत्र भवतां हासोल्लासः ?, तेऽपि ब्रुवते स्म—वयस्य ! नैषा देवताप्रतिमा, किन्तु सर्वाङ्गसुन्दरा धनसारश्रेष्ठिसुता मृगाङ्कलेखानाम,—'पुरा भविष्यचेदेषा, तदा लक्ष्म्याः कृते कृती । को नाम पयसां राशि—ममन्थिष्यद्विचक्षणः ? ॥ १ ॥ अत एवनामसारसंसारमरुमार्गामृतसरसीसदृशीं दृशा सम्यक् परिभावय यथा

भवति सफलं तव जन्मेति सुहृद्भिरभिहितः स ध्यातवान्–मम जन्म यौवनं धनं च सर्वमप्यसारं यदेनां तिलोत्तमोत्तमां न रेमे। ततस्तस्य स्वगृहं गतस्योद्दामकामज्वरविधुरितस्यान्नेऽप्यरुचिरजायत, विहस्तैरपि जनकादिभिः पृष्टोऽपि न स्पष्टमाचष्ट। तन्मित्रमुखात्कारणं विज्ञाय पितरौ ब्रुवाते स्म–वत्सोत्तिष्ठ भुङ्क्ष्व विद्धि च तां बालां स्वाशयकुशेशयशयालुं मरालीमिव। इतश्च तत्रैव पुरे सागरदत्तेन श्रीऋषभनाथचैत्यं रत्नमयं कारयित्वा प्रतिष्ठाप्य दशाह्निकामहोत्सवदशमदिने धनसार्थवाहः समाहूतः। ततोऽभयप्रदानदीनजनवनीपकवित्तवितरणजिनसङ्घपूजादिभिर्व्यतीतप्राये तस्मिन्नहनि सागरदत्तगृहे बहुजनपरिवारो धनसारोऽपि गतः। प्रस्तावोऽयमिति सागरदत्तप्रेरितैर्दैवज्ञैरुक्तम्–अपूर्वोऽयं शशिरवियोगो यदद्य ज्योत्स्नी जाता तस्मादद्यैव पर्वदिनं शोभनं च लग्नं यद्युवयोरेकत्र सङ्गतिः, ततोऽस्मद्गिरा परस्परं कमपि बन्धुरं सम्बन्धं विधत्तं, ततः सागरदत्तेनोक्तम्–मदङ्गजस्य सागरचन्द्रस्य योग्या करगृहीतीभवितुं भवत्कन्या मृगाङ्कलेखा,तदनु धनसारोऽपि सागरचन्द्रस्याप्रतिमं रूपं निरूप्य निजनन्दिनीमदात् , ततो नैमित्तिकाभिहिताह्ने द्वयोरपि गृहे विवाहसामग्री संवृत्ता। वधूवरावासन्ने लग्ने वर्णकगृहे निवेशितौ। तदा सागरेन्दुस्तद्दिदृक्षायै समुत्कण्ठितो धनमित्रं स्वमित्रमवादीत्–भ्रातर्मया तदा देवालये भवदुपहसितेन सा सम्यग् न दृष्टा तदधुनापि तदवलोकनकुतूहलं मे पूरय वर्णकभङ्गं कृत्वा कथं त्वं तत्र जिगमिषसीति तेन निषिद्धोऽप्याह स्म–भवतु यद्वा तद्वा, मया तद्विलोकनेन दृगुत्सवः करणीय एव, एवं तं कदाग्रहग्रहिलं ज्ञात्वा ज्योत्स्नानाशिततमिस्रायां तमिस्रायां

सिद्धार्थनामकसिद्धपुत्रप्रदत्तमन्धपटं प्रावृत्य यत्र सा वर्णिनी वर्णके निवेशिताऽस्ते तत्र तौ जग्मतुः। तस्मिन्नवसरे मृगाङ्कलेखा चित्रलेखापत्रलेखादिवयस्याभिः समं परमानन्दमयीं गोष्ठीमासूत्रयन्ती तिष्ठति स्म। अथ चित्रलेखा मृगाङ्कलेखामाह स्म–प्रियसखि! त्वमेव भुवि धन्याऽसि यया सौभाग्यसागरचन्द्रः सागरचन्द्रः प्रियतमो लेभे, यतः—अनुरूपः कलाशाली, वदान्यः सवयाः सुधीः। धनवाननुरक्तश्च, पुण्यैः सम्प्राप्यते पतिः ॥१॥ अथ तद्वचः प्रतिकूलयन्ती पत्रलेखाऽभाषत–मुग्धे! चित्रलेखे सत्यं चित्रलिखितैवासि, न जानासि सारासारं, किन्तु मत्सखी-योग्यस्तारुण्यपुण्यलावण्योऽनङ्ग इव चङ्गोऽनङ्गदेवो धनदेवाङ्गभूरस्ति, ततोऽपरा व्याजहार—पत्रलेखे! पत्रलेखैवासि, न पात्रपरीक्षादक्षाऽसि, नूनमनङ्गदेवं को नामानङ्गसमं न मन्यते? परं मया वयस्यावरार्थे संवरनामा ज्ञानी पृष्टः, तेनापि जगदे जगदेकबन्धुना–असावनङ्गदेवो न मृगाङ्कलेखाया उचितो वरः, यदेष विंशतिवर्षपरिमितायुः, तदन्वन्या जगाद–भगिनि! त्वमपि न जानासि, स्तोकमप्यमृतं बहुसुखावहं स्यान्न विषभारः, मृगाङ्कलेखा तु दक्षापि कक्षीकृतामन्दमन्दाक्षा दृशापि ता न न्यषेधयत्। तस्मिन्नवसरे सागरचन्द्रः सर्वं तासामालापं कर्णकटुकमाकर्ण्य कोपाटोपसमुत्कटललाटपट्टः कृपाणमाकृष्य तद्वधाय यावद्धावति स्म तावद्धनमित्रस्तं करे धृत्वाऽब्रवीत्–मित्र क एष तव रोषावसरः?, यतो वामापि वामा न विनाशमर्हति, विशिष्य लज्जासज्जा मृगाङ्कलेखेव निरवद्या मृगाङ्कलेखा, एता अपि तत्सख्यो मिथो नर्मालापं कुर्वन्त्यः कथं वधमर्हन्तीति सम्बोध्य कथमपि सुहृदा स गृहं निन्ये। ततः परं

त्पाणिग्रहणविरक्तचित्तोऽपि सागरचन्द्रः पितृवचोभङ्गभीरुर्न विवाहविधिं न्यषेधयत् । नैमित्तिकदत्तदिने जनाश्चर्यकारी तयोः पाणिपीडनमहामहः समजायत । व्यतीते च दशमेऽह्नि सागरदत्तेन तस्यै सप्रसादं निवासाय ददे प्रासादः । तत्र सुखेन निवसन्तीं तां सागरचन्द्रस्तद्दिनादेव सञ्जातानुशयो दुःस्वप्नवन्न स्मरति स्म न जल्पति स्म न दृशापि वीक्षते स्म, किन्तु निजदुश्चरितमिव तन्नामापि न प्रकाशयति स्म । सापि कमपि स्वदोषमपश्यन्ती तत्सम्भाषणमात्रस्याप्यप्राप्त्याऽधिकं खेदमुद्वहन्ती निजदुष्कर्मपरिणतिं परिभावयन्ती वामकरतलतल्पे मुखशशिनं निवेशयन्ती चित्रलेखाऽऽश्वासनवचनान्यशृण्वन्ती हृदयोद्गतविरहहुतभुग्विध्यापनायेव नयनाश्रुपूरं परिमुञ्चन्ती अशनपानविलेपनशृङ्गारादिकमङ्गारप्रकरमिवोज्झन्ती प्रायः स्वस्य मृत्युशरणसरणमेव गवेषयन्ती कृष्णपक्षेन्दुलेखेव सविलक्षा मृगाङ्कलेखा समयं गमयति स्म । ततस्तद्विरहसन्तापोच्छित्तिचिकीर्षया सखीजनः सरसीः सरसीरुहविरहिताः कङ्केलिवनान्युल्लुञ्छितपल्लवानि मलयाचलमचन्दनं च चक्रुः, तस्याश्चान्तरः परिकरो रत्नरुचिश्वासरणरणकरूपः प्रियः समभूत्, अपरस्तु बाह्यपरिचारः पटुचाटुपरोऽपि क्षार इव सञ्जज्ञे । कदाचिदसौ सदुःखं सखीमेवमाह स्म—मन्मथाग्निपरितप्तमनस्कं, चन्दनेन किमु लिम्पसि गात्रम् ? । अन्तरङ्गबहिरङ्गविधानादन्तरङ्गविधिरेव बलीयान् ॥१॥ एवं दुःखमनुभवन्त्या तया कथमप्येकविंशतिवर्षाण्यतिवाहितानि । अत्रान्तरे श्रीमदवन्तिसेनो राजा चतुरङ्गचमूयुक्तो लाटदेशाधिपजिगीषया चचाल साचलामप्यचलां चालयन्निव । तदा च राज्ञा सादरं सागरदत्तोऽभाष्यत—यन्मया सार्कं नीतिचतुष्कचातुरी-

वाचस्पतिं सन्धिप्रमुखषड्गुणसागरचन्द्रं सागरचन्द्रं स्वनन्दनं प्रेषय, तं विना ममापारे स्कन्धावारे कोऽपरो लवणकर्पूरादिवस्तुपूरं पूरयितुमीष्टे। श्रेष्ठ्यपि राज्ञोऽस्याग्रहं मत्वाऽनिच्छन्नपि जगाद मेदिनीपतिं—स्वामिन्! यूयं पादमवधारयत, सर्वसामग्रीनिस्तन्द्रः सागरचन्द्रः प्रेषयिष्यते मया युष्मदन्तिके। ततो जनकादिष्टः सोऽपि दशमदिने विहितसमग्रसामग्रीको निजमित्रगणमाकार्य सत्कृत्य च कृतकरभसैरिभवृषभतुरङ्गमरथक्रयाणकादिसंवाहनः शुभमुहूर्ते पद्मया जनन्या निर्मितभालस्थलतिलकः क्रियमाणप्रस्थानमङ्गलो मृगाङ्कलेखया कटकं गतः कदा मया दयितो द्रक्ष्यते? तदधुना पराङ्मुखोऽपि निरीक्षणीय इति विमृश्य सख्या सहागत्य विलोकितः। सागरचन्द्रेण बहुकार्यव्यग्रेण कथमपि तां वीक्ष्य निजपरिजनव्यापारणसम्भाषणप्रवणेनापि मौनव्रतेन स्थितं। ततः सा तत्पदपद्मयोर्निपत्य सगद्गदगिराऽवादीत्—प्रियतम! किमर्थं मां भक्तां रक्तां क्लिश्यन्तीमदोषामुपेक्षसे?, यतः—एतावत्यपि काले, गते परीक्षा कृता न यन्नाथ!। सङ्कल्पितदोषहरी, तन्मे वृजिनस्य माहात्म्यम् ॥ १ ॥ अस्मिन् प्रयाणसमये, दासानामप्यकारि सकलानाम्। सम्भाषणमुज्झित्वा, मामेकामहह पातकिनीम् ॥ २ ॥ एवं जल्पन्तीमपि तामवगणय्य पितृपादानभिवन्द्य समन्यत्सैन्यमिव प्रकटयंश्चचाल सुहृत्कलितः सागरचन्द्रः। तदनु मृगाङ्कलेखाऽपमानशतगुणितदुःख छिन्नशाखेव तल्पे गत्वा पपात। क्षणं मूर्च्छन्ती क्षणं चेतयन्ती क्षणं दैवमुपालम्भमाना वर्षलक्षोपमं दिनं कथमपि व्यतीयाय। सागरेन्दुरपि सहागतजनं सत्कारपुरस्सरं विसृज्य तटिनीतटनिकटे सार्थं निवेश्य तस्थौ—अत्रान्तरे विरहिणीजनती-

प्रतापनिर्घोपणार्थमिव पङ्करुहां वयस्यः । संहृत्य रश्मिनिकरं परितः स्फुरन्तं, द्वीपान्तरे सपदि वासमहो चकार ॥ १॥ आकाशवाससदने रजनीरमण्या, विध्यापितः किल ह्रियेव दिनेशदीपः । रागान्नवप्रियतमस्य सुधाकरस्य, सम्भोगयोगभवसौख्यचिकीर्षयेव ॥२॥ निद्रायमाणविपुलायतनेत्रपत्रा, प्रम्लानवक्त्रकमला नलिनी नवोढा । अन्तर्निलीनमधुकृद्ध्वनिकैतवेन, सा रोदितीव रविभर्तृवियोगदुःखात् ॥ ३ ॥ दुष्टप्रदोषसमयावनिनायकेना—लोके विलुप्तवति सर्वजगज्जनानाम् । स्वैरप्रचारकरणायतमिश्रनीरै, राज्येऽभ्यषिच्यततरामसतीजनोऽयम् ॥ ४ ॥ तस्मिन् क्षणे तुहिनभानुरसाववाप्य, पूर्वोदयं निजकरैस्तिमिरान्तरस्थैः । सीमन्तिनीजनकटाक्षशरैरिवाशु, चक्रे स्मरातुरमिदं प्रणिहत्य विश्वम् ॥ ५ ॥ तदा सकलपरिच्छदचिन्तां कृत्वा सागरचन्द्रः पल्यङ्के सुप्तो मुहुर्मुहुः करुणास्वरं प्रलपन्त्याः किंनर्या ध्वनिरश्रौषीत् । तत उत्थाय कृपाणमादाय निर्भयस्वान्तोऽनुशब्दं गच्छन् पत्रलवननिकुञ्जं प्राप्यैकां मृगाक्षीं रत्नाभरणद्युतिद्योतितदिगन्तां विरहज्वलनजाज्वल्यमानाङ्गीं पुनः पुनरतुच्छां मूर्च्छां गच्छन्तीं शिशिरसमीरेण स्वयमेव चैतन्यमाप्नुवन्तीं पुरो निरीक्ष्य सागरेन्दुरवादीत्—भद्रे! मृत्यवे कृतारम्भा किमिति त्वमीक्ष्यसे ?, साप्यूचे—बान्धव ! स कोऽपि जगति पुमान्नास्ति योऽस्मद्दुःखविभागी सम्पद्यते, परमहं मन्ये परोपकाररसिकात्त्वत्तः साध्यसिद्धिर्भवित्री, तस्मादाकर्णय यन्मम प्राणेश्वरो हरिप्रभनामा किंनरसुरः, तस्याहं हारावली नामातिवल्लभा वल्लभा, विधिवशात्तेन सह मार्गमागच्छन्त्या ममाकारणकलहोऽजनि, यदद्य कामिनि ! कदलीगृहेऽत्र रन्तव्यं, ततो मयाऽभाणि—प्रियतमाद्य सुरगिरिशिखरे क्रीडित-

व्यमिति विवादे जाते कान्तो रुष्टाऽत्रैव कदलीगृहे पराङ्मुखीभूय तस्थौ, आसन्ध्यं यामद्वयं यावत् प्रसादयन्त्या अपि न प्रसीदति स प्रियतमः, तद्वियोगेन मम हृदयं ज्वलतीव सहस्रधा भवतीव, ततो मानय मानधनं मे वल्लभमिति, तत्करुणवचनार्द्रितहृदयः सागरेन्दुः किंनरमुपसर्प्य मधुरालापैरपहृतामर्षोत्कर्षमकार्षीत् ? अथ सहासं स किंनरस्तं व्याजहार–योस्त्वं मां प्रियावियोगदुःखिनं मानयसि, न जानासि मृगाङ्कलेखाया विरहवैधुर्यं, या वराकी भक्ता रक्ता चैकविंशतिवर्षाणि भवता परितत्यजे, हा सा कथं भविष्यतीति जल्पित्वा निजप्रियामुत्सङ्गसङ्गिनीं विधाय किंनरस्तस्य पश्यत एव नभस्युदडीयत, अथ किंनर्याः किंकरी प्रकटीभूय तमालपति स्म–मम स्वामिनी मन्मुखेन त्वामाह स्म–तवोपकारस्य प्रत्युपकारं कर्तुं यद्यप्यक्षमा तथापि मूलिकामेकां पादलेपेनाकाशगामिनीमपरां च तिलकेन रूपपरावर्तकरीमादाय मामनृणीकुरुष्वेति दत्त्वा सा तिरोदधे । सागरोऽपि स्वसैन्यमध्यमध्यास्य किंनरमिथुनप्रेम्णोऽनुस्मरन्निति चिन्तयामास,—दृष्टेऽपि भूरिदोषे ये जलरेखासमानकोपभृतः । धन्यास्त एव लोके न पुनर्मत्सन्निभाः क्रूराः ॥१॥ शतकोटिकठिनमनसाऽनवलोकितदूषणाऽपि यन्मयका । त्यक्ता दयिता तन्मे धुरि रेखाऽधमजनेष्वजनि ॥२॥ एवमभिप्रायं स्वमित्राय धनमित्राय निवेदयामास, सोपि सागरं व्याजहार–साधु साधु त्वयाऽयं विमर्शश्चक्रे–एतावन्तमनेहसमेषा निर्दूषणाऽपि यद्भवता । त्यक्ता नाङ्गत्यागं, चक्रे पुण्योदयः स तव ॥१॥ अद्य तु भवता मुक्ता, यावन्न करोति जीवितान्तं सा । तावदिमामाश्वासय, शुष्यद्वल्लीमिव पयोदः ॥ २ ॥ एवं तौ पर्यालोच्य किं-

ञ्चरीवितीर्णमूलिकाद्रवविलिप्तपादौ दुर्जनमन इव श्यामलं नभस्तलमुत्लुत्य मृगाङ्कलेखावासवेश्मद्वारं प्रापतुः । तत्र तल्पे सदुःखाननल्पान् जल्पान् कल्पयन्तीं स्वल्पजलस्थितशफरीमिव वेल्लनोद्वेल्लनानि तन्वन्तीं पुनः पुनः सखीजनेनाश्वास्यमानां निश्वासवाततापैर्मुर्मुरितशय्यीकृतसरसीरुहां निःसहदेहां मृगाङ्कलेखां विरहविधुरां ददर्श सागरचन्द्रः । अथ तेनेरितो धनमित्रोऽन्तर्वासवेश्म प्रविशंस्तया हक्कितः—अरे कोऽसि कुत आगतः? किंवा ते कुपितः कृतान्तः? यदधुना सागरचन्द्रप्रेयस्या लीलालयं प्रविष्टः, अत्रार्यपुत्रं विहाय वासवस्यापि न प्रवेशः किं पुनस्तव, तस्माद्यदि जिजीविषा तदा मद्दृक्षु निर्गच्छ, नो चेन्निजशीलप्रभावकृशानुनेन्धनमिव भवन्तं भस्मसात्करिष्यामि । चित्रलेखे! इमं बाहू धृत्वा दूरय दुराचारमिति व्याहरन्ती तेनाभाणि—सतीशिरोमणे! मां स्वप्रियस्य प्राणप्रियं धनमित्रं मित्रं मित्रसेवारुणं जानीहि, तस्माद्दूरीकुरु वासमन्दिरादसुखकारणं विरहोपकरणं, समागत एव सम्प्रति त्वामनुस्मृत्य भवद्धृदयसागरचन्द्रः सागरचन्द्रः, साऽपि सखेदा तमाह स्म—धनमित्र! अमित्र इव किं मां दैवहतकामुपहससि?, समर्थोऽपि स्वसुहृदं मयि किं न प्रसन्नं करोषि?। अत्रान्तरे सहसा सागरचन्द्रं प्रविशन्तं तदुक्तिप्रेमामृतसारिणीं वाणीं शृण्वन्तं विलोक्य सलज्जा शय्यातः सोत्तस्थौ । ततः सागरः प्रियां प्राह स्म—जीवितेश्वरि! कृतं संरम्भेण, मम निर्विचारस्य दुःखेन सुतरां पीडिता कृशाऽसि, परमहं धन्यः, यत्त्वं मया प्राणन्ती प्राप्ताऽसीति ब्रुवाणस्तां करकमलेन गृह्णन्निव विवाहं प्रकाशयंस्तयाऽभाणि—नाथ मैवं वोचः, तवाहं सदैवाङ्कदास्येवास्मि । ततो दम्पत्योरेवं निर्भ-

रतरप्रेम्णोरभिप्रायं विदित्वा धनमित्रोऽवदत्–वयस्य ! त्वमप्यागच्छेः अहं तु सार्थे गच्छन्नस्मीतिव्योमाङ्गणमुत्पतितः। चित्रलेखापि व्याजान्तरं कृत्वा बहिर्निरगात् । चिरकालेन सङ्गतयोस्तयोर्यद्रतिसुखमभूत्तन्नागराजस्याप्यतिलोला लोलाः प्रकाशयितुं नेशाः । अरुणोदयवेलायां तु सान्द्रस्नेहेन सागरेण सा प्रोक्ता–प्रिये ! मुञ्च मां, सम्प्रति कालविलम्बे कृते पिता श्रीमदवन्तिसेनश्च राजा मां स्वच्छन्दचारिणं कथयिष्यतः । मृगाङ्कलेखाऽप्याख्यत्–नाथाहं कालधर्म्मिणी यदि कथमपि दैवयोगादाधानं भवेत् तदा त्वद्विरहे कथं भवामि ?, पद्मा गतदूषणामपि मां निर्वासयिष्यति सदनात्, किं न श्रुतं–कुक्कुटमार्जारयोरिव श्वश्रूवध्वोः परमं वैरं, सागरोऽपि तमाह स्म–प्रिये ! तन्निरासाय मम सङ्केतसूचकं नामाङ्कितं मुद्रारत्नमिदं गृहाण, निजहारं च मह्यमर्पय, तथा कृत्वा तामापृच्छ्य च स्वसार्थं मरुत्पथमार्गेणालमकरोत् । इतश्च तस्याः कुक्षौ लक्षकुक्षिम्भरिः कोऽपि जीवो दिवोऽवातारीत् , तस्या अपयशसा समं च वृद्धिमाधानमाप, ततः पद्मा प्रकुपिता गृहीतसागरदत्तसम्मता तामतर्जयत्–अहह पापे ! निजोभयपक्षकक्षाशुशुक्षणे ! कलङ्कपङ्किले ! किमिदमद्रष्टव्यमश्रोतव्यं च त्वयि दृश्यते ?, तदनु प्रणतिप्रह्वा सा तामाह स्म–मातस्तवाङ्गभूः सुहृत्सहितः प्रस्थानदिनरात्रावेत्य सङ्गत आसीत्, तेन च सङ्केतनिमित्तं स्वनामाङ्कितं मुद्रारत्नं दत्त्वा मम मुक्ताहारं स्वयमादायागम्यत, एतदुपलक्ष्य पश्चाद्यथोचितं दण्डं कुरुष्व । पद्माऽपि स्मित्वा गरलोद्गारानिव वचनप्रकारानुद्गीवोदगिरत्–आः पुंश्चलि ! जानासि कर्तुमीदृशान् प्रपञ्चान् , वयमपि स्त्रीचरित्रविशारदाः स्मः, कथं त्वद्वचनैः प्रतीमः, स्वसुनुस्वरूपं

जानाना: ? परं यदचिन्त्यं यच्च वक्तुमप्यक्षमं तन्नार्यः अनार्यहृदः कुर्वन्ति, यतः—जं चिंतिउं न जुग्गं न होइ वुत्तुंपि जं खमं होइ । नारीउ हयासाओ करंति कारंति तंपि इहं ॥१॥ तद्गच्छ गच्छ नाहं त्वद्वदनमप्यालोकयामि, यदि परं तव स्थानदायिनी रम्भैव सदम्भाया इति निर्भर्त्स्य स्ववेश्मनः सवयस्यां तां निर्वास्य स्वदास्या च धनसाररम्भयोस्तत्स्वरूपं साऽभाणयत्—यदेतस्या निजनन्दिन्याः सुपरीक्षिताया एव प्रवेशो देयो नेतरथा । ततश्च शिशिरर्तुदग्धपद्मिनीव परिम्लानवदना सवितृच्छविविलुप्तकान्तिर्मृगाङ्कलेखेव मृगाङ्कलेखा चित्रलेखासखीसहाया जनकनिकेतनद्वारमगमत् । तच्छ्वश्रूपूर्वविप्रतारिताभ्यां ताभ्यां सा वेश्मनि प्रविशन्त्येव न्यवारि । तदा तदीयबन्धुना धनञ्जयेन जनकोऽभण्यत—तात! यद्यप्येषा श्वशुरकुलान्निरवास्यत तथापि तवावगणितुं न युज्यते, यावत्सैन्यात्सागरचन्द्रः समेति तावद्गुप्तं प्रकटं वा स्थापयितुमुचिता । श्वश्रूवचसा त्वया प्रोज्झिताऽवश्यमियं प्राणांस्त्यक्ष्यत्यपमानेन, यतः श्वशुरकुलपराभूतानां सुतानां पितृकुलमेवाधारः, तत्कृपां कृत्वा मैनां निर्वासय, यतस्त्वं तातोऽसि अत एवोच्यते, सूनुनैवमुक्तोऽपि हृतसार इव धनसारो निर्भाग्य इवागतां श्रियं तां निरवासयत् । ततः सा जनकापमानेन विशिष्य सदुःखा मुक्ताफलस्थूलान्यश्रूणि मुञ्चन्ती दुर्जनैरुपहस्यमाना सज्जनैरनुकम्प्यमाना पौरनारीभिराश्वास्यमाना सवयस्या पुरान्निःससार । अनुदिनं सागरचन्द्रस्य पन्थानं पृच्छन्ती खरतरखरकरसन्तापिता सरःसन्निहिततरुमूले मध्याह्ने क्षणं विशश्राम । जाते च पश्चिमे यामे प्रियमार्गमनुसरन्त्यदभ्रदर्भसूचिकानिशिताग्रभिन्नांहिक्षरदसृक्परम्परयालक्तकेनेव

महिमण्डलं मण्डलमण्डयन्ती सा पुरश्चचाल । ततः प्रतिनिर्झरं वारि पिबन्ती प्रतितरुं विश्रमन्ती कियद्भिरहोभिः शून्यारण्यं पतिता सती सती मुक्तकण्ठमरोदीत् सगद्गदमवादीच्च—अमन्दानन्दसन्दोहद्रुमराजिपयोधरः । सागरेन्दो! जीवितेश!, द्रष्टव्योऽसि कदा मया ? ॥१॥ प्राणप्रिय ! मया प्रोक्तेनापि यद्भवता दीर्घदर्शिना प्रयाणकनिशि निजागमनं पित्रोर्न न्यवेदि तन्मे पातकिन्याः कुकर्मविजृम्भितं न तव दूषणं, हहा काननजलगगनदेव्यो मामेवंविधदुःखसागरनिमग्नां प्रियाय किं न कथयत? हा तात हा मातर्भ्रातृ भणितावपि मम पातकेन कुलिशादप्यतिकठिनहृदयौ जातौ वत्सलावपि, हा दैव! त्वयाऽहमाजन्म तावतां दुःखानां भाजनं विहिता यावन्तः कल्लोलाः कल्लोलिनीपतिजलेऽपि न सन्तीति पुनः पुनर्विलपन्ती तरुस्थानपि पक्षिणः कोलाहलच्छलेन रोदयामास । एवं निरशना दिनत्रयप्रान्तेऽरण्यमध्यमध्यासीनां तां चित्रलेखा सखी स्माह—प्रियसखि ! अस्मिन्नरण्ये भक्ष्यफलादिशून्ये किमपि कन्दादिकमास्वाद्य प्राणधारणा विधीयते यदि त्वं वदसि, तदा सा क्षुधाबाधिताऽपि तामूचे—सखि! कन्दादीनामनन्तकायानामर्हन्मतेऽभक्ष्याणां वृत्तिकान्तारेऽनुज्ञातानामपि आस्वादनेन न नियमभङ्गं करोमि असारतरप्राणत्राणाय । इतश्च तत्रायातेन चित्रगुप्तसार्थवाहेन स्वसेवकमुखेभ्यो ज्ञाततत्त्वेन तस्याः समीपमेत्य तद्दुःखदुःखितेन साऽभाणि—भगिनि! किं तारतरं रोदिषि ? कस्य वा सुभगशिरोमणेः परिग्रहेऽसि ? यत्र त्वमादेशयसि तत्र त्वां नयामि, ततः साऽपि तद्वचःश्रवणेन किञ्चिज्जातसन्तोषा स्वचरित्रं तदग्रे न्यवेदयत् , बान्धव! नय मां श्रीमदवन्तिसेनराजध्वजिनीं, सोऽप्योमि-

त्यभिगत्य स्वसार्थे नीत्वा कुलदेवीमिव तामाराधयन् सहकृत्य पुरश्चचाल। साऽपि तत्परिकरोपचारकिञ्चित्सञ्जात-सौख्या यावदस्थात् तावत् सार्थादिन्धनाद्युपहरणाय चित्रलेखा दूरं गता भिल्लैरपजह्रे। सार्थवाहेन सर्वत्र गवेषिताऽपि नावापि, पुनरभिनवदुःखा मृगाङ्कलेखा सखीवियोगात्तथा विललाप यथा सर्वोऽपि सार्थोऽत्यर्थं विहस्तोऽभूत्, हा प्रियसखि! सम्प्रति कं प्रति स्वं दुःखं निवेद्य सुखयिष्याम्यात्मानं? को वा मां त्वां विना दुःखिनीमाश्वासयिता? मया च सह को दुःखं सोढेति विलपन्तीं तां कथमपि संस्थाप्य सार्थवाहः कियद्भिर्दिनैर्नन्दिनपुरपरिसरे यावत्सार्थं न्यवेशयत् तावल्लाटदेशाधीशितुः श्रीशत्रुञ्जयस्य राज्ञो मित्रेण विजयराजेन मालवकदेशादागतः सार्थोऽयमिति सर्वोऽप्यलुण्ठ्यत। तस्मिन्नवसरे वाताहतचम्पकलतेव कम्पमानाङ्गी मृगाङ्कलेखा प्रपलाय्योद्यानदेवकुलैककोणे न्यलीयत। तत्र निशीथे सा सिंहारवश्रवणसम्भूतभया रविमिव प्राची तेजस्विनं सुतमसूत, तं स्वकुलनभस्तलचन्द्रं विलोक्य चन्द्रः समुदियाय, यद्वा सत्पुरुषजन्मनि के नाम नोदयं लभन्ते?। चन्द्रचन्द्रिकोद्योतितदेवभवने मृगाङ्कलेखा पुत्र-जन्म मत्वा विस्मृतदुःखप्रकर्षा जहर्ष। सा तमुत्सङ्गिनं विधाय सकष्टमरौत्सी(रोदी)त्-वत्साहं निर्भाग्यशिरोमणिस्तव जन्मनि कमुत्सवं करोमि? यदि सम्प्रति त्वत्पिता सविधस्थोऽभविष्यत्तदा देवानामप्याश्चर्यकारिणं महामहमकरिष्यत्, तद्वत्स! गतभाग्यलेखायाः (मृगाङ्कलेखायाः) कुक्षौ त्वं किमवातरः?। एवं विलपन्ती सा कथमपि वनदेवतयेति बो-धिता—"रिद्धी वा हाणी वा, गरुयाणं न उण दीणहीणाणं। महिमा उवरागो वा, ससिसूराणं न ताराणं॥ १॥

"अक्षिपक्ष्म कदा लुप्तं?, छिद्यन्तेऽत्र शिरोरुहाः। वर्द्धमानात्मनामेव, प्रसज्जिन्यो विपत्तयः ॥२॥ एवमाश्वास्य वनदेवता तिरोदधे, क्रमेण रात्रिरपि विरराम। तदा सागरचन्द्रनामाङ्कितमुद्रारत्नसनाथेन वस्त्राञ्चलेन समन्तात्परिवेष्ट्य देवकुलैककोणके तं सुतमवस्थाप्य स्वयं स्नातुं वासांसि क्षालयितुं च समीपवर्तिनि पद्मसरसि जगमे। तस्मिन्नवसरेऽत्यन्तबुभुक्षितेन शुनाऽऽमिषगन्धाकृष्टेन स दारको जगृहे, धिग् धिग् इमां कर्मपरिणतिं, न कदाप्यनवकाशः प्राकृतसुकृतदुष्कृतयोः, यतः—"जं जेण किंपि विहियं अन्नभवे इह भवे य सुहमसुहं। तं सो पावइ जीवो वच्चइ देसंतरं जइवि ॥ ॥ १ ॥ धारिज्जइ इंतो सागरोवि कल्लोलभिन्नकुलसेलो। नहु अन्नजम्मनियकम्मनिम्मिओ दिव्वपरिणामो ॥ २ ॥ ततः स बालकः समीपसरित्तटे शौचार्थमेतस्य वैश्रमणश्रेष्ठिनः पुरस्तात्तद्दर्शनतस्तस्य सारमेयस्य वदनादपतत्। तेनापि तत्र प्रवालदलकोमलकरचरणकमलो बालो व्यलोकि, तमादाय जातामन्दप्रमोदो निन्द्वा धनवतीनाम्न्याः स्वजायाया आर्पयत्, साऽपि तत्कालजातकं(बालकं) परासुं दास्या त्याजयित्वा तत्स्थाने तमभिनवं बालकं स्थापयामास, ततस्तज्जन्ममहस्ताभ्यां पितृवच्चक्रे, संवृत्ते च द्वादशाहे सुरेन्द्रदत्तइतिनामविदधे, तन्माहात्म्याच्च वैश्रमणः स्वल्पकालेनैव वैश्रमणतां विभवेनाऽऽशिश्राय, धनवत्यपि निन्दूदोषमुज्झांचकार, ततस्तस्याश्चापरौ नरदेवधनदाभिधौ तनयावभूतां, सुरेन्द्रदत्तोऽपि क्रमेण वर्द्धमानश्चारुतारुण्यं बभार, पित्रा द्वात्रिंशतं वधूः परिणायितो दोगुन्दुकलीलामाकलयामास। इतश्च मृगाङ्कलेखा देहं वासांसि च प्रक्षाल्य सरोवराद्यावदागता तावदानन्दकन्दलीकन्दं तं तनूभवं तत्रानव-

लोक्य पूत्कार–हहा हतकविधिना मुष्टा मुष्टा,ततो मूर्च्छाच्छन्नचैतन्या वज्राहतेव पपात शिशिरसमीरणेन च लब्धचैतन्या विललाप–"वत्स! श्रीवत्समत्स्यादिलक्षणश्रेणिलक्षित!। सुवर्णवर्णवर्ण्याङ्ग! कां गतिं गतवानसि?॥१॥ हा कथं गतपुण्याऽहमपि त्वां मुक्त्वा गता?, किन्तु प्रतिकूलेन विधिना वञ्चिताऽस्मि,रे दैव! प्रियतमबन्धुवर्गप्रियसखीविप्रयोगं दत्त्वाऽपि न तुष्टोऽसि? दुष्टाशय! यत्कष्टमिष्टपुत्रस्यापि ददासि,एवं विलपन्ती सा वल्लववल्लभया ललिताभिधया तद्दुःखदुःखितया कथमपि संस्थाप्य स्वेन साकं गोकुले निन्ये। तया तस्या वपुश्च मधुरतरगोरसेन सुहितीचक्रे, साऽन्यदा गोकुलस्वामिना वसन्तेन क्षामाङ्ग्यपि विजितसुररमणीरूपा निरूपिता, तस्यामत्यन्तानुरक्तो ललिताया गोकुललोकमुखेन स पटूनि चाटूनि कारयामास,सापि तेन गणाभियोगेनापि तं वसन्तं सपत्नमिव प्रेक्षाञ्चकार,ततः सुनिश्चलं शीललीलायितं तस्या विलोक्य ललितया सुललितया गिरा गोकुलपतिरभाष्यत–स्वामिन्! अन्यापि सती पूज्या स्यात्,किं पुनरियं स्ववेश्मसमेता?, ततस्तेन दुरात्मनाऽनङ्गग्रहग्रहिलेन चेतसीत्यचिन्ति–नूनमेषा यावन्मम वेश्मनि न तिष्ठति तावन्न मद्वचो मन्यते,इतस्तां बलादपि स्वसमीप मानयामि,ततस्तां सुखसुप्तां निशीथे स स्वयमपहृत्य गृहमानयत्, तत्प्रार्थनां च बहुशोऽकार्षीत्, तस्याः शीलानुभावेन स पापीयान् वासितवान्स्या तदैव विपेदे। ततश्च–"हिमकरकिरणसहोदरमस्या विललास गोकुले तु यशः। यद्वाऽत्र निष्कलङ्कं शीलं किं किं न साधयति?॥१॥" वसन्तपरिजनेन च सा सत्कृत्य ललितागृहं प्रति प्रेषिता सती मार्गभ्रष्टाऽरण्ये पतिता मार्गश्रान्ता न्यग्रोधतरुतले उपविष्टा कर्मपरिणतिं विमृशन्ती दैवयोगेन

मकरन्दनाम्ना तापसेन विलोक्य करुणारसपूर्णेन पृष्टस्वरूपा निजाश्रमं नीत्वा च कुलपतये दर्शिता। तेनापि पुत्रीति कृत्वा तापसान् सह दत्त्वा मन्दरग्रामासन्ने मोचिता,ग्रामान्तः सायं प्रविशन्ती तद्ग्रामस्वामिसुन्दरनाम्नः पुरुषैर्गृहीत्वा भद्रकाल्यायतने एकोनविंशतिबन्दानां मध्ये मुक्ता, सुन्दरेणापि सुतजन्मसमये दश पुरुषा दश स्त्रियश्च हत्वा चण्डिकायै बलिर्देयो मयेति प्रतिज्ञां पूरयितुकामेन भद्रकालीमठे समेत्य ते सर्वेऽपि बन्दा एकत्रीकृत्याभाष्यन्त-भो भो आकर्णयत कुलधर्मोऽयमस्माकं यदङ्गजे जाते त्रिंशतेर्बन्दकानां बलिः काल्यै दीयते,तज्जीवितमेकं मुक्त्वाऽन्यद्यत्किञ्चिदभीष्टं तद्याचध्वं, ततो बन्दिवृन्दमचिन्तयत्-वज्रं पतत्वस्मिन् कुलधर्मे, यत्रैवंविधो जीववध आचर्यते, उक्तं च-"जो नियजीवियकज्जे, चएइ अमरावइंइ रज्जंपि। कह तं विवायपावं, फिट्टइ अवरेहि दाणेहिं ॥ १ ॥ मेरुगिरिकणयदाणं धन्नाणं देइ कोडिरासीओ। इक्कं वहेइ जीवं न छुट्टए तेण दाणेणं ॥ २ ॥" सर्वेऽपि ते यावन्मृत्युभयभीतमौनमाश्रितास्तावन्मृगाङ्कलेखा तमवोचत्-भ्रातस्त्वामहं याचे प्रथमं मां मारय, पश्चाद्यदभिरुचितं तत्कुर्याः, देवताभियोगादेवेदं वचनं सावद्यं वच्मि बलाभियोगाच्च, अन्यथा सम्यक्त्वशालिनां व्रतभङ्ग एव स्यात्, किञ्च—प्राणिवधं पश्यतामपि महत्पातकं जायत इत्यतः प्रथमं विनाशिता परांस्त्वया वध्यमानान् जीवान् यथा न पश्यामीति तद्वचः श्रुत्वा सुन्दरः सञ्जातसुन्दरबुद्धिः सदयपरिणामश्च तामाह स-भगिनि! व्रज त्वं मुक्ताऽसि मया यस्यास्तवेदृगद्भुता मतिः, ततः साऽपि लब्धावसरा तं स्माह-भ्रातर्नाहमेकाकिनी व्रजामि जीवन्ती पश्चान्मार्यमाणानिमान् मुक्त्वा,

तस्मादेतानुज्झित्वा मामेव व्यापादय,कुरु प्रसादं, किं विलम्बेन?,ततः सुन्दरस्तत्कृपासारगिरं निशम्य विस्मयेन शिरो धुन्वन्नहो अस्या उपकारपरा मतिरिति मत्वा सूक्तमचिन्तयत्,–"निजप्राणैः परप्राणान्, परिरक्षन्ति सदोत्तमाः। मादृशा विपरीतं तु, प्रकुर्वन्ति महाधमाः ॥ १ ॥ ततः स तामुपवर्ण्य जीववधपरिहारव्रतं गृहीत्वा च बन्दानमुञ्चत, तेऽपि तां कुलदेवतामिव स्तुत्वा तद्विसृष्टाश्च स्वस्वस्थानमगुः। ततः साऽप्यग्रे यान्ती पथि ललल्लोलं दंष्ट्राकरालवदनं गुञ्जापुञ्जाभनयनं पञ्चाननं भक्षणाय समापतन्तं वीक्ष्य भयवेपमानाङ्गीति चिन्तयति स्म–का सम्प्रति गतिर्मे भवित्री?, अथवा किमनेन विमर्शनेन?, अस्ति मे शीलमाहात्म्यमेव परित्राणाय महदस्त्रं,ततः सा सिंहं प्रत्युवाच–यदि भो मया स्वपतिं मुक्त्वाऽन्यो मनसाऽपि प्रार्थितोऽस्ति तदा हरे! मां भक्षयान्यथा स्तम्भित इव स्वस्थाने तिष्ठेरिति, तद्वाक्कीलितस्तत्रैवास्थात्केसरी। सापि तदपायमुक्ता पुरो यान्ती गिरिसरित्सरोवरवनान्युल्लङ्घयन्ती जाते सायन्तनसमये विश्रामनिमित्तं वटवृक्षमनुसरन्ती प्रसारितास्यया तमालश्यामलया कालरात्रिमित्रया राक्षस्या तद्भक्षणाय धावन्त्या ददृशे, ततस्तां समीपमागतां बाला समालपत्–हे राक्षसि! यदि मम हृदये सागरचन्द्र एव स्वपतिरेकाग्रतया वर्त्तते तदा द्रागेवोपहता भवेति, तद्वचननालानस्तम्भिता करिणीवाभून्निशाचरी। ततस्तस्यैव वटतरोस्तले रात्रिमतिक्रम्य प्रातः प्रस्थाय सिद्धार्थपुरबहिरुद्यानदेवकुले सा पथश्रान्ता विशश्राम। दैववशात्कामसेनया पण्याङ्गनया निरुपमरूपा निधिरिव तत उत्पाट्य स्वधामानीयेत्यभाष्यत–वत्से! विधेहि गणिकाधर्म्मं, गृहाण तारुण्य-

तरोः फलं, समाराधय स्मरदेवमिति तद्वचः श्रवणकीलसदृशं श्रुत्वा सा स्माह-रूपाजीवे! मया शीलमेवाबालकालं यावत्परिशीलनीयम्, उभयकुलशैलकुलिशसदृशं नाद्रियै वेश्यात्वं, तदनु तया दुष्टया रुष्टया निविडं निगडिताऽपि सा सतीमतल्लिका न शीललीलायितादभ्रश्यत्, विधिवशाच्च तस्यामेव निशि कीनाशनिशान्तमाशिश्राय वेश्या, अथ पापफलमविकलमपि जानानाभिः शुम्भलीभिर्बलादपि तस्या वेश्यायाः पदे साऽभिषिक्ता, तथापि त्रिकरणशुद्ध्या सा शीलमेव पालयन्ती तिष्ठति स्म, न कथमपि तद्वचो मन्यते स्म। ततो गणिकाभिः श्रीकनकध्वजराजस्य पुरस्तात्तद्रूपसौन्दर्यातिरेको व्यावर्णितः, सोऽपि तद्रिरंसावशविवशाशयस्तदानयनाय प्रतिहारं प्राहिणोत्, सापि तं वेत्रिणं श्वित्रिणमिवालापमात्रेणापि न सम्भावयति स्म, सोऽपि तां पटुचाटुवचः पूर्वं प्रोवाच-सुभ्रु! राजाभियोगोऽयं नान्यथयितुमुचितः, स्वयमेव त्वं विचारचतुरासि, ततः सा मौनावलम्बिनी तेन वेत्रिणा बलात् सुखासने क्षिप्त्वाऽचाल्यत, साप्यनन्योपाया कपटेन वैकल्यमवलम्ब्य सुखासनात्पतित्वा भुव्यलुठत् यथा स्वैरं व्याजहार, वस्त्राणि स्फाटयामास, मृगमदक्षोदमिव पङ्कं सर्वाङ्गं लगयामास, समीपवर्तिनं जनं च लेष्टुयष्टिमुष्ट्यादिभिराहन्ति स्म, ततो वेश्याभिर्व्यावृत्त्य स्वगृहमानीयत, तद्दुःखार्त्ताभिस्ताभिर्मन्त्रवादिनः समाहूताः, सा च तान् समीपवर्त्तिनो लकुटैराजघान, तदनु मेदिनीजानिना महामन्त्रविद्याविशारदः कनकबाहुनामा निजाङ्गरक्षस्तद्दोषपरीक्षायै समादिदिशे, सोऽप्येकान्ते श्रीचन्द्रप्रभस्वामिशासनदेवतां ज्वालामालिनीं कनीशरीरेऽवतार्य मृगाङ्कलेखाया दोषमप्राक्षीत्, देव्यपि तन्मु-

खेनाख्यणात्–वत्साख्या महासत्या वपुषि सर्वथापि न दोषलेशोऽप्यस्ति, किन्त्वेषा महासतीषु प्रासरेखा मृगाङ्कलेखा भुवनप्रसिद्धस्य सागरचन्द्रस्य परमप्रेमवती प्रेयसी जिनमतभावितमतिर्विधिवशादिहागता स्वशीलपालनाय ग्रहिलीभूता, अतस्त्वयेयं मूर्तिमती कुलदेवीव रक्षणीया, सोऽपि देवीं विसृज्य पार्थिवाय परमार्थं निवेद्य तां च सम्बोध्य श्रियमिव स्वाश्रयं निनाय, सापि सुरकृतप्रातिहार्या प्रकटितशीलप्रभावा जनैरर्च्यमाना तत्र तिष्ठन्ती चिन्तयति स्म–

अन्यत्र सुतोऽन्यत्रैव, वल्लभः परिजनोऽपि चान्यत्र। बलिरिव सकलकुटुम्बं, प्रक्षिप्तं हतकदैवेन ॥ १ ॥ इतश्च सुरेन्द्रदत्तो व्यवहारकलासु कौशल्यं कलयन्नुपार्जयंश्च घनं धनं पितुर्जीवितादपि वल्लभोऽभवत्, तस्मिन्नवसरे तस्य सर्वेषु कृत्येषूत्कर्षं विलोकयन्ती धनवती तुच्छमतिरिति चिन्तितवती–अस्मिन् जीवति मत्पुत्रौ तूलतुल्यावेव, ततः सा शाकिनीव दुरध्यवसाया तद्व्यापादनाय सविषमोदकमेकमपरौ द्वौ निर्विषौ विधाय तेषां सुतानां कृते कोशशालायां दासीकरे प्रेषितवती तामुक्तवती च–स्थूलं मोदकं सुरेन्द्रदत्ताय देयं, इतरे लघुनी मोदके नरदेवधनदेवयोर्देये, तयाऽपि गत्वा तथैव चक्रे, सुरेन्द्रदत्तस्तु कार्यव्यापृतस्तं मोदकमेकान्ते चास्थापयत्, लघू तु बुभुक्षितौ बुभुजाते तदैव मोदकौ, स तु कार्यव्याकुलत्वेन भोक्तुं यावन्न पारयति तावत्तौ लघुबन्धू पुनः क्षुधितौ जातौ दृष्ट्वातं मोदकं विभज्य दत्तवान्, ताभ्यामपि भुक्तं, ततस्तत्क्षणादेव तौ गुरुगरललहरीपरीतौ विपन्नौ, यत्क्रियतेऽन्यस्य तत्स्वस्यैवायाति। तदनु ज्ञातवृत्तान्तो वैश्रमणस्तस्या दुष्टाशयं विमृश्य स खिन्नः सुरेन्द्रदत्तं रहस्याह स्म–वत्स! व्रज त्वं

स्वार्थसिद्धये ताम्रलिप्तीं पुरीं, क्षणमात्रमप्यत्र मा तिष्ठ,जनन्याः शाकिन्याः कियत्कालं जीव्यते?, सुरेन्द्रदत्तोऽप्युवाच–तात! कथमेतत्?, ततस्तत्पुरः श्रेष्ठिनाऽऽमूलचूलं वृत्तान्तं निवेद्य सागरचन्द्रनामाङ्कितं मुद्रारत्नं च वितीर्य सार्थघटनां संसूत्र्य च ताम्रलिप्त्यां सुरेन्द्रदत्तः प्रैष्यत, सोऽपि पित्रोः परिज्ञानचिन्तया सशल्य इव प्रतिग्रामं प्रतिपुरं सागरचन्द्रं पृच्छंस्ताम्रलिप्तीं प्राप, तत्र घनं धनं समर्जयन् श्रीऋषभदेवप्रासादे पूजार्थं जग्मिवान्, तत्र च शासनदेवतां श्रीचक्रेश्वरीं महाप्रभावामष्टमतपसा पूजोपचारेण चाराधयामास, सापि प्रकटीभूय तमाह स्म–वत्स! तव पिता सागरचन्द्रो माता च मृगाङ्कलेखा सिद्धार्थपुरे प्रियमेलकोद्याने संङ्गस्येते अतो मा खेदमुद्वह, तयोः परिज्ञाने चेदमभिज्ञानं–त्वामवलोक्य प्रश्नरत्स्तन्यधारा भवित्री सवित्री जनश्च सागरचन्द्रं निरूप्य सुरेन्द्रदत्तस्य पिताऽयमिति वदिष्यति, अद्यतनदिनाच्च मासेकेन भवतः पितृभ्यां सह मेलो भविष्यतीति निगद्य तिरोदधे देवी। ततः स परमानन्दामृतसिक्त इव श्रीनाभेयप्रभुमभ्यर्च्य पारणकं विधाय सिद्धार्थपुरं प्रति महता सार्थेन प्रतस्थे। इतश्च सागरचन्द्रः श्रीमदवन्तिसेनराज्ञा शत्रुञ्जये राजनि विजिते कटकाद्व्याघुट्य प्रियादर्शनोत्कण्ठितो निजधामाजगाम,सर्वं स्वोपार्जितं द्रविणजातं पितुरर्पयित्वा प्रियाविप्रयोगाश्रितसाङ्गो मृगाङ्कलेखावासभवनं वदनमिव नयनहीनं गगनमिव तुहिनकररहितं शून्यमालोक्य व्यचिन्तयत्–किं केनापि प्रयोजनेन पितृसद्म गता? अथवा हतविधिना किञ्चिदन्यथा व्यलासि? ततः स गत्वाऽम्बामवोचत्, मातर्मन्मनःकुमुदसमुल्लासनमृगांकलेखा मृगाङ्कलेखा क्व सम्प्रति वर्त्तते?,

सापि तन्निशम्य सशङ्कापि धाष्टर्यमवलम्ब्य स्माह—वत्स! तस्याः पापाया नामापि मा गृहाण, यदसौ त्वयि प्रस्थिते कृतकुलकलङ्का प्रादुर्भूतगर्भा भवनान्निरवासि, तदनाकार्यमाकर्ण्य हा हेति शब्दमुच्चैरुच्चरन् सागरो मुमूर्च्छे, परिकरकृतैः शिशिरोपचारैः कथमपि विगतमूर्च्छो हे कृशाङ्गि! यत्त्वया प्रोक्तेनापि मया पित्रोरग्रे न निजागमनं न्यवेदि तदामरणं मे मनो दहिष्यतीति पुनः पुनर्विलपन्मातरमाह स्म—मातर्मन्नामाङ्कितं चिरपरिचितमप्यङ्गुलीयकं विलोक्य कथं सा महासती निर्वासिता?, अथवा कुपतिस्तुष्टो रुष्टो वा मारयतीति विचिन्त्य हे वनदेवतास्तां मम प्राणप्रियां पितृश्वशुरकुलनिर्वासितां सतीव्रतभृतां रक्षत रक्षत, हा सा शून्येऽरण्ये गर्भभरालसाङ्गी कथं भविष्यतीति प्रलपन् स पितृश्वशुरवर्गं रोदसीपूरं रोदयामास, ततः स गोत्रवृद्धैर्भवभावनास्वरूपैर्बोध्यमानोऽपि शुचं नामुचदचिन्तयच्च—यावन्मृगाङ्कलेखां दृशा न पश्यामि तावत् वर्षसहस्रेणापि न गृहमागच्छामीति प्रतिज्ञामासूत्र्य मित्रेभ्योऽप्यनिवेद्य सद्यः सतूणीरं धनुः सहायीकृत्य सागरो नगरान्निरैयत् । ततो भुवं परिभ्रमन् प्रतिपदं पान्थान् पृच्छन् प्रति गिरिगुहां गवेषयन् प्रति तरून् शोधयन् प्रति तटिनीतटकोटरं निरूपयन् हेडम्बवनखण्डमाप । तत्र हरिण्यादिजन्तुजातमालोक्य प्रलपति स्म—कुरङ्गि! मम प्रियायाः सुरङ्गां दृक्श्रियं कमल! मुखकमलकमलां कलापिन्! केशकलापलीलां अशोक! करचरणाङ्गुलिपल्लवच्छायां शशाङ्क! कपोलपालिशोभां चापहृत्य विषमविषमस्थानेषु यद्यपि यूयं निलीनाःस्थ तथाप्यधुना मम प्रिया(याः)प्रतिप्रतीकोपाहृतां श्रियमर्पयत, नो चेत्कु-

तान्त इव कुपितः सर्वान् व्यापादयितेति मोहपिशाचग्रहग्रहिलः सर्वत्र बम्भ्रमीति स्म । तदा तं तथास्वरूपं निरूप्य हेडम्बनामा निशाचरः कौतुकात्प्रकटीभूयाचष्ट–भोः पुरुष ! किमेषां मृगादीनामुपरि कुप्यसि?, किमित्येतांश्च प्रियारूपं पृच्छसि ?, मामेकमेव पृच्छ येन सा गिलिता सुलोचनेति तद्वचनाकर्णने प्रादुर्भूतप्रभूतकोपावेशः सागरेन्दुस्तद्विध्वंसनार्थासिशुद्वीर्य रणाय सम्मुखो बभूव । तदनु द्वयोरपि महदायोधनं समवृतत, परस्परं प्रहरतोर्भग्नावसी, ततः सागरचन्द्रो द्रुममुन्मूल्य यावत्तं शिरस्यताडयत् तावत्स रौद्रमूर्तिर्द्विगुणत्रिगुणतरतनुर्जातः, तं तथा विकरालं वेतालं विलोक्य सागरचन्द्रः पञ्चपरमेष्ठिनमस्कारमहामन्त्रं सस्मार, तस्मिंश्च स्मृतमात्रे जगाम क्वापि चिषवद्वेतालः । सागरोऽपि गिरिसरःसरित्सु प्रियां शोधयन् क्वापि न तत्किंवदन्तीमात्रमप्याप । ततस्तेन प्रियाप्राप्त्यभावभवन्महदुःखदुःखितेन दारूणि मेलयित्वा ज्वलनं प्रज्वाल्य झम्पां दित्सुना शिखरिशिखरमारुह्य तारस्वरं जल्पे भोः ! सर्वेऽपि देवा देव्यश्च शृण्वन्तु–आजन्म निर्दूषणा प्रियप्रणयिनी मया दुःखापाराकूपारे निक्षिप्ता, तस्याश्च नैकमपि वचश्चक्रे, सम्प्रति च तस्याः क्वापि शुद्धिर्न लेभे, अतो दोषशतमलिनोऽहं सुहुतहुताशने प्रविशामीति यावज्झम्पां दित्सति स तावत्सुयशोनाम्ना सिद्धपुत्रकेण स निषिद्धः-मा कुरुष्वात्मविघातं त्वं, तथा दयितया सङ्गत्य सकलकर्माण्युन्मूल्य शिववधूवरो भविष्यसि, अन्यच्च त्वं सुरेन्द्रदत्तपुत्रेण प्रियया च सह सिद्धार्थपुरे प्रियमेलकोद्याने श्रीयुगादिदेवचैत्ये मिलिष्यसि, इदं च तवाभिज्ञानं यदद्यैव भिल्लपल्लीतो नंष्ट्वा चित्रलेखा तव मिलिष्यति, तां च सह कृत्वा प्रागेव सिद्धार्थे

पुरे व्रज, मा चानुजानीहि नन्दीश्वरवरद्वीपजिनचैत्यनमस्करणायेत्युक्त्वोत्पपात सा नभोवर्त्मनि । अथ सागरश्चिन्त-यति स्म—धन्योऽहमेव यज्जीवन्ती सपुत्रा मृगाङ्कलेखा मिलिष्यति, ततः स त्यक्तमरणाभिलापो गिरिशृङ्गादु-त्तीर्य यावत्पुरः कियतीं भुवं व्रजति स्म तावत्सदुःखं विलपन्त्या एकस्या नायिकाया रुदितध्वनिमशृणोत्—हा दैव ! सा मे प्रियसखी प्रियेण विप्रयुक्ता श्वशुरपितृकुलनिर्वासिता गर्भालसदेहैकाकिनी मां विना कथं भविश्रीति निशम्य सागरः स्वरेण चित्रलेखामनुमीय तत्समीपं गत्वाऽऽश्वास्य च मृगाङ्कलेखायाः शुद्धिमपृच्छत्, साऽपि तं स्वामिनमभिज्ञाय सगद्गदमवदत्—देव ! श्वशुरपितृकुलापमानिता भवन्मिलनाय चित्रगुप्तसार्थवाहेन सहारण्ये संस्थि-ताऽऽसीत् तदाऽहं सार्थात्परिभ्रष्टा दुष्टशबरैर्धनलोभेन धृत्वा पल्लीं नीता, सा च पल्ली सम्प्रति श्रीविजयराजकुअरेण वल्लरीवोदमूलि मूलतः, ततोऽहं प्रपलाय्यात्रायाता भवता मिलिता, सोऽपि तस्यै निवेदितस्वोदन्तः सिद्धार्थपुरा-सन्नप्रदेशे ययौ । अथ सुरेन्द्रदत्तः प्रियमेलकोद्यानमण्डनश्रीनाभेयजिनभवने सम्प्राप्तो भगवन्तं त्रिसन्ध्यमर्चयन् स्वकृत्यसाधनार्थमष्टाह्निकामहामहं कर्तुमारेभे । तस्मिंश्च महे सर्वजनाश्चर्यकारिणि दुरन्तदुरितविदारिणि तद्व्ययित-बहुतरद्रविणे पौरजनेन समं मृगाङ्कलेखा समाययौ । तत्र च युगादिजिनक्रमकमलयुगलं प्रणिपत्य विकसन्नेत्रपत्रा पुत्रधिया पुनः पुनः सुरेन्द्रदत्तं पश्यन्ती प्रक्षरत्स्तन्यधारावारा धरातलमभ्यषिञ्चत् । सोऽपि तां तथा दृष्ट्वा प्रोदञ्च-दुच्चरोमाञ्चो ध्रुवमेषा मे मातेति यावद्वितर्कयत् तावत्स सुयशाः सिद्धपुत्रो नन्दीश्वरयात्रामासूत्र्य तत्र च समेत्य

सुरेन्द्रदत्तमादिदेश–वत्स ! किं संशेषे ?, श्रीमरुदेवानन्दनपदप्रसादादिह ते जननी स्वयमेव सम्प्राप्ता, तत्कुरु मातृचरणप्रणमनं, भद्रे मृगाङ्कलेखे ! तवैष सुतः यस्त्वया यक्षायतने मुक्त आसीत् , स त्वद्भाग्येनात्र समेतः । ततः सुरेन्द्रदत्तः सरभसमुपसृत्य हर्षवशप्रसरन्नयनाम्बुकणैर्मुक्ताफलहारैरिव जननीपदपद्ममर्चयन्नमश्चक्रे, जनन्याऽपि स निजोत्सङ्गीकृत्य दृगानन्दाश्रुकणैः स्नपयन्त्येव शिरश्चुम्बनपूर्वकं स्वरूपमपृच्छि, सोऽपि स्वव्यतिकरं मात्रे निवेदयामास । अत्रान्तर प्रमोदमेदुरोदरः सुयशास्तं ब्रूते स्म-वत्स ! परमोत्सवेन वर्ध्यसे, एकाकी स्वप्रियां काननादिषु शोधयन्नधुना सागरचन्द्रोऽस्य पुरस्ताऽऽसन्नवर्त्ती वर्त्तते इति निशम्य त्रुट्यत्कञ्चुकसन्धिबन्धनरेखा मृगाङ्कलेखा पुलकाङ्कितकाया समभूतत् , ततः सुरेन्द्रदत्तो जननीयुतः सुयशसमाह स्म—वद क्व मे स जनकः ? समेत इति ब्रुवाणः सुरेन्द्रदत्तः पौरजनजननीयुतः पितृसम्मुखं प्रतस्थे, सुयशास्तु पूर्वं गत्वा सागरचन्द्राय प्रियायाः सुतस्य चागमनं न्यवेदयत्, ततस्तत्रैव प्रियमेलकोद्यानप्रान्ते तेषां कृतविप्रयोगदुःखलीलावहेलो मेलोऽजनि । सुरेन्द्रदत्तस्तु तदैव निजजन्मदिनं मन्वानः पितुः पादानवन्दत । सागरचन्द्रोऽपि तमात्मजं परिरभ्योत्सङ्गसङ्गिनमासूत्र्य पूगतरुतले उपाविशत् । मृगाङ्कलेखया च यमुनेव गङ्गया परमानन्दामृतरसपूरपूरितया चित्रलेखा समाश्लेषि । तदा तु तेषां यत्सुखमजनि तत्कविगिरामप्यगोचरचारि । ततश्चित्रलेखामुखात्पतिचरित्रं श्रोत्रपुटेनामृतमिव निपीय भर्तृपदपद्माग्रविलुठद्देहा मृगाङ्कलेखा रुरोद-हा नाथ ! ममाधन्यायाः कृते कथं हुतभुक्प्रवेशाध्यवसायसाहसो मदुचितस्त्वयाऽकारि ?, ततः

सा सुयशसं प्रत्याह स्म—भो निष्कारणवत्सल परमबन्धो ! तव कीर्त्तिरायुगान्तं धवलयतु, येन भवता सागरदत्तस्य निःशेषं कुलमुद्धृतं, एवं ब्रुवाणा सा सागरेण स्ववामपार्श्वे सखीसमेतोपवेश्य भाषिता—प्रिये ! मद्विरहविधुरया त्वया यद्दुःखमनुभूतं तन्मया त्वद्वियोगेन तिलतुषाग्रमात्रमपि न सेहे, एतच्च मम पुण्यमगण्यं यत्त्वं सुरेन्द्रदत्तयुता मद्रूपधमवतीर्णा । अथ कनकध्वजराजा कनकबाहुनाऽऽत्मरक्षकेण सहितः सागरचन्द्रागमनं निशम्य तत्रैव रथादायौ, ततो राजा तं सजायं राजकुञ्जरमारोप्य कारितहट्टशोभे स्वपुरे प्रवेशयामास । मासमेकं सत्कारपुरस्सरमवस्थाप्य स्कन्धावारं च दत्त्वोज्जयिन्यां राज्ञा सागरचन्द्रः सपरिकरः प्रापितः । सुयशोमुखाद्विज्ञातवृत्तान्तेनावन्तिसेनभूपतिना सागरदत्तेन सह सम्मुखमेत्य सगौरवं पौरजनैः सस्पृहमवलोक्यमानः सागरचन्द्रः पुरं प्रावेश्यत, स्वगृहं च गत्वा क्षामितमृगाङ्कलेखां मातरमनंसीत्, मृगाङ्कलेखापि गुरुजनं प्रणिपत्य निजावासमाससाद । सागरचन्द्रेणापि सुतसहितेन विविधवित्तव्ययेन जिनभवनविधापनादिधर्मैरात्मा विध्वस्तपापपङ्कश्चक्रे । सोऽन्यदा युगन्धरनामानं केवलिनमुद्याने समवसृतं श्रुत्वाऽङ्गजदयितायुतस्तत्र गत्वा तं च नत्वोपाविशत् । राजादयोऽपि लोकास्तदा तदुपदिष्टां धर्मकथामिति शुश्रुवुः—"निजकर्म्मवशाज्जीवा अधनाः सधना जडाशया अजडाः । सुभगाश्च दुर्भगा अपि भवन्ति पूज्या अपूज्याश्च ॥ १ ॥ मिथ्यात्वमविरतरतिः कषाययोगास्तथा प्रमादश्च । कर्मप्रकृतेर्बन्धनकारणमेतानि जायन्ते ॥ २ ॥ शुभाशुभैः सदा जीवाः, कर्मभिः सुखदुःखिनः । भ्राम्यन्तेऽसारसंसारे, छिद्यन्तां तानि तद्बुधैः ॥ ३ ॥"

देशनान्ते योजिताञ्जलिपुटा मृगाङ्कलेखा पृच्छति स्म—भगवन्! मया पुरा भवे किं दुष्कृतं कृतं? येनानुभूता दुःख-परम्परा, भगवानप्याह स्म—सिंहपुरे दर्पपराभूतसर्पः कन्दर्पनामा विप्रः कनकरत्नमयप्रासादे वसति स्म, बहुविधविद्यानिष्णातो राजसुतेनानङ्गदेवेन शश्वदाराध्यमानस्तृणाय जगन्मन्यानः सोऽनुदिनं तिष्ठति स्म। इतश्च तस्मिन्पुरे शतकीर्त्तिनामा घोरतपश्चरणचारी परिव्राट् लोकप्रसिद्धो वसति स्म। पुरोहितस्तु तद्गौरवमसहमानो निष्कारणरोषणो राजपुत्रानङ्गदेवमुखेन मिश्रं कन्दर्पद्विजमाह स्म—भोः! शतकीर्त्तिं कथमपि जनेष्वपवादमषीमलीनमातनु, सोऽपि गुर्वनुग्रहराजाभियोगौ दुःखफलावविचारयंस्तद्वचः स्वीचकार। अथ तत्र पत्तने पद्मदेवतनया कमलानाम्नी ललिताङ्गश्रेष्ठितनये रक्तचित्ता प्रच्छन्नं कस्याप्यनिवेदितवृत्तान्ता क्वापि ययौ, दैववशात्तस्मिन्नेवाह्नि मुधाजीवी शतकीर्त्तिर्जनेभ्योऽनिवेद्य ग्रामान्तरमगमत्, तदा लोकेष्विति वार्त्ता प्रससार—यत्कमला केनाप्यन्यायकारिणा नरेण सह जगाम। तदा पुरोधो गुरूपरोधेन राजकुमारस्य चाग्रहेण कन्दर्पो जनेषूदघोषयत्—नूनं कमलां शतकीर्त्तिरादायागमत्, यत्सा तमेवानिशमाराधयन्त्यासीत्, अतो द्वयोरप्येतयोर्विप्रलुब्धयोः सम्बन्धः सम्भाव्यते, ततोऽतत्त्वज्ञो जनस्तथैव तद्वचो मन्यानः सर्वधर्मबहिष्कृतोऽजनि। एकदा शतकीर्त्तिर्ग्रामान्तरादागतस्तेन कन्दर्पेण स्ववचनासत्यताभीरुणा लोकैः सह गत्वा यष्टिमुष्ट्यादिभिस्ताडितः। सोऽप्युपशान्तक्षान्तस्तत्सर्वं सेहे। ततः सप्तमेऽह्नि कन्दर्पस्य

---

१ सर्वेषु धर्मेषु विरक्तोऽजनि इति प्र०

रसनायां दुष्टस्फोटिकोऽजनिष्ट, तत्पीडयाऽऽर्त्तध्यानपरो मृत्वा सारमेयीभूय तथैवाऽऽबाधया विपद्य वेश्यात्वमाप, तत्र च चन्दनधनिसुतसम्पर्केण जिनधर्मे निश्चलाऽभवत्, तदनुभावसञ्जातसौभाग्योदयाद्यं यं कटाक्षलक्षीचकार तं तं कन्दर्पसर्पो दशति स्म। अन्यदा सरस्तीरे विलसन्ती राजहंसमिथुनं मिथः क्रीडदवलोक्य कुतूहलेन हंसं गृहीत्वा कुङ्कुमपङ्केनालिप्यामुञ्चत्, ततो हंस्या रथाङ्गभ्रान्त्या सकरुणमारसन्त्या विरहेण मूर्छन्त्यैकविंशतिघटिकां यावन्मरालेन सह न विलेसे, पुनस्तया विलासिन्या जातकरुणया जलेन जागुडं प्रक्षाल्य विशदीकृतो मरालो मराल्याऽऽदद्रे, तत्प्रदेशाद्विलासिन्यपि स्ववेश्म गत्वा सुचिरं धर्ममनुपाल्य समाधिना मृत्वा मायादोषेण सौधर्मेन्द्रस्याग्रमहिषीभूय च्युत्वा च शीलप्रासरेखा मृगाङ्कलेखा त्वमभूः। सोऽप्यनङ्गदेवः कन्दर्पद्विजकृतपापमनुमोद्य सुचिरं भवान् भ्रान्त्वा चित्रलेखात्वेनावतीर्णः, यत्त्वया स कलङ्कितस्तेनाजीर्णेन पातकेन भवती कलङ्किता, यच्च तपस्वी ताडितः तेन दुरन्ता दुःखपरम्परा भवत्याऽनुभूता, अनुमतपातका च तव समदुःखा चित्रलेखाऽपि संवृत्ता, यच्चैकविंशतिघटिका हंसो हंस्या सह व्ययोज्यत तेनैकविंशतिवर्षाणि तवापि प्राणेश्वरेण सह विरहः समभूत्, उक्तं च—"जो जं करेइ कम्मं विविहविवाएहिं तस्स कम्मस्स। सो परिणामवसेणं लहइ फलं भवसहस्सेसु॥ १॥" तस्मात्दुष्कर्मच्छित्तये श्रावकयतिधर्म्ममनुपालयत। ततः सागरचन्द्रः सप्रियः सम्यक्त्वसहितं गृहिधर्मं प्रतिपद्य ज्ञानिनमानत्य स्वधामागमत् पौरलोकश्च। तदनु स सदारः श्राद्धधर्मं कियन्तं कालमनुपाल्य प्रव्रज्य च सर्वकर्माण्युच्छेद्य च शिव-

श्रियमशिश्रयत्, ।—मृगाङ्कलेखाचरितं विभाव्याकारान् षडप्युज्झत दुर्विपाकान् । सम्यक्त्वमन्त्रीश्वर एष युष्मान्, यथाऽभितः सिञ्चति मुक्तिराज्ये ॥ १ ॥" सम्यक्त्वषडाकारविषये मृगाङ्कलेखाकथा । इति श्रीरुद्रपल्लीयगच्छगगन-मण्डनदिनकरश्रीगुणशेखरसूरिपट्टावतंसश्रीसङ्घतिलकसूरिविरचितायां सम्यक्त्वसप्ततिकावृत्तौ तत्त्वकौमुदीनाम्न्यां सम्यक्त्वषडाकारस्वरूपनिरूपणो नाम दशमोऽधिकारः समाप्तः ॥

दशमं सम्यक्त्वषडाकारस्वरूपाधिकारमुक्त्वा एकादशं भावनाषट्कद्वारमाह—

भाविज्ज मूलभूयं दुवारभूयं पइट्ठनिहिभूयं । आहारभायणमिमं सम्मत्तं चरणधम्मस्स ॥ ५५ ॥

व्याख्या—मूलभूतं द्वारभूतं प्रतिष्ठानभूतं निधिभूतम् आधारभूतं भाजनभूतं सम्यक्त्वं 'चरणधर्मस्य' यति-श्रावकधर्मस्य 'भावयेत्' विचारयेदिति गाथार्थः ॥ ५५ ॥ एषां षण्णामपि स्वरूपं गाथात्रयेण प्रपञ्चयन्नाह—

देइ लहु मुक्खफलं, दंसणमूले दढंमि धम्मदुमे । मुत्तुं दंसणदारं न पवेसो धम्मनयरम्मि ॥ ५६ ॥
नंदइ वयपासाओ दंसणपीढंमि सुप्पइट्ठंमि । मूलुत्तरगुणरयणाण दंसणं अक्खयनिहाणं ॥ ५७ ॥
समत्तमहाधरणी आहारो चरणजीवलोगस्स । सुयसीलमणुन्नरसो दंसणवरभायणे धरइ ॥ ५८ ॥

व्याख्या—'देइ'त्ति अर्थापत्त्या तत्सम्यक्त्वं दर्शनमूले तत्त्वावबोधस्कन्धे 'धर्मद्रुमे' यतिश्रावकधर्मरूपे वृक्षे

दृढे निश्चले सति 'मोक्षफलं' मुक्तिसुखफलं ददातीति प्रथमा भावना । 'मुत्तुं'त्ति 'धम्मनगरे' पुण्यपुरे दर्शनद्वारं मुक्त्वा विहाय 'न प्रवेशो' नान्तर्गमनम् , अपरस्मिन्नपि नगरे गोपुरद्वारं विना प्रवेशो न स्यादिति द्वितीया भावना । 'नंदइ'त्ति 'व्रतप्रासादो' यतिश्राद्धव्रतसौधं 'दर्शनपीठे' सम्यक्त्वस्थटकबन्धे 'सुप्रतिष्ठे' समन्तान्निश्चले 'नन्दति' चिरकालं तिष्ठतीति तृतीया भावना । 'मूलु'त्ति ( मूलु इत्यादि ) मूलगुणाः–पञ्च महाव्रतानि उत्तरगुणास्तु पिण्ड-विशुध्याद्यः, ते चामी–"पिंडस्स जा विसोही समिइओ भावणा तवो दुविहो । पडिमा अभिग्गहावि य उत्तर-गुणमो वियाणाहि ॥ १ ॥" श्रावकस्य तु मूलगुणाः पञ्चाणुव्रतानि उत्तरगुणास्त्रीणि गुणव्रतानि चत्वारि शिक्षाव्र-तानि, अथवा "पच्चक्खाणाऽभिग्गह सिक्खा तव पडिम भावणाखित्तो । धम्मो चिंता पूया गिहि उत्तरगुण इगुणन-उई ॥ १ ॥" एत एव रत्नानि उत्कृष्टत्वादुपादेयत्वाच्च वसूनि तेषां मूलोत्तरगुणानाम् 'अक्षयं' शाश्वतं निधानमिव निधिरक्षयनिधानं 'दर्शनं' सम्यक्त्वं स्यात् , यथा निधानं विना रत्नानां नावस्थितिः तथा सम्यक्त्वमन्तरेण मूलो-त्तरगुणानामपि नावस्थानमिति चतुर्थी भावना । 'सम्मत्त'त्ति 'सम्यक्त्वं' क्षायिकक्षायोपशमिकौपशमिकवेदकसा-स्वादनरूपं सम्यग्दर्शनं अभेदोपचारात्तदेव 'महाधरणी' अशीतिसहस्राधिकलक्षयोजनमानतिर्यग्रज्जुप्रमाणाया-मा सङ्ख्यातीतद्वीपसमुद्रपरिवेष्टिता भूमिः 'आधारो' निश्चलमवस्थानं, कस्य ?–'चरणजीवलोकस्य' चरणं–चारित्रं तत्प्रधानो यो लोको–विशिष्टतरभव्यप्राणिगणस्तस्य, यथा सचराचरजीवलोकस्य भूमिराधारस्तथा चरणजीवलोकस्य

सम्यग्दर्शनं, एतद्विना चारित्रस्यास्थिरत्वमिति पञ्चमी भावना । 'सुअसील'त्ति श्रुतं–द्वादशाङ्गीरूपं दृष्टिवादः (दान्तं) शीलं–सर्वसावद्यव्यापार निवारणप्रवणा क्रिया, कोऽभिप्रायः ?–सम्यग्ज्ञानचारित्रे परस्परसंवलिते एव परमार्थसाधके नासंयुक्ते, यदागमः–"हयं नाणं कियाहीणं, हया अन्नाणओ किया । पासंतो पंगुलो दड्डो, धावमाणो य अंधलो ॥ १ ॥ संजोगसिद्धीइ फलं वयंति, नहु एगचक्केण रहो पयाइ । अंधो य पंगू य वणे समिच्चा, ते संपउत्ता नगरं पविट्ठा ॥ २ ॥" एतयोः श्रुतशीलयोर्यो मनोज्ञः–शिवसुखास्वादसम्पादकत्वात्सर्वोत्तमो रसो निस्यन्दस्तं 'दर्शनभाजने' कारकरोचकदीपकाद्याधारसम्यक्त्वपात्रे 'धरति' स्थापयतीति षष्ठी भावनेति गाथात्रयार्थः ॥ ५६ ॥ ॥ ५७ ॥ ५८ ॥ भावार्थस्तु चन्द्रलेखाकथानकगम्यः, स चायम्–

हिययाणंदणचंदणफुल्लिरफुल्लेहिँ वासीअदियंतो । भारहसिरीइ सेहरसारिच्छो अत्थि मलयगिरी ॥ १ ॥ तरुवरकयसिरछत्तो निब्भरचामरसएहिँ सोहिल्लो । इयरसिहरीसु जो उण रायसिरिं पयडए सययं ॥ २ ॥ तस्स सिहरिस्स सिहरे वडतरुणो उवरि कीरवरमिहुणं । नेहपरं परिवसइ तमालदलकोमलच्छायं ॥ ३ ॥ केणवि खयरेण कुऊहलेण तरलियमणेण तं मिहुणं । दट्ठूणं संगहियं चंचुओ नडियअरुणपहं ॥ ४ ॥ नेउं तं नियगेहे मणिपंजरसंठियं पढावेइ । सयलकलाओ छद्दंसणाण तत्ताणि य जहिच्छं ॥ ५ ॥ निच्चं खयरो मिहुणं तं सह गहिऊण भमइ भुवणंमि । तव्विरहे उण सव्वं जयंपि सुन्नं य मन्नेइ ॥ ६ ॥ अह तं चारणमुणिणा पडिबोहिय खेयराउ

सुयमिहुणं । सयलकलानिलयंपिहु मोयवियं मलयगिरिसिहरे ॥ ७ ॥ खेयरपरियरणाए विन्नायसमत्थसत्थपरमत्थं । तम्मिहुणं सच्छंदं विलसइ विविहेहिं भोगेहिं ॥ ८ ॥ ताणं कमेण जाओ तप्पडिरूवो तणुब्भवो कीरो । सो तेहिं सिक्खविओ कलाकलावं समग्गंपि ॥ ९ ॥ अन्नुन्ननेहनिरयस्स तस्स मिहुणस्स कहवि दिवसा । जाओ अईव कलहो धिरत्थु चित्ताणि कामीणं ॥ १० ॥ तस्सा सुएण तत्तो अवरा तारुण्णपुण्णसव्वंगी । संगहिया वरकीरी निब्भरपिम्मेण परिकलिया ॥ ११ ॥ कीरी तुओ वराई तं मन्नावेइ चाडुवयणेहिं । तहवि न मन्नइ कीरो पावो इयरीइ गहियमणो ॥ १२ ॥ दट्ठुं सा नियदइयं कडुव पणट्ठपिम्मरसभारं । जंपइ अप्पसु खिण्णा मह पुत्तं गुत्तसुपवित्तं ॥१३॥ भणियं च–इत्थीण ताव पढमं पिओ पिओ होइ सव्वभंगीहिं । तव्विरहियाण पुत्तो नियमणआसासओ होइ ॥ १४ ॥ अहयं पुण निव्विण्णा दुरंतसंसारदुक्खवासाओ । गंतुं कंमिवि तित्थे अप्पाणं साहइस्सामि ॥ १५ ॥ एसो पुत्तो मह पास संठिओ धम्मसलिलसेएण । मोहं हरेइ संलेहणाइ विहियाइ जह तित्थे ॥ १६ ॥ धम्मज्झाणं तह पवहणं च निज्जामएण परिचत्तं । अवसाणसमयजलणिहिपरपारं नेव पावेइ ॥ १७ ॥ कीरोऽवि हु तव्वयणं सुणित्तु जरजज्जरुव्व कंपंतो । पभणइ मग्गंती मह तणयं सयखंडयं न गया ॥ १८ ॥ पुत्तो पिउणो आभवमेव वरखित्तखित्तबीयं व । सावि भणइ माऊए न तं विणा जं भवे तणओ ॥ १९ ॥ यतः–"उपाध्याया दशाचार्य, आचार्याणां शतं पिता । सहस्रं तु पितुर्माता, गौरवेणातिरिच्यते ॥ २० ॥" एवं बहुप्पयारं विवयंतं पुत्तसंजुयं मिहुणं ।

निच्छयकए पुरीए कंचीइ गयं नहपहंमि ॥ २१ ॥ तत्थत्थि वेरिलच्छिवेणीआगरिसणिकदुल्ललिओ । दुल्ललिओ नरनाहो तस्स सहोवरि गयं मिहुणं ॥ २२ ॥ खेयरसंसग्गेणं विगयभयं तं नहंमि ठाऊणं । कीरो वण्णइ पढमं नरनाहं नियबुद्धीए ॥२३॥ भूमीसरो स नंदउ जस्स सरस्सइरसं निएऊणं । पायालतलं गुविलं निलीय चिट्ठेइऽही अमियं ॥ २४ ॥ तत्तो कीरी दाहिणचरणं उप्पाडिउं महीनाहं । नमिऊणं भत्तीए सुललियवयणेहिं वण्णेइ ॥२५॥ अवइन्ना वाएसरि मुहकमले जस्स रायहंसिव्व । सो जयउ सच्चसंधो राया नयमग्गनहचंदो ॥ २६ ॥ कोऊहलेण कलिओ राया वाहरइ कीरमिहुणं तं । आगच्छसु मह पासे साहसु कज्जं तहा नियर्य ॥२७॥ तेहिवि निए विवाए कहिए राया निएइ मंतिमुहं । सोविहु साहइ एसिं मज्झण्हे उत्तरं देमो ॥२८॥ अच्छरियभरियमणो राया तं मिहुणयं गिहे नेउं । कुरजुएहिं दाडिमफुलेहिं भोयइ जहिच्छाए ॥ २९ ॥ अत्थाणे मज्झण्हे उवविट्ठे नरवरंमि मंतिजणो । जंपइ कीरविवाओ एस अउव्वो असुयपुव्वो ॥ ३० ॥ सुइरं वियारयंता अवि नो पारं गया इमस्सऽम्हे । ता गंतूणं अन्नत्थ नाणिणं कंपि पुच्छंतु ॥ ३१ ॥ तो रोसारुणनयणो राया मइगव्वपव्वयारूढो । तज्जेइ मंतिवग्गं अहो अहो तुम्ह मइविहवो ॥ ३२ ॥ दिवसा जइ एसो कीरविवाओ अणिच्छिओ इत्तो । अन्नत्थ पुरे गच्छइ ता लज्जा आजुगंतं मे ॥ ३३ ॥ अहवा कित्तियमित्तो एस विवाओ सुबुद्धिमंताणं? । तम्हा सुणेह सवणे पउणे काऊण मह वयणं ॥ ३४ ॥ बीयं खु बीयवइणो हवेइ लोएवि सुप्पसिद्धमिणं । खित्ताहिवस्स य जहा खित्तं इत्थंपि तं सुणह ॥ ३५॥

कीरो निययसरीरं खित्तं गहिऊण जाउ सच्छंदं । तणओ कीरस्स इमो इय नीइं मुणह सव्वत्थ ॥ ३५ ॥ कीरी विसन्नचित्ता पभणइ रायं! न एरिसा नीई । तुम्हाण काउमुचिया सत्थस्सऽत्थाण पडिकूला ॥ ३७ ॥ एयं चिय नयमग्गं पयासियं नाह! नियपंचउले । वहियाए लेहावसु जेण तुमाणं न वीसरइ ॥ ३८ ॥ तो अहिमाणवसेणं, नियभणियं अवितहं य मन्नंतो । लेहावइ वहियाए नरराओ नियअमच्चाओ ॥ ३९ ॥ तथाहि—बीजिन एव हि बीजं क्षेत्रं भवतीह तद्वतामेव । कुर्लोऽतमहीपालो निर्णयमेवं स्वयं चक्रे ॥ ४० ॥ सुणिउं निवकयनीइं नीसासपरा विमुक्कपुत्ता सा । धरणिं धसत्ति पडिया कीरी तरुछिन्नसाहव्व ॥ ४१ ॥ कीरोऽवि तम्मि समये निट्ठुरचित्तो गहि-त्तु तं पुत्तं । दीणमुहं चइय पियं स झत्ति पत्तो मलयसेलं ॥ ४२ ॥ सीयलउवयारेहिं मंतिपउत्तेहिं पत्तचेयन्ना । लोएहिं ससोएहिं दिट्ठा कीरीवि उड्डीणा ॥ ४३ ॥ सा सत्तुंजयतित्थे समत्थतित्थाण सेहरसरिच्छे । गंतुं पणमइ रिसहं भत्तीए उसहसेणजुयं ॥ ४४ ॥ चउव्विहमवि आहारं चइत्तु नवकारसुमरणुज्जुत्ता । चित्तंमि भावणाओ भावइ सा भवभउव्विग्गा ॥ ४६ ॥ न गिहं न य भत्तारो न य सुयणा नेय अंगजाओऽवि । सरणं इह संसारे एगं मह जिणमयं मुत्तुं ॥ ४६ ॥ सा पुण दुल्ललियनिवे गयचित्ता झत्ति भवविरत्तावि । विहिविहियपाणचाया मज्झिम-परिणामजोएणं ॥ ४७॥ कंचीए नयरीए समग्गतिहुयणसिरीण कंचीए । उप्पन्ना कयपुण्णा सिरिचंदणसारसिट्ठिगिहे ॥ ४८ ॥ बहुपुत्ताणं उवरिं जाया अइवल्लहा पिऊणं सा । नामेण चंदलेहा नमणिज्जा चंदलेहव्व ॥ ४९ ॥ कुलयं ।

पुव्वभवब्भासेण य जिणधम्मरया सभावओ जाया । उप्पन्नजाइसरणा कीरभवं जाणइ असेसं ॥ ५० ॥ सम्मद्दंसण-रम्मं जिणवरधम्मं करेइ सा बाला । पढइ गुणेइ सत्थं अज्जियजणनिच्चसेवाए ॥ ५१ ॥ जिणमयवियारसुंदरकम्म-प्पयडीसुहेसु गंथेसुं । कुसलत्तं संपाविय विउसाणं अग्गिमा जाया ॥ ५२ ॥ घरकम्मधम्मकज्जे जाया सव्वत्थ पुच्छणिज्जा सा । पावेइ गउरवं पुण गुणनिवहो इत्थ किं चुज्जं? ॥ ५३ ॥ अन्नदिणे नियजणयं विन्नविउं तीइ तेज-देसाउ । आणाविया तुरंगा रविरहतुरयाण गव्वहरा ॥ ५४ ॥ सेराहा खुंगाहा हंसुलया उक्कनाह वुल्लाहा । नीलुयका-लुयपमुहा बहुवेगा लक्खणोवेया ॥ ५५ ॥ जुयलं ॥ ते पुरपरिसरसरियातीरे बंधाविया तरुच्छाए । दिट्ठा कस्स न चित्तं हरंति सुररायतुरयव्व? ॥ ५६ ॥ अन्नदिवसंमि राया अब्भुयकोउगाउलियचित्तो । पिक्खइ ते वरतुरए विहगाहिवविजयवेगधरे ॥ ५७ ॥ मुल्लेण अतुल्लेणवि मग्गइ आसे सयं महाराओ । सिट्ठीवि नेव वियरइ धूयाए वारिओ संतो ॥ ५८ ॥ अन्नदिणे तणयाए वयणेणं देइ नियवरकिसोरे । गब्भकए तुरगीणं सिट्ठी अब्भत्थिओ रण्णा ॥ ५९ ॥ पइवच्छरं किसोरा रण्णा संचारिया किसोरीणं । जा पंच वच्छराइं तत्तो जाया हया बहवे ॥ ६० ॥ अह चंदलेहकन्ना जंपइ तायं किसोरएहिं मह । रण्णो जे संजाया तुरया ते लेसु सव्वेऽवि ॥ ६१ ॥ रुट्ठो राया जइया तुमं धरावेइ भणइ वा किंपि । तइया भणियव्वो सो जं मुणइ सुया मह रहस्सं ॥ ६२ ॥ धूयावयणेण तओ नियतुरय-समुब्भवा य जे तुरया । नीरं पाउमुवेया नईइ ते सिट्ठिणा हरिया ॥ ६३ ॥ सिट्ठिसुहडेहिं तासियपंडववयणेहिं

नवरो रुट्ठो । सिद्धिं आहविऊणं भणइ कहं मह हया हरिया ? ॥ ६४ ॥ साहइ चंदणसारो नाहं जाणामि किंपि परमत्थं । मह कन्ना उण विन्ना सामिय! तुह उत्तरं दाही ॥ ६५ ॥ अच्छरियपूरिओ तं पडिहारं पेसिऊण सिद्धिसुयं । आणावइ नरनाहो अत्थाणे बहुजणाइन्ने ॥ ६६ ॥ फुल्लकरंडयतंबोलतालयंटाइकलिय आलीहिं । सहिया सुहास-पत्था बहुपरियणपरिगया सुहया ॥ ६७ ॥ कप्पलया इव दाणं दिंती कित्तिं जए पयासंती । वण्णिज्जंती मागह-जणेहिं सा निवसहं पत्ता ॥ ६८ ॥ जुयलं । एसा अज्जवि कन्ना दुद्धमुही नरवरस्स किं दाही । उत्तरमिय नय-रजणो कुऊहलेणं मिलइ तत्थ ॥ ६९ ॥ साऽवि नमंसिय रायं उवविट्ठा नियपियस्स उच्छंगे । पुट्ठा रण्णा कन्ने ! हयहरणे उत्तरं देसु ॥ ७० ॥ सा अवलंबिय साहसमवणीसं भणइ इयरलोओऽवि । संभरइ नियवयणं विसेसओ देव ! तुम्ह समो ॥ ७१ ॥ सो संभंतो साहइ किं तं वयणं ? सरामि नो अहयं । तो सा सरसइसरिसा साहइ पुहवीपहु-प्पुरओ ॥ ७२ ॥ विससहयसिरीवि सिरी चेयन्नं हरइ भुज्जमाणाणं । तं उचियं चुज्जं पुण जं न हु मारेइ भुवणजणं ॥ ७३ ॥ पुव्वभवविहियकज्जं एगे सुमरंति निययनामुव । एगे पुण अच्छेरं इहभवचरियंपि न मुणंति ॥ ७४ ॥ तो रोसवियडउब्भडभिउडीभंगुरकरालभालयलो । साहइ राया तं चिय सुमरेसु ममं तु वीसरियं ॥ ७५ ॥ सा भणइ देव ! तुज्झगिराइ एए हए करेमि निए । अन्नह मह घरसारं सव्वं तुह संतियं चेव ॥ ७६ ॥ तो वहियं कहाविय वाइय मन्नाविउं नियं वयणं । मह तुरयजायतुरया मह चेव हवंति नन्नस्स ॥ ७७ ॥ मंतिपुरोहियतलवरसामंतप-

सुहपरियणो रण्णो । दट्ठूणं तीइ मइप्पगरिसमइविम्हिओ जाओ ॥ ७८ ॥ संकोयंती नियमुहकमलं जणयस्स नयणकुमुयाइं । उल्लसंती सयं सा जाया चंदलेहव्व ॥ ७९ ॥ तत्तो रायकुलाओ जियगासी वण्णणिज्जमइपसरा । पिउणो गिहंमि पत्ता पवरुल्लसरस्सई बाला ॥ ८० ॥ तं विन्नाणं तीए अवमाणं अत्तणो वियाणंतो । विम्हय-विसायपडिओ चिंतइ राया कहं नडिओ? ॥ ८१ ॥ अन्नदिणे तं कन्नं राया मग्गेइ पाणिगहणत्थं । सिद्धीवि भीयभीओ धूयं पुच्छेइ परमत्थं ॥ ८२ ॥ सा हरिसपूरियंगी जणयं पइ एरिसं भणइ वयणं । उज्झिय भयं विवाहं करेसु मह निवइणा सद्धिं ॥ ८३ ॥ दुल्ललियनिवेण समं चंदणसारेण चंदलेहाए । अइसयमहूसवेणं कारविओ झत्ति वीवाहो ॥ ८४ ॥ अहिणवपासायंमी ठावित्ता तं भणेइ भूमिंदो । जइविहु धुत्ती तहविहु सिद्धीसुए! वंचियासि मए ॥ ८५ ॥ संभलसु मह पइन्नं आरंभेऊण अज्जदिवसाओ । संलावं नो काहं सह तुमए रागरत्तमणो ॥ ८६ ॥ साहइ सावि निसामसु सामिय! छलसार मज्झवि पइन्नं । ताऽहं नूणं चंदणतणया वंचणचणा भुवणे ॥८७॥ जं असणं उच्छिट्ठं निजं जिमावेमि तूलियं सिज्जं । वाहावेमि अवस्सं खंधे तं अंकदासुव्व ॥८८॥ (जुयलं) तव्वयणानलजलिरो सोहग्गपमुहगुणगणजुयंपि । राया तं परिखिवई दोहग्गवईण मज्झंमि ॥ ८९ ॥ तत्तो जिणवरपूयं कुणमाणी पवरकुसुमगंधेहिं । सोहग्गकप्पतरुवरपमुहतवे सा कुणइ बहवे ॥ ९० ॥ अन्नदिणे आपुच्छिय रायं तवचरणउज्ज-मणहेउं । पिउणो गिहंमि पत्ता तवसोसियतणुलया बाला ॥९१॥ अइकिसदेहं दट्ठुं सिद्धी ठावित्तु तं निउच्छंगे । विल-

मइ हा किं वच्छे! अप्पा खित्तो दुहे तुमए? ॥ ९२ ॥ कहमवि तुज्झ विवाहं कारेमि इमेण राइणा नेव। अहवा हयदिवकयं कज्जं कयमेव दीसेइ ॥ ९३ ॥ पडिसेहिऊण पिउणो वयणं निम्मिय तवाण उज्जमणं । विहिपुव्वं कारवेई पूयंती संघजिणचलणे ॥ ९४ ॥ अइसयविसन्नहिययं तायं नारित्तु कहइ करणिज्जं । सयलकलाकुलनिलयं पन्नासं देसु महकन्ना ॥९५॥ एगं नियगेहाओ मम गेहं जाव कारसु सुरंगं । बीयं दुवारवासिणिदेवीए वासगेहाओ ॥९६॥ मह गेहस्स य हिट्ठा सुरंगमज्झंमि जिणहरं एगं। कारावसु निच्चिंतो तत्तो होऊण चिट्ठेसु ॥९७॥ देवीए इव तीए चिंतियअत्थस्स पूरणेण धुवं। कप्पद्दुमस्स लीला इह कलिया चंदणेणावि ॥९८॥ तो गेहाओ गंतुं सुरंगमग्गेण जणयभवणंमि । अज्झावइ पन्नासं कन्नाओ सयलवि कलाओ ॥ ९९॥ सिक्खविया संगीयं सरलक्खणगामतालसुविसालं। वीणावायणआउज्जविज्जयं सवमणवज्जं ॥ १०० ॥ तंमि य मणिगणनिम्मियपासाए कंतिनासियतमिस्से। पायाले इव न दिवसनिसाइ लक्खिज्जइ विसेसो ॥ १०१ ॥ इंदाणीव निसीयइ सययं सिंहासणंमि सा बाला। समसिंगारपराहिं कन्नाहिं ताहि सोहिल्ला ॥ १०२ ॥ तीए आएसेणं समहत्थं तासु कावि वायंति । आणंदजणयनंदीनिनायपडिसद्दियदियंतं ॥ १०३ ॥ कावि हु वीणं कावि हु मुयंगयं कावि वेणुआउज्जे। सज्जंति कावि तालं धरंति नच्चंति चज्जाओ ॥ १०४ ॥ राया निसीहसमए तं सुणिऊणं मणंमि झाएइ। पायाले गयणयले महीयले वा किमु गिरिंमि? ॥ १०५ ॥ संगीयमिमं सरचारभासुरं दुलहं सुराणंपि । कस्सवि धन्नस्स पुरो पयट्टए सवणसुहजणयं ॥ १०६ ॥

जुयलं ॥ तस्सवणमोहियमणो परियणसहिओ विमुक्कपल्लंको । चित्तलिहिउव्व जाओ राया रुद्धऽन्नवावारो ॥ १०७ ॥ खणमित्तेणं । तत्तो तन्नाडयसवणविहडणपयंडो । पाभाइयतूररवो उच्छलिओ रायपासाए ॥ १०८ ॥ उज्झिअसंगीयरसा पेसइ कन्नाउ जणयगेहंमि । सयं तु चंदलेहा धवलहरे जाइ निययंमि ॥ १०९ ॥ अइसयचुज्जं चित्ते समुवहंतो दुहेण दुल्ललिओ । रज्जस्सवि कज्जाइं न करइ तग्गीयहयहियओ ॥ ११० ॥ पुणरवि एगदिणस्स य अंतरियं ताहिं लोयमणहरणं । पिक्खणयं पारद्धं अउव्वतालेहिं रेहिल्लं ॥ १११ ॥ गामत्तयपरिकलियं मुच्छाजणयाहिं मुच्छणाहिं जुयं । महुरसरपसरसारं राया गीयं सुणइ ताणं ॥ ११२ ॥ चिंतइ चित्ते उम्मत्तयावि मत्तत्तणं चइय करिणो । गीएणं पसुणोऽविहु जंति वसं का नराण कहा ? ॥ ११३ ॥ तं अमियरससरिच्छं संगीयरसं भिसं पियंतस्स । पाभाइयतूररवो भरपसरसहोयरो सुणिओ ॥ ११४ ॥ पिच्छणच्छणे नियत्ते पत्तो अत्थाणमंडवं राया । नेमित्तियपमुहजणे पुच्छइ संगीयवुत्तंतं ॥ ११५ ॥ तस्स रहस्सं नवि कोऽवि जाणए दूमिओ तओ राया । अइवाहइ कट्ठेणं दिवसं रयणिं समीहंतो ॥ ११६ ॥ अह रण्णो मणभावं सम्मं नाऊण चंदलेहावि । रण्णो पासे पेसइ संकेइय जोगिणिमेगं ॥ ११७ ॥ सा य केरिसा ?-मणिकणयदंडमंडियपाणी मणिपाउयाहिं आरूढा । नित्तमयचारुतलवट्टपट्टसंछन्नअद्धंगा ॥ ११८ ॥ मुत्ताहलजवमाला पहिरिय जट्टरपडेण सोहिल्ला । सोवन्नजोगवट्टी मणिकुंडलमंडियकवोला ॥ ११९ ॥ मुत्तिमई इव सिद्धी रयणासणपाणिचिल्लियाकलिया । पडिहारदिन्नमग्गा रायसयासंमि सा पत्ता ॥ १२० ॥ (कुलयं) तं सिद्ध-

जोगिणिं पित्र, दट्ठुं राया सविम्हओ होउं । सिंहासणे निवेसइ पणयपरो लद्धआसीसो ॥ १२१ ॥ सिद्धिं मणि-
च्छियाणं सिद्धिं निधाणसंतियं कुणइ । जो जोगो सो तुम्हं वियरउ सिद्धिं महीनाह! ॥१२२॥ साहइ निवोऽवि जाया,
अम्हे तुह दंसणेऽवि सकयत्था । तहविहु पुच्छामि तुमं किंपिहु दूरं न जोगाओ ॥ १२३ ॥ सा भणइ नरिंद ! इहं
सक्का सक्कं समाणिउं सग्गा । नियसत्तीए सूरं गिलेमि राहुव चंदंपि ॥ १२४ ॥ भुवणत्तयस्स मज्झे गुत्तं पयडं
च किंपि जो कज्जं । करइ य कारइ य नरो तं मह सव्वंपि पच्चक्खं ॥ १२५ ॥ राया चिंतइ कज्जं मह सरिही जो-
इणीउ एयाओ । तं सह नेउं भवणे सक्कारइ असणवसणेहिं ॥ १२६ ॥ जाए जामिणिसमए संगीयं सुणिय तं
भणइ राया । नियसत्तीइ ममाविहु पिक्खणयमिमं निदंसेसु ॥ १२७ ॥ साविहु रायं जंपइ एयंपिहु तुज्झ देव !
दंसेमि । परमक्खिजुयलयंमी बंधिस्सं पट्टए तिन्नि ॥ १२८ ॥ तह तुह देहं दिव्वं नियसत्तीए अ पढमओ काउं ।
पच्छा तत्थ नइस्सं अन्नह नहु लब्भइ पवेसो ॥ १२९ ॥ तव्वयणे पडिवन्ने रण्णा जाए पभायसमयंमि । मंडलमज्झे
ठाविय दिव्वकरं सुचरइ मंतं ॥१३०॥ रयणीसमए पत्ते वारित्ता सव्वजणगमागमणे । पट्टयतियं निबंधइ अक्खीसुं सा
नरिंदस्स ॥ १३१ ॥ पढमं तु चंदलेहाभवणे पच्छा नएइ सिट्ठिगिहे । वारनिवासिणिभवणे तओ सुरंगाभवणदारे
॥ १३२ ॥ एगंते ठावित्ता रण्णो छोडेइ अक्खिपट्टतिगं । सोऽविहु विम्हयभरिओ इओ तओ खिवइ नयणजुयं
॥ १३३ ॥ भासुरमणिरुइतासियतिमिरभरं सहसकिरणबिंबं व । मंडवमंडियमुत्तमजहरचंदोययसणाहं ॥ १३४ ॥

रयणमयसालहंजियराइयथंभयसहस्ससंकिण्णं । रणिरमणिकिंकिणीगणउब्भडधयवडसमूहजुयं ॥ १३५ ॥ उल्लसिर-पवरतोरणवज्जपहाररुमरुइरसुरचावं । विप्फारियनयणजुओ स नियइ पायालवरभवणं ॥ १३६ ॥ कुलयं । तम्मज्झे समरूवा समवेयत्था समाणऽलंकरणा । दिट्ठा रण्णा कन्ना सुवण्णवण्णा सुरीउव्व ॥ १३७ ॥ तम्मज्झे अइउज्जय-मणिमयसिंहासणंमि उवविट्ठं । सेविज्जंतिं कन्नाहिं ताहिं पिक्खेइ ससिलेहं ॥१३८॥ जय जय सामिणि! मयगलगामिणि सिरिनायलोयनाहस्स । पाणेसरि! सुरसुंदरि! सुंदरतररूवमयहरणि ॥ १३९ ॥ एवं वण्णिज्जंतिं तं राया नियवि विम्हियस्संतो । चिंतइ नूणं एसा लक्खिज्जइ कावि सुररमणी ॥ १४० ॥ जुयलं ॥ अज्ज नयणूसवो मे संजाओ जीवियंपि सकयत्थं । जं एसा सुररमणी रइरमणीया मए दिट्ठा ॥ १४१ ॥ विम्हयउप्फुल्लियलोयणस्स निवइस्स पिच्छमाणस्स । पिच्छणयं पारद्धं तीए आएसओ ताहिं ॥ १४२ ॥ सा जोगिणीवि तीए पणयाए वियरिऊण आसीसं । परिचियइव पुव्विं मणिसिंहासणमलंकुणइ ॥ १४३ ॥ कन्नाहिवि संगीयं तं रायं आगयं मुणेऊणं । तह विहियं अमियमयंपि मुच्छजणयं जहा जायं ॥ १४४ ॥ खीणाइ खणं व निसाइ दिवसपहरे गए तहा तत्तो । तीए आएसेणं विसज्जियं पिक्खणं ताहिं ॥ १४५ ॥ तम्मि समयंमि सहसा अट्ठारसभुज्जपिंजरमणिज्जा । तीए संकेएणं अइसरसा रसवई पत्ता ॥ १४६ ॥ उप्पन्नसंसया इव सा तं जंपेइ जोइणी देवी । किं नागरायरज्जं चइऊणं इत्थ पत्तासि? ॥ १४७ ॥ बाहजलाविलनयणा साविहु संभासए सदुक्खव्व । जोइणिसामिणि! जाणसि मह चरियं

तहवि पमणेमि ॥ १४८ ॥ सिरिधरणिंदपियासुं पट्टमहादेवियाा अहं मज्झ । तं चेव मुणसि सम्मं कंतं अणवरयरत्त-
मणं ॥ १४९ ॥ एसा कुसला कुसला वीणावायणकलाइ मह दासी । धरणेण भणियाविहु सिरिभूयाणंदमित्त-
कए ॥ १५० ॥ नो दिन्ना जं जायइ मह नाडयभंगयं इमीइ विणा । तो भणइ नागराओ हठेणवि एयं गहिस्सामि
॥ १५१ ॥ तं अवमाणं पइणो नाउं रूसित्तु इत्थ पत्ताऽहं । काऊण रयणभवणं सुहेण चिट्ठामि एगंते ॥ १५२ ॥
तुह पुरओ विन्नत्तिं करेमि जह सो न मं इह मुणेइ । तह कायवं तुमए नियाइ मंतस्स सत्तीए ॥ १५३ ॥ इय भ-
णिय जोइणिं तं आयरपुवं गहित्तु नियहत्थे । संपत्ता भोयणमंडवंमि सुरमंदिरसरिच्छे ॥ १५४ ॥ ससिलेहा तं
साहइ चिरकालेणं तमम्ह मिलियासि । ता एगभायणंमि जिमेसु पियसहि ! मए सद्धिं ॥ १५५ ॥ सा पडिवज्जि-
यवयणा उवविट्ठा दिवरसवइं भुत्तुं । दिट्ठा रण्णा विम्हयविप्फारियनयणकमलेणं ॥ १५६ ॥ राया तत्तो चिंतइ
अदिट्ठपुवं मए नियंतेणं । पायालनाइगाए रूवं किं किं न पज्जत्तं? ॥ १५७ ॥ तीए संकेएणं अह सा जोइणिवरा
पयंपेइ । हद्धी मह वीसरिओ अंतेवासी पमाएणं ॥ १५८ ॥ तेण विणा अज्जवि नहु भुंजिस्समहं इओ य ससिलेहा ।
साहइ जोइणिसामिणि !, को तुह सीसो मह कहेसु ? ॥ १५९ ॥ असुरो वा अमरो वा गंधवो नागलोगवासी वा । तस्स कए
गोरवं करेमि जह सवसत्तीए ॥ १६० ॥ सा जोइणीवि तं पइ जंपइ नहु सुरवराइजाईओ । किं पुण दुल्ललियनिवो
एसो माणुस्सकुलतिलओ ॥ १६१ ॥ अवि कूणिऊण नासं सा जंपइ तं तुमंसि भोलविया । अइभत्तीए केणवि जोइणि !

धुत्तेण मणुएणं ॥ १६२ ॥ साविहु साहइ वच्छे ! मा अन्नह तं मणंमि चिंतेसु । दिव्वसरीरो विहिओ मए समंता स-
सत्तीए ॥ १६३ ॥ इत्थागओ य एसो तुमए गउरयपयं परं नेओ । जस्साहं परितुट्ठा तस्स न दुलहमिहं किंपि
॥ १६४ ॥ ता मह वयणेण इमं भुंजावसु नियमायणे सीसं । दिव्वाइ रसवईए आजम्माभुत्तपुव्वाए ॥ १६५ ॥ ता
जोइणीवि रायं जंपइ आगच्छ वच्छ! भुंजेसु । नागरमणीइ सद्धिं दिव्वमिमं रसवइं झत्ति ॥ १६६ ॥ अत्ताणं कय-
किच्चं मन्नइ जाणंतओऽवि उच्छिट्ठं । भुंजंतो को अहवा इत्थीहिँ न वंचिओ भुवणे ? ॥ १६७ ॥ काउवि कन्ना अन्नं
मणुन्नमन्नं पुणोवि वियरंति । अन्ना जोइणिवयणा तम्मज्झे हसिय भुंजंति ॥ १६८ ॥ सोगंधियपरिकलियं तंबोलं
तस्स दाविउं भणइ । पुत्तय! उट्ठिय पिच्छसु रयणमयं नागरमणिहरं ॥ १६९ ॥ ताहिवि वरकन्नाहिं ठाणे ठाणे
हसिज्जमाणो सो । वक्काहिं उत्तीहिं सुहेण दियहं अइक्कमइ ॥ १७० ॥ रयणीसमए जाए विसज्जिए पिक्ख-
णाइववसाए । राया जोडियहत्थो विन्नवई जोइणिं एवं ॥ १७१ ॥ जइ सामिणि! संतुट्ठा सव्वं चिय कप्पवल-
रिव्व तुमं । ता एयाणं मज्झा रमिउं मह अच्छरं देसु ॥ १७२ ॥ सा तं साहइ कहमवि जइ संसज्जंति अच्छ-
राउ नरे । उज्झंति सुरकुमारा ता एयाओ खणद्धेणं ॥ १७३ ॥ परमहयं नियविज्जाबलेण तुह वंछियं करिस्सामि ।
आजम्मं तु तए पुण वयणं एयाण कायव्वं ॥ १७४ ॥ अंगीकयम्मि रण्णा वयणे तो सा भणेइ ससिलेहं । तुज्झाणा-
निरयस्स य इमस्स पूरेसु मणइट्ठं ॥ १७५ ॥ एसो चिरजागरिओ भवणोवरि तुम्ह लहउ निद्दभरं । अन्नं च तुह

पसाया पावउ सुरसिज्जसंगसुहं ॥ १७६ ॥ ताणं एगा जंपइ उवरितले नत्थि तूलिया काऽवि । जइ महइ एस सुक्खं ता तूलिं नेउ सयमेव ॥ १७७ ॥ तो हरिसनिब्भरंगो सहसा उट्ठित्तु सयगुणुच्छाहो । राया सिरंमि तूलिं करित्तु भवणोवरिं चडिओ ॥ १७८ ॥ उयरिय पुणोवि तत्तो पलंकं मत्थयंमि धरिऊणं । नेउं भवणस्सुवरिं राया पत्थरइ दासुव ॥ १७९ ॥ जोइणिवयणेण तओ उप्पाडिय तूलियं सपल्लंकं । सुरसुंदरीइ उवरिमतलंमि नेऊण पत्थरइ ॥ १८० ॥ सावि ससिज्जं ठाउं रण्णो रंजेइ रइरसगुणेहिं । तह चित्तं जह अन्ना मन्नइ सो रासहीउव ॥ १८१ ॥ जामिणिजामे तह पच्छिमंमि नयणेसु बंधिउं पट्टं । सो जोइणीइ नीओ नियए भवणंमि नरनाहो ॥ १८२ ॥ एवं पइदियहं चिय आगच्छंते निवंमि ससिलेहा । तीए भणिया वच्छे ! दासो जाओ पईवि तुह ॥ १८३ ॥ तो पूरियप्पइन्ना ससिलेहा काउ फारसिंगारं । अंतेउरमज्झगयं रायं विन्नवइ कयहासा ॥ १८४ ॥ सामिय ! दूसणकलिया जं परिचत्ता अहं तु जुत्तमिणं । अवराहिं किमवरद्धं अंतेउरियाहिं जं चयसि? ॥१८५॥ अहवा नायं सुरसुंदरीइ बहुविहविलासरसियस्स । अम्हारिसीण नामं गहियं तुह न य रइं कुणइ ॥ १८६ ॥ तव्वयणेण चमक्कियचित्तो राया निरूविऊण तयं । उवलक्खिऊण य पुणो भणइ अ तं किं किमेयंति ? ॥ १८७ ॥ तत्तो नमिय नरिंदो तीए भणिओ मए अविणओ जो । जोइणिवयणेण कओ सो खमियव्वो तए नाह ! ॥ १८८ ॥ हरिसविसायाच्छेरयपरिपूरियमाणसो नराहिवई । तं बुद्धिमइं देवीपयंमि ठावेइ ससिलेहं ॥ १८९ ॥ उक्तंच–"ता गव्वो ता रोसो ताव चिय पुव-

दोससंभरयं । उक्कीरिउ व्व हियए जाव चडुट्टंति नेव गुणा ॥ १९० ॥ सयलंतेउरकलिओ पायालहरंमि विविहभं-
गीहिं । विलसंतो वसुहवई गमेइ वरिसाण सहसाइं ॥ १९१ ॥ अह नंदणवणसरिसे कुसुमागरनामगंमि उज्जाणे ।
सिरिअभयंकरसूरी समोसढो साहुपरियरिओ ॥ १९२ ॥ दुल्ललियनिवो सूरिं समागयं जाणिऊण साणंदो । सल्लिलेह-
जुओ नमिउं उवविसिय सुणेइ धम्मकहं ॥ १९३ ॥ तथाहि—श्रेयो विषमुपभोक्तुं क्षमं भवेत्क्रीडितुं हुताशेन ।
संसारबन्धनगतैर्न तु प्रमादः क्षमः कर्तुम् ॥ १९४ ॥ तस्यामेव हि जातौ नरमुपहन्याद्विषं हुताशो वा । आसेवितः
प्रमादो हन्याज्जन्मान्तरशतानि ॥ १९५ ॥ तस्मात्प्रमादं निर्धूय, सम्यक्त्वे क्रियतां मतिः । मूलादिभूते धर्मस्य,
द्वादशव्रतरूपिणः ॥ १९६ ॥ मूलं धर्मद्रुमस्यैतद्द्वारं धर्मपुरस्य च । पीठं निर्वाणहर्म्यस्य, निधानं सर्वसंपदाम्
॥ १९७ ॥ गुणानामेक आधारो, रत्नानामिव सागरः । पात्रं चारित्रवित्तस्य, सम्यक्त्वं श्लाघ्यते न कैः ? ॥ १९८ ॥
तद्भोः प्रमादमदिरां त्यक्त्वोपादत्त दत्तशिवसौख्यम् । शुद्धं श्रावकधर्मं कुकर्ममर्माविधं सुधियः ! ॥ १९९ ॥ पर-
तीर्थेऽपि गतानां येषां मरणेऽभ्युपस्थिते पुंसाम् । सम्यक्त्वभक्तिरधिकी भवति हि ते प्राप्नुवन्ति शिवम् ॥२०० ॥ तत्तो
ससिलेहं पइ भणंति गणहारिणो इमं वयणं । भद्दे! किं नहु बुज्झसि जाणंती नियपुव्वभवं? ॥२०१॥ सिरिसत्तुंजय-
तित्थे आराहंतीइ पढमजिणरायं । दुल्ललियनिवे कोवं कुणमाणीए तए तइया ॥ २०२ ॥ सम्मद्दंसणसेवणवसेण पत्ता
महासिरी एसा । बुद्धीइ सयलतिहुयणअच्छेरयकारिणीइ फुडं ॥ २०३ ॥ जुम्मयं ॥ इय सोऊण गुरूणं वयणं संभम-

तत्तअइयंमं । पिच्छेइ चंदलेहा सावयवयनिवहमइसुहयं ॥ २०४ ॥ तत्तो रायाइजणो जहसत्तीए वहित्तु नियमाइं । नमिउं च सूरिरायं नियनियगेहेसु संपत्तो ॥ २०५ ॥ पव्वतिहीए संविग्गमाणसा नियघरेऽवि ससिलेहा । नयनिवह-पालणकए समचित्ता पोसहं लेइ ॥ २०६॥ एगंमि दिणे गिण्हइ सा निच्चलमाणसा गिरिव्वं व । काउस्सग्गं अंतरस-मरमरिउवग्गदुग्गहरं ॥ २०७ ॥ तंमि खणे देवीओ दुन्निवि सम्मत्तमिच्छदिट्ठीओ । तं निच्चलझाणत्थं दट्ठुं वण्णेइ सम्मसुरी ॥ २०८ ॥ सुरअसुरकिंनराविहु एयं धम्माउ चालिउं न खमा । इय सुणिय मिच्छदिट्ठी सुरी भणइ पिच्छ मे किच्चं ॥ २०९ ॥ तीए संखोहकए विउविया रक्खसा महाघोरा । कित्तियहत्था मुहविस्सरंतजालउलिविकराला ॥ २१० ॥ सेले अवि फोडंता उच्चसरेणं भणंति ते दुट्ठा । उज्झसु एयं धम्मं अन्नह तुमयं फलिस्सामो ॥ २११ ॥ अहवा उज्झिय सावयधम्मं अम्हाण पायपउमाइं । पूयसु अइभत्तीए मुत्तिसुहाणं कए मूढे ! ॥ २१२ ॥ सा ससि-लेहा निच्चलदेहा तव्वयणवज्जपहयावि । नवि संमत्तं खंडइ मंडणमिव मुणइ तग्घाए ॥ २१३ ॥ जाव न रक्खसभीया नियनियमं भंजए महासत्ता । पवणाहयव्व मेहा खणंमि ते ताव य विलीणा ॥ २१४ ॥ तत्तो मत्ता करिणो हरिणोवि विउविया महाघोरा । उवसग्गेहिं ताणवि न य चलिया सा सज्झाणाओ ॥२१५॥ केसेसुं धरिऊणं दुव्वलियनिवं सुराण मज्झाए । दंसिय तं पइ जंपइ सा दुट्ठा विउव्वियसरिया ॥ २१५ ॥ रेरे मुद्धि ! पमुंचसु एयं मे अम्मओ फक्कधम्मं । अन्नह तुह पाणपियं एयं मारिस्समविकप्पं ॥ २१७ ॥ सा तं सुणिउं अवलंबिऊण मोणं विसेसझाणपरा । चिट्ठइ

ता कुडनिवो करुणसरं रुयइ तप्पुरओ ॥ २१८॥ दइए चएसु तमेयं किरियं छुट्टेमि जेण कट्ठाओ । नियजीवियदाणेणवि कंतं रक्खंति कुलजाया ॥ २१९ ॥ तो सा चिंतइ जायइ भवे भवे पियथमो न उण धम्मो । तम्हा जं वा तं वा होउ न खंडेमि नियनियमं ॥ २२० ॥ एवं झायंतीए खणेण खीणेसु घाइकम्मेसु । तीए संदेहहरं केवलनाणं समुप्पन्नं ॥ २२१ ॥ आसन्नट्ठियदेवीहि झत्ति तीए समप्पिया मुद्दा । तत्तो तीइ वि लोओ चउमुट्ठीहिं सिरंमि कओ ॥ २२२ ॥ उवविसिय देवविहिए सुवण्णकमलंमि साहए धम्मं । तत्तो पयडीहोउं खामइ सा वंतरीवि तयं ॥ २२३ ॥ पडिबोहिय दुल्ललिएण संजुयं सा य नायरं लोयं । निवाणं संपत्ता सत्तुंजयगिरिवरसिरंसि ॥ २२४ ॥ नायं नाउं भुवणमहियं चंदलेहासईए, संमत्तंमी वयचयमहारुक्खमूलायमाणे । नो कायवो नरगजणगो जीवियंतेवि भंगो, जेणं तुम्भे लहह सयलं सासयं मुक्खसुक्खं ॥ २२५ ॥ भावनाषट्कविषये चन्द्रलेखाकथा । इतिश्रीरुद्रपल्लीयगच्छगगनमण्डनदिनकरश्रीगुणशेखरसूरिपट्टावतंसश्रीसङ्घतिलकसूरिविरचितायां सम्यक्त्वसप्ततिकावृत्तौ तत्त्वकौमुदीनाम्न्यां सम्यक्त्वषड्भावनास्वरूपनिरूपणो नामैकादशोऽधिकारः समाप्तः ॥

एकादशं सम्यक्त्वषड्भावनास्वरूपाधिकारमुक्त्वा द्वादशं सम्यक्त्वषड्लक्षणस्वरूपाधिकारमाह—

अत्थि जिओ तह निच्चो कत्ता भुत्ता य पुण्णपावाणं । अत्थि धुवं निव्वाणं तस्सोवाओ य छट्ठाणा ॥५९॥

व्याख्या—'अस्ति' विद्यते 'जीवः' आत्मेति निश्चयात्प्रथमलक्षणम् । तथा स जीवो 'नित्यः' शाश्वतो द्रव्यापेक्षयेति

द्वितीयं लक्षणं, 'कर्त्ता' ज्ञानावरणाद्यष्टकर्मणामुपार्जनादिति तृतीयं लक्षणं, 'भोक्ता च' पुण्यपापयोः उपभोक्तृत्वादिति चतुर्थं लक्षणम्, 'अस्ति ध्रुवं निर्वाणं' सकलकर्मक्षयान्मोक्ष इति पञ्चमं लक्षणं, 'तस्य' निर्वाणस्य 'उपायश्च' उपक्रमः शुक्लध्यानादीति षष्ठं लक्षणम्, एवं षट् स्थानानि। एषां च सम्यक्परिज्ञानादवश्यं सम्यक्त्वस्य सत्त्वं ज्ञायत इति द्वारगाथार्थः ॥ ५९ ॥

एतेषां षण्णामपि मध्ये प्रथमस्थानकस्वरूपमाह—

आया अणुभवसिद्धो, गम्मइ तह चित्तचेयणाईहिं । जीवो अत्थि अवस्सं पच्चक्खो नाणदिट्ठीणं ॥६०॥

व्याख्या—इह हि केचिदनादिमिथ्यात्ववासनावासितस्वान्ताः शाक्यादयः परमार्थावेदिन आत्मानं प्रत्यात्मवैरिणो विप्रतिपद्यन्ते, इत्थं च तदभावमावेदयन्ति, तथाहि—नास्त्यात्मा स्पर्शनरसनघ्राणचक्षुःश्रोत्ररूपपञ्चविधप्रत्यक्षेण गृहीतुमशक्यत्वात्, तदभावाच्च नानुमानादिभिः, यद्यत्प्रत्यक्षं न गृह्यते तत्तन्नास्ति, यथाऽऽकाशकुशेशयं, तथा चायं, तस्मान्नास्त्येवात्मेति । तन्निरासायाह—'आत्मा' जीवः 'अनुभवसिद्धः' स्वसंवेदनज्ञानानुभूतः, आत्माऽऽत्मनाऽऽत्मानं सुविशुद्धध्यानसंवलितः पश्यति, चैतन्यरूपत्वात्तस्य, अतः प्रत्यक्षीभूतः, तदनुमानगम्यतामप्याह—'गम्मइ'त्ति 'तथा' तेन प्रकारेण 'गम्यते' अवबुध्यते परीक्षकैरिति, कैः?-'चित्तचैतन्यादिभिः' ज्ञानं च चैतन्यं च ज्ञानचैतन्ये आदिशब्दात्सुखदुःखेच्छादयस्तैरिति, अत्र साधनं चेदम्—अस्त्यात्मा, चैतन्यसुखदुःखेच्छादिकार्याणां कारणभूतत्वात्, यद्य-

त्कार्यकारणभूतं तत्तदस्ति, यथा घटकारणं मृत्पिण्डः, तथा चायं, तस्मात्तथा, अतः अवश्यमस्त्यात्मा, न केवलमनुमानगम्यः, किन्तु ज्ञानदृष्टीनां प्रत्यक्षः, इति येषां धिषणा प्रोस्फुरीति तेषां सम्यक्त्वस्थानता ज्ञायत इति प्रथमं जीवसत्ताख्यं स्थानमिति गाथार्थः ॥ ६० ॥

अथ द्वितीयं जीवनित्यत्वस्थानस्वरूपमाह—

दव्वट्ठयाइ निच्चो उप्पायविणासवज्जिओ जेणं । पुव्वकयाणुसरणओ पज्जाया तस्स उ अणिच्चा ॥ ६१ ॥

व्याख्या—इह ह्येकान्तानित्यवादिन आत्मनोऽनित्यत्वमेव प्रकटयन्ति, तच्च विचार्यमाणं विशारुतामावहति; एकान्तानित्यो ह्यात्मा क्रमेणार्थक्रियां कुर्याद्यौगपद्येन वा ?, न तावत्क्रमेण, तस्य द्वितीयक्षणे विनष्टत्वात्, क्रमस्तु क्षणान्तरावस्थायिन एव स्यात्, तथा च सति कल्पान्तेऽपि न तद्विप्रतिपत्तिः, अतो बलादेवापतितं नित्यत्वं, नापि यौगपद्येन, स्वोत्पादवैयर्थ्यात्कथं सर्वदेशकालभाविक्रियाऽऽविष्करणं स्यात्, द्वितीयक्षणे विनष्टत्वात्, अतो न क्रियाकारित्वं, ततः क्रमयौगपद्याभ्यामर्थक्रियाऽकारित्वादवस्तुत्वप्रसङ्गः । नाप्येकान्तनित्य आत्मा, 'अप्रच्युतानुत्पन्नस्थिरैकस्वभावं नित्य'मिति तु नित्यलक्षणं, तच्चात्र न सङ्गच्छते, इच्छाद्वेषप्रयत्नप्रसादाद्येकभावपरिहारेण भावान्तरसंश्रयणाद्बलादापतितमनित्यत्वम्, एकत्वभावाभावात्, अत एवाह-'दव'त्ति अयमात्मा द्रव्यापेक्षया 'नित्यः' शाश्वतो 'येन' हेतुना 'उत्पादविनाशविरहितः' न कदाचिदप्ययमुत्पद्यते विपद्यते च, अनाद्यनन्तकालावस्थायित्वेन ध्रुवत्वात्, नन्वेवं

ब्रुवाणेनाचार्येण नित्यैकान्तपक्ष एव कक्षीकृतः अतस्तन्निरासायाह—'पुव्वत्ति' पूर्वकृतानुस्मरणात् मयेयं पूर्वजन्मनि श्रीमदर्हत्प्रतिमा कारिताऽऽसीद्, अधुना तदवलोकनात् ,प्रत्यभिज्ञाने जातिस्मरणम्, अत एव तु तस्य 'पर्याया' भवाद्भवान्तरगमनानि सादिसान्तकालवैशिष्ट्येन 'अनित्या'नश्वराः,एतावताऽऽत्मा नित्यः,तत्पर्यायास्त्वनित्याः,न च कदाचिद्द्रव्यं पर्यायवर्जितं स्यात्, उक्तं च—"द्रव्यं पर्यायवियुतं, पर्याया द्रव्यवर्जिताः । क कदा केन किंरूपा?, दृष्टा मानेन केन वा? ॥ १ ॥" अतो द्रव्यपर्यायाणां कथञ्चिद्भेदाभेदाङ्गीकारेण नित्यानित्योऽयमात्मा, उत्पादव्ययध्रौव्ययुक्तत्वात्, यथा—"घटमौलिसुवर्णार्थी, नाशोत्पादस्थितिष्वलम् । शोकप्रमोदमाध्यस्थ्यं जनो याति सहेतुकम् ॥१॥" एवं निश्चलीकृते स्वान्ते सम्यक्त्वस्थानता ज्ञायत इति द्वितीयं स्थानमिति गाथार्थः ॥ ६१ ॥

अथ तृतीयं कर्त्राख्यं स्थानमाह—

कत्ता सुहासुहाणं कम्माण कसायजोयमाईहिं । मिउदंडचक्कचीवरसामग्गिवसा कुलालुव्व ॥ ६२ ॥

व्याख्या—अयमात्मा 'कर्त्ता' करणशीलः, केषाम्?—'शुभाशुभानां कर्म्मणां' ज्ञानावरणप्रभृतीनामष्टानां, न तु जगदादीनाम्, इह हि केचनापि मिथ्यात्वान्वितविलोचनास्त्रिलोचनकृतं विश्वं मन्यन्ते, तथाहि—उर्वीपर्वततर्वादिकं सर्वं सकर्तृकं, कार्यत्वात्, यद्यत्कार्यं तत्तत्सकर्तृकं, यथा घटः, तथा चेदं, तस्मादीश्वरकर्तृकमित्येतद्वचो विचारचतुरचेतोभिर्विचार्यमाणं वन्ध्यास्तनन्धयलीलामाकलयति, तथाऽप्यभ्युपगम्य ब्रूमः-स भवदभिमतः कर्त्ता मूर्त्तोऽमूर्त्तो वा

जगत्सृजति?, मूर्त्तश्चेज्जगत्सृजति तदा कुलालवत्किं न दरिदृश्यते?, अतो न मूर्त्तः कर्त्ता, अथामूर्त्तो जगत्सृजति तर्हि तस्य शरीराद्यभावात्कथं जगत्सृष्टिसामर्थ्यमिति दूरापास्तैव जगत्कर्तृत्वकथा, अतः शुभाशुभान्येव कर्माणि जीवः करोतीति सिद्धं, कैर्हेतुभिरित्याह–'कसायत्ति' 'कषाययोगादिभिः' तत्र कषायाः–अनन्तानुबन्ध्यप्रत्याख्यानप्रत्याख्यानसञ्ज्वलनरूपाः क्रोधमानमायालोभाः षोडश, योगाः–मनोवचनकायरूपाः पञ्चदश, उक्तं च–"सच्चं मोसं मीसं असच्चमोसं मणं तह वई य। उरलविउव्वाहारा मीसगकम्मइग इय जोगा ॥ १ ॥" अत्र मकारोऽलाक्षणिकः, आदिशब्दान्नवनोकषायमिथ्यात्वपञ्चकद्वादशाविरतीनां परिग्रहः, एवंविधैर्बन्धहेतुभिरिति, अत्रार्थे दृष्टान्तमाह–'मिउत्ति' मृत्-मृत्तिका दण्डो-भ्रमणयष्टिः चक्रं प्रसिद्धं चीवरं-संमार्जनवस्त्रं, मृच्च दण्डश्च चक्रं च चीवरं च मृद्दण्डचक्रचीवराणि तेषां यः 'सामग्रीवशः' सहकारिकारणसामर्थ्यं तस्मात् 'कुलाल इव' कुम्भकार इव, यथा कुलालो मृदादिभिर्घटमुत्पादयति तथा जीवः कषायादिभिः कर्म बध्नातीत्येवं ज्ञाततत्त्वः सम्यक्त्वस्थानतामवगाहत इति तृतीयं स्थानमिति गाथार्थः ॥ ६२ ॥

अथ चतुर्थं भोक्तृनामकं स्थानमाह—

भुंजइ सयंकयाइं परकयभोगे अइप्पसंगो उ। अकयस्स नत्थि भोगो अन्नह मुक्खेऽवि सो हुज्जा ॥ ६३ ॥

व्याख्या—इह हि महामोहधूमध्वजधूमव्याकुलीकृताक्षा अक्षपादादय इति ब्रुवते, यदु-ईश्वरप्रेरणया सर्वः कोऽपि

सुखदुःखादिकं स्वर्गनरकादिष्वनुभवति, यदूचुस्तद्यूथ्याः—"ईश्वरप्रेरितो गच्छेत्स्वर्गं वा श्वभ्रमेव वा। अन्यो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः ॥ १ ॥" इति, तन्निरासायाह—'भुञ्जइ'त्ति भुङ्क्ते अनुभवति स्वयम्—आत्मना कृतानि—विहितान्यर्थापत्त्या शुभाशुभानि कर्माणीति गम्यते, अत एवोक्तम्—"नाभुक्तं क्षीयते कर्म, कल्पकोटिशतैरपि। अवश्यमेव भोक्तव्यं, कृतं कर्म शुभाशुभम् ॥ १ ॥" यद्येवं तर्हि परकृतानि भुङ्क्ते न वेत्याह—'परकय'त्ति 'परकृतभोगे' अन्यकृतकर्मण्यन्यस्य भोक्तृत्वेऽतिप्रसङ्गः, तुः निश्चयार्थः, यद्यन्यकृतमन्यो भुङ्क्ते तदा देवदत्ते भुक्ते सर्वस्यापि जगतस्तृप्तिः स्यात्, तथा च न दृश्यते, अतः परकृतं कर्म प्राणी न भुङ्क्ते, किन्तु स्वकृतमेवानुभवति, यदागमः—"जीवे णं भन्ते! किं अत्तकडे दुक्खे परकडे दुक्खे तदुभयकडे दुक्खे?, गोयमा! अत्तकडे दुक्खे नो परकडे दुक्खे नो तदुभयकडे दुक्खे" यद्येवमपि तदकृतस्य भोगो भवति न वेत्याह—'अकयस्स'त्ति अकृतस्य अनुपार्जितस्य 'नास्ति' न विद्यते भोगः, अकृतस्य वस्तुन एवाभावः शशशृङ्गवत्, अतः कथं तद्भोगः?, 'अन्यथा' तद्वैपरीत्ये सकलकर्मात्यन्तोच्छेदावाप्ते 'मोक्षे' मुक्तावपि स कृतभोगः स्यात्, तथा च न किमिति?, कर्मबन्धाभावात्तदनुभवकारिपौद्गलिकशरीराभावाच्च, इत्येवं ज्ञाततत्त्वस्य पुंसश्चतुर्थं सद्दर्शनस्थानं भवतीति गाथार्थः ॥ ६३ ॥ अथ पञ्चमं निर्वाणाख्यं स्थानमाह—

निव्वाणमक्खयपयं निरुवमसुहसंगयं सिवं अरुयं। जियरागदोसमोहेहिं भासियं ता धुवं अत्थि ॥६४॥

व्याख्या—'निर्वाणं' मोक्ष इति सम्बन्धः, तत्स्वरूपमाह—'अक्षयपदं' एकसिद्धापेक्षया साद्यनन्तं, सर्वसिद्धापेक्षयाऽनाद्यनन्तं, सिद्धानां पतनाभावान्न पुनः संसारावतारः, एतावता—"ज्ञानिनो धर्मतीर्थस्य, कर्त्तारः परमं पदम्। गत्वाऽऽगच्छन्ति भूयोऽपि, भवं तीर्थनिकारतः ॥ १ ॥" इति वादिनः सौगता निरस्ताः अतो युक्तमक्षयपदमिति पदोपादानं, पुनः कीदृशम्?-निरुपमम्—उपमानवर्जितम्, 'इक्षुक्षीरगुडादीनां,माधुर्यस्यान्तरं महदि'ति न्यायात्केवलिनामपि वक्तुमशक्यं यत्सुखं-सातं तेन संगतं-मिलितमनन्तसुखात्मकत्वान्मोक्षस्येति। नन्वशरीरस्य नष्टकर्माष्टकस्य सिद्धस्य कुतः सुखसम्भवो भवति? इति, अत्रोच्यते वाचकप्रणीतवचः-लोके चतुर्ष्विहार्थेषु, सुखशब्दः प्रवर्त्तते। विषये वेदनाभावे,विपाके मोक्ष एव च॥१॥ सुखो वह्निः सुखो वायुर्विषयेष्विह कथ्यते। दुःखाभावे च पुरुषः, सुखितोऽस्मीति मन्यते ॥२॥ पुण्यकर्मविपाकाच्च, सुखमिष्टेन्द्रियार्थजम्। कर्मक्लेशविमोक्षाच्च,मोक्षे सुखमनुत्तमम्॥३॥ अत एव 'शिवम्' अनुपद्रवं, पुनः किंभूतम्?—'अरुजं' शरीराभावादष्टाधिकशतरोगसंभवाभावाच्च गदरहितं, तच्च कथं ज्ञायत इत्याह-'जियराग'त्ति 'जितरागद्वेषमोहैः' जितो रागो द्वेषो मोहश्च यैस्ते जितरागद्वेषमोहाः, यतः—"रागोऽङ्गनासङ्गमनानुमेयो, द्वेषो द्विषद्दारणहेतिगम्यः। मोहः कुवृत्तागमदोषसाध्यो, नो यस्य देवः स स चैवमर्हन् ॥१॥" तैः 'भाषितं' पूर्वापराविरुद्धतया कथितं, न विप्रतारकवचनप्रायं, तस्मात् 'ध्रुवं' निश्चितम् अस्ति मोक्षो भव्यजीवस्येत्यध्याहारः। एवं ज्ञाततत्त्वस्य पञ्चमं मोक्षः स्थानं स्यादिति गाथार्थः ॥ ६४ ॥ अथ षष्ठं मोक्षोपायाख्यं स्थानमाह—

सम्मत्तनाणचरणा संपुन्नो मोक्खसाहणोवाओ । ता इह जुत्तो जत्तो ससत्तिओ नायतत्ताणं ॥ ६५ ॥

व्याख्या—अर्हदुक्ततत्त्वेषु सम्यग्भावः-शोभनः परिणामः सुरैरप्यचाल्यः सम्यक्त्वं क्षायकादि, ज्ञायते सचराचरं जगदिति ज्ञानं मतिश्रुतावधिमनःपर्यायकेवलरूपं, चर्यते सत्कर्त्तव्यविशेषोऽनेनेति सामायिकच्छेदोपस्थाप्यपरिहारविशुद्धिसूक्ष्मसम्परायययथाख्यातरूपं चरणं, सम्यक्त्वं च ज्ञानं च चरणं च सम्यक्त्वज्ञानचरणानि 'सम्पूर्णः' अविकलो 'मोक्षसाधनोपायो' मुक्तिगमनकारणं, प्राकृतत्वादत्र पुंस्त्वं न दोषायेति, यथा साधनेन भूधनः परचक्रं विजित्य राज्यादिकमासादयते तथाऽनेनोपक्रमेणाऽऽन्तरान् रिपून् जित्वा निर्वृतिपुरीराज्यश्रियमाश्रयति, तस्मात् 'इह' मोक्षसाधनोपाये 'यत्नः' उद्यमः 'स्वशक्तितो' निजवीर्यानतिक्रमेण सर्वबलेन युक्तः, केषाम् ?—'ज्ञाततत्त्वानाम्' अवगतजिनवचनरहस्यानां, एवमुद्यमवतो मोक्षोपायाख्यं षष्ठं स्थानं स्यादिति गाथार्थः ॥ ६५ ॥षण्णामपि स्थानानां भावार्थो नरसुन्दरकथया कथ्यते, तथाहि—

अत्थि समत्थपसत्थकंचणरयणकंतकंतिपंतिभासुरसुरसिहरिसेहरदीवे सिरिमंजंबूद्दीवे पढमद्दीवे निरंतरच्छेरयपरंपराविचित्ते सिरिभरहखित्ते तरणिव्व तरुणीमणीमयकंची कञ्चीणाम महानगरी—घण्टापहं जीइ पलोइऊणं, माणिक्कमुत्ताहलजालकिण्णं । मन्नेइ चित्तंमि जणो जुहोऽवि, जलावसेसं रयणायरंपि ॥ १ ॥ तत्थ पसत्थसत्थसकलकलाकलियजयसुंदरो नरसुन्दरो राया,—जेणं बाहुमहीहरेण सययं मंथित्तु सव्वत्तओ, जुज्झं दुद्धरसायरं

जयसिरिं आयड्डिऊणं खणा। नूणं सो पुरिसुत्तमो विहसिओ देविन्दमन्थयलाणंतेहिं परिमन्थिए जलणिही सावियच्छ-लच्छिंदिरो ॥ १ ॥ सो उण कुलक्कमागयनत्थियवायवायाऊरियपुट्ठो देवगुरुदुट्ठो जीवस्स बन्धमुक्खपुण्णपावपरभवग मणाइयं न मन्नइ, चत्तारि चेव भूए सव्वत्थ वत्थुकारणभूए परमरहस्सं वाहरेइ। तस्स य पुरिसुत्तमस्स य सच्छी नियलडहलायण्णपराजियहरिसुंदरी सुरसुन्दरी नाम महादेवी। तस्स य मइमाहप्पदप्पपराजियामरमंती सुमइनामा मंती, जो य—निरुवमसुणिजणसेवणधुरीणभावेण सुणियसुयसारो। जिणपूयबद्धलक्खो नयपालणसावहाणमणो ॥१॥ इओ य भूरमणीतिलयसहोयरे सिरिचण्डउरे नयरे वेरिचक्कसुसुमूरणचंडसेणो सेणो नाम सामन्तओ आसि, तस्स मंत-तंतजंतसुदित्तमई जोई परममित्तो हुत्था, सो य अन्नया नरसुन्दररायविसमतमसेवानिव्वेयपरेण चण्डसेणसामन्तेण सवाऽलंकारभासुरीकाऊण सप्पणयं वाहरिओ-बन्धव! मं दुक्खसायरनिवडियं नरसुन्दररायविद्धंसणहत्थावलम्बणदा-णेण समुद्धरेसु, तेणावि तम्मोहमोहियमइणा तहेव पडिवन्नं, तओ जोगीवि कञ्चीपुरीए गन्तूण एगंमि मढे ठाऊण बहुप्पयारकोउगादंसणरञ्जियजणो परमं पसिद्धिमुवगओ, रण्णावि तप्पभावाइसयं लोयाओ सुणिय णियसगासमा-कारिय सायरं दिन्नासणो रहम्मि पुच्छिओ—जोइराय! कओ देसाओ तुम्हे अम्ह पुरं सम्पत्ता?, जोगीवि जम्पेइ—महा-राय! जोइयपयभत्तं भवन्तमायण्णिय उक्कण्ठियचित्तो सिरिपव्वयाओ तुम्ह दंसणूसुओ समागओ, पुणरवि निव-इणा पुट्ठो-अत्थि कावि तुम्ह देवाणुभावसत्ती?, तेणावि अप्पणो परमसुक्करिसं पयडन्तेण भणियं-अत्थी चेव—दंसेमि रत्तीइ दिणं दिणंमी रत्तिं धरित्तीइ गणं गहाणं। पाडेमि थंभेमि किवीडजोणिं, सोसेमि एक्कचुलुएण सिन्धुं ॥ १ ॥

थारेमि इंतं परचक्कचकं, सक्कंपि आणेमि नियड्डिऊणं । अन्नंपि तं किंपि न अत्थि लोए, जं सिज्झए नेव मए नरिंद !॥२॥ एयंमि खणे नम्मसचिवेण जंपियं—जोइराय ! किमेयारिसेहिं फग्गुवग्गिएहिं ?, जइ कावि तुम्ह सत्ती अत्थि ता मज्झ पाणपिया पणयकलहेण रुसिय गया अत्थि, तीइ विणा मह अरण्णमिव भवणं जायं, तं आणेसु जहा तुह भद्दवयमेहस्सव गलगज्जियं सच्चं मुणेमि । तओ जोगिणा मंडलं पूरिऊणायड्ढियमंतबलेण कणिकाच्छिककरा मंडए कुणमाणी सा आणीया, तयणु नम्मसचिवो नियं पणइणिं आगयं दट्ठूण हरिसाऊरियपुट्ठो करे उब्भिऊण नच्चिउं लग्गो, रण्णावि जायच्छरिएण जोगीवि भणिओ—अत्थि कोऽवि कालवंचणोवाओ नवित्ति, तओ तेणुत्तं-अत्थि, परं गिण्हेसु मह दिक्खं जइ महसि कालवंचणं, रण्णावि तव्वयणे पडिवन्ने सो पमुइओ, तं पव्वज्जिऊण एवमुवएसं देइ—"नियदेहे बारस अंगुलाइं नीहरइ पविसइ दसेव । पवणो तव्विवरीयं जो कुणइ स वंचए कालं ॥ १ ॥ एवं कूडब्भमेण भूवं भोलविय जीवहिंसाइपावट्ठाणसायरे बोलिऊण उम्मग्गे पाडेइ स दुट्ठपासंडी । अन्नया विसमविसदाणेण रायं वावाएऊण काकनासं नट्ठो स धिट्ठो, रायावि विसव्वसगओ कट्ठुव्व अचेयणो जाओ, तओ हाहारवं कुणमाणो परियणो मिलिओ, तओ सपच्चया मंतवाइणो सव्वेऽवि हक्कारिया, तेहिंपि नियनियसत्ती फोरवियावि वज्जे टंकियव्व विहला जाया, सचिवाईलोओऽवि अईव विसायसायरे पडिओ, अक्कंदं कुणंतीओ पाणिपुडाहयपीणथणतुट्टंतहारमुत्ताहलधवलियगिहंगणाओ मिलियाओ अंतेउरविलयाओ, तओ मंतीहिं सव्वहा गयचिट्ठुत्ति कलिऊण हत्थिणीकुम्भत्थलमा-

रोविय मसाणभूमिं नेऊण जाव चंदणागुरुदारुरइयाए चियाए राया आरोविओ, ताव उग्घाडियनयणजुयलो पाउब्भूयचेयन्नो राया चियाए उत्तरिऊण मंतिजणं जंपिउं पउत्तो। तओ सुमइमंतिणा नमिऊण विन्नत्तो—महाराय! स पाविट्ठो जोगी तुम्हाणं विसं दाऊण नट्ठो, गवेसिज्जमाणोऽवि न कत्थवि पत्तो, मंतवाइहिंपि तुम्हे पडिजागरियावि न चेयणं पत्ता, तओ रण्णा वुत्तं—सम्पयमहं कहं पवणसंसग्गेण निविसो जाओ?, तओ मंतिणा भणियं—परमेसरो जाणइ, किं तु देव! मया पुव्विं सुणियमासि—जहा उग्गतवस्सीणं पत्तविचित्तलद्धिसिद्धीणं अंगसंगयसमीरणफरिसमित्तेणावि पाणिणो विसवेगाओ मुचंति, तओ रण्णा आइट्ठा विसिट्ठा सेवगा, वच्चह उवरिमभूमिसुद्धिं कुणेह, कोवि अत्थि इत्थ मुणीसरो?, तओ तेहिं आणं पडिच्छिऊण भूमिसुद्धिं विहिऊण विन्नविओ राया—जहा सामिय! पुप्फागरुज्जाणे संपयं चेव राउव्व सेणासमूहेणं वासवुव्व सुरगणेणं फुल्लियदुमुव्व विहगनिवहेणं कमलुव्व भसलपडलेणं मुणिजणेणं भूसियपासदेसो नाणलच्छिनिवासो चारुचरित्तपवित्तगत्तो पत्तो चंदप्पहायरिओ, भूवइणा भणियं—नूणमेयस्सेव मुणिंदस्स पभावो संभाविज्जइ, जं मह देहाओ गरललहरिओ पणट्ठाओ, तम्हा जामि अंतेवासिव्व तस्संतियं। तओ उट्ठिऊण सपरियणो राया तस्स पासं गंतूण महियलमिलंतमऊली नमिऊण उवविट्ठो, सूरिहिंपि समारद्धा धम्मदेसणा, तहाहि—माणुस्सखित्तजाईकुलरूवारुग्ग आउयं बुद्धी। समणुग्गहसद्धा संजमो य लोगंमि दुलहाइं ॥१॥ अत्रान्तरे राज्ञा स्वकुलक्रमागतं नास्तिकमतं प्रकटयता गुरवो बभाषिरे-भवद्भिर्यदिदं जीवास्तित्वादिकमुक्तं तन्नास्मन्मनसि

घटाकोटिसंटङ्कमाटीकते, भूम्यादिमहद्भूतचतुष्टयाव्यतिरिक्तं परलोकादिभवभ्रमणप्रवणमन्यज्जीवादिकं वस्तु न दरीदृश्यते, असत्त्वेन, तथाहि—नास्ति जीवः प्रत्यक्षप्रमाणाविषयत्वाद्व्योमारविन्दवत्, यच सद्रूपमस्ति न तत्प्रत्यक्षप्रमाणातीतं, यथा चत्वारि भूतानीत्युक्त्वा स्थिते भूपरिवृढे भगवन्तोऽभाषन्त—राजन्नयमात्मा किं भवतोऽध्यक्षागोचर उत सर्वेषां ?, तत्र चेत्त्वयाप्रत्यक्षत्वान्नास्ति तदा विप्रकृष्टदेशकालस्वभावानां भून्नासुर्वीपर्वततर्वादीनामप्यसत्त्वप्रसङ्गः, भवतोऽप्येषामैन्द्रियकज्ञानेनानवलोकनात्, यदि च सकललोकावलोकनातीतत्वान्नास्तीति निगद्यते, तदपि सावद्यं, जगज्जनप्रत्यक्षाणां तेषां भवदनध्यक्षत्वात्, उत तेऽपि भवदध्यक्षास्तदा भवतोऽत्र जगज्जीवप्रसङ्गः, किञ्च—चैतन्यमिदं चतुर्भूतानां प्रकृतिरुत कार्यं ?, न तावत्प्रकृतिः, तेषां चैतन्यवन्ध्यत्वात्, न चापि कार्यं, भूतानुरूपताऽसत्त्वात्, अथ सर्वभूतसंयोगाच्चैतन्यमुत्पद्यते, यथा मद्याङ्गेभ्यो मदशक्तिः, तदप्यपटु, यस्य वस्तुनो यत्राभावस्तत्र तस्योत्पादाभाव एव, यथा धूलीकणालीभ्यस्तैलं, मद्याङ्गेषु च सर्वेषु प्रत्येकं मदशक्तिसद्भावात्, सर्वजगदनुभवसिद्धं चेदं चैतन्यं यस्य कस्यापि स्वभावः स भूतेभ्यो भिन्न एव परभवगामी जीवः, द्रव्यपर्यायभेदैश्च नित्यानित्यः स्वकर्मफलोपभोक्ता पुण्यपापक्षयान्मोक्षगामीति स्थितं । तओ नरिंदेण पचुत्तरदाणाखमेण भणियं—भयवं ! जइ परभवगामी एस जीवो जायइ ता मज्झ पिया बहुविहजीवघायणनिबद्धमई तुम्हाणं मए अवस्सं नरए गओ भविस्सइ, ता एस कहमिह आगंतूण मं पावाओ न निवारेइ ?, गुरुणावि वुत्तं-जहा कोऽवि महाअन्नायकारी निबिडनियडेहिं निगडिऊण कारागारंतरे

निक्खित्तो पिक्खिउंपि न नियपरियणं लहइ, तहा एएण दिट्ठंतेण तुम्ह पिया कम्मपरवसा नरयाउ न पावइ नीसरिउं, भूवइणा भणियं—जइ एवं ता मह माया तुम्ह धम्मरत्ता जीवदयानिरया अवस्सं सग्गं गया हविस्सइ, सा य आगंतूण पावनिरयं मं किं न बोहेइ ?, तओ भगवया वागरियं-भो देवाणुप्पिया ! सग्गं गया जीवा सहाव-सोहग्गसुंदरअमरसुंदरीभोगदुल्ललिया बहुपयाररिद्धिभरवक्खित्तचित्ता असंपन्नपओयणा अणहीणमणुयकज्जा चउसय-पंचसयजोयणुच्छलिरितिरियलोयदुरभिगंधसंतट्ठा तित्थेसरपंचकल्लाणगे महरिसितवाणुभावं जम्मंतरनेहं वा मुत्तूण पाएण न समागच्छंति मणुयलोयं। तओ रण्णा वुत्तं—भयवं ! मए जीवस्स पिक्खणकए एगो चोरो दोखंडीकओ, तत्थ न दिट्ठो कोऽवि नीहरंतो महब्भूए चइवि अन्नो जीवो, मुणिवरेणावि भणियं-राय ! केणवि अरणियकट्ठं बहुसो खंडीकयं, तस्स मज्झे न पलोइओ सव्वहावि अग्गी, अवरेण महणदारुणा महणजुत्तीए उट्ठिओ दिट्ठो हव्ववाहो। जइ मुत्तिधरा अवि पयत्था विज्जमाणावि चम्मचक्खूहिं न पिक्खिज्जंति ता सरीराइविरहियस्स अम्मुत्तस्स जी-वस्साणवलोयणे का विपडिवत्ती ?, पुणो रण्णा साहियं—भयवं! एगो चोरो जीवंतो लोहमंजूसाए पक्खित्तो, सा य जउपमुहदव्वेहिं समंतओ नीरंधीकया, कियंतेऽवि समए समइक्कंते चोरो तम्मज्झट्ठिओ चेव विवन्नो, जइ कोऽवि सरी-रवइरित्तो जीवो हुज्जा ता नूणं पलोइज्जइ, तन्निस्सरणमग्गो मंजूसाए न दिट्ठो, तम्हा नत्थि जीवो, तओ भगवया भणियं—एगंमि पुरे कोऽवि संखवायगो हुत्था, तस्सेवंविहलद्धी—दूरेवि संखं पूरंतो कण्णसन्निहाणे चेव लक्खियइ,

नंदणो हुत्था, सो लोएहिं पए पए हसिज्जंतो निव्विवेयजणेहिं विनडिज्जंतो अमरिसवसेण कूवे पडिय मओ । नंदिगामे ठक्कुरमंदिरे दासपुत्तो जाओ, एगया मज्जपाणपरवसेण नियठक्कुरो अक्कोसिओ बहुविहअसब्भवयणेहिं, तओ तेण रुट्ठेण तस्स छिन्ना जीहा, सो य महापीडाविहुरियंगो महीए पडिओ, तओ महुरगिराए मुणिणा भासिओ-भद्द ! किमत्थ संतावं वहसि ?, जं तए पुव्विं कुकम्मं निम्मियं तस्सेस विवागो, अज्जुणभवाओ आरब्भ सव्वो पुव्वभववइयरो निवेइओ, तस्सवणेण सोऽवि जायजाइसरणो अप्पाणं निंदंतो मुणिपासाओ लद्धं पंचपरमिट्ठिमंतं सुमरंतो पाणे चइऊण महाराय! तुमं जाओ । पुव्वब्भासाओ य नत्थियमयभावो तुम्ह संजाओ । रायावि इय गुरुमुहाओ सुणिय संजायजाइसरणो पच्चक्खीकयपुव्वभवो मुणिं पइ जंपइ–भयवं ! सच्चं चेव तुम्हाण वयणं, तम्हा अत्थि चेव अप्पाऽणाइनिहणो पुण्णपावकरणपवणो तव्वेयणे पवीणो य, धुवं निव्वाणमवि अत्थि, न इत्थ कोऽवि संदेहो, ता भयवं! मह इहइमित्तो कालो निरत्थओ जाओ, संपइ पुण तुम्ह दंसणाओ पणट्ठं मह पावकम्मं, ता पसिऊण संसारसागरतारिणिं अन्नाणतिमिरतरणिं निरवज्जं पव्वज्जं मे वियरेह । सूरिणावि अब्भणुन्नाओ परमसंवेगरसपोसियमणो नियं पुत्तं रज्जे ठविय चेइएसु अट्ठाहियामहिमं कारिय नरसुंदरराओ गुरूण पासे पव्वज्जं पडिवज्जइ । 'जयं चरे जयं चिट्ठे, जयमासे जयं सए । जयं भुंजंतो भासंतो, पावं कम्मं न बंधइ ॥१॥' इच्चाइ परमरहस्सं हियए चिंतयंतो निरइयारं चरित्तं पालयंतो पढियसिद्धंतो गुरूहिं सूरिपए ठविओ रायरिसी । तओ मिच्छत्ततिमिरनियरं सहस्सकिरणुव्व संहर-

माणो पडिबोहियभव्वचक्को नरसुंदरसूरी नियपए सव्वगुणोववेयं सीसं ठाविअ पंचविहतुलणाए अप्पाणमेवं तोलेइ, सा चैवंविधाः—"तपसा सत्त्वसूत्राभ्यामेकत्वेन बलेन च। तुलना पंचधा प्रोक्ता, जिनकल्पं जिघृक्षतः॥ १॥ प्रथमोपाश्रयस्यान्तो, द्वितीया तद्बहिः स्मृता। तृतीया चत्वरे ज्ञेया, चतुर्थी शून्यवेश्मनि॥२॥ पञ्चमी पितृवने (श्मशाने पञ्चमी) भीमे, भयसम्भ्रमवर्जिता। विधेयेति महात्मानः, प्राहुः सिद्धान्तवेदिनः॥३॥ तओ जिणकप्पं पडिवज्जिय नियदेहेऽवि अप्पडिबद्धो गामे एगराइयं नयरे वीहीकमेण पंचराइयं चिट्ठंतो पज्जंते पायवोपगमणमणसणं करिय समाहिणा नरसुन्दररायसूरी सव्वट्ठसिद्धे विमाणे सुरवरो समुप्पन्नो। तत्तो मणुस्सभवे अवयरिय सिद्धिसुहं पाविस्सइ—"एवं सयावि नरसुंदरभूमिरायदिट्ठंतमेयममयं व निपीय भव्वा!। जीवाइअत्थिवयणेसु कुणेसु बुद्धिं, सम्मत्तसुद्धिवसओ जह होइ सिद्धी॥ १॥ सम्यक्त्वषट्स्थानविषये नरसुन्दरकथा॥ सम्प्रति सकलशास्त्रार्थं निगमयन्नाह—

**इय सत्तसट्ठिपयाइं उच्चिणिउं विउलआगमारामा। संगहिया इत्थ मए, मंदमईणं सरणहेउं॥ ६६॥**

व्याख्या—'इतिः' परिसमाप्तौ श्रद्धानादिद्वादशमूलद्वाराणामुत्तरप्रकृतिरूपाणि सप्तषष्टि पदानि 'विपुलागमारामात्' विस्तीर्णसिद्धान्तोद्यानादर्थवशात्पुष्पाणीवोच्चित्य 'अत्र' सम्यक्त्वसप्ततिकायां महाशास्त्रे 'मन्दमतीनाम्' अल्पबुद्धीनां 'स्मरणहेतवे' स्मृतिनिमित्तं मया 'संगृहीतानि' उपात्तानीति गाथार्थः॥ ६६॥ एषां परिज्ञानात् किं फलं स्यादित्याह—

एगया तेण नरिंदस्स सरीरचिन्तावसरे वाइओ संखो, मम कण्णमूले ठाऊण एस संखं धमइत्ति संखुद्धस्स रण्णो पुरीसनिरोहो जाओ, तओ कुविएण रण्णा सो बज्झो आणत्तो, तेणवि राया विन्नत्तो–सामिसाल! अहं दूरट्ठिओऽवि संखं वायंतो रुद्धीए समीवट्ठिओ चेव लक्खियामि, जइ एयं मह वयणं न मन्नेह तो पच्चयं कुणेह, तत्तो कुम्भीए निक्खिविऊण तीए सम्मं मुहं पूरिऊण उवरिं लक्खाए सारियाए तम्मज्झट्ठिएण धमिओ संखो, सव्वेहिवि सुओ नाओ, कुम्भी सव्वओऽवि अच्छिद्दा दिट्ठा। तहा लोहकारेण एगेण लोहंमि धमिए छिद्दं विणा तत्थ अग्गी पविट्ठो, तारुओ चेव जाओ, एवं जीवस्सावि पवेसे निग्गमे य परमा सत्ती। तयणु पुणोऽवि रण्णा भणियं–भयवं! एगो चोरो मयकालाओ पुव्विं तोलिओ, तओ कण्ठकंदलुब्बंधणेण वावाइय तोलिओ तप्पमाणो चेव जाओ, न तत्थ घडचडयसरिच्छोऽवि जीवाइओ पयत्थो नीहरंतो दिट्ठो। तओ गुरुणा वाहरियं–महाराय! एगेण गोवालबालगेण कुऊहलेण एगो दिइपुडो पवणेण पूरिऊण तोलिओ, पच्छा वायं निस्सारिय तोलिओ समाणो चेव, तयफासिंदियगिज्झस्स मुत्तिमंतस्सवि वाउस्स पवेसनिस्सरणेण दिइणो समाणया, ता सरीरवइरित्तस्स ससंवेयणपच्चक्खस्स चेयणालक्खणस्स जीवस्स परिन्नाणे को संसओ?। तओ राया भणइ–भयवं! तुम्ह पसाया जइवि झत्ति नट्ठो दुहावि विमोहविसो तहावि नत्थियवायं कमागयं कहं चएमि?, गुरूहिं वुत्तं–संपत्तविवेएहिं एयं कुमग्गं चइय सुमग्गासेवणं काउमुचियं, भणियं च–जे केऽवि पुव्वपुरिसा अंधलया अंधकूवए पडिया। ता किं सचक्खेणं झडत्ति तत्थेव पडियव्वं १॥

जहा धणत्थिणो चत्तारि पुरिसा भमंता कमेण लोहरुप्पसुवण्णरयणाणि पाविऊण पुवपुवपत्तवत्थुपरिहारेण उत्तमवत्थुसंगहेण आजम्मं सुहभायणं जाया, तम्मज्झे एगो पुण कुव्वहिलचित्तो पुवपत्तं लोहं कहं चएमित्ति बहुवारमवरेहिं वारिओऽवि भणइ, तओ स दुक्खी जाओ, एवं महाराय! तुमंपि कुलकमागयं नत्थियमयमचयंतो नरयाइदुक्खभायणं पुवंव भविस्ससि। तओ रण्णा पुच्छिया गुरुणो–मया कहं दुक्खरिंछोली पुवभवे अणुहूया, ता पसिय कहेसु। गुरुवि भणिउमाढत्तो–इत्थेव भारहे वासे नवगामनामे गामे अज्जुणनामओ कुलपुत्तओ आसि, तस्स य सुसावगो सुहंकराभिहो मित्तो जाओ। अन्नया तत्थ गामे मुणिणो समागया, तया सुहंकरेण भणिओ अज्जुणो-बंधव! वच्चामो मुणिपासं, सुणेमो जिणधम्मं, तओ अज्जुणेणुत्तं-वयंस! मए नायमेवागमरहस्सं-लोयभोलवणकए धुत्तेहिं कयाइं कव्वाइं कमेण सिद्धंतो संवुत्तो, एवं नियहिययाभिप्पायं पयासंतेण कुकम्ममज्जियं, कालकमेण मरिऊण अज्जुणो छगलओ जाओ, तओ तस्सेव निमित्तदिणे अज्जुणनंदणेण स छागो वावाइऊण माहणाण दिन्नो तप्पुण्णकए। तओ रासहो जाओ, बहुयरं ताडिज्जंतो भारं वहेइ, खुहापिवासातरलिओ अणिट्ठविट्ठाइभक्खणेण कालं गमन्तो कयावि बहुभारपीडिओ पडिओ भण्डगाणसुवरि, तओ रुट्ठेण कुम्भयारेण लउडएण तहा पहओ जहा मओ। तओ गड्डसूयरो जाओ, असुइमज्झे लुटंतो भक्खंतो आहेडियभसणेण सवणेण गहिय चिरसमारसंतो मारिउं भक्खिओ। तत्तो चुत्तो करहो, सोऽवि महाभारवहणपरिस्संतगत्तो तडिणीदुत्तडिपडणपीडियसव्वंगो कलु रडंतो दुहसंतत्तो मरिय गुब्बरगामे धणनामगस्स वणिणो मूयगो

एएसिं दुविहपरिन्ना दंसणसुद्धिं करेइ भव्वाणं। सुद्धंमि दंसणंमी, करपल्लवसंठिओ मुक्खो ॥ ६७ ॥

व्याख्या—'एषां' सम्यक्त्वभेदानां द्विविधा-सामान्यविशेषात्मकतया परिज्ञा 'भव्यानां' मोक्षगमनार्हाणां 'दर्शनशुद्धिं' सम्यक्त्वनैर्मल्यं 'करोति'आपादयति, तस्मिंश्च 'दर्शने' सम्यक्त्वे 'शुद्धे' अकलुषे 'करपल्लवसंस्थितः' शयकिशलयगतो 'मोक्षो' मुक्तिः, यदागमः—"संमत्तंमि उ लद्धे पलियपुहुत्तेण सावओ हुज्जा। चरणोवसमखयाणं सायरसंखंतरा हुंति ॥ १ ॥" इति गाथार्थः ॥ ६७ ॥ सा च सम्यक्त्वशुद्धिः कथं स्यादित्याह—

संघे तित्थयरम्मी, सूरिसु रिसीसु गुणमहग्घेसुं। अप्पच्चओ न जेसिं, तेसिं चिय दंसणं सुद्धं ॥ ६८ ॥

व्याख्या—'सङ्घे' साधुसाध्वीश्रावकश्राविकारूपे 'तीर्थंकरे' श्रीमदर्हति 'सूरिषु' पञ्चविधाचारचारचञ्चुरेषु 'ऋषिषु' साधुषु, एतेषु किंभूतेषु ?—'गुणमहार्घेषु' स्वस्वानुरूपगुणपूज्येषु 'येषां' विवेकिनां 'नाप्रत्ययो' मनोवाकायैर्नाविश्वासस्तेषां चैव 'दर्शनं' सम्यक्त्वं 'शुद्धम्' अवदातमिति गाथार्थः ॥ ६७ ॥ ये त्वेवंविधा न स्युस्तेषां लक्षणमाह—

जे पुण इय विवरीया, पल्लवगाही सबोहसंतुट्ठा। सुबहुंपि उज्जमंता ते दंसणबाहिरा नेया ॥ ६८ ॥

व्याख्या—ये पुनः 'इति' प्रागुक्तप्रकारेण 'विपरीताः' सङ्घादिषु प्रत्यनीकाः 'पल्लवग्राहिणः' कस्यापि कस्यापि

शास्त्रादेः किमप्युपादाय स्वात्मानं ज्ञंमन्यमानाः पुनः 'स्वबोधसंतुष्टा' अनन्तार्थानां शास्त्राणां रहस्यमजानानाः कुतोऽपि किमपि श्रुतग्राहिकतया ज्ञात्वैतावतापि मनसि परमोत्कर्षं टिट्टिभवद्वहन्तो भवन्ति, यतः—"टिट्टिभः पादमुत्क्षिप्य, शेते भङ्गभयादिव । स्वचित्तनिर्मितो गर्वः, कस्य न स्यात् सुखप्रदः ? ॥ १ ॥" तर्हि ते क्रियाशून्या भविष्यन्तीत्याह—'सुबहुंति' सुबह्वप्यनेकधापि तपःप्रभृतिकृत्येषु 'उद्यच्छन्तः' उद्यमं कुर्वाणास्ते 'दर्शनबाह्याः' सम्यक्त्वविकला मिथ्यादृश एवावगन्तव्या इति गाथार्थः ॥ ६९ ॥ ज्ञाततत्त्वैस्त्वेवंविधैर्न भाव्यं, किन्तु प्रागुक्तगाथाप्रतिपादितार्थे सुन्दरवच्चेष्टितव्यं, तद्दृष्टान्तश्चायम्—

जम्बूवृक्षाङ्कितो द्वीपो, यस्यास्ति त्रिदशाचलः । कीर्तिस्तम्भ इव श्रेयोवैभवराजिलसल्लिपिः ॥ १ ॥ तत्रास्ति श्रीविदेहेषु, गेहेष्विव वृषश्रियाम् । पूर्वेष्वपूर्वरम्येषु, मणिवत्यां तु नीवृति ॥ २ ॥ मणिप्राकारसम्भूतज्योतिरस्ततमोभरा । पुरी मणिवती नामाक्षामसज्जनराजिता ॥ ३ ॥ युग्मम् ॥ यां विश्वविश्वसम्भूतश्रीणां श्वशुरमन्दिरम् । विलोक्य कस्य नैव स्याद्विस्मयोत्तानितं मनः ? ॥ ४ ॥ यस्यां जिनेशप्रासादाः, पद्मरागमणीमयाः । हरन्ति दीपवत्नृणां, सबाह्याभ्यन्तरं तमः ॥ ५ ॥ तत्र सुस्थितनामाऽभूच्छ्रेष्ठी श्रेष्ठगुणोल्बणः । सम्यग्दृक्षु परां कोटिमुवाह श्रावकेषु यः ॥ ६ ॥ तन्मन्दिरे कर्मकरो, विनयादिगुणाग्रणीः । सुन्दरः सुन्दराचारविचारचतुराशयः ॥ ७ ॥ सोऽन्यदा पुण्ययोगेन, मुनीनां सविधे ययौ । तत्र शुश्राव सिद्धान्तरहस्यमिति सुन्दरः ॥ ८ ॥ जिनपूजनं जनानां जनयत्येकमपि सम्पदो

विपुलाः । काले जलदविमुक्तं जलमिव तस्य श्रियः सफलाः ॥ ९ ॥ एनमर्थं निधिमिव, सम्प्राप्य मुनिपुङ्गवात् । सुन्दरो मुदितस्वान्त, इत्यभिग्रहमग्रहीत् ॥ १० ॥ नार्चयामि जिनं यावद्गन्धाद्यष्टविधार्चया । सामग्र्या न गुरून् वन्दे, तावन्नाश्नामि चाशनम् ॥ ११ ॥ एवं स भावनापूरकर्पूरैर्वासितान्तरः । नियमं पालयामास, निधानमिव दुर्गतः ॥ १२ ॥ प्रकृत्याऽल्पकषायोऽयं, गुरौ देवे च भक्तिभाक् । स्मृतपञ्चनमस्कारो, व्यपद्यत समाधिना ॥ १३ ॥ पुर्यां तक्षशिलायां स, त्रिविक्रममहीपतेः । राज्ञीसुमङ्गलाकुक्षौ, गर्भत्वेन ह्यवातरत् ॥ १४ ॥ राज्या निजमुखाम्भोजे, स्वप्ने तद्गर्भयोगतः । प्रविशन् ददृशे पूर्णकलशो मुखसद्दलः ॥ १५ ॥ प्रतिबुध्य धराभर्तुः, पुरतः परया मुदा । न्यवेदयत तया स्वप्नो, मनोज्ञसुखकारणम् ॥ १६ ॥ स्वप्नस्य तस्य तेनापि, व्याख्येति प्रतिपादिता । प्रिये ! भावी तनूजस्ते, सम्राट् राष्ट्रौघपालनात् ॥ १७ ॥ कर्णग्राहं गाहमाने, वाक्ये तस्मिन् नृपप्रिया । जहर्ष समये तस्या, दौहृदः प्रादुरास च ॥ १८ ॥ परिम्लानमुखीं वीक्ष्य, सायमम्भोजिनीमिव । तामादरपरोऽप्राक्षीद्दौहृदं प्रेमतो नृपः ॥ १९ ॥ साऽप्यूचे नाथ ! भवता, धृतच्छत्रा करेणुगा । अभ्रास्यं पूरयन्त्यर्थैर्दानादीनां मनोरथान् ॥ २० ॥ तथैव पूरिते राज्याः, तस्या राज्ञाऽथ दौहृदे । गर्भोऽवर्द्धत पित्रोश्च, मनोरथमहीरुहः ॥ २१ ॥ साऽसूत समये राज्ञी, पुत्रं सुत्रामसन्निभम् । विदूरभूरिवाङ्कूरं, रत्नस्य द्युतिशालिनः ॥ २२ ॥ तज्जन्म जनकः श्रुत्वाऽऽनन्दमेदुरितान्तरः । सुत्रामेव जयन्तेन, तेन पुत्रिषु धुर्यभूत् ॥ २३ ॥ स्थाने स्थाने ततो राजा, मञ्चानुच्चानरीरचत् । प्रशस्तानि स्वस्तिकान्यतीतम-

न्मौक्तिकालिभिः ॥ २४ ॥ तोरणानि प्रतिगृहं, शुचि चन्दनमालया । अचीकरद्गुडीर्दि, धूपपात्राण्यतिष्ठिपत् ॥२६॥
पट्टांशुकै राजमार्गमरूरुचदरीरमत् । जनं नभोऽङ्गणस्पर्शिध्वजराजिमदीधरत् ॥ २६ ॥ अनीनृतन्नर्त्तकीनां, कुलं
नृत्यकलाकुलम् । गान्धर्वैर्धुर्यैर्गन्धर्वैस्तूर्यत्रिकमवीवदत् ॥ २७ ॥ असिञ्चयन्महीपीठं, सुगन्धैश्चन्दनद्रवैः । अदीदपच्च
दानानि, पुत्रजन्मनि भूधनः ॥ २८ ॥ पञ्चभिः कुलकम् ॥ नालिकेरफलप्रोद्यदक्षतस्थालपाणयः । पौरस्त्रियः प्रविविशु-
स्तदा नृपनिकेतनम् ॥ २९ ॥ भोजनाच्छादनैः स्फारताम्बूलैर्भूषणैरपि । भूपः सत्कारयामास, पौरलोकं प्रहर्षुलैः
॥ ३० ॥ यदस्मिन् गर्भगे माता, गृहान्निर्गत्य कानने । अभ्राम्यत्तेन नामास्य, निर्गतसुख उच्यते ॥ ३१ ॥ अबाल-
वृत्त्या बालत्वमतिवाह्याखिलाः कलाः । कलयित्वा च तारुण्यपुण्याङ्गो भूपभूरभूत् ॥ ३२ ॥ तं पतीयितुमायान्त्यो,
भूरिशोऽपि नृपाङ्गजाः । नाग्रहीन्मेदिनीनाथोऽचिन्तयच्चेति चेतसि ॥ ३३ ॥ स्वयं परीक्ष्य रूपाद्यैर्गुणैरत्यद्भुतैर्युताः ।
कन्याः कुमारराजेन, परिणाययिताऽस्म्यहम् ॥ ३४ ॥ अद्रुमं वरमुद्यानमाकीर्णं न विषद्रुभिः । अनूढो हि वरं सूनुर्न
कुदारपरिग्रही ॥३५॥ अथ तस्य कुमारस्य, निशम्य चरितं जनात् । नामश्रीभ्यां वासवस्य, वैशालीनगरीशितुः ॥३६॥
कामकीर्त्यभिधा कन्या, धन्या धाम्नामिवाकरः । सादरं पितरं स्माह, सा लक्ष्मीरिव सागरम् ॥ ३७ ॥ युग्मं ॥
तात ! तक्षशिलापुर्यां, मां निर्गतसुखेऽधिकम् । एकाग्रमनसां मद्दक्षु, प्रेषयस्व स्वयंवराम् ॥ ३८ ॥ पित्राऽपि हृष्टचि-
त्तेनोचितज्ञैषेति जानता । संश्लाघ्य पुत्रीं सामग्र्या, भूयस्याऽप्रेष्यत द्रुतम् ॥ ३९ ॥ तयाऽपि पुरतः प्रैषि, वाडवः

साम्भरायणः । सोऽपि त्रिविक्रमं भूपं, दत्ताशीरित्यभाषत ॥ ४० ॥ राजन्! वैशालिकाधीशो, वासवः क्षोणि-वासवः । प्राणेभ्योऽप्यधिका तस्य, कामकीर्त्यभिधाऽऽत्मजा ॥ ४१ ॥ धातुर्निर्माणकौशल्यरहस्यकेलिवेश्मनः । यस्या विलोकनादेव, मुह्यन्ति त्रिदशा अपि ॥ ४२ ॥ सा कन्या त्वत्कुमारस्य, श्रावं श्रावं जनाद्गुणान् । तीव्रानुरागतोऽ-भ्येति, स्वयंवरकृते कृतिन्! ॥ ४३ ॥ सरित्सरित्पतिं त्यक्त्वा, प्रयात्यन्यत्र किं क्वचित्? । लक्ष्मीश्चिन्तामणिं चेति, सा विमृश्य समेति हे ॥ ४४ ॥ साम्भरायणविप्रस्येति पीत्वा वचनामृतम् । उज्जगार धराधीशः, सम्बन्धो बन्धुरो हि नः ॥ ४५ ॥ पितुर्वाचा कुमारोऽपि, परिणीय जहर्ष ताम् । गुरूपदिष्टमिष्टं हि, प्राप्यार्थं को न हृष्यति? ॥ ४६ ॥ परस्परं परा प्रीतिरजायत तयोर्भृशम् । उमेशयोरिव यथा, चन्द्रचन्द्रिकयोरिव ॥ ४७ ॥ अन्यदा रणसिं-हाख्यः, सीमालक्षोणिवल्लभः । त्रिविक्रमाज्ञां नो मेने, मत्तद्विप इवाङ्कुशम् ॥४८॥ तस्योपरि स्वयं राजा, प्रतिष्ठासु-रताडयत् । प्रयाणभेरीं दुर्वारकृतान्तस्येव हुङ्कृतिम् ॥ ४९ ॥ तच्छ्रुत्वा निर्गतसुखः, शौर्योत्कर्षादमर्षभृत् । समेत्य पितरं स्माह, याताऽहं तात! तं प्रति ॥ ५० ॥ प्रस्थाय पितुरादेशात्सोऽन्वितः सबलैर्बलैः । सांयुगीनो रणं कृत्वा, हेलयैव जिगाय तम् ॥५१॥ पित्रा तेन जितं शत्रुं, घनेनेव हुताशनम् । निरीक्ष्य राज्यभारस्य, धुर्यताऽस्य धृता हृदि ॥ ५२ ॥ कुमारमङ्कमारोप्य, कुमारमिव शङ्करः । सुधाकिरा गिरा राजा, सादरं व्याजहार तम् ॥ ५३ ॥ वत्साहं त्वयि सत्पुत्रे, सर्वकार्यधुरन्धरे । न्यस्य राज्यश्रियं सम्यक्, साधयामि परं पदम् ॥ ५४ ॥ अनिच्छतोऽपि पुत्रस्य,

सामन्तामात्ययुग् नृपः । राजाऽस्य स्थापनां चक्रे, नाभेयस्येव वासवः ॥ ५५ ॥ त्रिविक्रमनृपो जैनशासनस्य प्रभा-
वनाम् । कृत्वा दीक्षामुपादत्त, तरीमिव भवाम्बुधेः ॥ ५६ ॥ श्रीनिर्गतसुखो राजा, राज्यश्रीसमलङ्कृतः । नयेन
पालयामास, स प्रजाः स्वप्रजा इव ॥ ५७ ॥ सुरराज इव स्वैरं, भुञ्जन् भोगानभङ्गुरान् । विवेद न गतं कालमन्तः-
पुरकृतस्थितिः ॥ ५८ ॥ मदनाख्यो युवराजो, मन्त्री सुमतिसंज्ञकः । दूतः संवचनाह्वश्चासंस्तद्राज्यधुरन्धराः ॥ ५९ ॥
वयमेवेत्युपायज्ञाः, सांयुगीनाः कलापराः । आत्मोत्कर्षं प्रशंसन्तो, राज्ञः पुण्यं न मेनिरे ॥ ६० ॥ यदेष विषयासक्तो,
राज्यव्यापारशून्यधीः । अस्मद्बुद्धिबलेनैव, शशास क्षितिमण्डलम् ॥ ६१ ॥ इति तेषां परिज्ञायाखर्वगर्वमयं मनः ।
तन्मानध्वसनायोचे, वचनं क्षोणिनायकः ॥ ६२ ॥ यद्यप्येष द्विषद्वर्गो, मत्प्रतापमहाग्निना । प्रतप्तः सिक्थुवन्मङ्क्षु,
जगाल समरं विना ॥ ६३ ॥ तथाप्यहं दिदृक्षायै, देशानां सेनयाऽन्वितः । प्रयास्यामि विधास्यामि, मनोऽभीष्टं च
सम्प्रति ॥ ६४ ॥ चतुरङ्गचमूचक्रयुक्तः शक्र इवावनीम् । भ्रमन् स्वदेशसीमानं, जगाम धरणीधवः ॥ ६५ ॥
युवराड्मन्त्रिदूतांस्तानूचेऽथ पृथिवीपतिः । निस्सहाया वयं पुण्यपरीक्षां स्वस्य कुर्महे ॥ ६६ ॥ निःशम्बलानामस्माकं,
प्रत्येकं प्रतिवासरम् । भोजनादिक्रिया कार्या, प्रतिज्ञायेति तेऽचलन् ॥६७॥ क्रमेणोल्लङ्घयन्तस्ते, नानाश्चर्यधरां धराम् ।
श्रीकाशीं नगरीं प्रापुस्ततो भूपोऽब्रवीदिति ॥ ६८ ॥ कोऽद्य भोजनसामग्रीं, कर्त्ता ? दूतस्ततो जगौ । अहं सर्व-
रसोपेतां, दास्ये रसवतीं हि वः ॥६९॥ इत्युक्त्वा स पुरीमध्यं, प्रविश्यापश्यदेककम् । आपणं श्रेष्ठिनस्तत्रोपाविश-

त्तस्य सन्निधौ ॥७०॥ दिने तस्मिन् पुरे कोऽपि, प्रावर्त्तत महोत्सवः । तेन लोको वस्तुजातग्रहायागात्तदापणे ॥७१॥ एकाकिनस्तस्य दूतः, साहाय्यं पण्यविक्रये । ददावानन्दितः सोऽपि, तमभाषत नैगमः ॥ ७२ ॥ भोजनावसरो वृत्तो, वत्सोत्तिष्ठ गृहे मम । समागच्छ गृहाणाद्याऽऽतिथ्यं तथ्यगुणाकर! ॥ ७३ ॥ दूतस्तं प्राह नैकाकी, त्रयोऽन्ये सन्ति पूर्बहिः । सुहृदस्तैर्विना नाहं, विदधामि भुजिक्रियाम् ॥ ७४ ॥ सोऽभाणि श्रेष्ठिना सद्यः, तानानय मदोकसि । धन्यानामेव पुण्येन, समयेऽतिथिसङ्गमः ॥ ७५ ॥ चत्वारोऽपि तदा श्रेष्ठिसदने भोजनं व्यधुः । वणिजस्तद्व्यये द्रम्मः, सपादः कर्म्मैकफलम् ॥ ७६ ॥ द्वितीये दिवसे जग्मुः, श्रीमद्रत्नपुरेऽथ ते । युवराड् भूभुजाऽऽदिष्टो, भोजनादिककर्म्मणे ॥ ७७ ॥ पुरान्तः प्रविशन् सोऽपि, रूपतर्जितनिर्जरः । पुंद्वेषिण्या मगधया, वेश्यया ददृशेतराम् ॥ ७८ ॥ मत्वा तस्मिन्नतितरामनुरागवतीं सुताम् । अक्का तमानयद्गेहं, देहवन्तमिव स्मरम् ॥ ७९ ॥ सोऽपि तां कुम्भिकुम्भाभवक्षोजां कमलाननाम् । तिलोत्तमापरिस्पर्द्धिरूपां वीक्ष्य विसिष्मिये ॥ ८० ॥ द्यूतक्रीडामसञ्जातव्रीडां कुर्वंस्तयाऽथ सः । ऊचे प्राणेश! कुर्वीथा, भोजनं स्नानपूर्वकम् ॥ ८१ ॥ सोऽप्यूचे मम मित्राणि, त्रयोऽन्ये सन्ति पूर्बहिः । ऋते तेभ्यो न कुर्वेऽहं, भोजनं चारुलोचने! ॥ ८२ ॥ तानप्यानय जीवेश!, तथैव विहितेऽमुना । सादरं कारयामास, सा तकान् स्नानभोजने ॥ ८३ ॥ रूपकानां पञ्चशती, लग्ना तद्भोजनव्यये । ततः प्रस्थाय ते जग्मुः, श्रीमत्पद्मपुरे पुरे ॥ ८४ ॥ तृतीये दिवसे मन्त्री, प्रहितो भूभुजा पुरे । सोऽपि पौरश्रियं पश्यन्नगच्छद्राजसंसदि

॥ ८५ ॥ तस्मिन्नवसरे तत्र, विवादः सुमहानभूत् । सपत्नीद्वितयस्यार्थनन्दनग्रहणात्मकः ॥८६॥ स चायम्—दूरदेशेऽभवत्कोऽपि, श्रेष्ठी तद्वल्लभाद्वयम् । लघीयस्याः सुते जाते, दैवयोगान्ममार सः ॥ ८७ ॥ ज्यायसी दुष्टबुद्ध्या तं, तत्पुत्रं समपूपुषत् । कदाचित्त्वेतया साकं, विवादं विदधे कुधीः ॥ ८८ ॥ ममायमङ्गज इति, विवदाते उभे अपि । तत्रायाते नृपामात्यैर्न निश्चिक्ये च तत्कलिः ॥ ८९ ॥ सुमतिः स्माह भूपादीन्, विवादं वारयामि किम् ? । सादरं तैरपि प्रोचे, कुरु निर्णयमेतयोः ॥ ९० ॥ आहूय तेन ते पृष्टे, प्रोक्ते च विभजाङ्गजौ । द्विधा विधाय गृह्णीतं, ज्यायस्याऽङ्गीकृतं हि तत् ॥ ९१ ॥ लघीयसी पुनः स्माह, क्षरदश्रुविलोचना । मैवं कार्यं मन्त्रिवर्य !, चिरं जीवतु मेऽङ्गभूः ॥ ९२ ॥ पश्यन्त्या मम जीवन्तं, सुतं तुष्टिर्भविष्यति । ततश्चास्यै सुतं वित्तं, वितर न्यायसागर ! ॥ ९३ ॥ तां सत्यमातरं मत्वा, तस्यै सर्वमदापयत् । शुनीमिव द्वितीयां च, नृपस्तां निरवासयत् ॥ ९४ ॥ तद्बुद्ध्या रञ्जितो राजा, भोजनाद्यैरतूतुषत् । चतुःसहस्र्या द्रम्माणां, व्ययेन चतुरोऽपि तान् ॥ ९५ ॥ ततः प्रस्थाय तुर्येऽह्नि, ययुस्ते हस्तिनापुरं । सुखं सुष्वाप भूमीभृदशोकस्य तरोस्तले ॥ ९६ ॥ दृष्ट्वा सुप्तं महीनाथमहसंस्ते परस्परम् । वारके कथमद्यास्य, करिष्यामो भुजिक्रियाम् ? ॥ ९७ ॥ अस्मिन्नवसरे हस्तिपुराधीशे त्वपुत्रके । स्वर्गते तदमात्याद्यैः, पञ्च दिव्यानि चक्रिरे ॥ ९८ ॥ परिभ्रम्य पुरे तत्र, तैरुद्याने समेत्य च । अभिषिक्तः क्रमेणाथ, स निर्गतसुखो नृपः ॥ ९९ ॥ अहो पुण्यस्य माहात्म्यं, यत्सुप्तस्य तरोस्तले । राज्यप्राप्तिरभूद्राज्ञो, मित्राणां पश्यतामपि ॥ १०० ॥

राजा राजगजारूढोऽमात्यसामन्तयुक् पुरे। प्रविश्याशिश्रियत्सिंहासनं सिंहो गुहामिव ॥ १०१ ॥ राजपुत्रीं रूपसत्रं, पात्रं सर्वकलाश्रियाम्। जयश्रियमिव क्षिप्रमुपायंस्त जयश्रियम् ॥ १०२ ॥ तस्मिन् दिने जनेशस्य, संवृत्तं भोजनव्यये। लक्षमेकं सपादं च, द्रम्माणां पुण्ययोगतः ॥ १०३ ॥ नवोऽयमिति भूपालस्तदाज्ञालोपिनां नृणाम् । महीपतिर्निराकृत्यै, प्रतिहारान् समादिशत् ॥ १०४ ॥ तेऽपि प्रत्युत भूपालं, बालवज्जहसुर्भृशम्। ईदृग्भिः क्वापि किं राज्यं, भुजिष्यैरिव भुज्यते ? ॥ १०५ ॥ ततः कोपात्सभाभित्तिचित्रितान् वेत्रिणो नृपः। समादिक्षन्निहन्तुं तांस्तेऽपि तत्ताडनं व्यधुः ॥ १०६ ॥ भयभ्रान्तास्ततस्ते, सर्वेऽपि शरणं ययुः। तावन्न वशतामेति, मूर्खो यावन्न हन्यते ॥१०७॥ निरीक्ष्य तस्य माहात्म्यं, दुर्द्धरा अपि भूधनाः। आज्ञां शेषामिव क्षिप्रं, स्वशीर्षेऽस्थापयन् भिया ॥१०८॥ स्वपुण्योदयतो मानं, निजोत्कर्षप्रदर्षिणाम् । मन्त्र्यादीनां धराधीशो, भङ्क्त्वा राज्यमपालयत् ॥ १०९ ॥ अन्यदा नरयुग्मेन, विज्ञसः स क्षितेः पतिः । स्वामिन्नस्ति प्रशस्तश्रि, श्रीपुरं प्रवरं पुरम् ॥ ११० ॥ तत्रामात्रारिमातङ्गकेसरी नरकेसरी। नृपोऽस्ति यस्य शौण्डीर्यं, वीक्ष्य शक्रोऽपि कम्पते ॥ १११ ॥ तस्य प्रिया महालक्ष्मीर्लक्ष्मीरपि यदग्रतः। जलाहर्त्री भवत्यत्र, सौभाग्येनापि सङ्गता ॥ ११२ ॥ तत्कुक्षिशुक्तिमुक्ताभा, जयलक्ष्मीस्तनूभवा। निरूप्य यां श्रियमपि, हरिः परिजिहीर्षति ॥ ११३ ॥ एकदा संसदासीनो, नरेन्द्रो नरकेसरी । निमित्तवेदिने कन्यां, जयलक्ष्मीमदर्शयत् ॥ ११४ ॥ सोऽपि तल्लक्षणश्रेणिं, सम्यग् निश्चित्य भूभुजे। अवदद्य इमां कन्यां, वरेण्यां परिणेष्यति ॥११५॥

वशगा प्रियभार्येव, समस्ता सागराम्बरा। भवित्री तस्य चक्रित्वपदव्यपि न संशयः ॥ ११६ ॥ युग्मम्। वाचा दैवज्ञकस्येति, श्रुत्वा राजा व्यचिन्तयत्। नान्यत्र दीयते कन्यारत्नमेतत् सुलक्षणम् ॥ ११७ ॥ हहा लोभो ह्यनर्थानां, मूलं युक्तमुदाहृतः। तन्मूढो यत्पिताऽप्येमां, कन्यां परिणिनीषते ॥११८॥ तद् ज्ञात्वा मन्त्रिभिः पापात्तस्माद्भूपो निवारितः। तां विनाशयितुं भृत्यानादिदेश दुराशयः ॥ ११९ ॥ विचारचतुरैर्मन्त्रिमुख्यैः प्रच्छन्नवेश्मनि। सा स्थापिताऽपि केनापि, न्यगद्यत महीभुजे ॥१२०॥ तेषामुपरि साक्षेपं, चुकोप स कृतान्तवत्। अन्यायिनां कुतो बुद्धिः?, शुद्धा जागर्त्ति पुण्यिषु ॥ १२१॥ तदा पापात्मनस्तस्मादात्मानं राक्षसादिव। परित्रातुं भवत्पार्श्वमावां संप्रेषितौ प्रभो! ॥ ११२ ॥ ग्रासमात्रं भवन्तं ते, न्यायिनं पुण्यसागरम्। चिन्तारत्नमिवाश्रित्य, तं त्यक्ष्यन्ति विषौघवत् ॥ १२३ ॥ एवं तयोर्वचः श्रुत्वा, स निर्गतसुखो नृपः। स्वं राज्यं मन्त्रिषु न्यस्याभिप्रायं चाप्रकाशयन् ॥ १२४ ॥ तावेकाकी पुरः कृत्वा, सन्नद्धग्रः स पार्थिवः। प्रस्थाय स्वपुरात्प्राप, सत्त्वरं श्रीपुरं पुरम् ॥ १२५ ॥ युग्मम्। मन्त्रिभिः स्वीकृतस्तत्र, जयलक्ष्मीं समं श्रिया। पाणौ चक्रे नृपः पुण्यवतां स्यात्किमु दुर्लभम्? ॥ १२६ ॥ श्रीनिर्गतसुखस्याज्ञा, प्रावर्त्तत पुरेऽखिले। नंष्ट्वा शृगालवद्भीतः, क्वाप्यगान्नरकेसरी ॥ १२७ ॥ पुण्यप्रभावतो राज्यं, पालयन् न्यायतत्परः। जयलक्ष्मीं जनं चैष, स्वगुणैरन्वरञ्जयत् ॥ १२८ ॥ कियद्भिर्वासरैर्यातैः, श्रीमत्तक्षशिलापुरात्। समेत्यानल्प भूपालो, व्यज्ञाप्यत नरोत्तमैः ॥ १२९ ॥ स्वामिंस्तव पुरी सैन्यैः, सूरतेजोमहीभुजा। महासतीव दुर्वारपरपुंसा न्यरुध्यत ॥ १३० ॥

कर्णे बाणेष्विव गतेष्वेषां वाक्येषु भूपतिः । कोपात् सर्वाभिसारेण, तं प्रति प्रास्थित द्रुतम् ॥ १३१ ॥ सुदारुणं रणं कृत्वा, जगदाश्चर्यकारणम् । बद्धः पाशेन भूपेन, सूरतेजाः प्रजापतिः ॥ १३२ ॥ दीनाननः पदोरग्रे, स शत्रुस्तेन पातितः । अब्रवीत्ते धरिष्यामि, वेलां वेलाधराद्रिवत् ॥ १३३ ॥ तं मोचयित्वा सत्चक्रे, भूशक्रः सकृपाशयः । सरपिमौनविचानामथमेव विजृम्भते ॥ १३४ ॥ सोऽपि पीनस्तनाभोगां, स्मेरपङ्कजलोचनाम् । देवीमिव भुवं द्रष्टुमवतीर्णां कुतूहलात् ॥ १३५ ॥ निर्मीलितरतिप्रीर्ति, रूपनिर्जितरुक्मिणीम् । यशोमत्यभिधां पुत्रीं, स्वां राज्ञा पर्यणाययत् ॥१३६॥ युग्मम् । तदाज्ञां मस्तके रक्षामिव धृत्वा स्वपत्तने । सूरतेजा ययौ का हि, स्पर्द्धा शौण्डीर्यशालिषु ? ॥१३७॥ उत्पताकां तक्षशिलां, स प्रविश्य निजां पुरीम् । एकच्छत्रं महीचक्रं, चक्रीव प्रत्यपालयत् ॥ १३८ ॥ प्रेयसीभिश्च तासुभिर्भुसदामिव नायकः । महाभोगान् मुदाभोगानसेवत नृपोत्तमः ॥ १३९ ॥ प्रत्येकं तासु कान्तासु, राजा पुत्रानजीजनत् । सागरानिव गम्भीरान्, ससारान् भूधरानिव ॥ १४० ॥ चत्वारोऽपि हि चातुर्यवर्यशौर्यदयोल्बणाः । लावण्यपुण्याः संवृत्ता, माधवस्येव वासराः ॥ १४१ ॥ अथ तस्य महीशस्य, वैशद्ययुजि मानसे । विललास विवेकाख्यो, मरालो विश्वहर्षकृत् ॥ १४२ ॥ तस्मिंश्च जाते दध्यौ स, राजा किं पूर्वजन्मनि । निरमायि मया पुण्यं ?, राज्यान्येतानि यत्फलम् ॥ १४३ ॥ अत्रान्तरे रयादेव, समेत्योद्यानपालकः । नमन्मौलिः सभासंस्थं, राजहंसं व्यजिज्ञपत् ॥ १४४ ॥ देवाद्य नन्दनोद्याने, धर्मघोषोऽभिधानतः । चतुर्ज्ञानधरः सूरिशेखरः समवासरत् ॥ १४५ ॥

तस्मादाकर्ण्य वर्णानां, पतिरागमनं गुरोः । कर्णकोटरपीयूषपानप्रायं तुतोष सः ॥ १४६ ॥ प्रीतिदानेन सम्मान्य, तं राजा पौरलोकयुक् । सूरीन् प्रणन्तुमुद्याने, जगाम निजधामतः ॥ १४७ ॥ दत्त्वा प्रदक्षिणास्तिस्रो, नत्वोर्वीपाकशासनः । गुरून् यथोचिते स्थानेऽकुण्ठभक्तिरुपाविशत् ॥ १४८ ॥ धर्मोपदेशमादेशमशेषानिमिषश्रियाम् । शुश्राव श्रमणाधीशादमुं श्रवणसौख्यदम् ॥ १४९ ॥ गोसर्गे परमेष्ठिमन्त्रपठनं देवार्चनं वन्दनं, प्रत्याख्यानविधानमागमगिरामश्रान्तमाकर्णनम् । कालेऽर्हद्गुरुसंविभक्तमशनं न्यायेन वित्तार्जनं, शीलावश्यकशीलनेत्यनुदिनं कार्यं शुभासेवनम् ॥ १५० ॥ व्याख्यामृतमिदं पीत्वा, स तृप्तीभूतमानसः । दक्षमुख्यस्तमप्राक्षीत्, क्षमानाथं क्षमापतिः ॥ १५१ ॥ भगवन्! मयका पूर्वभवे किं कर्म निर्ममे? । निर्ममेशोऽपि विज्ञाय, ज्ञप्त्या तं प्रत्यवोचत ॥ १५२ ॥ सुन्दरस्य भवे भूप,! यत्त्वया विधिवत्कृतम् । अर्हतां च गुरूणां च, समाराधनमुत्तमम् ॥ १५३ ॥ तेनैवागण्यपुण्येन, प्राप्तवान् सम्पदां पदम् । सुराणामपि दुष्प्रापं, राज्यानां हि चतुष्टयम् ॥ १५४ ॥ मूलप्रायमिदं पुण्यतरोः स्वस्य विदांकुरु । भोक्तास्यतः परं पुष्पसदृशं त्रैदशं सुखम् ॥ १५५ ॥ भवे सप्तमके राजन्नाप्तासि फलमुज्ज्वलम् । सोत्कण्ठाकुण्ठसिद्धिश्रीपरिरम्भणसम्भवम् ॥ १५६ ॥ श्रीधर्मघोषसूरीणामेवं मुखसरोरुहात् । वचोमरन्दमापीय, भृङ्गवन्मुदितो नृपः ॥१५७॥ ततः सम्यक्त्वमूलां स, श्राद्धव्रततिश्रियम् । अग्रहीद्गुरुपाथोधेरसुरारिरिवोन्मनाः ॥ १५८ ॥ भावशुद्ध्या गुरून्नत्वा, गत्वा च स गृहं नृपः । सादरं पालयामास, व्रतराज्ञीः प्रजा इव ॥ १५९ ॥ देवे गुरौ च सङ्घे च, चैत्योद्धरणकर्मसु ।

यतमानोऽधिकं राजा, पुण्यश्रियमपूपुषत् ॥ १६० ॥ श्रीनिर्गतसुखक्षोणीबिडौजा बोधिबीजतः । पुण्यकल्पद्रुमा-
रोप्य, चक्रवान् फलशालिनम् ॥ १६१ ॥ क्रमेण दैवतश्रीणामुपभोगपरम्पराम् । भुक्त्वा भवे पञ्चमे स, श्रयिष्यति
शिवश्रियम् ॥ १६२ ॥ कर्णावतंसपदवीमिति सुन्दरस्य, चित्रं चरित्रमतिचारुगुणं प्रणीय । सङ्घे गुरौ जिनवरे परमा-
दरेण, कार्या रतिः शिवरमापरिरम्भणाय ॥ १६३ ॥ देवगुर्वादिभक्तिविषये सुन्दरकथा ।

अथ सर्वशास्त्रार्थं निगमयन्नाह—

इय भाविऊण तत्तं, गुरुआणाराहणे कुणह जत्तं । जेणं सिवसुक्खबीयं, दंसणसुद्धिं धुवं लहह ॥ ७० ॥

व्याख्या—'इति' पूर्वोक्तं 'तत्त्वं' परमरहस्यं 'भावयित्वा' विचार्य 'गुर्वाज्ञाराधने' सद्गुरुवचनसेवायां 'यत्नम्' आ-
दरं 'कुरुत' विधत्त, अर्थाद्भो भव्या इति, न हि गुर्वाज्ञाऽऽराधनमन्तरेण कदाचनाप्यभीष्टफलसिद्धिः । यदागमः—"महा-
गमा आयरिया महेसी, समाहिजोगे सुयसीलबुद्धिए । संपाविउकामेणऽणुत्तराइं, आराहए तोसइ धम्मकामी ॥ १ ॥"
'येन' हेतुना 'शिवसौख्यबीजां' मोक्षसुखबीजभूतां 'दर्शनशुद्धिं' सम्यक्त्वनिर्मलतां 'ध्रुवम्' अवश्यं 'लभध्वं' सम-
श्नुत । अत्र शिवशब्दोपादानमासूत्रयता शास्त्रकृता शास्त्रप्रान्ते मङ्गलसूचा कृता, यतो मङ्गलादीनि मङ्गलमध्यानि
मङ्गलावसानानि शास्त्राणि विदुषामुपादेयानि निःश्रेयससाधकानि च भवन्तीति गाथार्थः ॥ ७० ॥

या श्रीजिनेशसमयाम्बुधितो गृहीत्वा, सम्यक्त्वतत्त्वमणिसप्ततिका व्यधायि । पूर्वैर्मुनीश्वरवरैरधुना मया तु, सो-

त्तेजिता विवृतिशाणकयन्त्रयोगात् ॥ १ ॥ जैनं वाक्यमनन्तार्थं, शेमुषी नः कृशा भृशम् । अत उक्तं यदुत्सूत्रं, तन्मिथ्यादुष्कृतं मम ॥ २ ॥

इति श्रीरुद्रपल्लीयगच्छगगनमण्डनदिनकरश्रीगुणशेखरसूरिपट्टावतंसश्रीसङ्घतिलकसूरिविरचितायां सम्यक्त्वसप्ततिकावृत्तौ तत्त्वकौमुदीनाम्न्यां सम्यक्त्वस्थानषट्कस्वरूपनिरूपणो नाम द्वादशोऽधिकारः समाप्तः ॥

अथ प्रशस्तिः—श्रीवीरशासनमहोदधितः प्रसूतः, प्रोद्यत्कलाभिरभितः प्रथितः पृथिव्याम् । माद्यन्महःप्रसरनाशिततामसोऽस्ति, श्रीचन्द्रगच्छ इति चन्द्र इवाद्भुतश्रीः ॥ १ ॥ तत्रासीद्धरणेन्द्रवन्द्यचरणः श्रीवर्द्धमानो गुरुस्तत्पट्टे च जिनेश्वरः सुविहितश्रेणीशिरःशेखरः । तच्छिष्योऽभयदेवसूरिरभवद्भ्रव्याङ्गवृत्तिस्तम्भनपार्श्वनाथजिनराड्मूर्त्तिप्रकाशैककृत् ॥ २ ॥ तत्पट्टपूर्वाचलचूलिकायां, भास्वानिव श्रीजिनवल्लभाख्यः । सच्चक्रसम्बोधनसावधानबुद्धिः प्रसिद्धो गुरुमुख्य आसीत् ॥ ३ ॥ तच्छिष्यो जिनशेखरो गणधरो जज्ञेऽतिविज्ञाग्रणीस्तत्पादाम्बुजराजहंससदृशः श्रीपद्मचन्द्रप्रभुः । तत्पट्टाम्बुधिवर्द्धनः कुवलयप्रोद्यत्प्रबोधैकधीः, श्रीमान् श्रीविजयेन्दुरिन्दुवदभूच्छश्वत्कलालङ्कृतः ॥ ४ ॥ पट्टे तदीयेऽभयदेवसूरिरासीद् द्वितीयोऽपि गुणाद्वितीयः । जातो यतोऽयं जयतीह रुद्रपल्लीयगच्छः सुतरामतुच्छः ॥ ५ ॥ तत्पादाम्भोजभृङ्गोऽजनि जिनसमयाम्भोधिपाथोधिजन्मा, सूरीन्द्रो देवभद्रोऽनुपमशमरमारामवेषोपमानः । तस्यान्तेवासिमुख्यः कुमततिमिरथण्डमार्त्तण्डकल्पः, कल्पद्रुः कल्पितार्थप्रवितरणविधौ श्रीप्रभानन्दसूरिः ॥ ६ ॥

ज्योतिःस्तोमैरमानैः प्रतिहतजगतीवर्त्तितेजस्वितेजःस्फूर्त्ती तत्पट्टपूर्वाचलविमलसन्मौलिमौलीयमानौ। श्रीमान् श्रीचन्द्रसूरिर्विमलशशिगुरुश्चाप्रमेयप्रभावौ, जातौ श्रीराजहंसाविव भविकजनव्यूहबोधैकदक्षौ ॥ ७ ॥ आकाश्मीरमणीणचारुधिषणान् वादीन्द्रवृन्दारकान्, माद्यद्वादविधौ विजित्य जगति प्राप्तप्रतिष्ठोदयाः। सूरीन्द्रा गुणशेखराः स्मयहराः श्रृङ्गारचन्द्रक्षमाधीशाभ्यर्च्यपदाम्बुजाः समभवंस्तत्पट्टशृङ्गारिणः ॥ ८ ॥ श्रीसङ्घतिलकाचार्यास्तत्पदाम्भोजरेणवः। सम्यक्त्वसप्ततेर्वृत्तिं, विदधुस्तत्त्वकौमुदीम् ॥ ९ ॥ अस्मच्छिष्यवरस्य सोमतिलकाचार्यानुजस्याधुना, श्रीदेवेन्द्रमुनीश्वरस्य वचसा सम्यक्त्वसप्ततेः। श्रीमद्विक्रमवत्सरे द्विनयनाम्भोधिक्षपाकृत्(१४२२)प्रमे, श्रीसारस्वतपत्तने विरचिता दीपोत्सवे वृत्तिका ॥ १० ॥ सा सोमकलशवाचकवरानुजैरत्र विहितसाहाय्यैः। प्रथमाऽऽदर्शे लिखितोपाध्यायैः श्रीयशःकलशैः ॥ ११ ॥ मेधामान्द्यात्प्रमादाच्च, यदवद्यमिहाजनि। तत्प्रसद्य महाविद्याः, शोधयन्तु विशारदाः ॥ १२ ॥ द्वादशात्मेव सद्द्वारैर्द्वादशात्मेव बोधकृत्। इयं सम्यक्त्वतत्त्वानां, कौमुदी द्योततां भुवि ॥ १३ ॥ प्रशस्तिश्लोकाः ॥ १४ ॥ प्रत्यक्षरं निरूप्यास्या, ग्रन्थमानं विनिश्चितम्। रुद्राब्धिमुनिसङ्ख्याङ्काः, श्लोकाः सचतुरक्षराः ॥ १ ॥ ग्रन्थाग्रम् ७७११ अ० ४ ॥ श्रेष्ठि-देवचन्द्रलालभाइजैनपुस्तकोद्धारे ग्रन्थाङ्कः ३५ ॥

॥ इति श्रीसम्यक्त्वसप्ततिकावृत्तिः सम्पूर्णा ॥

# अद्यावधिभाण्डागरातो मुद्रितग्रन्थवृन्दस्य सूचीपत्रम्

| अंकः | नाम | मूल्यम् | | | |
|---|---|---|---|---|---|
| १ | श्रीवीतरागस्तोत्रम्—श्रीमद्धेमचन्द्राचार्यकृतमूलम्, प्रभानन्दसूरिकृतविवरण—श्रीविशालराजशिष्यकृतावचूरिसमेतम् | * | ० | ८ | ० |
| २ | श्रीश्रमणप्रतिक्रमणसूत्रवृत्तिः पूर्वाचार्यकृता | * | ० | १ | ६ |
| ३ | श्रीस्याद्वादभाषा—श्रीमच्छुभविजयगणिकृता | * | ० | १ | ६ |
| ४ | श्रीपाक्षिकसूत्रम्—श्रीयशोदेवसूरिकृतविवृत्त्युपेतम् | * | ० | ६ | ० |
| ५ | श्रीअध्यात्ममतपरीक्षा—न्यायाचार्यश्रीमद्यशोविजयप्रणीतस्वोपज्ञटीकायुक्ता | * | ० | ६ | ० |
| ६ | श्रीषोडशकप्रकरणम्-श्रीहरिभद्रसूरिकृतमूलम् टीकाद्वयोपेतम् | * | ० | ६ | ० |
| ७ | श्रीकल्पसूत्रसुबोधिकावृत्तिः—श्रीविनयविजयोपाध्यायकृता | * | ० | १२ | ० |
| ८ | श्रीवन्दारुवृत्त्यपरनाम्नी श्राद्धप्रतिक्रमणसूत्रवृत्तिः, श्रीमद्देवेन्द्रसूरिविरचिता | * | ० | ८ | ० |

९ श्रीदानकल्पद्रुमः वा धन्यचरितम् परमगुरुश्रीसोमसुन्दरशिष्यश्रीजिनकीर्त्तिसूरिकृतः * ० ६ ०

१० धी योगफीलोसोफी ( अंग्रेजी ) By वीरचंदराघवजी गांधी ० [illegible] ०

११ श्रीजल्पकल्पलता—श्रीरत्नमण्डनकृता * ० ३ ०

१२ श्रीयोगदृष्टिसमुच्चयः—श्रीहरिभद्रसूरिकृतः स्वोपज्ञवृत्तियुतः * ० ३ ०

१३ धी कर्मफिलोसोफी—By वीरचंद राघवजी गांधी ० ५ ०

१४ श्रीआनन्दकाव्यमहोदधिमौक्तिकं प्रथमं पृथक् पृथक् साधुकृता रासाः ( गूजराती ) ० १० ०

१५ श्रीधर्मपरीक्षाकथा—श्रीधर्मसागरोपाध्यायशिष्य पण्डित पद्मसागरगणिकृता * ० ५ ०

१६ श्रीशास्त्रवार्त्तासमुच्चयः—उपाध्यायश्रीयशोविजयविरचितविवरणसहितः श्रीहरिभद्रसूरिकृतः २ ० ०

१७ श्रीकर्म्मप्रकृतिः वा कम्मपयडी—श्रीमलयगिरिसूरिकृतटीकायुक्तः श्रीशिवशर्माचार्यविरचिता * ० १४ ०

१८ श्रीपञ्चप्रतिक्रमणसूत्रम् * ० ४ ०

१९ श्रीकल्पसूत्रम् कालिकाचार्यकथायुक्तम् ० ८ ०

| | | | | |
|---|---|---|---|---|
| २० | आनन्दकाव्यमहोदधिमौक्तिकं द्वितीयं विजयगच्छीयमुनिश्रीकेशराजकृतो रामरासः (गूजराती) | ० | १० | ० |
| २१ | श्रीउपदेशरत्नाकरः—श्रीमुनिसुन्दरसूरिकृतस्वोपज्ञटीकासमेतः | १ | ४ | ० |
| २२ | श्रीआनन्दकाव्यमहोदधिमौक्तिकं तृतीयं पृथक् पृथक् साधुकृता रासाः (गूजराती) | ० | १० | ० |
| २३ | श्रीचतुर्विंशतिजिनानन्दस्तुतिः—श्रीमेरुविजयमुनिवर्यविरचितटीकायुक्ता | ० | २ | ० |
| २४ | श्रीषट्पुरुषचरित्रम्—श्रीक्षेमङ्करकृतम् | ० | २ | ० |
| २५ | श्रीस्थूलिभद्रचरित्रम्-श्रीजयानन्दकृतम् | ० | २ | ० |
| २६ | श्रीधर्मसङ्ग्रहः (पूर्वार्द्धम्) श्रीमानविजयमहोपाध्यायप्रणीतः न्यायाचार्यटिप्पणीयुतः | १ | ० | ० |
| २७ | श्रीसंग्रहणीसूत्रं वा लघुसंग्रहणी, श्रीचन्द्रसूरिकृतम् वृत्तिकारः मलधारगच्छीयश्रीदेवभद्रसूरिः | ० | १२ | ० |
| २८ | श्रीउपदेशशतकसम्यक्त्वपरीक्षे विमलगच्छीयश्रीविबुधविमलसूरिकृते—(औपदेशिकग्रन्थौ) (मुद्रणमन्दिरे) | | | |
| २९ | श्रीललितविस्तराख्या चैत्यवन्दनासूत्रवृत्तिः श्रीमुनिचन्द्रसूरिविरचितपञ्जिकायुता, श्रीहरिभद्रसूरिकृता | ० | ८ | ० |

३० आनन्दकाव्यमहोदधिमौक्तिकं चतुर्थं–श्रीजिनहर्षवाचककृतः श्रीशत्रुञ्जयमहातीर्थरासः ० १२ ०
३१ श्रीअनुयोगद्वारसूत्रम्–( प्रथमो विभागः ) मलधारगच्छीयाचार्यश्रीमद्धेमचन्द्राचार्यविरचितवृत्तियुक्तम् ० १० ०
३२ आनन्दकाव्यमहोदधिमौक्तिकं पञ्चमं(मुद्रणमन्दिरे)
३३ श्रीउत्तराध्ययनानि ( विभागः प्रथमः)शान्त्याचार्यविहितवृत्तियुक्तानि १ ५ ०
३४ श्रीमलयसुन्दरीचरित्रम् श्रीजयतिलकसूरिविरचितम् ० ७ ०
३५ अयं ग्रन्थः

* सम्प्रति विक्रीता

प्राप्तिस्थानम्

लायब्रेरीयन, शेठ देवचन्द्र लालभाई जैनपुस्तकोद्धारफण्ड,

शेठ–देवचन्द्र लालभाई धर्मशाला,

बडेखां चकलो, गोपीपुरा, सुरतसीटी

श्रीमद्रुद्रपल्लीयश्रीसङ्घतिलकाऽऽचार्यकृता

# श्रीसम्यक्त्वसप्ततिटीका समाप्ता ।

इति श्रेष्ठि देवचन्द्र लालभाई-जैनपुस्तकोद्धारे-ग्रन्थाङ्कः २५.